ओम्

श्रीगुरुमण्डल-

श्रीगुरुमण्डल-

संस्थापकाचार्यनिखिलशास्त्रनिष्णातपूज्यपाद

स्वामि श्री १०८ बालरामोदासीनजी।

साङ्ख्यकारिका

महामुनीश्वरकृष्णविरचिता

श्रीगुरुमण्डल-
संस्थापकाचार्य्यनिखिलशास्त्रनिष्णातपूज्यपादस्वा-
मिश्री१०८बालरामोदासीनविरचिताभ्यां
विद्वत्तोषिणीव्याख्यातत्कृत-
टिप्पणीभ्यां समलङ्कृतया

निखिलतन्त्रस्वतन्त्रप्रतिभश्रीमद्वाचस्पतिमिश्रविरचितया

साङ्ख्यतत्त्वकौमुद्या

विभूषिता

सेयं
मुम्बय्यां
स्वाम्यात्मस्वरूपोदासीनैः
निर्णयसागराख्यमुद्रणयन्त्रालये मुद्रयित्वा प्रकाशिता।

शके १८३४, संवत् १९६९.

अस्यायमुपोद्घातः—

विजयते खलु सर्वविद्वज्जनमुखकमलमाध्वीकायिताऽऽस्तिकषड्दर्शनान्तर्गतं वेदशिरोलालनीयं श्रीमता परमर्षिणा कपिलाचार्येण श्रीमहाविष्णोरपरावतारेण कृतं भूतानां सृष्टिस्थितिलयप्रतिपादनद्वारा प्रकृतिपुरुषविवेकज्ञानसम्पादनक्षमं—

"प्रधानास्तित्वमेकत्वमर्थवत्त्वमथान्यथा ।
पारार्थ्यं च तथाऽऽनैक्यं वियोगो योग एव च ॥
शेषवृत्तिरकर्तृत्वं मौलिकार्थाः स्मृता दश ।
विपर्ययः पञ्चविधस्तथोक्ता नव तुष्टयः ।
करणानामसामर्थ्यमष्टाविंशतिधा मतम् ।
इति षष्टिः पदार्थानामष्टभिः सह सिद्धिभिः" ॥ इति—

षष्टिपदार्थप्रतिपादकं साङ्ख्यशास्त्रमासुरिनाम्ने मुनये स्वशिष्यायोपदिदेश । तेन च पञ्चशिखाचार्यायेत्येवं शिष्यपरम्पराक्रमेण स्वेनापि सम्प्राप्तमतिविस्तृतं दीर्घकालसापेक्षमतिक्लेशसाध्यं चेत्यादिकं पर्यालोच्य तच्छास्त्रपारदृश्वना दीनजनोद्धरणकृपापरिपूर्णान्तरङ्गेणाधीतषष्टितन्त्रेण श्रीमतेश्वरकृष्णमहाविदुषा साङ्ख्यकारिकानामकनिबन्धेन (द्वासप्ततिकारिकात्मना) मिताक्षरेणामिताशयेन सर्वमुमुक्षुजनहार्दान्धतमसनिर्णाशनपटीयसा सञ्चिक्षिपे आर्यमतिना कोविदाग्रण्या ।

ततः कालवशात्तदध्ययने तत्प्रवचनेऽपि क्लेशबाहुल्यं विद्वद्ह्रासादिवशात्सम्प्राप्तं परिपश्यता मूलशास्त्रकृतो महाविष्णववतारादन्येन महर्षिणा कपिलाचार्येण (१)–हेयहानतद्धेतुव्यूहाख्यार्थचतुष्टयवत्प्रथमाध्यायः, (२)–प्रधानकार्यभूतसप्तदशात्मकलिङ्गदेहगतवस्तुप्रकाशप्रतिपादकद्वितीयाध्यायः, (३)–परवैराग्यसाधनीभूतपुरुषाविषयाव्यक्तसम्बन्ध्यत्यन्तलयान्तकार्यप्रतिपादकतृतीयाध्यायः, (४)–प्रागुक्ताध्यायत्रितयगतविवेकान्तरङ्गप्रतिपादकचतुर्थाध्यायः, (५)–स्वसिद्धान्तदृढीकरणसमर्थार्थप्रतिपादकपञ्चमाध्यायः, (६)–मुख्यार्थविस्तृतिपरिशिष्टवाक्यार्थप्रतिपादकषष्ठाध्यायश्चेत्येवं पञ्चविंशतितत्त्वप्रकाशनद्वारा मुमुक्षुलोकस्य हितप्राप्तयेऽहितनिवृत्तये च षडध्यायात्मकं साङ्-

ख्यशास्त्रं निर्माय स्वशिष्यायोपदिदेश, तथा सप्तविंशतिसूत्रात्मकमपरमपि संक्षिप्तं तदिदं शास्त्रं यच्छ्रीमद्विद्यारण्यस्वामिभिर्व्याख्यातं मुद्रितं सत्प्रकाशते इत्यन्यत् ।

तदुक्तं स्मृतिकर्तृभिर्महामुनिभिः—

"एतन्मे जन्म लोकेऽस्मिन्मुमुक्षूणां दुराशयात् ॥ प्रसङ्ख्यानाय तत्त्वानां स्वमतीयात्मदर्शनम्" इति । एतेन महाविष्णववतारभिन्नेनाग्न्यवतारेण कपिलाचार्येण व्यरचि, तदाह स्मृतिकृद्—"अग्निः स कपिलोनाम साङ्ख्यशास्त्रप्रवर्तकः" इति परास्तम् । मुन्यन्तरकल्पनायां गौरवाच्च । फलमुखगौरवस्यादोषत्वं यदि—ब्रूयात्तर्हि त्वद्वचनेऽग्निशब्दोऽग्न्याख्यशक्त्यावेशादेव प्रयुक्तः—यथा—"कालोऽस्मि लोकक्षयकृत्प्रवृद्धः" इति श्रीभगवद्गीतायां श्रीभगवद्वाक्ये कालशब्दः कालशक्त्यावेशादिति ।

सेयं—न्यायकणिका, तत्त्वसमीक्षा, तत्त्वबिन्दुस्तथा योगतत्त्ववैशारद्याख्ययोगभाष्यटीका, श्रीमच्छाङ्करभाष्यव्याख्या भामती, उद्योतकरकृतन्यायवार्तिकतात्पर्यटीका, चेत्येवं श्रीमद्वाचस्पतिमिश्रेण षड्दर्शनव्याख्यात्रा (द्वादशदर्शनव्याख्यात्रा) साङ्ख्यकारिका व्याख्याता ।

यच्च व्याख्यानं तत्त्वकौमुदीनाम्ना लोके प्रसिद्धम् ।

तामेतां श्रीमद्वाराणस्यादिगतपण्डितजनहृदयाह्लादिनीं नसर्वजनप्रवेशसुलभां विचिन्त्य वाराणस्यां काश्चित्सभामलङ्कुर्वाणैः महामहोपाध्यायश्रीमच्छिवकुमारमिश्र—महामहोपाध्यायश्रीमद्गङ्गाधरशास्त्रि जि. सि. ऐ. यस्प्रभृतिपण्डिताखण्डलैर्व्याख्यातुं प्रोत्साहितेन सर्वतन्त्रस्वतन्त्रेण परमहंसपरिव्राजकाचार्येण दिगन्तविश्रान्तशारदज्योत्स्नासदृक्षकीर्तिविशदीकृतदिगन्तरालेन निरन्तरक्षितिपतिकुलसेवासमयसमुन्मिषितपदारविन्दमध्वास्वादनप्रज्वलन्नखमयूखनिकषोल्लिखितरत्नप्रभाभासुरकिरीटसहस्रपरिशोभितभारतमण्डलेन 'विद्वत्तोषिणी' नाम व्याख्या मूलव्याख्यादिषु क्वचित्क्वचिट्टिप्पणी च व्यरचि । येयं व्याख्या केवलं लोकोपकारद्वारा भगवत्प्रीत्यै लिखितुमारब्धाप्यतिप्रबलविघ्नव्यूहेन साङ्ख्यतत्त्वकौमुद्यास्त्रयस्त्रिंशत्तमश्लोकव्याख्यासम्बन्धिनोः "अन्तर्गड्डुना कालेन" इत्येतत्पदयोर्व्याख्योत्तरं "केचित्तु क्षणस्तु वस्तुपतित इत्युत्तरभाष्यानुरोधात्क्ष" इत्यन्तैवासीन्न तदूर्ध्वम् । यतः—

'हा हाऽयं गुरुमण्डलस्य पुरतस्तत्पादपद्माम्बुजद्वन्द्वं चिन्तयतो विहाय बत कैवल्यं विदेहं गतः । कालेस्मिन् गुरुकुम्भयोगमहिते क्षेत्रे प्रयागे निशि त्वङ्काङ्के हि शके हराहय (१८२८) मिते शुक्रे तपस्येऽसिते ॥ १ ॥

तदैतज्जन्मादिचरितमुखेन स्पष्टीकृतं श्रीपाण्डेयश्रीकान्तशर्मभिर्विद्वद्भिः मित्रगोष्ठीपत्रिकानाम्नि मासिकसंस्कृतपत्रे । तथाहि—

"आसीन्निखिलशास्त्रपारावारपारदृश्वा विश्वविश्रुतयशोराशिर्विषयभीषणाशीविषदष्टमानुपजनविषवैद्यो हृद्यानवद्यगुणरत्नाकरोऽश्रान्तोपस्थितमहीपतिगणाहम्पूर्विकाप्रणतमूर्धतिरोहितचरणारविन्द उदासीनो महात्मा स्वामिश्रीबालरामो नाम । अयं खलु क्रमशः—

पितुः प्रियः प्राप्तसमग्रसंस्कृतिः कृती जनानन्दकरः स्वभावतः ।
प्रभावशाली धिषणाप्रकर्षतः प्रवीणतां वर्णगणेधिजग्मिवान् ॥ १ ॥

अत्यल्पकालात्सकलान्यधीत्य श्रुतेः षडङ्गानि परिश्रमेण ।
विचक्षणाद्दीक्षितवैद्यनाथात्तथेतरेभ्यो नियतो गुरुभ्यः ॥ २ ॥

काश्यामधीयाय महामहोपाध्यायादसौ कोविदराममिश्रात् ।
वेदान्तशास्त्राणि नितान्तसक्तो भक्तौ परब्रह्मण उत्कचित्तः ॥३॥ (युग्मम्)

ततो नवद्वीपपुरं प्रयातोऽधीते स्म शेषाण्यपि दर्शनानि ।
अभ्यस्य भूयो रसनाग्रवर्त्तीन्यमूनि कृत्वा भृशमाप तोषम् ॥ ४ ॥

अथ भ्रमन् देशविशेषशोभां पश्यन्गुरुभ्यो बहुशोऽधिगच्छन् ।
शास्त्राणि लोकैरभितोर्च्यमानः पराभवन्वादिकुलं तथासीत् ॥ ५ ॥

दाक्षिण्यवान्दक्षिणदिग्गतोसौ विचक्षणानैक्षत सक्षणस्तान् ।
क्षणादवाकृष्यत यैर्मनोऽस्य वैलक्ष्यमापे भृशमीक्षितश्च ॥ ६ ॥

मूर्ध्ना गतः क्ष्मां विनयेन युक्तः परिक्षितोनुक्षणमेभिरेषः ।
क्षीणः क्षुधाम्नायभुवाऽक्षयां हि तृप्तिं प्रपेदे श्रुतिशिक्षयासाम् ॥ ७ ॥

तेन श्रुतिक्षौद्रबुभुक्षितेन गृहीतदीक्षेण समीक्षितानि ।
क्षौद्रेक्षवक्षीरसुधादिकानि क्षाराणि रूक्षाणि गतक्षणानि ॥ ८ ॥

समाप्य वेदाध्ययनं विधायोपाध्यायवर्गाङ्घ्रिसरोजरेणून् ।
निजोत्तमाङ्गस्य विभूषणानि तीर्थाटनं कर्तुमियेष भूयः ॥ ९ ॥

कुर्वन्पवित्रान्पृथिवीप्रदेशान्महात्मनां सङ्गतिमीप्समानः ।
प्रायः प्रयाति स्म सतां समाजो यात्राप्रसङ्गाद्भवति स्म यत्र ॥ १० ॥
क्ष्मामण्डलस्याखिललब्धवर्णवर्गे दधत्प्रेम परं सदाऽयम् ।
वाराणसीवासिमनीषिवृन्दे महद्गुरुत्वं कलयाञ्चकार ॥ ११ ॥
विधाय पातञ्जलदर्शनस्य व्याख्यां नवीनां रुचिरां चिराय ।
स्थिरां तनुं कीर्तिमयीमभीप्सुस्तत्पुस्तकान्यर्पितवान्बुधेभ्यः ॥ १२ ॥
अभ्यर्थितः शिष्टजनैश्च पातञ्जलप्रकाशं सरलं स्फुटार्थम् ।
हिन्दीगिरा दर्शनशास्त्रसारं लोकोपकाराय चकार शीघ्रम् ॥ १३ ॥

अथ येन श्रौतसर्वस्वं=(पिण्डपितृयज्ञमीमांसा), गङ्गास्थितिमीमांसा अबोधध्वान्तमार्तण्डः, अमूल्यरत्नमित्यादयोन्येप्यनेके ग्रन्थास्तत्रभवता भवतापवतां जनानामुपकरिष्णुना प्राणायिषत, प्रास्थायि चोदग्दिग्गतजनपदान्पदारविन्दरजोभिः पवित्रयितुम् । यः प्रागेवास्यापूर्वं प्रभावमाकर्ण्यातिसमुत्कण्ठितचेतसा सत्सम्भावनस्वभावेन छपरानगरीवास्तव्येन श्रीमता देवकुमारसिंहेनाभ्यर्थितः सनाथयाम्बभूव तद्भवनं चरणसरसीरुहरेणुभिः । सततपरिभ्रमणशीलेनापि भावभूरिलेन तस्मै प्रत्यहं ज्ञानमार्गमुपदिशता व्यलम्बि तस्यैवालये वर्षद्वयम् । ततः प्रस्थितो वङ्गदेशीयाङ्गलविद्यालयानामध्यक्षेण (इन्स्पेक्टर् आफ् स्कूलस् बेङ्गाल्) श्रीमता भूदेवचन्द्रमुखोपाध्यायेन दर्शनशास्त्राध्ययनाय स्वस्योपाध्यायपदवीं प्रापितः । उत्तरपाराभूमिपतिना श्रीमता रासविहारिमहोदयेनापि दर्शनशास्त्रस्य महाऽऽदर्शभूतः स्वसद्मनो भूषणीचक्रे वर्षद्वयावधि ।

एवमेव जगति ज्ञानमार्गं प्रकाशयता भूमण्डलमार्तण्डेन जनाह्लादकारिणा क्षयरहितचन्द्रमसा मनीषितवर्षिणा जङ्गमकल्पतरुणा करुणावरुणालयेन वर्त्तमान एव संवत्सरे (श. १८२७) कुम्भमहोत्सवे त्रिवेण्यां स्नातुं प्रयागतीर्थं गतवता शमवता साधुगणानवता सर्वदर्शिनापि स्वानुचरवर्गान् स्फुटमकथितवतैव ससम्भ्रममीश्वराहूतेन वा पापीयसामस्माकं सङ्गतिं त्वरया परिजिहीर्षता वा देवैः स्वेषामधःस्थितलोके तस्य वासमनुचितं मन्यमानैर्विमानवद्भिरपि तस्मिन् बहुमानवद्भिर्मानवजनादृश्यैर्नीतेन वोपरिलोकं तपोनिधिना तपोमासे कृष्णप्रियेण कृष्णपक्षेऽद्भुतप्रभावपूर्णेन पूर्णाङ्कतिथौ (नवमीतिथौ) यशःशुक्लेन शुक्रवासरे सेवकजनक्षणदेन क्षणदायां महात्म-

नामग्रगण्येनाद्ये यामे भूमिवलयेऽभिनवं शोकमुद्भावयता नवम्यां घण्टाया-मस्मिँल्लोके सचेतनमात्रस्य नेत्राभ्यामश्रुवेणीः प्रवाहयता शोकसागरमग्नेष्वपि सर्वेषु परमप्रियशिष्यं श्रीस्वाम्यात्मस्वरूपशास्त्रिणं, ज्योतिर्विदं श्रीरामचन्द्रोपाध्यायं, च निरवलम्बमेव त्यजता त्रिवेणीतटे निजपाञ्चभौतिकशरीरशून्यं मर्त्यभुवनं व्यधायि।

अधुना श्रीस्वाम्यात्मस्वरूपशास्त्रिणा श्री १०८ स्वामिबालरामोदासीनैस्तत्रभवद्भिः परमकृपालुभिः स्थापितेन गुरुमण्डलेन तदधिष्ठानाधिकारेऽभ्यर्थितपूर्वेण निजशोकमूनयित्वा तन्मण्डलं स्वमात्रशरणं यथापूर्वं पालयितुं प्रवृत्तेन भूयतामित्याशास्ते।

पाण्डेयश्रीकान्तशर्म्मा।"

ततस्तत्र तन्मुख्यशिष्येणात्मस्वरूपोदासीनेन यथाविधि सर्वं कृत्वा त्रिवेण्यास्तीरे निर्वर्त्य कृतार्थीकृतो ह्यात्मा ।

ततस्तत्साङ्ख्यतत्त्वकौमुदीव्याख्यायास्तद्धस्ताक्षरमन्तिममेतत्परिचिन्त्य २ चिरं दुःखान्यनुभूय २ पारमपारयता तेन परं यत्नमास्थाय तस्य ग्रन्थस्य व्याख्यारूपस्य प्राचीनतदुक्तिगतविचित्रार्थावगमसुखसम्पादनमिक्षोरिव तत्समाप्य तन्मुद्रणोत्तरं तदिदं साधयितुं शक्यं नान्यथेति निश्चित्यावशिष्टभागव्याख्यां श्रीरामावतारसाहित्याचार्यद्वारा कारयित्वा मुद्राप्य स ग्रन्थः प्रकटीकृतस्तद्दर्शनगततत्त्वज्ञानसम्पत्तिसम्पित्सुजनमनःकुतूहलाभिवृद्धये, तथा श्री १०८ स्वाम्यात्मस्वरूपशास्त्रिणा श्री १०८ स्वामिबालरामोदासीनवर्यैस्तत्रभवद्भिः परमकृपापरिपूर्णान्तरङ्गैः स्थापिते गुरुमण्डले प्रविष्टैर्विद्वद्भिः साधुभिरभ्यर्थितेन तदधिष्ठिताधिकारस्वीकाराय, तन्मण्डलगतसाधुजनमानसिकशोकापनोदाय च, तमधिकारमधिष्ठाय तन्मण्डलं यथापूर्वं पालयितुं प्रवृत्तेन समर्पितमिमं ग्रन्थं सफलीकुर्वन्तु तत्रभवन्तो भवन्त इत्यभ्यर्थयते इति शम् ।

काशीशेषश्रीव्यङ्कटाचलशास्त्री,

विद्वत्कृपाभिलाषी.

साङ्ख्यतत्त्वकौमुदी.

ओम्

नमोऽन्तर्य्यामिणे.

यो भावः सर्वभावेषु ह्यनुस्यूतो विभाव्यते ।
भावये तं भवं देवं भवाभावाय केवलम् ॥ १ ॥
वम्भ्रमीति यया बद्धो मुक्तस्तिष्ठति कूटवत् ।
त्रिगुणाऽलौकिकी रज्जुर्मया दृष्टा जहातु माम् ॥ २ ॥
यद्वचोऽमृतमापीय प्राकृतामृतनिस्पृहः ।
संवृत्तस्तं समालम्बे देशिकं नानकं परम् ॥ ३ ॥

इह खलु प्रत्नविद्वत्सामन्तशिरोरत्नायमानो निखिलदर्शनासाधारणधिपण आचार्य्यवाचस्पतिमिश्रः साङ्ख्यकारिकासप्ततिं व्याचिख्यासुरारब्धपरिसमाप्त्यरातिप्रत्यूहव्यूहापोहासाधारणकारणमविगीतशिष्टाचरिततर्कितस्मृत्यनुमितश्रुतिज्ञापितानुष्ठेयताकं मङ्गलाचरणमुपशिक्षयन् प्रकृततन्त्राभिधेयाभिधित्सया प्रकृततन्त्रमूलभूतां श्वेताश्वतरश्रुतिं किञ्चिद् व्यत्ययेन निबध्नन् प्रकृतिं

---

(१) एतेन "शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकं मङ्गलम्" इत्येवंविधा ये तत्र तत्राधुनिकानां लेखा उपलभ्यन्ते तेऽविचारप्रभवा इति सूचितम्—

अयम्भावः—यथाऽसति विरोधे स्मृत्या तन्मूलभूता श्रुतिरनुमीयते नैवं शिष्टाचारेण साक्षात्सानुमीयते किन्तर्हि शिष्टाचारेण स्मृतिस्तया च श्रुतिरिति, तथाचाहुः कुमारिलस्वामिनः "आचारात्तु स्मृतिं ज्ञात्वा श्रुतिर्विज्ञायते ततः" इति, स्पष्टं चैतत् प्रथमाध्यायतृतीयपादे तन्त्रवार्तिक इति तत्रैव कर्णेकृत्य निरीक्षणीयम् ।

(२) मन्त्रद्वितीयपादान्ते 'सरूपा' इत्यस्य स्थाने 'नमाम' इति व्यत्यस्तं, 'अजो ह्येको जुषमाणोनुशेते' इति तृतीयपादस्थाने 'अजा ये तां जुषमाणां भजन्त' इति व्यत्यस्तं, 'जहात्येनां भुक्तभोगामजोन्य' इति तुरीयपादस्थाने 'जहत्येनां भुक्तभोगां नुमस्तान्' इति व्यत्यस्तमिति ज्ञेयं, नच 'मन्त्रः स्वरतो हीनो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह, स वाग्वज्रो यजमानं हिनस्ति' इति मिथ्याप्रयोगस्य वाग्वज्रतुल्यत्वाभिधानेनानर्थावहत्वोक्तेः कथमत्र व्यत्ययीकरणमिति वाच्यं, यजमानम् इत्युपादानेन यागाङ्गभूते मन्त्र एव व्यत्ययीकरणस्यानर्थावहत्वाभ्युपगमादिति दिक् ।

अजामेकां लोहितशुक्लकृष्णां

पुरुषांश्च प्रणमति "अजामेकाम्" इत्यादिना, न जायत इत्यजा—जनिविकारविधुरा मूलप्रकृतिः, (१) तां नमाम इति संबन्धः ।

"तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम[2]" इत्यादीनि वाक्यानि तु'अजाम्'-इत्यादिश्रुतिविरोधेन न प्रकृत्युत्पत्तिपराणि किन्तर्हि चितिसन्निधानाद् गुणत्रयक्षोभपुरस्सरसर्गोन्मुखतारूपगुणवैषम्यदशापत्तिरूपाभिव्यक्तिपराणि, ॥

एवं यत्र क्वचिच्छ्रूयमाणं[3] पुरुषेऽव्यक्तलयाभिधानमपि गुणसाम्यदशारूपकार्य्याक्षमतारूपानभिव्यक्तिपरतया नेयम् ॥

एवमेव 'अजो नित्य' इति श्रुतिविरोधाद् "यतः प्रधानपुरुषौ" "प्रधानं पुरुषश्चैव लीयेते परमात्मनि" इति श्रूयमाणौ पुरुषयोत्पत्तिप्रलयावप्युपचारेण[4] नेयौ ॥

केचित् तु[5] "संयोगलक्षणोत्पत्तिः कथ्यते कर्मजानयोः" "वियोजयत्यन्योन्यं प्रधानपुरुषावुभौ, प्रधानपुंसोरनयोरपि संहार ईरितः" इति मात्स्यं कौर्मं च वच उपन्यसन्तः पुम्प्रकृत्योः संयोग एव तयोरुत्पत्तिर्वियोग एव च तयोर्लय इत्येवं व्यवस्थापयन्ति ॥

---

१ अत्राध्यात्मविद्याप्रस्तावाद् अजा—पदं योगेन प्रकृतायैव नेयं न समुदायप्रसिद्ध्या छाग्यां, रूपककल्पनया तु समुदायप्रसिद्धिस्वीकारेऽपि नासङ्गतिरित्यवधेयम्। रूपककल्पनाप्रकारश्च 'यथा हि लोके यदृच्छया काचिदजा रोहितशुक्लकृष्णवर्णा स्याद् बहुवर्करा सरूपवर्करा च, तां च कश्चिदजो जुषमाणोनुशयीत कश्चिच्चेनां भुक्तभोगां जह्याद्, एवमियमपि प्रकृतिस्त्रिवर्णा बहु सरूपं विकारजातं जनयति, अविदुषा च क्षेत्रज्ञेनोपभुज्यते विदुषा च परित्यज्यत' इत्येवं शारीरकीये भाष्ये प्रदर्शितः (अ० १ पा० ४ सू० १०)

२ महाभारतशान्तिपर्वमोक्षधर्मे अ० ३३ श्लो० ३१.

३ 'अव्यक्तं पुरुषे ब्रह्मन् निष्कले सम्प्रलीयते' इति विष्णुपुराणादिषु श्रूयमाणम्.

४ गुणवैषम्यदशायाम्प्राकृतगुणसङ्गादुदासीनस्यापि पुंस औपाधिकी भोक्तृत्वापत्तिरुत्पत्तिः. गुणसाम्यदशायां च विकारासंसर्गिणस्तस्याविक्रियस्वरूपेऽवस्थानं लय इत्येवमुपचारेणेत्यर्थः.

५ 'जन्माद्यस्य यतः' इति ब्रह्मसूत्रविवरणे विज्ञानामृते विज्ञानभिक्षवः.

बह्वीः प्रजाः सृजमानां नमामः ।

ननु "मायान्तु प्रकृतिं विद्यात्" "सत्त्वं रजस्तम इति प्राकृतं तु गुणत्रयम्, एतन्मयी च प्रकृतिर्माया या वैष्णवी मता" इति श्रुतिस्मृत्योर्मायाप्रकृत्योः पर्यायत्वावगमाद् मायायाश्च "इन्द्रो मायाभिः पुरुरूप ईयत" इति श्रुत्याऽनेकत्वावगतेर् 'अजाम्' इत्येकवचनमननुगुणमित्याशङ्कापनोदायाऽऽह "एकाम्" इति । सजातीयद्वितीयरहितामित्यर्थः ॥

साजात्यं चात्र विकृतित्वानधिकरणत्वे सति तत्त्वान्तरोपादानरूपत्वमभिमतं, तेनाविकृतित्वेन त्रिगुणत्वेन वा साजात्यमादाय न दोषोन्मेषः ॥

'मायाभिर्' इति बहुवचनन्तु प्रकृतिगतानन्तज्ञानक्रियासर्गस्थितिप्रभृतिरूपशक्तिभेदाभिप्रायेण, प्रकृत्यात्मकगुणत्रयभेदाभिप्रायेण वा सुयोज्यमिति न प्रकृत्यैकत्वबाधः ॥

यत्तु गर्भोपनिषदि "अष्टौ प्रकृतयः षोडश विकाराः" इति श्रुतं यच्च "भिन्ना प्रकृतिरष्टधा" इति भगवता गीतं तत्तु महदादीनां विकृतीनामप्यहङ्कारादीनां प्रकृतित्वेनैकांशसाम्यमादाय महदहंकारपञ्चतन्मात्राण्यपि संकलय्याभिहितं न तु मूलप्रकृत्यभिप्रायेणानेकत्वाभिधानमिति ध्येयम् ॥

एवंविधायाः प्रकृतेः श्रुतिसिद्धत्वेपि दार्ढ्याय कार्यलिङ्गकानुमानं सूचयितुमाह "बह्वीः प्रजाः सृजमानाम्" इति, प्रकर्षेण=व्यक्तरूपेण जायन्ते=आविर्भवन्तीति प्रजाः=महदादयो विकाराः, ताश्च प्रजाः सुखदुःखमोहात्मत्वेनानेकविधा इति बह्व्यश्च, ता अनेकविधाः प्रजाः सृजमानाम्=आविर्भावयन्तीम्, अनेकविधविकाराकारेण परिणममानामित्यर्थः ॥

---

१ विष्णोः—व्यापकस्य पुरुषस्य संबन्धिनी, पौरुषेयभोगापवर्गापादिनीति यावद्.

२ पुरुषस्य महदादेश्च द्वितीयस्य सद्भावात्कथं द्वितीयरहितत्वमित्याशङ्काशमनाय सजातीयेति विशेषणम्.

३ नन्वविकृतित्वेन पुरुषस्य प्रकृत्या साजात्यात् त्रिगुणत्वेन च महदादेरपि तत्साजात्यात्कथं सजातीयद्वितीयराहित्यमित्यत आह—"साजात्यं चात्र" इति.

४ 'अजामेकाम्' इति श्रौतश्रुत्या मायाभिरिति लैङ्गिकस्य बहुत्वस्य बाधान्न प्रकृत्यनेकत्वकल्पना शोभनेति भावः.

५ एवं "माया चाविद्या च स्वयमेव भवति" इति तापनीयश्रुतिरपि स्वयमिति पदमुपाददती वास्तवमनेकत्वमपह्नुवाना सती प्रकृत्यैकत्वेऽनुकूलेति ज्ञेयम् ।

अजा ये तां जुषमाणां भजन्ते

नन्वेकस्याः प्रकृतेः कथं विभिन्नरूपमहदादिप्रपञ्चोपादानत्वम्, एकरूपाद्धि खलु कारणादेकरूपेणैव कार्य्येण भवितव्यमितरथा कार्य्यगतवैचित्र्यस्याकस्मिकत्वप्रसङ्गेन स्वभाववादपादाभिवादापत्तेरित्याशङ्कामपनिनीषुः प्रकृतेस्त्रिगुणात्मिकतामाह "लोहितशुक्लकृष्णाम्" इति ॥

लोहिता चासौ शुक्ला चेति लोहितशुक्ला, सा चासौ कृष्णा चेति लोहितशुक्लकृष्णा, इत्येवं कर्मधारयाश्रयणेन पूर्वयोः पुंवद्भावः,

तां लोहितशुक्लकृष्णां, तत्र लोहितं=रक्तं रजः, शुक्लं=श्वेतं सत्त्वं, कृष्णं=नीलं तम इति, तदात्मिकां-रजःसत्त्वतमोगुणात्मिकामित्यर्थः ॥

यद्यपि लोहितत्वादयो वर्णा न रजःप्रभृतिषु गुणेष्वद्धा विद्यन्ते तथापि यथा लोहितं महारजनादि वसनं रञ्जयति तथा रजोऽपि प्रवृत्त्या मनो रञ्जयतीति लोहितं रजः, एवं यथा शुक्लं सलिलं विमलयति तथा सत्त्वमपि ज्ञानादिना मनो विमलयतीति शुक्लं सत्त्वम्, एवं यथा नीलं घनपटलमावृणोति तथा तमोपि ज्ञानमावृणोतीति कृष्णं तम, इत्येवमुपचारेण गुणानां लोहितत्वादिकमुन्नेयम् ॥

अवयवधर्मैर्व्यपदेशाच्च गुणसाम्यावस्था प्रकृतिरपि लोहितशुक्लकृष्णेति न प्रकृतनिर्देशानुपपत्तिः ॥

एतेन प्रधानमेव जगदुपादानमित्यपि सूचितं, तथा हि ये हि भावा येन रूपेण समन्वीयन्ते ते तदुपादानका उपलब्धा यथा घटकटकादयो मृत्सुवर्णा-

---

१ प्रथमसमासे लोहितेत्यस्य द्वितीयसमासे लोहितशुक्लेत्यस्य पुंवद्भावः, कर्मधारयसमासाश्रयणेनैतद् दर्शयति न गुणेभ्यस्तत्त्वान्तरं प्रधानमपि तु गुणा एव साम्यावस्थापन्नाः प्रधानपदव्यपदेश्या इति. व्यक्तं चैतत् "प्रकाशशीलं सत्त्वं क्रियाशीलं रजः, स्थितिशीलं तम, इत्येते गुणाः प्रधानशब्दवाच्या भवन्ति" इति योगभाष्ये, लोहितं शुक्लं कृष्णं यस्यामिति बहुव्रीह्याश्रयणे तु गुणेभ्योऽर्थान्तरं गुणिरूपं प्रधानं संसिध्येत् तच्चानिष्टमिति कर्मधारय एवाश्रितः.

२ नन्वेवमुपचाराश्रयणेपि लोहितत्वादयो गुणधर्मा एवायान्ति नाजापदाभिधेयप्रधानधर्मास्तत्कथं प्रकृतेर्लोहितत्वादिव्यपदेश इत्याकाङ्क्षाशमनायाह-"अवयवधर्मैर्" इति, अवयवाः प्रधानस्यावयविन एकदेशरूपा रजस्सत्त्वतमांसि, तेषां धर्मा लोहितत्वादयस्तैरवयविनः प्रधानस्य व्यपदेशादित्यर्थः, एवमवयविरूपप्रकृतिगतस्त्रीत्वमादाय लोहितेत्यादि स्त्रीत्वेन व्यपदेश इत्यपि बोध्यम् ।

जहत्येनां भुक्तभोगां नुमस्तान् ॥ १ ॥

न्वितास्तदुपादानकाः, तथाचेमे भावाः सुखदुःखमोहात्मनान्वीयमाना उपलभ्यन्ते तस्मात्तेपि सुखदुःखमोहात्मसामान्योपादानका भवितुमर्हन्ति, तादृशं च गुणत्रयात्मकत्वेन प्रधानमिति तदेव जगदुपादानं नान्यत्[२] ॥

तत्र येयं प्रधानस्य सुखात्मता तत्सत्त्वं, या च दुःखात्मता तद्रजः, या च मोहात्मता तत् तम इति त्रिगुणात्मकत्वेन प्रधानस्य सुखाद्यात्मकत्वसिद्धिरिति ॥

कस्य हेतोरियं विचित्रविकाराकारेण परिणमत इत्याशङ्क्य पौरुषेयभोगापवर्गसम्पादनरूपपुरुषार्थाख्यस्वभावत एवेयं प्रवर्तते[३] नान्येन केनचित्प्रवर्त्यते इति परिहारं मनसि निधाय येषां पुरुषाणां भोगापवर्गलक्षणमर्थं साधयितुं नैसर्गिक्यस्याः प्रवृत्तिस्तान् पुरुषान् प्रणमति "अजा ये ताम्" इत्यादिना ॥

ये=अहंप्रत्ययविषयत्वेन प्रसिद्धाः, अजाः=अनादिनः पुरुषाः, तां=प्रकृतिं, भजन्ते=प्रकृतितत्त्वादात्मनोऽन्यतामबुध्यमानाः प्रकृतिगतसुखित्वादिकमात्मन्यभिमन्यमानाः सुखिनो दुःखिनो मूढा वयमित्येवमभिनिविशन्ते तान् बद्धानविवेकिनः पुरुषान् वयं नुमः, ये चाजाः=प्राप्तप्रकृतिपुरुषान्यताप्रत्ययाः पुरुषाः, तां=प्रकृतिं जहति=अनात्मत्वेन परित्यजन्ति तान् विवेकिनोपि पुरुषान् वयं नुम[४] इत्यर्थः ॥

किंविधाम्प्रकृतिमविवेकिनो जना भजन्त इत्याकाङ्क्षायां हेतुगर्भितं[५] विशे-

१ यथा च सर्वेषां भावानां सुखाद्यात्मकत्वं तथा 'अनया त्रिया सर्वे भावा व्याख्याताः' इत्यग्रे (१३ का०) व्यक्तम् ।

२ सर्वे भावा सुखाद्यात्मकोपादानोपादेयाः सुखाद्यन्वितत्वाद् यद् यदन्वितं तत् तदुपादानकं यथा मृत्कनकान्वितं घटकटकादिकं, तथा चेमे, तस्मात् तथेति चात्र प्रयोगः.

३ एतच्च "पुरुषार्थ एव हेतुः" (३१ का०)इत्यत्र व्यक्तीभविष्यति.

४ भोगस्य सिद्धत्वेनापवर्गस्यैवावशिष्टत्वादपवर्गयोग्यतया बद्धा अपि पुरुषा मुक्तवन्नन्तव्या एवेत्याशयेनोभयेषां पुरुषाणां नमनमिति बोध्यम् ।

५ यतो हेतोर्जुषमाणा=भोगप्रदानेन पुरुषान् प्रीणयति ततो हेतोस्तां ते भजन्ते=अनुसरन्तीतिभावः.

कपिलाय महामुनये

षणमाह—"जुषमाणाम्" इति, शब्दाद्युपभोगप्रदानेन पुरुषं सेवमानां सुखाद्यात्मकशब्दादिरूपपरिणामेन पौरुषेयभोगं साधयन्तीमिति यावद् ॥

किंविधां च तां विवेकिनः परित्यजन्तीत्याकाङ्क्षायां हेतुगर्भितं[2] विशेषणमाह "भुक्तभोगाम्" इति, भोगपदम् अपवर्गस्याप्युपलक्षकं, तत्र शब्दाद्युपलब्धिर्भोगः, प्रकृतिपुरुषान्यताख्यातिश्चापवर्गः[3], भुक्तः निष्पादितः भोगो यया सा भुक्तभोगा तां=सम्पादितपौरुषेयभोगापवर्गत्वेन समाप्ताधिकारामित्यर्थः ॥

इदमत्रावधेयं–तावदेव हि प्रकृतितत्त्वं विचेष्टते न यावद् भोगं वाऽपवर्गं वा सम्पादयति निष्पादितभोगापवर्गा तु कृतकृत्या सती स्वयमेव निवर्तते पुरुषाणाञ्चाऽऽनन्त्याद् यं प्रति कृतकार्य्या तं प्रत्येव निवर्तते नान्यान् प्रति, एवं च नैकस्मिन् विवेकिनि सति प्राकृतपरिणामविरामः, तथा चाहुः— "कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वाद्" इति[4] ॥

एतेन (गुणत्रयात्मिका प्रकृतिरेव कर्त्री, पुरुषार्थ एव च तस्याः प्रवृत्तेर्हेतुः, पौरुषेयभोगापवर्गनिष्पादनमेव च तत्कृत्यं, पुरुषस्तूदासीनोपि प्राकृतगुणसङ्गादविवेकाद् भोक्तृभावेन बध्यते, विवेकख्यात्या चाऽसङ्गत्वभावनया मुच्यते) इत्ययं प्रकृतशास्त्राभिधेय इत्यपि सूचितम् ॥ १ ॥

इदानीं प्रकृतशास्त्रप्रवर्तकसङ्ग्राहकाचार्य्याननुक्रमेणोद्दिश्य प्रणमति "कपिलाय" इत्यादिना ॥

'नमस्याम' इत्युत्तमपुरुषानुरोधेन 'एते इत्यत्र वयमित्यध्याहार्य्यम्, एते वयं कपिलाय नमस्याम इत्यन्वयः ॥

---

१ यद्यपि भोगादयो विकाराश्चित्तस्यैव वृत्तिविशेषरूपा धर्मास्तथापि चितिचित्तयोर्जपाकुसुमस्फटिकयोरिव सन्निधानादभेदग्रहे चित्तवृत्तीः स्वस्मिन्नारोप्य शान्तोस्मि दुःखितोस्मि मूढोस्मीत्यध्यवस्यति पुरुषः, यथा विमले वा मलिने वा दर्पणतले प्रतिबिम्बते वदने दर्पणतलीयवैमल्यं मालिन्यं चारोप्य कमनीयं मलिनं च वदनमध्यवस्यतीति, एवं च चित्तवृत्तिसारूप्यात्पुरुषस्यौपाधिको भोगो भवतीति ज्ञेयं, व्यक्तं चैतत् "वृत्तिसारूप्यमितरत्र" इत्यत्र पातञ्जले पा० १ सू० ४.

२ यतो भुक्तभोगा=निष्पादितकृत्या ततस्तां परित्यजन्तीति यावद्.

३ अपवृज्यते=कैवलीभवति मुच्यते येन विवेकज्ञानेन सोऽपवर्ग इत्यर्थः.

४ योग सू० २२ पा० २.

मुनये शिष्याय तस्य चासुरये ।

वयमित्यनुक्त्वा 'एत' इति कथनन्तु स्वीयौद्धत्यापोहाय, बहुवचनन्तु सपरिवारस्य सशिष्यस्य वा स्वस्य विनेयस्वाख्यापनाय ॥

'एते' इति कर्तृपदमादाय "शेषे प्रथमः" इति प्रथमपुरुषप्रयोगस्तु नापादनीयः, वयमित्यस्मदः प्रयुक्तत्वेन ततोऽन्यत्वरूपशेषत्वस्याभावाद् [1] अत एव त्वं च देवदत्तश्च पचथ इत्यादिप्रयोगसाधुत्वाय प्रवृत्तं 'युष्मदस्मदन्येषु प्रथमस्य प्रतिषेधो वक्तव्य' इति वार्तिकं 'नहि शेषश्चान्यश्च शेषग्रहणेन गृह्यत' इत्यास्थाय प्रत्याख्यातं महाभाष्ये ।

ननु कपिलायेत्यत्र कथं चतुर्थी, नच "नमःस्वस्तिस्वाहा" इत्यनेन सेति वाच्यम्, अत्र नमःशब्दयोगाभावाद्, नच नमस्यशब्दे नमःशब्दस्य सद्भावात् तद्योगसद्भाव इति साम्प्रतं, वृत्तावेकार्थीभावाङ्गीकारेण पृथगर्थासत्त्वात्समुदायस्यैव नमस्यशब्दस्यात्रार्थवत्त्वेन नम इत्यस्यार्थवत्त्वाभावात् तदुक्तं महाभाष्यकृता "अर्थवतो नमःशब्दस्य ग्रहणं नच नमस्यशब्दे नमःशब्दोऽर्थवान्" इति, इति चेद् [2], अत्राहुः—कपिलाय इत्यस्य कपिलं प्रीणयितुम् अनुकूलयितुं वा नमस्याम इत्यर्थमादाय "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" [3] इत्यनेन चतुर्थ्याः साधुत्वाश्रयणेन प्रकृतप्रयोगसङ्गतिरिति ॥

कपिलशब्दस्य बहुष्वर्थेषु [4] साधारणवृत्तित्वाद् असाधारणाभिमताभिधेयस्योपादेयत्वाय विशिनष्टि "महामुनये" इति, मुनित्वं=ज्ञानवत्त्वम्, महत्त्वं

१ उपयुक्तादन्यो हि शेषत्वेनाभिमन्यतेऽत्र चोपयुक्तस्य वयमित्यस्य सत्त्वान्न ततोऽन्यत्वमिति कथमत्र शेषत्वमिति भावः-

२ अत एव नमस्यति देवानित्यस्यैव साधुत्वमास्थितं महाभाष्ये न चतुर्थ्यन्तस्येत्यपि ज्ञेयम्,

३ क्रियार्था क्रियोपपदं यस्य तस्य स्थानिनः अप्रयुज्यमानस्य तुमुन्नन्तस्य कर्मणि चतुर्थी स्याद् इति सूत्रार्थः, फलेभ्यो याति, फलान्याहर्तुं यातीति च तदुदाहरणम्.

४ विष्णुरपि कपिलो यथा "सनात् सनातनतमः कपिलः कपिरव्ययः" इति, महादेवोपि कपिलो यथा "कपिशः कपिलः शम्भुः," इति, नागविशेषोपि कपिलो यथा "शङ्खश्च शङ्खपालश्च कपिलो वामनस्तथा" इति, दानवविशेषोपि कपिलो यथा "अयोमुखः शंबरश्च कपिलो वामनस्तथा" इति, मुनिविशेषोपि कपिलो यथा "सिद्धानां कपिलो मुनिर्" इति.

पञ्चशिखाय तथेश्वरकृष्णायैते नमस्यामः ॥ २ ॥

चाप्रतिहतानौपदेशिकत्वं, तच्च मुनिपदार्थतावच्छेदके ज्ञानेऽन्वितम्, एवं चाप्रतिहतानौपदेशिकज्ञानशीलाय कपिलायेत्यर्थः ॥

यद्वा निखिलवेदविषयत्वरूपं महत्त्वं ज्ञाने ज्ञेयं, तथाहुर्विष्णुसहस्रनाम-भाष्ये शङ्कराचार्य्याः 'महर्षिः कपिलाचार्य्य इति सविशेषणमेकं नाम महांश्चासावृषिश्चेति महर्षिः कृत्स्नस्य वेदस्य दर्शनाद् अन्ये तु वेदैकदर्शनाद् ऋषयः' इति ॥

यद्यपि "ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति" "महर्षिः कपिलाचार्य्यः" इति श्रुतिस्मृतिभ्यां कपिलस्यर्षित्वमेव प्रतीयते न मुनित्वं तथाप्यन्यत्रासाङ्कर्य्येण मुनित्वर्षित्वयोर्वृत्तावप्यत्र कपिले द्विविधधर्मसद्भावादुभय व्यपदेशसम्भवेन न मुनित्वाभिधानहानिः ॥

एवं प्रथमसाङ्ख्याचार्य्यं प्रणम्य "पञ्चमे कपिलो नाम सिद्धेशः कालविप्लुतं, प्रोवाचासुरये साङ्ख्यं तत्त्वग्रामविनिर्णयम्" इत्यभिहितं द्वितीयाचार्य्यमासुरिं नमति "मुनये शिष्याय तस्य चासुरये" इति ॥

यथानौपदेशिकज्ञानशीलत्वेन कपिलो महामुनिर्नैवमासुरिरपि त्वौपदेशिकज्ञानवत्त्वेन मुनिरयमित्याह—"मुनये" इति, औपदेशिकज्ञानवत्त्वमेवास्य स्फुटयितुं विशिनष्टि—"तस्य शिष्याय" इति, कपिलादाप्ततत्त्वज्ञानत्वेन कपिलशिष्यायेत्यर्थः

तदुक्तं पञ्चशिखाचार्य्येण "आदिविद्वान् निर्माणचित्तमधिष्ठाय कारुण्याद् भगवान् परमर्षिरासुरये जिज्ञासमानाय तन्त्रं प्रोवाच" इति ॥

---

१ तच्च=महत्त्वञ्च.

२ 'ऋषिर्दर्शनाद्' इति यास्कोक्तेः 'ऋषन्ति=जानन्ति—एतदर्थकैतन्मन्त्रयुक्तादेतस्मात्कर्मणोऽमुना प्रकारेणैतत्फलमित्येवमभ्यूहन्तीति ऋषय इति निर्वचनाच्च मन्त्रद्रष्टृत्वमृषित्वं, तच्च वशिष्ठवामदेवादिषु वर्तते, मननशीलत्वं मुनित्वं तच्च शौनकादिषु वर्तते, इत्येवमृषित्वमुनित्वयोरन्यत्रासाङ्कर्येण वृत्तावप्यत्र भगवदवतारे कपिले मन्त्रद्रष्टृत्वज्ञानवत्त्वरूपयोरुभयोरपि धर्मयोः सद्भावाद् 'ऋषिं प्रसूतम्' इत्यत्रर्षित्वेन व्यपदेशः, "सिद्धानां कपिलो मुनिः" इत्यत्र च मुनित्वेन व्यपदेश इति न कपिलस्य मुनित्वोक्त्यसङ्गतिरिति भावः.

३ भागवत प्र० स्कं० अ० ३ श्लो० १०.

इह खलु प्रतिपित्सितमर्थं प्रतिपादयन्
प्रतिपादयिताऽवधेयवचनो भवति प्रेक्षावताम्

इदानीम् "आसुरेः प्रथमं शिष्यं यमाहुश्चिरजीविनं, पञ्चस्रोतसि निष्णातः पञ्चरात्रविशारदः, पञ्चज्ञः पञ्चकृत् पञ्चगुणः पञ्चशिखः स्मृतः" इत्युक्तलक्षणं "जटा वह्निशिखारूपा पञ्च सन्ति च मस्तके, तपस्तेजोभवा यस्य स च पञ्चशिखः स्मृतः[2]" इत्युक्तनिर्वचनं वा तृतीयाचार्य्यं प्रणमति, "पञ्चशिखाय" इति ॥

तथा-पूर्वोक्तप्रकारेण आसुरिशिष्याय पञ्चशिखाय मुनये नम इति यावत्, समुच्चयार्थो वा तथा—शब्दः ॥

सम्प्रति प्रकृतसाङ्ख्यार्य्यासप्ततिनिर्मातारं प्रणमति—"ईश्वरकृष्णाय[3]" इति, एतेन सिद्धशिरोमणिमहामुनिकपिलादिप्रवर्तितत्वेनायं तत्त्वग्रामविनिर्णयः सूपादेय इति बोधितं भवति ॥ २ ॥

एवं तत्त्वज्ञाचार्य्यनामनिर्देशपुरस्सरनमनेन प्रकृतशास्त्रोपादेयतां शिष्टाचारानुसरणं च प्रदर्श्य साम्प्रतमुपादेयताहेतुभूतां प्रकृतशास्त्रस्यानन्यसाधारणाभिधेयवत्तां प्रेक्षावदपेक्षितां समर्थयितुं प्रकृतशास्त्रारब्धुश्च परीक्षकत्वं ज्ञापयितुं कारिकापीठिकामारचयति—"इह खलु" इत्यादिना ॥

---

१ महाभा० पर्व० १२ अ० २१८ श्लो० १२, 'पञ्च स्रोतांसि विषयकेदारप्रणालिका यस्य तस्मिन् मनसि निष्णातः=ऊहापोहकौशलवान्, पञ्चरात्रो नाम विष्णुत्वप्रापकः क्रतुः 'पुरुषो हवै नारायणोऽकामयताऽत्यतिष्ठेयं सर्वाणि भूतान्यहमेवेदं सर्वं स्यामिति स एतं पञ्चरात्रं पुरुषमेधं क्रतुमपश्यद्" इति शतपथोक्तः, तत्र विशारदः=अनुष्ठिताखिलकर्मेत्यर्थः, पञ्च अन्नमयादीन् कोशान् मिथ आत्मनश्च विविक्तान् जानातीति पञ्चज्ञः, अत एव पञ्चकृत्=पञ्च तद्विषयाण्युपासनानि 'भृगुर्वै वारुणिर्' इत्यस्यामुपनिषदि 'स तपस्तप्त्वाऽन्नं ब्रह्मेति व्यजानाद्' इत्यादिविहितानि करोतीति पञ्चकृत्, पञ्च—'शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येद्' इति श्रुताः शान्त्यादयो गुणा यस्मिन् स पञ्चगुणः, पञ्चभ्योऽतिरिच्यमानत्वात् शिखेवेति पञ्चशिखं पुच्छं ब्रह्म तज्ज्ञत्वान्मुनिरपि पञ्चशिख इत्यर्थ इति तद्व्याख्यायां नीलकण्ठः.

२ ब्रह्म वै० ब्र० खं० अ० २२ श्लो० १६.

३ अयं च न साक्षात्पञ्चशिखान्तेवासी किन्त्ववर्वाचीन एव ततः कश्चित्साङ्ख्यतत्त्ववेत्ता, एतच्च "शिष्यपरम्परयागतम्" इत्यत्रान्ते व्यक्तम्.

अप्रतिपित्सितं तु प्रतिपादयन् नायं लौकिको नापि परीक्षक इति प्रेक्षावद्भिरुन्मत्तवदुपेक्ष्येत,

इह=व्यवहारभूमौ—परीक्षकजनसंसदि वा, खलु इत्यव्ययमवधारणे, वाक्यालङ्कारे वा, प्रतिपित्सितं=प्रतिपत्तुम्—अवगन्तुम् इष्टम्—अभिलषितं सन्दिग्धत्वेन सप्रयोजनत्वेन च[1] जिज्ञासागोचरम्, अर्थम्=अभिधेयं वस्तुतत्त्वं प्रतिपादयन्=वाग्व्यवहारेण स्वमनोगतं परत्र संक्रामयन्, प्रतिपादयिता=बोधयितोपदेष्टा, अवधेयवचनः=[2]समादरपुरस्सरश्रवणीयवचनो भवति, किं सर्वेषां, नेत्याह "प्रेक्षावताम्" इति, हेयोपादेयविवेकनिपुणधिषणातिशयवतामित्यर्थः ॥

यद्यपि 'प्रतिपित्सितं प्रतिपादयन्नवधेयवचनो भवति' इत्येतावतैव निर्वाहे 'प्रतिपादयिता' इत्यनावश्यकं 'तथापि स एव प्रतिपादयिता प्रेक्षावतामवधेयवचनो भवति यः खलु प्रतिपित्सितं प्रतिपादयन् वर्तते' इत्येवं वचोवैचित्र्यबोधनायेदमभिहितम् ॥

एतद्विपरीतस्तु प्रतिपादयिता नावधेयवचनो भवत्यपि तूपेक्षार्ह इत्याह—"अप्रतिपित्सितं तु" इति ॥

पूर्वोक्तवैपरीत्यद्योतनाय तु-शब्दः, अप्रतिपित्सितम्=असन्दिग्धत्वेनाप्रयोजनत्वेन च जिज्ञासानर्हमर्थं प्रतिपादयन् वर्तमानस्तु जनः प्रेक्षावद्भिर् उपेक्ष्येत=त्यज्येत—अश्रद्धेयवचनतया न गृह्येतेत्यर्थः, उपेक्ष्यत—इति पाठे तु त्यज्यत इत्यर्थः, किं ज्ञात्वासावुपेक्ष्येत इत्यत्राह—"नायं लौकिको नापि परीक्षक इ[3]ति" इति, । लौकिकपरीक्षकजनविलक्षणोयं मतिविप्लवशील इति ज्ञात्वेत्यर्थः, तदेवाह—"उन्मत्तवद्" इति ॥

तत्र लोके—सामान्यजनसमवाय एव यो भवः=सत्तावान् न विद्वद्गोष्ठ्यामुपवेष्टुमर्हस्सलौकिकः—सांसारिककुटुम्बभरणक्रयविक्रयादिव्यवहारचतुरः शास्त्रीयसंस्कारविधुरो नर इति यावद्

परितः=सर्वतः—प्रमाणैस्तर्केण च य ईक्षते—पश्यति वस्तुतत्त्वं निश्चिनोति स परीक्षकः, पारमार्थिकविचारचतुरः शास्त्रीयसंस्कारवान्नर इत्यर्थः ॥

---

१ निर्णीते निष्प्रयोजने च जिज्ञासानुदयादिति भावः.

२ अवधानं परत्र चित्तवृत्तिसंचारवैधुर्य्यपुरस्सरं प्रकृतार्थाकर्णनौत्कण्ठ्यम्, अवधातुमर्हमवधेयं श्रद्धेयमिति यावद्, एवंविधं वचनं यस्य स तथा, तदेवाह—'समादर' इत्यादिना.

३ इति=इति कृत्वा, ज्ञात्वेत्यध्याहारो वा.

स चैषां प्रतिपित्सितोऽर्थो यो ज्ञातः सन् परमपुरुषार्थाय कल्पते, इति प्रारिप्सितशास्त्रविषयज्ञानस्य परमपुरुषार्थसाधनहेतुत्वात् तद्विषयजिज्ञासामवतारयति "दुःखत्रयाभिघाताद्" इति ॥

दुःखत्रयाभिघाताज् जिज्ञासा तदपघातके हेतौ ।
दृष्टे साऽपार्था चेन् नैकान्तात्यन्ततोऽभावाद् ॥ १ ॥

तदुक्तं पक्षिलस्वामिना[1]—"लोकसाम्यमनतीता लौकिका नैसर्गिकं वैनयिकं बुद्ध्यतिशयमप्राप्ताः[2], तद्विपरीताः[3] परीक्षकास्तर्केण प्रमाणैरर्थं परीक्षितुमर्हन्ति" इति ॥

कोऽसावर्थः यत्प्रतिपादनेनावधेयवचनो भवति यश्च प्रेक्षावज्जिज्ञासागोचर इत्याकाङ्क्षायामाह—"स चैषाम्" इति ॥

चोऽवधारणे, योऽर्थो ज्ञातः सन् मननद्वारा परमपुरुषार्थाय=दुःखात्यन्तोच्छेदाय, कल्पते=समर्थो भवति स एवार्थ एषाम्=प्रेक्षावतां प्रतिपित्सितः जिज्ञासागोचर, इति=यत एवमतः तद्विध[4]प्रकृतशास्त्रविषयजिज्ञासामवतारयतीत्यन्वयः

प्रकृतशास्त्रविषयस्य कथं पुरुषार्थसमर्थत्वं येन तस्य जिज्ञासागोचरत्वमित्यत्राह—"प्रारिप्सित" इत्यादि, प्रारब्धुमभिलषितं यच्छास्त्रं तस्य यो विषयः—पञ्चविंशतितत्त्वविनिर्णयात्मकः, तद्गोचरज्ञानस्य परमपुरुषार्थसाधनहेतुत्वाद्=दुःखात्यन्तोपरमरूपपरमपुरुषार्थस्य साधनं यद्विवेकज्ञानं तस्य हेतुत्वादित्यर्थः ॥

जिज्ञासां समर्थयितुं सम्भावनामूलकान् विकल्पान् प्रकल्प्य तन्निराकरणेन कारिकां योजयितुमुपक्रमते–"एवं हि" इत्यादिना, उत्तरत्र यदित्यनुरोधाद्

---

१ न्यायदर्शनभाष्यकारवात्स्यायनमुनिना, अ० १ आ० १ सू० २५.

२ नैसर्गिकं=प्राक्तनसंस्कारजन्यं, वैनयिकम्=ऐहिकं शास्त्राभ्यासपरिशीलनजन्यं, प्रज्ञोद्रेकमप्राप्ता इत्यर्थः.

३ नैसर्गिकवैनयिकमत्यतिशयसम्पन्ना इत्यर्थः.

४ तद्विधप्रकृतशास्त्रविषयजिज्ञासां=परमपुरुषार्थसमर्थविवेकज्ञानसाधनतत्त्वग्रामविनिर्णयात्मकप्रकृतशास्त्रविषयज्ञानेच्छामित्यर्थः, एवं च प्रकृतशास्त्रार्थो ज्ञातः सन् परमपुरुषार्थसमर्थो यतोऽतो भवत्यस्यार्थस्य प्रतिपित्सितत्वमिति बोधितम् ।

एवं हि शास्त्रविषयो न जिज्ञास्येत यदि दुःखं[1] नाम जगति न स्यात्, सद्वा न जिहासितं, जिहासितं वाऽशक्यसमुच्छेदम्, अशक्यसमुच्छेदता च द्वेधा दुःखस्य नित्यत्वाद्वा तदुच्छेदोपायापरिज्ञानाद्वा, शक्यसमुच्छेदत्वेपि च शास्त्रविषयस्य ज्ञानस्यानुपायत्वाद्वा सुकरस्योपायान्तरस्य सद्भावाद् वा ।

'एवं हि' इति तर्हीत्यर्थकं, यदि दुःखं नाम जगति न विद्येत तर्हि शास्त्रविषयो[2] न जिज्ञास्येतेत्यन्वयः ॥

द्वितीयं विकल्पमाह—"सद् वा" इति, विद्यमानमपि तद् दुःखं यदि त्यक्तुमभिलषितं न स्यात् तर्ह्यपि शास्त्रविषयो न जिज्ञास्येतेत्यर्थः ॥

तृतीयं विकल्पमाह—"जिहासितं वा" इति, त्यक्तुमभीष्टमपि तद् दुःखं यदि पौरुषेण यत्नेन नापनेयं स्यात् तर्ह्यपि शास्त्रविषयो न जिज्ञास्येतेत्यर्थः ॥

दुःखस्य पौरुषेण यत्नेनानपनेयत्वे काल्पनिकं साधकमाह—"दुःखस्य नित्यत्वाद्" इति, "नाभावो विद्यते सत" इत्युक्तेर्दुःखस्य नाशाप्रतियोगित्वेन न यत्नापनेयत्वमित्यर्थः, साधकान्तरमाह—"तदुच्छेदोपायापरिज्ञानाद्वा" इति, कूटस्थनित्यत्वाभावेनापनेतुमर्हत्वेपि तदपनयनसाधनापरिज्ञानाद्वाऽनपनेयत्वमित्यर्थः ॥

तुरीयं विकल्पमाह—"शक्यसमुच्छेदत्वेपि" इति, अपनयनोपायपरिचयाद् दुःखस्यापनेतुं शक्यत्वेपि प्रकृतशास्त्रविषयज्ञानस्य तदपनयनासाधनत्वाद् यदि विवेकज्ञानं साधनं न स्यात् तर्ह्यपि शास्त्रविषयो न जिज्ञास्येतेत्यर्थः[3] ॥

पञ्चमं विकल्पमाह—"सुकरस्य" इति, । विवेकज्ञानापेक्षया सुकरस्येतरस्योपायान्तरस्य विद्यमानत्वेन यदि विवेकज्ञानमन्यथासिद्धं स्यात् तर्ह्यपि शास्त्रविषयो न जिज्ञास्येतेत्यर्थः ॥

---

१ नाम इति प्रसिद्धार्थकम्—पीडापरपर्य्यायं प्रत्यात्मप्रतिकूलवेदनीयमित्यर्थः, ।

२ दुःखत्रयात्यन्तविघटकविवेकज्ञानजनकप्रकृतशास्त्रप्रतिपाद्यतत्त्वग्रामनिर्णयः.

३ यद्यपि सद्वाऽजिहासितं, जिहासितं वाऽशक्यसमुच्छेदम् इत्यादिपूर्वलेखानुरोधेन 'शास्त्रविषयज्ञानस्यानुपायत्वं, सुकरस्योपायान्तरस्य सत्त्वं वे'ति प्रथमान्तपाठ एवोचितस्तथापि यथाश्रुतपाठोप्यध्याहृत्य योजयितुं शक्यत इत्याशयेनाध्याहृत्य योजयति "यदि विवेकज्ञानम्" इत्यादिना.

तत्र न तावद् दुःखं नास्ति, नाप्यजिहासितम् इति, अत उक्तं "दुःखत्रयाभिघाताद्" इति, दुःखानां त्रयं दुःखत्रयं, तत् खलु आध्यात्मिकमाधिभौतिकमाधिदैविकं च ।

तत्राध्यात्मिकं द्विविधं शारीरं मानसं च, शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तं, मानसं कामक्रोधलोभमोहभयेर्ष्याविषादविषयविशेषादर्शननिबन्धनं ।

सर्वं चैतद् आन्तरोपायसाध्यत्वादाध्यात्मिकं दुःखं,

आदिमं विकल्पद्वयमसङ्गतयितुं कारिकांशं पातयति—"तत्र न तावद्" इत्यादिना ॥

कायिकमानसिकदुःखयोरेकीकरणेन दुःखत्रयाभिधानमित्याशयेनाध्यात्मिकं विभजते "तत्राध्यात्मिकम्" इति, आत्मानं=देहम् अधिकृत्य जायमानं यन्नैसर्गिकमशनायादिकं यच्च धातुप्रकोपजन्यं ज्वरातीसारादि, यच्चात्मानम्=अन्तःकरणमधिकृत्य जायमानं कामादिनिबन्धनं दुःखं तत्सर्वमाध्यात्मिकमित्यर्थः, तदेवाह "शारीरं मानसं च" इति, "कामक्रोध" इति, कामः=इष्टविषयाभिलाषः, क्रोधः=अनिष्टविषयद्वेषः, लोभः=सत्यपि धने तदादानेच्छा, मोहः=हानोपादानविवेचनासामर्थ्यम्, भयम्=अनिष्टदर्शनजन्यस्त्रासः, ईर्ष्या=परसम्पदुत्कर्षासहिष्णुता, विषादः=स्नेहास्पदपदार्थविच्छेदनिमित्तो व्याकुलीभावः, विषयविशेषादर्शनम्=अनवधारणात्मकमनेककोटिकं ज्ञानं, संशय इत्यर्थः, एते सर्वे विकारा मनस्येवाविर्भूतास्सन्तो नरं दुःखयन्तीत्येतन्निबन्धनं दुःखं मानसमित्युच्यत इत्यर्थः ॥

यद्यपि निखिलमपि दुःखं मनोधर्मत्वेन तज्जन्यत्वान्मानसमेव तथापि यन्मनोमात्रजन्यं तन्मानसं, यच्च बाह्यनिमित्तसापेक्षं मनोजन्यं तदितरदित्येवं विभज्यवचनेन विभाग उन्नेयः ॥

एतयोराध्यात्मिकत्वे प्रवृत्तिनिमित्तमाह "सर्वं चैतद्" इति, शारीरं मानसं चेत्यर्थः । आन्तरोपायसाध्यत्वाद्=साध्यशब्दोऽत्र निवर्तनीयपर्यायः, असाध्योयं रोग इत्यादौ तथा दर्शनाद्, एवं च आन्तराः=शरीराभ्यन्तरे वाऽन्तःकरणे वा भवाः=सत्तावन्तो य उपायाः अन्नाम्बुभेषजदमदयादानविवेच-

---

१ असाध्योऽयं रोग इत्यादौ निवर्तयितुमशक्योयं रोग इत्यर्थदर्शनात् साध्धातोरत्र निवृत्त्यर्थकत्वमिति भावः.

बाह्योपायसाध्यं च दुःखं द्वेधा, आधिभौतिकम् आधिदैविकं च

तत्राधिभौतिकं-मानुषपशुसरीसृपस्थावरनिमित्तम्, आधिदैविकं यक्षराक्षसविनायकग्रहावेशनिबन्धनम् ॥

नादयः साधनविशेषास्तैः साध्यत्वाद् निवर्तनीयत्वाद् दुःखमप्युपचारादान्तरं सदाध्यात्मिकमित्युच्यते ॥

यथाऽऽन्तरं दुःखं द्विविधं तथा बाह्यमपि द्विविधमित्याह—"बाह्योपायसाध्यं च दुःखं द्वेधा" इति ॥

शरीराद्बहिर्भवा ये दण्डच्छत्रमणिमन्त्रादयः साधनविशेषास्ते बाह्योपायास्तैर्निवर्तनीयं दुःखं बाह्यमित्युच्यते, तच्च द्विप्रकारमित्यर्थः ॥

प्रकारद्वयमुद्दिशति—"आधिभौतिकम्" इत्यादिना, तत्र भूतानि=जरायुजाऽण्डजस्वेदजोद्भिज्जरूपाणि चौरवैरिकुक्कुरसिंहव्याघ्रमहिषपक्षिसर्पयूकादंशमशकवृश्चिकनक्रमकरवृक्षशिलाप्रभृतीनि चराचरजातीयानि अधिकृत्य=निमित्तीकृत्य जायमानं यद्दुःखं तदाधिभौतिकं, यच्च देवान्=यक्षादीन् दिवःप्रभवान् वातवर्षातपशीतोष्णादीन् वा निमित्तीकृत्य जायते तदाधिदैविकमित्यर्थः, तदेवाह—"मानुष" इत्यादिना ॥

ननु भवतु मानसं दुःखमान्तरोपायनिवर्त्यं शारीरं तु ज्वरादि न तथा नहि भेषजादय आन्तरा अपितु बाह्या इति कथमान्तरोपायसाध्यत्वं शारीरस्य दुःखस्य, यद्यभिधीयेत बाह्या अपि भेषजादयः शरीरसंसर्गेणान्तरा इति तर्हि बाह्या मणिदण्डादयोपि कथं नान्तराः, तेपिहि शरीरसंसर्गिण एव सन्तो दुःखं शमयन्ति न यत्र तत्र स्थिता इति चेत्, अत्रोच्यते—उपायानां बाह्यत्वाविशेषेऽप्यन्तःप्रवेशाप्रवेशकृतविशेषमादाय भेदोऽवसेयः ॥

अयंभावः सत्यं भेषजादयो बाह्यास्तथापि यथाऽन्तःप्रविष्टास्ते ज्वरादिकं शमयन्ति न तथा मणिदण्डादयोन्तःप्रविश्य तथा कुर्वन्त्यपितु बहिरवस्थिता एव तत्तद्दुःखमपनयन्तीत्यस्ति विशेषः ॥

---

१ अन्नमन्तर्भवं सदशनायां शमयति, अम्बु चान्तर्गतं सतिपपासामपनयति, भेषजं चान्तरं ज्वरादि नाशयति, दमश्च कामं शिथिलीकरोति, दया च क्रोधमपनयति, दानञ्च लोभमुच्छिनत्ति, विवेचनञ्च मोहमुन्मूलयति, इत्येवमेते सर्वे आन्तराः सन्तस्तत्तद् दुःखमपनयन्तीत्यान्तरोपायनिवर्तनीयत्वादान्तरं सदाध्यात्मिकमित्युच्यत इति भावः.

२ दण्डादिना कुक्कुरव्याघ्रादिजन्याधिभौतिकदुःखस्य निवृत्तिः, छत्रेणातपादिजन्यस्य मणिना च यक्षादिजन्यस्याधिदैविकदुःखस्य निवृत्तिरित्यर्थः ।

तदेतत्प्रत्यात्मवेदनीयं दुःखं रजःपरिणामभेदो न शक्यते प्रत्याख्यातुम्

तदनेन दुःखत्रिकेणाऽन्तःकरणवर्तिना चेतनाशक्तेः प्रतिकूलतयाऽभिसंबन्धोऽभिघात इति

एतावता प्रतिकूलवेदनीयत्वं जिहासाहेतुरुक्तः,

वस्तुतस्तु आन्तरोपायसाध्यत्वाद् इत्यत्र साध्यशब्दो जन्यपर्यायः, तथा च शरीराभ्यन्तरे मनसि वा भवा ये धातुवैषम्यादयः कामादयो वा निमित्तविशेषास्तैः साध्यत्वाद्=जन्यत्वात् शारीरं मानसं चान्तरमित्युच्यते, शारीरमनोबहिर्भूतसिंहव्याघ्रवर्षातपादिनिमित्तविशेषजन्यत्वाच्चाधिभौतिकादि बाह्यमित्युच्यत इत्यर्थोऽत्र बोध्यः, ॥

यदुक्तं प्राङ् 'न तावद् दुःखं नास्ति' इति, तत्सुस्थिरमित्याह—"तदेतद्" इति, बुद्धितत्त्ववर्तिरजोगुणपरिणामविशेषात्मकं निखिलजनानुभववेदनीयं तदेतत् त्रिविधं दुःखं प्रत्याख्यातुं न शक्यते—दुःखं नास्तीत्येवं निराकर्तुं न शक्यतेऽनुभवसिद्धस्यापलापायोगादित्यर्थः, एतेन प्रथमविकल्पो[2] निराकृतः, ॥

द्वितीयं विकल्पं[3] निराकर्तुमभिघातपदं व्याचष्टे—"तदनेन" इति ॥ तदनेन=अनन्तराभिहितेनानुभवसिद्धेन दुःखत्रिकेण सह यः चेतनाशक्तेः=दृक्शक्तेश्चेतनस्य पुरुषस्यानिष्टतयाऽसह्यः संबन्धः सोऽभिघात इत्यर्थः, ॥

दुःखस्य चेतनधर्मत्वं वारयितुमाह—"अन्तःकरणवर्तिना" इति, । कथन्तर्हि चेतनस्य तेन संबन्ध इति चेद्, बुद्धितत्त्वप्रतिबिम्बितत्वेन तत्सारूप्यापत्त्येत्यवेहि[4] ॥

एतेन दुःखमजिहासितमिति कल्पना शिथिलीकृतेत्याह—"एतावता" इति, एतावता=अभिघातपदेन दुःखसंबन्धस्यासह्यत्वाख्यानेन, स्ववृत्तितयेष्यमाणत्वाभावरूपं प्रतिकूलवेदनीयत्वं जिहासाहेतुरुक्तः=अभिघाताद् इति हेतुपञ्चम्या यतो दुःखसंबन्धोऽनिष्टोऽतस्तज् जिहासितमित्युक्तमित्यर्थः ।

---

१ ननु यथाऽन्तरप्रविश्यैव मणिदण्डादयस्तत्तद् दुःखमपनयन्ति तथा मनोज्ञाङ्गनालिङ्गनमप्यन्तरप्रविश्यैव कामं शमयति, एवमपामार्गरूपो भेषजविशेषोपि हस्ते बद्धः सन्नन्तरप्रविश्यैव ज्वरादि शमयतीति न लदुक्ता व्यवस्थाऽनुगतेत्याशङ्क्य जलाहरणादिकं घटसाध्यम् इत्यत्रेव साधूधातोर्जन्यार्थकत्वमादायाऽर्थान्तरमाह—"वस्तुतस्तु" इति, ।

२ दुःखं नाम जगति नास्तीत्यात्मकः,

३ सदप्यजिहासितमित्याकारम्.

४ विशदीकृतं चैतद्–अजा ये ताम्—इत्यस्य व्याख्याने प्रागत्रैव,

यद्यपि न सन्निरुध्यते दुःखं तथापि तदभिभवः शक्यः कर्तुमित्युपरिष्टान्निवेदयिष्यते,

---

ननु भवतु जिहासा तथापि न शक्यनिरोधं तत् साङ्ख्यनये नासत उत्पादो न वा सतो निरोध इति सत्कार्यवादाङ्गीकारेण सतो दुःखस्योच्छेत्तुमशक्यत्वादित्याशङ्क्य समाधत्ते "यद्यपि न" इति, यद्यपि दुःखं न सन्निरुध्यते[1]=समूलमुच्छेत्तुं न पार्य्यते तथापि तदभिभवः=शान्तावस्थापादनेन स्थूलस्वरूपप्राप्तियोग्यताविरहरूपोऽनाविर्भावः कर्तुं शक्य इत्यर्थः, एतच्चाग्रे विशदयिष्यत इत्याह–"इत्युपरिष्टाद्" इति,

एतेन सहेतुकस्तृतीयविकल्पोपि[2] निराकृत इति बोध्यम्,

अयम्भावः[3]—यथा तार्किकैरुत्पत्तेः प्राग् भावस्य कारणे प्रागभावः, नाशकसामग्र्या च सतो भावस्य कारणे प्रध्वंसाभाव इत्यभ्युपेयते न तथा कापिलपातञ्जलैरपितूत्पत्तेः प्राक् सूक्ष्मावस्थया कारणे सन्नेव भावोऽनागतावस्थावान् अव्यपदेश्य इत्याख्यायते, कारणव्यापारेण च स्थूलावस्थामापन्नः सन् वर्तमानावस्थावान् उदित इत्युच्यते, नाशकसामग्र्या च कारणरूपतामापन्नः सन् अतीतावस्थावान् शान्त इत्युच्यते, तथा च दुःखस्यातीतावस्थीकरणमेवात्र दुःखोच्छेदो नात्यन्तनाशः, नचैवं तर्कयितव्यं-यथाऽनागतावस्थं सूक्ष्मं कार्य्यं व्यापारेण पुनर्वर्त्तमानावस्थमापद्यते तथातीतावस्थमपि सूक्ष्मत्वाविशेषात्कथं न पुनः स्थूलावस्थमापद्यत इति, उपलम्भाभावाद्, यद्यतीतमपि कार्य्यं पुनर्वर्त्तमानं स्यात् तदा तदेवेयमिति कदाचित् प्रत्यभिज्ञायमानमुपलभ्येत नोपलभ्यते चातो योग्यानुपलब्ध्याऽतीतव्यक्तेरनुन्मज्जनमेव निश्चीयते,

यदाहुः कृष्णद्वैपायनाः[4]–"यथानागतवर्त्तमानयोः पूर्वपश्चिमता, नैवमतीतस्य तस्मान्नातीतस्यास्ति समनन्तरं[5]" इति,

---

१ केचित्तु–सन्निरुध्यत इत्यत्र न सम् इत्युपसर्गः किन्तर्हि दुःखविशेषणं सद् इति तथाच यतो दुःखं सद्=सत्तावद्–नित्यमिति यावद्, अतो "नाभावो विद्यते सत" इत्युक्तेर्न निरोद्धुं शक्यम् इत्यर्थमाहुः,—

२ नित्यत्वेन दुःखमशक्यसमुच्छेदमित्याकारो विकल्प इत्यर्थः ।

३ अग्रे क्वापि विस्पष्टमेतस्यार्थस्यानिवेदितत्वादत्रैव विस्पष्टयितुमाह—"अयं भाव" इत्यादिना—

४ शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी, पा. ३ सू. १४ इति योगसूत्रव्याख्याने भाष्यकारा इत्यर्थः ।

५. समनन्तर–इत्यत्र वर्तमान इति शेषः;

तस्मादुपपन्नं 'तदपघातके हेतौ' इति,

तस्य दुःखत्रयस्यापघातकस्तदपघातकः, उपसर्जनस्यापि बुद्ध्या सन्निकृष्टस्य तदा परामर्शः,

---

ननु यज् जिहासितं दुःखं तत् कीदृगिति विवेचनीयं न तावदतीतम्, उपभोगेनातिवाहित्वाद्, नापि वर्तमानं क्षणान्तरे स्वयमेव नङ्क्ष्यमाणत्वाद्, नाप्यनागतं तत्सत्त्वे मानाभावाद् इति चेद् अत्राहुः सूत्रकाराः "हेयं दुःखमनागतम्"[1] इति, न च तत्सत्त्वे मानाभाव इति वाच्यं, यावच्चित्तकालावस्थायिकार्य्यजननशक्त्या यावच्चित्तमनागतदुःखानुमानात्[2] स्पष्टं चैतत्—'सर्वं सर्वात्मकम्' इत्यादिना योगभाष्ये[3] इति तत्रैव निरीक्षणीयम्, उपसंहरति—"तस्मादुपपन्नम्" इति यतो दुःखस्याभिभवः कर्तुं शक्योऽतः तदवघातके=दुःखत्रयाभिभावके हेतौ पुरुषाणां जिज्ञासा जायत इति अन्कारिकायामभिहितं तद् युक्तमित्यर्थः,

ननु तदवघातक इत्यत्र तच्छब्देन कथं दुःखत्रयस्य परामर्शः, समास ऐकार्थीभावसत्त्वेनोत्तरपदार्थसंसृष्टस्यैव पूर्वपदार्थस्योपस्थितिविषयत्वाभ्युपगमेन केवलस्य पूर्वपदार्थस्य पृथगुपस्थितिविषयत्वाभावाद् दुःखत्रयाभिघातरूपसमासैकदेशस्य दुःखत्रयस्य परामर्शायोगादित्याशङ्क्य समाधत्ते—"उपसर्जनस्यापि" इति, उपसर्जनस्य=समासे विशेषणीभूतत्वेन स्वातन्त्र्येणोपस्थित्यविषयस्यापि दुःखत्रयस्य, तदा=तदवघातकेत्यत्रत्यसर्वनामतच्छब्देन, परामर्शः=उन्नयनम्—अध्याहार इत्यर्थः, ॥

ननु सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शित्वनियमात्कथं गुणीभूतस्य दुःखत्रयस्य परामर्श इत्याकाङ्क्षामपनेतुमाह—"बुद्ध्या सन्निकृष्टस्य" इति, बुद्ध्या=मानस्या कल्पनया समाकृष्टस्य—ज्ञानारूढस्येत्यर्थः ॥

एतदुक्तं भवति—न तच्छब्देनात्र पूर्वाभिहितं दुःखत्रयं परामृश्यतेऽपितु

---

१ योगसू. १६ पा. २

२ चित्ततत्त्वमनागतदुःखसत्तावद् भवितुमर्हति यावच्चित्तावस्थायिकार्य्यजननशक्तिमत्वात् वह्निवद् इत्यनुमानादित्यर्थः ।

३ तृतीयपादे १४ सूत्रे—

४ 'पृथगर्थानामेकार्थीभावः सामर्थ्यं क्व पृथगर्थानि क्व वैकार्थानि, वाक्ये पृथगर्थानि समास एकार्थानि' इति समर्थसूत्रे महाभाष्योक्तेः पृथगर्थानां विशेषणविशेष्यभावापन्नानामेकोपस्थितिविषयत्वमेकार्थीभावत्वमित्यभ्युपगमाद्,

अवघातकश्च[1] हेतुः शास्त्रप्रतिपाद्यो नान्य इत्याशयः ।

अत्राऽऽशङ्कते—"दृष्टे साऽपार्था चेद्" इति, ।

अयमर्थः—अस्तु दुःखत्रयं, जिहासितं च तद् भवतु, भवतु च तत् शक्यहानं, सहतां च शास्त्रगम्य उपायस्तदुच्छेत्तुं तथाप्यत्र प्रेक्षावतां न युक्ता जिज्ञासा,

---

बुद्ध्याकृष्टत्वेन ज्ञानारूढं यद् दुःखत्रयं तदेव परामृश्यते[2], एवंविधस्थले एवंविधाया एव रीतेरौत्सर्गिकत्वनियमाद्, यथाहुः प्रदीपकाराः—"उत्तर पदार्थान्तर्गतस्याऽपि पूर्वपदार्थस्य बुद्ध्या प्रविभागात् प्रत्यवमर्शो यथा राजपुरुषोयमित्युक्ते कस्य राज्ञ इति[3]" ॥

ननु भवतु दुःखत्रयोच्छेदके हेतौ जिज्ञासा तथापि कथं प्रकृतशास्त्रविषयजिज्ञासेत्याशङ्क्य तुरीयविकल्पं[4] निराकुर्वन् समाधत्ते—"अवघातकश्च" इति, चोऽवधारणे भिन्नक्रमश्च[5] प्रकृतशास्त्रप्रतिपाद्यस्तत्त्वविवेक एव दुःखोच्छेदको हेतुरिति युक्ता तत्र जिज्ञासेत्यर्थः, ॥

पञ्चमं[6] विकल्पं निराकुर्वन्नेवकारव्यावर्त्यमाह—"नान्य" इति, ॥

नान्य इत्येव दृढीकर्तुमाशङ्कामुत्थापयति—"अत्राशङ्कते" इति, अत्र=नान्यो दुःखोच्छेदक उपाय इत्यंशे,

कारिकांशमवतारयन् शङ्कास्वरूपमाह—"दृष्टे साऽऽपार्था चेद् इति" इति, दृष्टे=लोकप्रसिद्धे सुकरे भेषजादौ दुःखोच्छेदके हेतौ सुलभे सति, सा=दुष्करे दुर्लभे विवेके जिज्ञासा, अपार्था=निरर्थिका इत्यर्थः, ॥

एतदेव स्पष्टयितुमाह—"अयमर्थ" इति, दृष्टे साऽपार्था इति ग्रन्थस्यायमभिप्राय इत्यर्थः,

---

१ अपघातकावघातकशब्दयोः पर्य्यायत्वात् अपघातक इति पाठेपि नार्थभेद इति ज्ञेयम् ।

२ तच्छब्दस्य सामर्थ्यद्वयं पूर्वाभिहितवस्तुपरामर्शकत्वं, ज्ञानाऽरूढपरामर्शकत्वं च तथाचात्र न तच्छब्दः पूर्ववस्तुपरामर्शकोपितु बुद्ध्याकृष्टज्ञानारूढदुःखत्रयपरामर्शक इति ध्येयम् ।

३ अथशब्दानुशासनमितिप्रस्तावे केषांशब्दानामिति महाभाष्यमुपादाय कय्यटोक्तिरियम्,

४ शास्त्रविषयज्ञानस्यानुपायत्वाद्वेत्याकारम्,

५ यत्सन्निधौ श्रुतं तं विहाय यत्रापेक्षितं तत्र योजनीयमित्यर्थः, । यद्वा चेति वाक्यशोभायां, सर्वं वाक्यं सावधारणमिति न्यायेन चैवकाराध्याहार इति,

६ सुकरस्योपायान्तरस्य सद्भावाद्वेत्याकारम्,

दृष्टस्यैवोपायस्य तदुच्छेदकस्य सुकरस्य विद्यमानत्वाद्,

तथाच लौकिकानामाभाणकः—"अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेद्, इष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेद्" इति

सन्ति चोपायाः शतशः शारीरदुःखप्रतीकारायेषत्करा भिषजां वरैरुपदिष्टाः,

मानसस्यापि सन्तापस्य प्रतीकाराय मनोज्ञस्त्रीपानभोजनविलेपनवस्त्रालङ्कारादिविषयप्राप्तिरुपायः सुकरः,

---

तमेवाभिप्रायमाह—"अस्तु" इत्यादिना, विद्यतां दुःखत्रयं, भवतु च तद् हानेच्छागोचरः, संभवतु च तत् शक्यहानं=शक्यसमुच्छेदं, सहतां च शास्त्रगम्य उपायस्तदुच्छेत्तुं=समर्थश्च भवतु शास्त्रप्रतिपाद्यो विवेकस्तदुच्छेदाय तथापि नात्र विवेके जिज्ञासा युक्तेत्यर्थः,

विवेकविषयकजिज्ञासाया अयुक्तत्वेऽन्यथासिद्धत्वरूपं हेतुमाह—"दृष्टस्यैव" इति, लोकप्रसिद्धस्य सुकरस्य दुःखनाशकस्य भेषजादेरुपायस्य सत्त्वादित्यर्थः,

सुकरमुपेक्ष्य दुष्कराचरणं न योग्यमिति लोकसंवादेनापि सिद्धमित्याह—"तथा च" इति, लौकिकानां=लोकव्यवहारविदां प्राकृतानां जनानाम्,—आभाणकः=प्रसिद्धप्रवाद इत्यर्थः,

तमेवाऽऽभाणकमाह—"अर्के" इति, । यथा मधुकामस्तदन्वेषणाय पर्वतं प्रस्थितः सन् यदि मार्ग एव अर्कवृक्षे मधु विन्देत तर्हि पर्वतं किमर्थं किन्निमित्तं गच्छेतापि तु न गच्छति, एवम् इष्टस्यार्थस्य=अभिलषितवस्तुनः संसिद्धौ=अनायासेन निष्पत्तौ सत्यां पुनस्तन्निष्पत्त्यर्थमायाससाध्यं यत्नं को विद्वाननुतिष्ठेन्न कोपीत्यर्थः,

विवेकापेक्षया के सुकरा उपाया इत्याकाङ्क्षायां सुकरान् दृष्टोपायानाह—"सन्ति" इति, भिषजांवरैः—वैद्यधौरेयैश्चिकित्साकुशलैर्धन्वन्तरिचरकप्रमुखैः शारीरदुःखापनोदायोपदिष्टा अनेक उपाया ईषत्करा=अनायाससंपाद्याः—सुकरा विद्यन्त इत्यर्थः,। शारीरदुःखप्रतीकारकरं सुकरमुपायमभिधाय मानसतापप्रतीकारकरं सुकरमुपायमाह—"मानसस्यापि" इति, तत्तदभिलषि-

---

१ अर्के—इति पाठे तु—समीपे—गृहकोणे, इति वार्थो बोध्यः, वस्तुतस्तु जैमिनीयसूत्रभाष्ये शबरस्वामिभिः पथि जातेऽर्के मधूत्सृज्य तेनैव पथा यथामध्वर्थिनः पर्वतं न गच्छेयुरित्यभिधाय 'अर्के चेन्मधु विन्देत' इत्येवमुपन्यासाद् अर्के—इत्येव पाठः साधीयान्,—

एवमाधिभौतिकस्य दुःखस्य नीतिशास्त्राभ्यासकुशलता-निरत्ययस्थानाध्यासनादिः प्रतीकारहेतुरीषत्करः.

तथाऽऽधिदैविकस्यापि दुःखस्य मणिमन्त्रौषधाद्युपयोगः सुकरः प्रतीकारोपाय इति, ॥

निराकरोति—"न" इति, कुतः—'एकान्तात्यन्ततोभावाद्'

तवनिताऽऽलिङ्गनासवपानसदन्नाशनचन्दनविलेपनवसनभूषणात्मकविषयप्राप्तिरूप उपायो मानससन्तापापहारायालमित्यर्थः, ॥

व्याघ्राद्युत्थदुःखप्रतीकारकरमुपायमाह—"एवम्" इति, आधिभौतिकस्य दुःखस्य प्रतीकारहेतुः नीतिशास्त्राभ्यासकुशलता=दंष्ट्रिणः शृङ्गिणो दूरतः परिवर्ज्याः, "नादण्डो बहिर्गच्छेद्," इत्यादिबार्हस्पत्यौशनसकामन्दकीयनीतिशास्त्राभ्यासनिपुणता, तथा निरत्ययस्थानाध्यासनादिः=निर्बाधनिरुपद्रवपरिखोपेतमणियन्त्राद्यन्तर्हितगिरिदुर्गादिरूपस्थानावलम्बनादिरुपायः सुकर इत्यर्थः, ॥

यक्षाद्युपद्रवविद्रावकमुपायमाह—"तथा" इति मणिमन्त्रौषधाद्युपयोगः= "दोषोपसर्गप्रभवाश्च ये ते नोपद्रवास्तं समभिद्रवन्ति, गुणैः समुत्थैः सकलैरुपेतं यः पद्मरागं प्रयतो बिभर्ति" इत्यादिना मणिप्रकरणे मणिधारणस्य तत्तदुपद्रवविद्रावकत्वस्मरणाद्, मन्त्रानुष्ठानस्य च तत्तच्छास्त्र उपद्रवापनोदकत्वप्रसिद्धत्वाच्च 'कृष्णामरीचसिन्धूत्थमधुगोरोचनाकृतम् । अञ्जनं सर्वदेवादिकृतोन्मादहरं परम्' इत्यादिनौषधस्यापि तत्तदुपद्रवविद्रावकत्वाभिधानाच्च मणिमन्त्रौषधाद्युपयोग आधिदैविकदुःखस्य प्रतीकारहेतुरित्यर्थः, ॥

लौकिकेनोपायेन नाभिलषितदुःखनिवृत्तिः सिध्यतीत्याशयेन 'न' इति कारिकांशमवतारयति—"निराकरोति न इति" इति, । 'न' इति पदेन 'साऽपार्था' इत्याशङ्कामपनुदतीत्यर्थः, ॥

लौकिकोपायनिराकरणे हेतुं पृच्छति 'कुत' इति,

न दुःखनिवृत्तिमात्रमभिलषितमपि त्वैकान्तिकात्यन्तिकदुःखनिवृत्तिः, सा च दृष्टोपायान्न लभ्येत्याशयेन कारिकागतं हेतुमाह—"एकान्तात्यन्ततोभावाद्" इति, दुःखनिवृत्तावेकान्तत्वम् उपायानुष्ठानानन्तरं नियमेन भवनशीलत्वम् अत्यन्तत्वं च भविष्यद्दुःखासहवर्तित्वं, तथा च—दृष्टादुपायाद् एकान्तात्यन्तदुःखोच्छेदाभावान्न दृष्टे हेतौ जिज्ञासा कार्येत्यर्थः,[1]

---

१ दृष्ट उपाये नियमेन दुःखनिवर्तकत्वरूपमेकान्तत्वं नास्ति, दृष्टोपायजन्यदुःखनिवृत्तौ च भविष्यद्दुःखासहवर्तित्वरूपमत्यन्तत्वं नास्तीत्यपि ज्ञेयम् ।

एकान्तः=दुःखनिवृत्तेरवश्यम्भावः, अत्यन्तः=निवृत्तस्य दुःखस्य पुनरनुत्पादः, तयोरेकान्तात्यन्तयोरभाव एकान्तात्यन्ततोऽभाव इति, षष्ठीस्थाने सार्वविभक्तिकस्तसिः,

एतदुक्तं भवति—यथाविधिरसायनादिकामिनीनीतिशास्त्राभ्यासमन्त्राद्युपयोगेपि तस्य तस्याध्यात्मिकादेर्दुःखस्य निवृत्तेरदर्शनादनैकान्तिकत्वं, निवृत्तस्यापि पुनरुत्पत्तिदर्शनादनात्यन्तिकत्वम्, इति सुकरोप्यैकान्तिकात्यन्तिकदुःखनिवृत्तेर्न दृष्ट उपाय इति नापार्था जिज्ञासेत्यर्थः,

यद्यपि दुःखममङ्गलं तथापि तत्परिहारार्थत्वेन तदवघातो मङ्गलमेवेति युक्तं शास्त्रादौ तत्कीर्तनमिति ॥ १ ॥

एतदेवैकान्तात्यन्तपदार्थाख्यानविग्रहाभिधानद्वारा दर्शयति—'एकान्त' इत्यादिना,

फलितमाह—"एतदुक्तं भवति" इत्यादिना, 'रसायनादि' इति, 'यज्जराव्याधिविध्वंसि भेषजं तद्रसायनम्" इति वैद्यकशास्त्राद्रसायनपदेन भेषजं गृह्यतेऽन्यत्प्राग् व्याख्यातम्, ।

उप सं हरति—"इति सुकरोपि" इति; इतिशब्दो हेत्वर्थे, यत एवमतः सुकरोपि दृष्ट उपायस्तथाप्यैकान्तिकात्यन्तिकदुःखनिवृत्तेर्न स [2]उपाय इत्यतस्तमुपेक्ष्य विवेके जिज्ञासा न निरर्थिकेत्यर्थः ।

एतेन 'न दृष्टात्तत्सिद्धिर्निवृत्तेप्यनुवृत्तिदर्शनात्' [3] इति साङ्ख्यसूत्रार्थः संगृहीतः ॥

ननु "मङ्गलाचरणं शिष्टाचारात्फलदर्शनाच्छ्रुतितश्च" इति [4] साङ्ख्यसूत्राच्छास्त्रादौ मङ्गलाचरणस्यावश्यकत्वात् "प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम्, एतद्धि मङ्गलं प्रोक्तं मुनिभिस्तत्त्वदर्शिभिः" इतिवचनेन प्रशस्ताचरणस्यैव मङ्गलपदार्थत्वादत्र शास्त्रादौ दुःखेत्यप्रशस्तोच्चारणं तद्विरुद्धं कथमाचरितमित्याशङ्कामपाकरोति—"यद्यपि" इत्यादिना ॥ १ ॥

---

१ नात्र तसिल् प्रत्ययः किमादिपञ्चम्यन्तत्वाभावात् अपि तु आद्यादेराकृतिगणत्वात् 'आद्यादिभ्य उपसंख्यानम्' ५ । ४ । ४४ । इत्यनेन षष्ठ्यन्तात् तसिरिति भावः,

२ अहो विमलं जलं नद्याः कूले महिषश्चरति—इत्यत्र नद्या इव उपायपदमावर्त्य व्याख्येयमित्याशयेन पुनरुपायपदं प्रयुङ्क्ते "स उपाय" इति,-

३ (अ. १ सू. २) ४ (अ. ५ सू. १)

स्यादेतद्[1]-मा भूद्दृष्ट उपायो वैदिकस्तु ज्योतिष्टोमादिः संवत्सरपर्य्यन्तः कर्मकलापस्तापत्रयमेकान्तमत्यन्तं चापनेष्यति श्रूयते हि 'स्वर्गकामो यजेत' इति ।

स्वर्गश्च—

"यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्,

दृष्टवदिति द्वितीयकारिकामवतारयितुं मीमांसकाशङ्कामुत्थापयति—"स्यादेतद्" इति, दृष्ट उपायो दुःखनिवृत्तेर्हेतुर्माभूत्=नास्ति इति यदभिहितमेतत्स्याद्=भवतु नाम वैदिकस्तूपायोऽवश्यं दुःखत्रयमत्यन्तम् अपनेष्यति=दूरीकरिष्यतीति पुनरपि विवेके जिज्ञासाऽपार्था इत्यर्थः ॥

विवेकापेक्षया वैदिकस्य सुकरत्वमाह—'संवत्सरपर्य्यन्त' इति, अनेकजन्माभ्यासपरम्परासाध्यविवेकापेक्षयाऽल्पकालसाध्य इत्यर्थः.—

वैदिककर्मकलापस्य तापत्रयापनोदकत्वे प्रमाणमाह—"श्रूयते हि स्वर्गकामो यजेत" इति, ॥

ननु स्वर्गविषयाभिलाषवान् यागेनेष्टं स्वर्गं संपादयेदित्येव श्रुत्या बोध्यते नतु यागेनात्यन्तिकीं दुःखनिवृत्तिं संपादयेदित्याम्नायते तत्कथमेतत्प्रकृतार्थे प्रमाणमित्याशङ्क्यैतादृशदुःखनिवृत्तेरेव नामान्तरं स्वर्ग इत्याशयेन स्वर्गं लक्षयति—"स्वर्गश्च" इति, स्वर्गश्च इति=इति श्रुत्याभिहितो दुःखविरोधी सुखविशेष इत्यग्रिमेणान्वयः, ।

एतादृशसुखविशेषस्य स्वर्गपदार्थत्व इतिपदसूचितामर्थवादरूपां श्रुतिमाह—"यन्न दुःखेन सम्भिन्नम्" इति, दुःखेन न सम्भिन्नं=दुःखसम्पर्कविधुरं—दुःखासम्मिश्रमिति,

ननु किमिदं दुःखासम्मिश्रत्वं, न तावद्दुःखासामानाधिकरण्यम्—असम्भवाद्, नहि स्वर्गप्राप्तेरर्वाग् यद्दुःखाधिकरणमात्मान्तःकरणं[3] वा ततोऽधिकरणान्तरं स्वर्गस्येति सम्भवः, नापि दुःखासमानकालिकत्वं तद्,

१ यद्वा पूर्वोक्तं मा भूद् एतद्=वक्ष्यमाणं तु स्यादित्यर्थोऽत्रावसेयः, ।

२ 'यन्न दुःखेन संभिन्नम्' इति भट्टवार्तिकमिति केचित्, स्मृतिरियमिति विज्ञानभिक्षवः, परिमलादिषु प्रामाणिकग्रन्थेषु श्रुतित्वेन व्यवहारादर्थवादरूपा श्रुतिरियमिति मादृशाः. ।

३ नैयायिकादिमत आत्मा दुःखाधिकरणं, साङ्ख्यादिमतेऽन्तःकरणमधिकरणमित्यर्थः,

अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्"
इति दुःखविरोधी सुखविशेषः,

अस्मदादिसुखस्यापि तथात्वेन[1] विशेषाभावाद् नहि नः सुखं दुःखकाले सद् येनेदं[2] ततो विशिष्येत इति चेद्, अत्रोच्यते—इतरविशेषणसहकारेण लौकिकसुखविलक्षणमोक्षसलक्षणसुखविशेषस्यैवानेनाभिधानेनोक्तदोषाभावात्, तथाहि—यथा लौकिकं सुखं स्वसमयेऽन्यसुखाप्राप्तिनिबन्धनविषादेनानुपक्तं न तथेदम् अपितु—'दुःखेन न संभिन्नम्' इति,=वर्तमानकालिकान्याभिलषिताप्राप्तिनिबन्धनदुःखासम्मिश्रमित्यर्थः,

किञ्च लौकिकं सुखं यथा सुखसाधनस्रक्चन्दनादिसंपादनायासरूपप्राक्कालिकदुःखानुपक्तं तथा नेदं किन्तु "अभिलाषोपनीतम्" इति, संकल्पमात्रेणैवोपनीतं=सामीप्यमाप्तं नतु साधनसम्पादनायासाधीनमित्यर्थः ॥

किञ्च यथा लौकिकं सुखमन्तराऽन्तरा तिरोभूय विरलप्रवाहशीलं भवति नेदं तथाविधमपितु—'अनन्तरम्[3]' इति, व्यवधानहीनम्=अविरलसंलग्नप्रवाहशीलत्वेन चिरकालस्थायित्वादुत्तरकालिकदुःखासम्मिश्रमित्यर्थः ।

किञ्च यथा सार्वभौमादिसुखं लौकिकं चिरकालस्थाय्यप्यन्ते ग्रस्तं भवति न तथेदं ग्रस्तमपि तु "नच ग्रस्तम्" इति, नाशाप्रतियोगि–अक्षयि इति यावद् एवंविधं यत् त्रैकालिकदुःखासम्मिश्रं सुखं तत् स्वःपदास्पदं=स्वर्गपदाभिधेयमित्यर्थः ॥

तन्त्रवार्तिके कुमारिलभट्टैरपि 'स्वर्गशब्देनापि नक्षत्रदेशो वा वैदिकप्रवादपौराणिकयाज्ञिकदर्शनेनोच्यते, यथा हि वेदे 'ये हि जनाः पुण्यकृतः स्वर्गं लोकं यान्ति तेषामेतानि ज्योतींषि नक्षत्राणि' तथा 'यथैष ज्योतिष्मन्तं पुण्यलोकं जयति' इति, यदि वेतिहासपुराणोपपन्नं मेरुपृष्ठम् इति मतान्तरेण स्वर्गपदार्थमभिधाय 'अथवाऽन्वयव्यतिरेकाभ्यां विभक्तं केवलमेव सुखं यन्मंवत्सरादिष्वनुभूयमानं दुःखसाधनशीतोष्णक्षुत्पिपासादिसमस्तद्वन्द्वरहि-

---

१ तथात्वेन=दुःखसमानकालासत्त्वेन ।

२ इदं=स्वर्गपदाभिधेयं सुखम् ।

३ अन्तर-शब्दो व्यवधानवाची, निर्=नास्ति-अन्तरो=व्यवधानं यस्मिन् तदनन्तरमिति, तदेवाह-'व्यवधानहीनम्' इति, प्रथमतः सुखं तदव्यवहितोत्तरक्षणे किञ्चिद्दुःखं, तदनु पुनः सुखमित्येवंविच्छेदराहित्येनाऽविच्छिन्नमित्यर्थः ।

स च स्वसत्तया समूलघातमपहन्ति दुःखं नचैष क्षयी, तथाहि श्रूयते "अपाम सोमममृता अभूम", इति,

---

तम्' इत्यादिनेदृग्विध एव स्वर्गपदार्थोऽभिहितः, । अत्र यदन्यद्वचनीयं तदेतत्पूर्वपक्षसमाधानावसरेऽभिधास्यते ॥

वैदिकेनोपायेनेदृग्विधे स्वर्गेऽवाप्ते सत्यात्यन्तिकी दुःखनिवृत्तिरर्थात् सिद्धा भवतीत्याशयेनाह—"स च" इति, सच स्वर्गः स्वसत्तया=स्वीयोदारावस्थया समूलघातं=मूलेन=कारणेनाधर्माख्येन दुरदृष्टेन सह दुःखं हन्तीति न पुनर्दुःखोद्भवशङ्केत्यर्थः ॥

ननु "तद् यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत" इति श्रुत्या कर्मजन्यस्वर्गस्य क्षयित्वश्रवणेन कथं 'नच ग्रस्तम्' इत्यनेनाक्षयित्वाभिधानमित्याशङ्कां प्रतिक्षिपति—"नचैष क्षयी" इति,

क्षयित्वाभावे प्रमाणमाह—"अपाम सोमम्' इति,

"अपाम सोमममृता अभूमाऽगन्म ज्योतिरविदाम देवान्, किन्नूनमस्मान् कृणवदरातिः किमु धूर्तिरमृतमर्त्यस्य" इति हि समग्रो मन्त्रः, इयं च श्रुतिर्भगवता गौडपादाचार्य्येणेत्थं व्याख्याता (कदाचिदिन्द्रादीनां देवानां कल्पे आसीत् कथं वयममृता अभूमेति, विचार्य्य यस्माद्वयम् अपाम सोमम्=पीतवन्तः सोमं तस्माद् अमृता अभूम=अमरा भूतवन्त इत्यर्थः, किंच

---

१ अ. १ पा. ३. अधि. २६ । वैदिकेन प्रकृष्टेन स्पष्टेन वादेन, तन्मूलेन च पौराणिकानां मातल्यर्जुनसंवादादिगतेन दर्शनेन, याज्ञिकानां 'धाइ गन्म स्तुवः संज्योतिषा भूमा' इत्यादिप्रोत्साहनमन्त्रार्थानुसंधानरूपेण दर्शनेनेत्यर्थः, वैदिकप्रवादद्वयं (यथावेद) इत्युपक्रम्योदाहृतम्' इत्येतदर्थ इति न्यायसुधाकारः सोमेश्वरभट्टः,

२ 'यन्न दुःखेन' इत्यनेन नाकपृष्ठविशेषः स्वर्गपदार्थत्वेनाभिहित उताहो मोक्षरूपसुखविशेष इत्याकाङ्क्षायामाह—"अत्र यद्" इत्यादिना,

३ इह=लोके कर्मचितः=कृषिव्यापारादिकर्मणा संपादितः लोकः–धान्यधनादिः क्षीयते तद्यथाऽयं दृष्टान्त एवमेव अमुत्र–लोकान्तरेपि, यागादिजन्यपुण्यसंपादितः सुधापानाप्सरोरमणादिरूपो भोगोपि क्षीयत इति श्रुत्यर्थः, "यत्कृतकं तदनित्यम्" इति व्याप्तिमूलेयं श्रुतिरिति भावः,

४ कल्पः=समाजः–सभेति यावत्.

तत्प्रक्षये[1] कुतोऽस्यामृतत्वसम्भवः,

तस्माद् वैदिकस्योपायस्य तापत्रयप्रतीकारहेतोर्मुहूर्तयामाहोरात्रमाससंवत्सरादिनिर्वर्तनीयस्यानेकजन्मपरम्परायाससम्पादनीयाद्विवेकज्ञानादीषत्करत्वात्पुनरपि व्यर्था जिज्ञासेत्याशङ्क्याह—

अगन्म=गतवन्तो—लब्धवन्तो ज्योतिः=स्वर्गमिति, अविदाम देवान्=दिव्यान् विदितवन्तः, एवं च 'किन्नूनमस्मान्कृणवदरातिः'=नूनं=निश्चितं किम् अरातिः=शत्रुरस्मान् कृणवत्कर्तेति, 'किमु धूर्तिरमृतमर्त्यस्य'=धूर्तिः=जरा हिंसा वा किं करिष्यति अमृतमर्त्यस्येति[2],

नन्वनया श्रुत्या स्वर्गिणाममृतत्वमेवाभिहितं न स्वर्गस्याक्षयित्वमित्यत आह—"तत्प्रक्षये" इति, स्वर्गस्य प्रक्षये सति अमृतत्वासम्भवाद् अमृतत्वश्रुत्यन्यथानुपपत्त्या स्वर्गस्याक्षयित्वं कल्पनीयमित्यर्थः,

एवं चामृतत्वश्रुतिविरोधात् "तद्यथेह" इत्यादिश्रुतिर्न स्वार्थपराऽपि तु विधेयसंन्यासपुरस्सरज्ञानफलप्रशंसायै निन्दार्थवादरूपेति बोधितम्,—

कर्ममीमांसकाशङ्कामुपसंहरति—"तस्माद्" इति, तस्माद्=उपदर्शिताद् हेतोः वैदिकस्योपायस्य तापत्रयनिराकरणकारणस्य विवेकज्ञानरूपादुपायात्सुकरत्वात्पुनरपि विवेकज्ञाने जिज्ञासा व्यर्थेत्यन्वयः,

वैदिकस्य सुकरत्वे हेतुमाह—"मुहूर्त" इति, तत्र मुहूर्तमात्रनिर्वर्तनीयं सन्ध्योपासनादि, यामनिर्वर्तनीयं पिण्डपितृयज्ञादि, मासनिर्वर्तनीयं मासाग्निहोत्रादि, संवत्सरनिर्वर्तनीयं ज्योतिष्टोमादि, इत्यर्थः,

विवेकज्ञानस्य दुष्करत्वे हेतुगर्भितं विशेषणमाह—"अनेकजन्मपरम्परायाससम्पादनीयाद्[3]" इति,

---

१ तत्क्षये-इति, तदपक्षये—इति च पाठान्तरमपि सम्यक्,

२ मर्त्यशब्दोऽत्र शरीरवाची व्यत्ययेन च बहुत्व एकवचनं, तथाच-मरणरहितशरीरवतामस्माकं जरादि नास्तीत्यर्थः,

३ अनेकजन्मपरम्परायां यो ज्ञानसाधनानुष्ठानाभ्यासस्तेन सम्पादनीयादित्यर्थः,

दृष्टवदानुश्रविकः, स ह्यविशुद्धिक्षयातिशययुक्तः,
तद्विपरीतः श्रेयान्, व्यक्ताव्यक्तज्ञविज्ञानाद् ॥ २ ॥

गुरुपाठादनुश्रूयत इत्यनुश्रवो वेदः, एतदुक्तं भवति–श्रूयत एव परं न केनापि क्रियत इति, तत्र भव आनुश्रविक इति, तत्र प्राप्तो ज्ञात इति यावत्,

आनुश्रविकोपि कर्मकलापो दृष्टेन तुल्यो वर्तत इति,

ऐकान्तिकाऽऽत्यन्तिकदुःखप्रतीकारानुपायत्वस्योभयत्रापि तुल्यत्वात्,

---

आनुश्रविकशब्दस्य योगार्थं प्रतिपिपादयिपुरानन्तर्य्यार्थकानूपसर्गापेक्षितावध्याकाङ्क्षां शमयति "गुरुपाठाद्" इति, गुरुकर्तृकोच्चारणानन्तरमित्यर्थः,

तदेव स्पष्टयति—"एतदुक्तम्" इत्यादिना, विद्यासम्प्रदायप्रवर्तकब्रह्मादिगुरुपरम्परया श्रूयत एव यः स वेद इत्यर्थः,

एवकारव्यावर्त्यमाह—"न केनापि क्रियत" इति, भारतादिवत्र केनापि निर्मित इत्यर्थः,

तत्र भव इत्यत्र भवपदस्य जन्यार्थकत्वं वारयितुमाह—"तत्र प्राप्त" इति, वेद उपलब्ध इति यावद्, तदेवाह—"तत्र ज्ञात" इति, वेदबोधित इत्यर्थः,

किमखिल एव वेदबोधित उपाय आनुश्रविकशब्देन गृह्यते, नेत्याह—

"कर्मकलाप" इति, ज्योतिष्टोमप्रमुखयागसमूहो य आनुश्रविकः सोऽपि लौकिकेनोपायेन सम इत्यर्थः,

केनांशेन साम्यमित्यपेक्षायामाह—"ऐकान्तिक" इत्यादिना, समूलदुःखोपरमसाधनत्वाभावस्य उभयत्रापि=लौकिके वैदिके चोपाये तुल्यत्वादित्यर्थः, ॥

एतेन "अविशेषश्चोभयोः" इति साङ्ख्यसूत्रार्थो दर्शितः ।

---

१ अनु श्रूयत इत्यत्र 'अनु' इत्युपसर्ग आनन्तर्य्यार्थकः, आनन्तर्य्यं चावधिसापेक्षं भवति 'कस्मादनु' इति, तदेतदपेक्षां पूरयितुं 'गुरुपाठाद्' 'इति पञ्चम्यन्तमध्याहृतमित्यर्थः,

२ गुरुमुखाद् इति पाठान्तरमपि सम्यक्,

(३) अ. प्र. सू. ६ उभयोः=लौकिकवैदिकोपाययोः, अत्यन्तदुःखनिवृत्त्यसाधकत्वे अविशेषः=साम्यमित्यर्थः,

यद्यपि चाऽऽनुश्रविक इति सामान्येनाभिहितं तथापि कर्मकलापाभिप्रायं द्रष्टव्यं विवेकज्ञानस्याप्यानुश्रविकत्वात्, तथा च श्रूयते—"आत्मा वा अरे द्रष्टव्यः" (प्रकृतितो विवेक्तव्यः) "न स पुनरावर्तत" इति, ।

ननु 'दृष्टवदानुश्रविक' इत्यनेन साधारण्येन वैदिकोपायमात्रस्य दृष्टसाम्याभिधानेन कथं तद् विहाय तदेकदेशकर्मकलापोपायपरतया व्याख्यातमित्याशङ्क्य समाधत्ते—"यद्यपि" इति, आनुश्रविकपदेनात्र कर्मकलापग्रहण एव वक्तुस्तात्पर्यं न वैदिकोपायमात्रग्रहण इत्यर्थः,

आनुश्रविकोपायमात्रग्रहणे दोषमाह—"विवेकज्ञानस्याप्यानुश्रविकत्वाद्', इति, साधारण्येन ग्रहणे हि विवेकज्ञानस्यापि वैदिकोपायत्वात् तस्यापि दृष्टोपायसाम्यमभिहितं स्यात्, तच्चानिष्टमित्यर्थः,

विवेकज्ञानस्य वैदिकत्वे श्रुतिः प्रमाणमित्याह—"तथाच श्रूयते" इति, द्रष्टव्य इति श्रौतं पदं व्याचष्टे—"प्रकृतित" इति,

(ननु भवतु विवेकज्ञानस्य वैदिकत्वमस्तु च तस्यापि दृष्टोपायतुल्यत्वं किमेतावता विच्छिन्नमिति शङ्कायामाह—"न स पुनरावर्तत" इति, सः=अहङ्ग्रहोपासनादिना ब्रह्मलोकं गत उपासकः पुनस्ततोऽवरुह्य जन्मान्तरं नानुभवत्यपि तु तल्लोकाधिष्ठातॄणा ब्रह्मणा सह परं पदं प्रविशतीत्यर्थः,

एषा श्रुतिः कैमुतिकन्यायेनात्रोपन्यस्ता प्रकृतोपयोगिन्यस्तु "तमेव विदित्वातिमृत्युमेति" "तमेवं विद्वानमृत इह भवति" "तरति शोकमात्मविद्" इत्यादय उदाहार्याः;)

तथाच विवेकज्ञानस्य दृष्टोपायसाम्याभ्युपगमे तस्यामृतहेतुत्वं श्रूयमाणं विरुध्येतातः सामान्येनाभिधानेपि कर्मकलापाभिप्रायेण व्याख्येयमिति भावः,

१ आनुश्रविक इत्यभिधानं कर्मकलापाभिप्रायमित्यर्थः,'कर्मकलापाभिप्राय' इति पुँल्लिंगपाठे तु 'आनुश्रविक इति प्रयोगः कर्मकलापाभिप्राय' इत्येवं योज्यम्,

२ कर्मोपास्तिज्ञानात्मकस्योपायसमुदायस्येत्यर्थः,

३ उपासकदशानिरूपिकायाः 'न स पुनरावर्तत' इति श्रुतेः प्रकृते विवेकज्ञाने क उपयोग इत्याशङ्कायामाह 'कैमुतिक' इति, यदा किलाविद्यावतामपि ब्रह्मोपासकानामपुनरावृत्तिस्तदा विध्वस्ताविद्यावतां ब्रह्मज्ञानिनामपुनरावृत्तिर्भवतीति किमु वक्तव्यमिति न्यायेनेत्यर्थः,

अस्यां प्रतिज्ञायां हेतुमाह—"स ह्यविशुद्धिक्षयातिशययुक्तः" अविशुद्धिः=सोमादियागस्य पशुबीजादिवधसाधनता,

---

वैदिकस्योपायस्य दृष्टोपायसाम्यसाधकं कारिकागतं हेतुमवतारयति—"अस्यां प्रतिज्ञायाम्" इति, वैदिकोप्युपायो लौकिकोपायवन्नामृतत्वसाधक इत्यभ्युपगमे साधकमाहेत्यर्थः,

तदेव साधकमाह—"स ह्यविशुद्धिक्षयातिशययुक्त" इति, हि=यतः सः=वैदिक उपायोऽविशुद्धिक्षयातिशययुक्तोतो दृष्टवदित्यर्थः,

तत्राविशुद्धिशब्दार्थमाह—"अविशुद्धिर्" इति, साध्यसोमादियागनिरूपिता या पशुबीजादिवधनिष्ठा साधनता=कारणता सैवात्राविशुद्धिरित्यर्थः ।

एतदुक्तं भवति—होमदेवपूजनदक्षिणाप्रदानादिरूपपुण्यजनककर्मसाध्यस्य सोमयागादेर्यत् पशुहिंसनबीजवधादिरूपपापजनककर्मसाध्यत्वं तदेव सोमयागादेरविशुद्धियुक्तत्वम्,

योगभाष्ये भगवता व्यासदेवेनापि "शुक्लकृष्णा बहिःसाधनसाध्या तत्र परपीडानुग्रहद्वारेण कर्माशयप्रचयं" इत्येवं यागस्याऽविशुद्धियुक्तत्वमभिहितम्,

---

१ सोमादियागस्येत्यत्र निरूपितत्वं षष्ठ्यर्थ इत्यर्थः,

२ चतुष्टयी खलु कर्मजातिः तत्र तमोमूला दुःखमात्रफलिका ब्रह्महत्यादिरूपा कृष्णा, रजोमूला दुःखोपसर्जनसुखफलिका यागादिरूपा शुक्लकृष्णा, सत्त्वमूला सुखमात्रफलिका सन्ध्योपासनप्रणवजपादिरूपा शुक्ला, गुणाहेतुका निजानन्दफलिका सम्प्रज्ञातसमाध्यादिरूपाऽशुक्लकृष्णा, तथाच सूत्रं "कर्माशुक्लकृष्णं योगिनस्त्रिविधमितरेषाम्" पा. ४ सू. १ । एवं च यागस्य शुक्लकृष्णकर्मरूपत्वेनाविशुद्धियुक्तत्वं स्पष्टमिति बोध्यम्,

३ 'यद् यावद् बहिःसाधनसाध्यं तत्र सर्वत्रास्ति कस्यचित् पीडा नहि व्रीह्यादिसाधनेपि यागादिकर्मणि परपीडा नास्ति अवघातादिसमये पिपीलिकादिवधसम्भवाद् अन्ततो बीजादिवधेन स्तम्बादिभेदोत्पत्तिप्रतिबन्धाद्, अनुग्रहश्च दक्षिणादिना ब्राह्मणादेः' इत्येतद्भाष्यार्थ इति वाचस्पतिमिश्राः,

"शारीरजैः कर्मदोषैर्याति स्थावरतां नर" इति मानवरवाद् व्रीह्यादिबीजानामपि प्राणित्वाविशेषात् तत्पीडनमपि हिंसनमेव, अत एव तत्तद्बीजपीडकानां तैलिकशौण्डिकानां सौनिकसाम्यमभिहितं मनुना "**दशसूनासमश्चक्री दशचक्रसमो ध्वजी**"इत्यादिनेति भावः ।

४ यथा दक्षिणाप्रदानादिपुण्यकर्मयोगेन शुक्लात्मत्वाद् यागादेर्विशुद्धियुक्तत्वं तथा पशुवधादिपापकर्मयोगेन कृष्णात्मत्वादविशुद्धियुक्तत्वमभिहितमित्यर्थः,

यथाह स भगवान् पञ्चशिखाचार्य्यः—

एवं च[1] यथा यागाङ्गभूतदीक्षणीयादिदक्षिणावसानपुण्यकर्मणामुत्र सुखं जन्यत एवं यागाङ्गभूतपशुबीजादिवधपापकर्मणा दुःखमपि जन्येत तथा च यथा लौकिकोपायस्य दुःखसंमिश्रसुखजनकत्वं तथा वैदिकोपायस्यापि दुःखसम्भिन्नसुखजनकत्वमिति सोपि दृष्टवदिति भावः ।

यागादेरविशुद्धियुक्तत्वे पञ्चशिखाचार्य्यवचनं प्रमाणयति—"यथाह" इत्यादिना,

योगभाष्ये[2] तीव्रसंवेगेनानुष्ठितस्य कर्मणो दृष्टजन्मवेदनीयत्वमभिधायान्यस्यादृष्टजन्मवेदनीयस्यानियतफलस्य कर्मणस्तिस्रो गतयोऽभिहिताः "कृतस्याविपक्वस्य नाश" इत्येका[3] "प्रधानकर्मण्यावापगमनम्"[4] इति द्वितीया "नियतविपाकप्रधानकर्मणाभिभूतस्य वा चिरमवस्थानम्"[5] इति तृतीया,

---

१ अविशुद्धियुक्तत्वकथनेन कथं दृष्टसाम्यं नहि दृष्टे मणिमन्त्रादिरूप उपायेऽविशुद्धियोगः कश्चित्प्रतीयत इत्याकाङ्क्षायां तात्पर्य्येण दृष्टसाम्यमाह—'एवं च" इत्यादिना—

(२) पा. २ सू. १२ अत्युग्रपुण्यपापरूपकर्मण इहैव सद्यः फलप्रदातृत्वात् दृष्टजन्मवेदनीयत्वम्, इतरस्यच परत्र फलप्रदत्वेनाऽदृष्टजन्मवेदनीयत्वं, तत्रादृष्टजन्मवेदनीयकर्मणो नियतफलकालनिर्धारणासत्त्वेन तस्य तिस्रो गतयो भवन्तीत्युक्तमित्यर्थः ।

३ अदत्तफलस्य कस्यचित्पापकर्मणः प्रायश्चित्तादिना नाश इत्येका गतिरित्यर्थः ।

४ प्रधाने कर्मणि ज्योतिष्टोमादिके तदङ्गस्य पशुहिंसादेरावापगमनं, द्वे खलु हिंसादेः कार्य्ये प्रधानाङ्गतया विधानाद् यागोपकारः 'न हिंस्याद्' इति निषिद्धत्वादनर्थश्च, तत्र प्रधानाङ्गतयाऽनुष्ठानादप्रधानतैवेत्यतो न द्रागित्येव प्रधाननिरपेक्षा सती स्वफलमनर्थं प्रसोतुमर्हति किन्त्वारब्धविपाके प्रधाने साहायकमाचरन्ती व्यवतिष्ठते, प्रधानसाहायकमाचरन्त्याश्च तस्याः स्वकार्य्ये बीजमात्रतयावस्थानं प्रधाने कर्मण्यावापगमनमिति तदर्थ इति वाचस्पतिमिश्राः,

अयंभावः—यथा धान्यबीजैः सहोत्पन्नानां तृणबीजानां तैः सहैव कुसूलमध्यस्थापितानां वपनसमये धान्यबीजैः सहैव वपनप्राप्तिर्न स्वातन्त्र्येण तद्वत् प्रधानयागाङ्गतयाऽनुष्ठितस्य पशुहिंसादेर्यत् स्वातन्त्र्येण फलदानासामर्थ्यं प्रधानकर्मविपाकसमये च फलदानोन्मुखत्वं तदेवाऽऽवापगमनमिति,

५ नियतविपाकेन बलीयसा कर्मान्तरेण प्रतिबद्धस्य बलीयःकर्मभोगपर्य्यन्तं बहुकालमवस्थानमित्यर्थः, तथा च स्मर्य्यते—"कदाचित्सुकृतं कर्म कूटस्थमिह तिष्ठति, मज्जमानस्य संसारे यावद् दुःखाद्विमुच्यते" इति ।

"स्वल्पः सङ्करः सपरिहारः सप्रत्यवमर्ष" इति । स्वल्पः सङ्करः—ज्योतिष्टोमादिजन्मनः प्रधानापूर्वस्य पशुहिंसादिजन्मनाऽनर्थहेतुनाऽपूर्वेण,

सपरिहारः=कियतापि प्रायश्चित्तेन परिहर्तुं शक्यः

अथ प्रमादतः प्रायश्चित्तमपि नाचरितं प्रधानकर्मविपाकसमये स विपच्यते तथापि यावदसावनर्थं सूते तावत् सप्रत्यवमर्षः—प्रत्यवमर्षेण=सहिष्णुतया सह वर्तत इति,

---

तत्र प्रधानकर्मण्यावापगमने प्रमाणतया "स्यात् स्वल्पः सङ्करः सपरिहारः सप्रत्यवमर्षः कुशलस्य नापकर्षायालं कस्मात्, कुशलं हि मे बह्वन्यदस्ति यत्रायमावापं गतः स्वर्गेप्यपकर्षमल्पं करिष्यति" इत्ययं पञ्चशिखग्रन्थ उद्धृतः तत्रत्यं प्रकृतोपयुक्तं भागमत्र प्रमाणतयोद्धरति—"स्वल्पः सङ्करः" इति ।

केन कस्य सङ्कर इत्याकाङ्क्षां पूरयन् सङ्करशब्दार्थमाह—"स्वल्पः सङ्करः-ज्योतिष्टोमादिः" इति, ज्योतिष्टोमजन्यस्य प्रधानीभूतधर्मस्य यः पशुहिंसादिजन्येनाप्रधानीभूताधर्मेण सह सामानाधिकरण्येन सहावस्थानरूपः संसर्गः स सङ्कर इत्यर्थः, पुण्यापेक्षयाऽल्पत्वेन च स स्वल्पः, यागे हिंसाजन्यः स्वल्पः सङ्कराख्यः प्रत्यवायो विद्यत इत्यर्थः ।

सङ्करस्याल्पत्वेनैवाल्पेनैव प्रायश्चित्तेन सोऽपनेय इत्याशयेन सपरिहारपदं व्याचष्टे—"कियतापि" इति, अल्पेनापि[1] इत्यर्थः ।

सप्रत्यवमर्षपदं व्याचष्टे—"अथ" इति, अथ=यदि प्रमादतः=आलस्यात् प्रायश्चित्तमपि नानुष्ठितं 'तर्हि' प्रधानकर्मविपाकसमये=ज्योतिष्टोमफलभूतस्वर्गभोगकाले सः सङ्कराख्यः प्रत्यवायः विपच्यते=फलोन्मुखीभवति तथापि=एवं सति, असौ=हिंसाजन्योऽधर्मः यावत्=यत्पर्यन्तम्[2]

---

१ "यत् पशुर्मायुमकृतोरो वा पद्भिराहते, अग्निर्मा तस्मादेनसो विश्वान् मुञ्चत्वंहसः" इत्यादिमन्त्रवर्णबोधितेनाल्पेन प्रायश्चित्तेनेत्यर्थः ।

२ 'यावन्तमसावनर्थं सूते तावान् सप्रत्यवमर्ष' इति–पाठान्तरे तु 'असौ=हिंसाजन्योऽधर्मः यावन्तमनर्थं=वृत्रासुरादिजन्यं भयं सूते=जनयति तावाननर्थः सप्रत्यवमर्षः=अवश्यं सहनीय इत्यर्थो बोध्यः, परन्त्वेवं सति सप्रत्यवमर्ष इति अनर्थविशेषणमित्यायाति. तथाच सङ्करः सप्रत्यवमर्ष इति श्रूयमाणं सामानाधिकरण्यं व्याकुप्येतेति मूलधृतपाठ एव साधीयान्,–

मृष्यन्ते हि पुण्यसम्भारोपनीतस्वर्गसुधामहाह्रदावगाहिनः कुशलाः पापमात्रोपपादितां दुःखवह्निकणिकाम् ।

न च "मा हिंस्यात्सर्वा भूतानि" इति सामान्यशास्त्रं विशेषशास्त्रेण "अग्नीषोमीयं पशुमालभेत" इत्यनेन बाध्यत इति युक्तं,

---

अनर्थं=स्वफलं वृत्रासुरादिभयरूपं सूते=उत्पादयति तावत्=तत्पर्य्यन्तं सप्रत्यवमर्षः=अवश्यं सहनीयः, सङ्करजन्यं दुःखमवश्यं भोक्तव्यमित्यर्थः । तदेवाख्यातुं सप्रत्यवमर्षपदं विगृह्णाति—"प्रत्यवमर्षेण" इति,

एतदेव स्पष्टयति—"मृष्यन्तेहि" इति, हि–शब्दः वैदिकपौराणिकप्रसिद्धिद्योतनार्थः, पुण्यपुञ्जोपनतस्वर्गाख्यसुखमयामृतसरोवरावगाहनशीलाः कुशला य इन्द्रादयस्ते हिंसाजन्यस्वल्पपापेन जनितां देवासुरसंग्रामादिरूपां दुःखवह्निकणिकां मृष्यन्ते=सहन्ते हि=प्रसिद्धमेतदित्यर्थः ।

यद्यवश्यं सङ्करजन्यं दुःखं सहनीयं तत् त्यज्यतां यागानुष्ठानमित्यपेक्षायाम् "कुशलस्य नापकर्षायालं कस्मात्, कुशलं हि मे बह्वन्यदस्ति यत्रायमावापं गतः स्वर्गेऽप्यपकर्षमल्पं करिष्यति" इत्यग्रिमपञ्चशिखग्रन्थ इति बोध्यम्, अस्य चायमर्थः—अयं स्वल्पः सङ्करः कुशलस्य=महतः पुण्यकर्मण अपकर्षाय=प्रक्षयाय न अलं=पर्य्याप्तः, कस्मात् हि=यतः मे=यागानुष्ठातुः कुशलं=पुण्यात्मकं कर्म दीक्षणीयादिदक्षिणावसानं बहु विद्यते यत्र प्रधानकर्मणि अयं स्वल्पः सङ्करोऽन्तर्भूतः सन् स्वर्गेपि स्वर्गादल्पं दुःखसंभेदं करिष्यतीति । एवं चाल्पदुःखभयेन महत्सुखं न त्याज्यमिति याज्ञिकाशयः ।

यागादेरविशुद्धियुक्तत्वममृष्यमाणस्य कर्ममीमांसकस्याशङ्कामुत्थाप्य निराकरोति—"न च मा हिंस्याद्" इति

शङ्ककमीमांसकस्यायमाशयः—सामान्यशास्त्रं हि विधेयसामान्यद्वारा विशेषमुपसर्पतीति विलम्बेन प्रवृत्तत्वाद् दुर्बलं तद्, विशेषशास्त्रं तु साक्षादेव विशेषमुपसर्पतीत्याशुतरप्रवृत्तत्वात्प्रबलं तद्, एवं च यथा प्रबलेन "अश्वस्य पदे जुहोति" इति विशेषशास्त्रेणाश्वपदाधिकरणकहोमविधानप-

---

१ अश्वमेधप्रकरणे तुरङ्गमविमोचनोत्तरं स्वैरं विचरन्तमश्वं दशममासादूर्ध्वं रथकारगृहे समानीय बद्ध्वा तस्य चतुर्षु पदेषु 'इह धृतिः स्वाहा' इत्याद्याहुतिचतुष्टयं जुह्वति चत्वार ऋत्विज इति याज्ञिकसम्प्रदायः ।

विरोधाभावाद्, विरोधे हि बलीयसा दुर्बलं बाध्यते न चेहास्ति कश्चिद् विरोधः भिन्नविषयत्वात्

तथा हि 'न हिंस्याद्' इति निषेधेन हिंसाया अनर्थहेतु-भावो ज्ञाप्यते न त्वक्रत्वर्थत्वमपि 'अग्नीषोमीयं पशुमालभेत' इत्यनेन वाक्येन च पशुहिंसायाः क्रत्वर्थत्वमुच्यते नानर्थहेतु-त्वाभावः, तथासति वाक्यभेदप्रसङ्गाद्,

---

रेण "आहवनीये जुहोति" इति होममात्रस्याहवनीयाधारत्वविधायकस्य सामान्यशास्त्रस्य बाधात् सामान्यशास्त्रस्य तदितरपरत्वेन संकोचः तथाऽग्नी-षोमीयपशुहिंसाविषयेण विशेषशास्त्रेण हिंसानिषेधपरस्य सामान्यशास्त्रस्य बाधात् सामान्यशास्त्रस्य यागीयहिंसातिरिक्तहिंसाविषयत्वेन संकोच आ-स्थेय, एतन्मूलकमेव सामान्यशास्त्राद्विशेषशास्त्रं प्रबलमिति न्याय इति ।

न च युक्तमित्युक्तौ हेतुमाह—"विरोधाभावाद्" इति, नहि प्रबलमि-त्येतावता दुर्बलं बाध्यते किन्तु सति विरोधे नचेहास्ति कश्चिद् विरोधो भिन्नगोचरचारित्वादुभयोरित्यर्थः ।

भिन्नविषयत्वमेव स्पष्टयति—"तथाहि" इति निषेधेन हि 'हिंसा पु-रुषानर्थकरी' इत्येव बोध्यते नतु 'हिंसा यागोपकारिणी न' इत्येवमपि, एवं पशुमालभेतेतिवाक्येनापि "हिंसा यागोपकारिणी" इत्येव ज्ञाप्यते नतु 'हिंसा नानर्थकरी' इत्येवमपि, एवं च भिन्नविषयत्वान्न विरोध इत्यर्थः ।

ननु न हिंस्यादित्यस्यार्थद्वयं हिंसानर्थहेतुरित्येकः अक्रत्वर्था च सेत्यपरः एवम् 'अग्नीषोमीयं पशुमालभेत' इत्यस्याप्यर्थद्वयं पश्वालम्भनं क्रत्वर्थमि-त्येकः, इदं चालम्भनं नानर्थहेतुरित्यपरः, एवं च सामान्यशास्त्रबोधितयोरन-र्थहेतुत्वाक्रत्वर्थत्वयोर्विशेषशास्त्रबोधितानर्थाहेतुत्वक्रत्वर्थत्वाभ्यां विरोधात्कथं विरोधाभावः इत्याशङ्क्याह—"तथासति" इति, तथासति=अर्थद्वयस्वी-कारे सति, अन्याय्यश्चानेकार्थं, इति न्यायेन वाक्यभेदस्य मीमांसकैर्दुष्टत्व-स्थापनादित्यर्थः ।

---

१ अयमेव चोत्सर्गापवादन्यायः तथाचाहुः शङ्कराचार्य्याः—'उत्सर्गस्तु सः, अयं चापवादोऽग्नीषोमीयं पशुमालभेत' इति—ब्रह्मसू. अ. ३ सू. १३ ।

नचाऽनर्थहेतुत्वक्रतूपकारकत्वयोः कश्चिद् विरोधोस्ति, हिंसा हि पुरुषस्य दोषमावक्ष्यति क्रतोश्चोपकरिष्यतीति,

---

यथाश्रुतैकार्थत्वस्वीकारे तु न कश्चिद् विरोध इत्याह–"नचानर्थहेतुत्व"इति विरोधाभावायोभयोः समावेशमाह"हिंसा हि" इति, दोषम् आवक्ष्यति=सम्पादयिष्यतीत्यर्थः।

एतदुक्तं भवति—क्रतुप्रकरणे समाम्नातं पश्वालम्भनं क्रत्वर्थतामेवास्य गमयति नत्वपनयति निषेधापादितं हिंसायाः पुरुषं प्रत्यनर्थहेतुत्वं तेनास्तु निषेधात्पुरुषं प्रत्यनर्थहेतुता विधेश्च क्रत्वर्थता को नाम विरोधावकाशः।

अयं भावः—यथा "आमतक्रं कोष्ठे कफं हन्ति" इति वाक्यस्येष्टसाधनत्वं विषयः "कण्ठे च तत् तक्रं कफं करोति" इति वाक्यस्यानिष्टसाधनत्वं विषय इति विषयभेदादुभयोरविरोधस्तथा निषेधवाक्यस्यानर्थहेतुत्वं विषयः पश्वालम्भनवाक्यस्य च क्रतूपकारकत्वं विषय इति विषयभेदादुभयोरविरोध इति।

ननु[1] वैधपश्वालम्भनस्यानिष्टजनकत्वे आलभेतेत्यत्र बलवदनिष्टाननुबन्धीष्टसाधनत्वरूपस्य विध्यर्थस्य कथमक्षतिरिति चेद्—

अत्राहुः साङ्ख्यप्रवचनभाष्यकारा विज्ञानभिक्षवः[2]—"वैधहिंसाजन्यानिष्टस्येष्टोत्पत्तिनान्तरीयकत्वेनेष्टोत्पत्तिनान्तरीयक[3]दुःखाधिकदुःखाजनकत्वरू-

---

१ ननु माभूद् 'न हिंस्याद्' इति निषेधवाक्यस्यार्थद्वयं पशुमालभेत इतिवाक्यस्य त्वर्थद्वयं दुर्वारम् आलभेत इत्यत्र विधिप्रत्ययेन बलवदनिष्टाजनकत्वेष्टसाधनत्वरूपार्थद्वयस्य बोधनादित्याशयेन शङ्कते–"ननु वैध" इति

(२) अ. १ सू. ७।

३ अन्तरा–इत्यव्ययं विनार्थकम्–अन्तरा=विना भवम् अन्तरीयं गहादित्वाच्छः, नान्तरीयं नान्तरीयकम्, इष्टोत्पादकयत्नानुनिष्पादनीयं,यद् विनेष्टोत्पत्तिर्न भवत्येवंविधं यदिष्टोत्पत्त्यविनाभूतमिष्टोत्पत्तिसहभूतं वा दुःखं तदितरदुःखाजनकत्वमेव बलवदनिष्टाजनकत्वमित्यर्थः, युक्तं चैतद् अन्यथा लौकिकपाकादिकर्मणो धूमादिप्रयुक्तदुःखजनकत्वात्, स्वर्गप्रापककर्मणश्च मरणपानभयाधःपातादिदुःखजनकत्वात्, राज्यप्रापककर्मणश्च गर्भवासादिदुःखजनकत्वात्, कुत्रापि दुःखाजनकत्वं न स्यात्।

एवं च हिंसाजन्यप्रत्यवायफलीभूतस्याल्पदुःखस्येष्टस्वर्गोत्पत्त्यविनाभूतत्वेन तद्दुःखजनकत्वेपि तदितरदुःखाजनकत्वाद्भवति यागादेर्बलवदनिष्टाजनकत्वमिति न विध्यर्थक्षतिः।

पस्य बलवदनिष्टाननुबन्धित्वस्य विध्यंशस्याक्षतेः यत्तु वैधहिंसातिरिक्त-हिंसाया एव पापजनकत्वमिति, तदसत्, सङ्कोचे प्रमाणाभावाद्, युधिष्ठिरादीनां स्वधर्मेपि युद्धादौ ज्ञातिवधादिप्रत्यवायपरिहाराय प्रायश्चित्त-श्रवणाच्च, 'तस्माद् यास्याम्यहं तात दृष्ट्वेमं दुःखसन्निभं, त्रयीधर्ममधर्माढ्यं किम्पाकफलसन्निभम्' इति मार्कण्डेयवचनाच्च, 'अहिंसन् सर्वाणि भूतान्यन्यत्र तीर्थेभ्य" इति श्रुतिस्तु वैधातिरिक्तहिंसानिवृत्तेरिष्टसाधनत्वमेव वक्ति नतु वैधहिंसाया अनिष्टसाधनत्वाभावमपीत्यादिकं योगवार्तिके द्रष्टव्यमिति दिक्" इति।

किञ्च–इष्टस्वर्गापेक्षया हिंसाजन्यानिष्टस्याल्पत्वेन बलवदनिष्टाजनकत्वरूपविध्यर्थस्याक्षतेर्नात्र विध्यर्थस्यानुपपत्तिरिति।

वस्तुतस्तु—अङ्गविधीनां विनियोगमात्रतात्पर्यकत्वेन बलवदनिष्टाननुबन्धित्वबोधने तात्पर्याभावान्न काचिदत्रापत्तिरिति।

अयं भावः–यो हि पुरुषप्रवर्तकः प्रधानविधिस्तेन स्वप्रवृत्तिसिद्धये बलवदनिष्टाननुबन्धित्वमपि तात्पर्यतो बोध्यते 'अग्नीषोमीयं पशुमालभेत' इत्याद्यङ्गविधयस्तु न पुरुषप्रवर्तका अपि त्वङ्गानां प्रधानविनियोगतात्पर्यकाः तत्सिद्धये चेष्टसाधनत्वमेव तात्पर्यगत्या तैः प्रतिपादनीयं तस्मिन् प्रतिपादिते किं तदिष्टमित्याकाङ्क्षायामुपस्थितत्वात्क्रतूपकार एवेत्यवगम्यते नत्वनर्थहेतुत्वाभावोपि, एवं चानर्थहेतुत्वाभावस्य विधिनाऽस्पृष्टत्वाद् 'विधिस्पृष्टे निषेधानवतार' इति न्यायावतारोप्यत्र न भवतीति बोध्यम्।

नन्वेवं क्रत्वन्तर्गता हिंसापि निषेधविषयत्वेनानर्थहेतुरित्यायातं तथा च यागमध्ये निषिद्धानुष्ठानेन कथं न क्रतोर्वैगुण्यमिति चेद्—

अत्र ब्रूमः–यथा 'न कलञ्जं भक्षयेद्' इति कलञ्जभक्षणप्रतिषेधस्य क्रतु-

(१) पा. २ सू. ३४। कार्यत्वमिष्टसाधनत्वं वा विध्यर्थो न पुनरनिष्टाननुबन्धित्वमपि, राजत्वादिप्रापककर्मणां गर्भवासजन्याद्यनर्थहेतुतायाः सर्वसंमतत्वात्, नच बलवदनिष्टाननुबन्धित्वमपि विध्यर्थो वक्तुं शक्यते, अनिष्टेषु पुरुषाणां बलवद्द्वेषस्याव्यवस्थितेः, दुःखमेव सर्वं विवेकिन इत्युक्तत्वात्, किंच बलवदनिष्टाननुबन्धित्वस्य विध्यर्थत्वेपि यज्ञादिनान्तरीयकहिंसायाः सामान्यतोनिष्टजनकत्वश्रुत्यविरोध' इत्यादिना योगवार्तिकेऽयमेव मार्ग उपदिष्ट इति बोध्यम्।

२ विषाक्तास्त्रहतमृगपक्षिसंबन्धिमांसः कलञ्ज इति त्रिकाण्डशेषः, केचित्तु विष्णुसिद्धान्तसारावल्यभिधाने वैद्यकग्रन्थे धूमपर्णाधूमपानगुणवर्णनं प्रतिज्ञाय 'कलञ्जसंवेष्टनधूमपानात्स्याद्दन्तशुद्धिर्मुखरोगहानिः' इत्यभिधानात्कलञ्जपदं ताम्रकूटवाचकमपीत्याहुः। ताम्रकूटः=तमाकू इति लोकप्रसिद्धः क्षुपविशेषः।

प्रकरणेऽनाम्नानात् क्रतुशेषत्वाभावेन यजमानकर्तृककलञ्जभक्षणेन न क्रतोर्वैगुण्यं तथा हिंसानिषेधस्यापि क्रतुशेषत्वाभावेन हिंसयापि न क्रतोर्वैगुण्यं,

तथाचाहुर्भट्टपादाः[1] 'यो नाम क्रतुमध्यस्थः कलञ्जादीनि भक्षयेद्, न क्रतोस्तत्र वैगुण्यं यथाचोदितसिद्धितः[2], इति, ।

नचैकत्रेष्टहेतुत्वानिष्टहेतुत्वयोर्वृत्तौ विरोधाद्[3] न यागीयहिंसाऽनिष्टहेतुरिति वाच्यम् । मधुविषसंपृक्तभोजने परकीयकमनीयरमणीरमणे[4] चोभयोः[5] समावेशदर्शनेन विरोधाभावाद् ।

ननु यागीयहिंसाया अनिष्टहेतुत्वे तत्र कथमास्तिकानां प्रवृत्तिरिति चेद् अत्रोच्यते—यथा सत्यप्यभिचारस्यानिष्टहेतुत्वे[6] तद्दोषसहिष्णोरेव क्रोधान्धस्य श्येनयागादौ प्रवृत्तिर्नेतरस्य तथात्रापि तद्दोषसहिष्णो रागान्धस्यैव प्रवृत्तिर्नेतरस्येति न प्रवृत्तिविरहः ।

केचित्तु[7] यथा मरणरूपमहानिष्टसाधने सहगमनवेणीप्रवेशनादावाप्माहु-

१ तन्त्रवार्तिके अ. ३ पा. ४ सू. १३ कुमारिलस्वामिनः,

२ कलञ्जभक्षणादिनिषेधानां पुरुषार्थत्वात् तदतिक्रमे पुरुषस्यैव प्रत्यवायो न क्रतोर्वैगुण्यं यथाविहितस्य तस्य सिद्धेः, नहि क्रतुशेषः प्रतिषेधो यतस्तदतिलङ्घनात्क्रतोर्वैगुण्यं स्यादिति भट्टोक्तेरर्थ, इति भामतीव्याख्याने कल्पतरुकारः ।

३ आलभेत इत्यत्र विधिप्रत्ययेन हिंसाया इष्टहेतुत्वं बोध्यते न हिंस्यात् इति निषेधेन च हिंसाया अनिष्टहेतुत्वं बोध्यते तथा चैकत्र हिंसायामुभयवर्तनं विरुद्धमित्यर्थः ।

४ विषसंपृक्तज्ञानेसति तत्र न प्रवर्तेत इत्यत आह 'परकीय' इति,

५ उभयोः=इष्टहेतुत्वानिष्टहेतुत्वयोः ।

६ अभिचारः=श्येनयागादिना शत्रुमारणं,

'गोवधोऽयाज्यसंयाज्यपारदार्यात्मविक्रय' इत्युपक्रम्य 'अभिचारो मूलकर्म च' इति मध्ये पठित्वाऽन्ते 'नास्तिक्यं चोपपातकम्' इत्येवं याज्ञवल्क्येनोपसंहारादभिचारस्योपपातकत्वेनानिष्टहेतुत्वस्य स्पष्टत्वादिति भावः,

७ बृहद्वैयाकरणभूषणकाराः कौण्डभट्टा इत्यर्थः,

८ सहगमनं=पत्न्याः पत्या सहैकचित्यारोहणं, वेणीप्रवेशनं=अनशनादिना मज्जनेन वा प्रयागमरणम्, आदिना हिमालयगमनरूपमहाप्रस्थानगमनम्, आत्माहुत्यङ्गकसर्वस्वारयज्ञस्तु—एकाहसाध्यः स्वर्गकामस्य विहितः क्रतुविशेषः, तत्र हि आर्भवस्तोत्रकाले 'ब्राह्मणाः समापयत मे यज्ञम्' इति प्रैषमृत्विग्भ्यः प्रदाय यजमानेनात्माहुतिप्रदानेन मर्तव्यमिति विहितम्, एतच्च 'सर्वस्वारस्य दिष्टगतौ

त्यङ्गके सर्वस्वारयज्ञे चोत्कटफलेच्छावशात्प्रवृत्तिस्तथात्राप्युत्कटफलरागवशात्प्रवृत्तिरित्याहुः ।

अन्ये[1] तु यथा द्रव्यव्ययादिना यागादीनामनिष्टफलकत्वेपि यागजनितफले रागवशात्प्रवर्तते तथा हिंसायाः प्रत्यवायकरत्वेपि यागफलेऽत्यन्तरागवशात्प्रवर्तते, इयाँस्तु विशेषः–द्रव्यव्ययादिना प्राप्तमनिष्टं प्रत्यक्षप्रमाणकं, हिंसादौ तु प्रत्यवायकरता न हिंस्यात् इति शास्त्रप्रमाणिकेत्याहुः ।

स्वर्गसुखापेक्षया हिंसाजन्यदुःखस्याल्पत्वज्ञानेन यागादौ प्रवृत्तिरिति तत्त्वम्, एतच्च 'कुशलस्य नापकर्षायालम्' इत्यत्र पञ्चशिखाचार्यवचनेन पूर्वत्र व्यक्तीकृतम् ।

ननु[2] योहि क्रतुप्रकरणे समाम्नातः स क्रतुशेषत्वेन क्रत्वर्थ इत्याख्यायते यस्तु कस्य चित् क्रतोः प्रकरणेऽनाम्नातत्वेनाऽनारभ्याधीतः स पुरुषार्थ इत्यभिधीयत इति हि मीमांसकसमयः, तथा च न हिंस्यादिति निषेधस्यानारभ्याधीतत्वेन पुरुषार्थत्वात् 'यदर्थो निषेधस्तदर्थमेव निषेध्यम्' इति नियमेन पुरुषार्था एव हिंसा अनेन निषेध्या न क्रत्वर्था, अत[3] एव 'नानृतं वदेत्'' इति स्मार्तेऽनृतवदननिषेधे पुरुषार्थरूपे सत्यपि पुनर्दर्शपौर्णमासप्रकरणे 'नानृतं वदेत्' इति क्रत्वर्थतया पुनः समाम्नातं संगच्छते, यदि हि पुरुषार्थोपि निषेधः क्रत्वर्थो भवेत् तर्ह्येकेनैव निषेधेनालं किं पुनराम्नानेन, स्पष्टं चैतत् 'पुरुषार्थाया एव हिंसाया न हिंस्यादिति प्रतिषेधात्' इति भामतीग्रन्थमुपादाय कल्पतरौ परिमले च, तथा च न यागीयहिंसाविषयत्वं निषेधस्येति चेत् ।

अत्र ब्रूमः—भवेदेतदेवं यदि 'यदर्थो निषेधस्तदर्थमेव निषेध्यम्' इति नियमः सुस्थिरो भवेत्, तदेव तु न स्त्र्युपगमनमांसभक्षणादिप्रतिषेधस्य पुरुषार्थस्यापि क्रत्वर्थत्वदर्शनान्नियमस्य व्यभिचरितत्वात्, यदाहुः—स्त्र्युपायमांसभक्षादिपुरुषार्थमपि श्रितः, प्रतिषेधः क्रतोरङ्गमिष्टः प्रकरणाश्रयात् इति.

समापनं न विद्यते कर्मणो जीवसंयोगात्' अ. १० पा. २ । इति द्व्यविंशेधिकरणे जैमिनीये व्यक्तम् ।

१ ब्रह्मविद्याभरणकारा अद्वैतानन्दाः,

२ प्रभाकरोक्तप्रकारमालम्ब्य शङ्कामुत्थापयति 'ननु योहि' इति,

३ येन दृष्टान्तोपन्यासेन भामतीकल्पतरुब्रह्मविद्याभरणकारैर्मीमांसकसाहायकमाचरितं तद्दृष्टान्तोपन्यासेन प्रभाकरोक्तं द्रढयति 'अत एव' इत्यादिना,

"आत्मज्ञानं हि संयोगपृथक्त्वात्क्रत्वर्थपुरुषार्थत्वेन ज्ञायते" इत्यादिना तन्त्रवार्तिके आत्मज्ञानस्योभयार्थत्वोपगमाच्च,

क्रत्वर्थहिंसाया अपि परम्परया पुरुषोपकारकत्वेन पुरुषार्थत्वसंभवाच्च,

किञ्च—यदि 'न हिंस्याद्' इति निषेधस्य क्रत्वर्थहिंसाविषयत्वं नाभिमन्येत मीमांसकैस्तर्हि ('पशुमालभेत' इति विधेर्विशेषविषयत्वात् सामान्यविषयो निषेधस्तद्विरोधाद् हिंसान्तराण्यवलम्बते) इति, "न हिंस्यादित्युत्सर्गः 'अग्नीषोमीयं पशुमालभेत' इति चापवाद" इति च तेषामभिधानं कथं सङ्गच्छेत, नहि सामान्यशास्त्रस्य विशेषशास्त्रविषयाननुप्रवेशे बाधो दृष्टचरो नाम ।

अयं भावः—यत्र हि सामान्यविधिना विशेषविहितस्यार्थस्याऽपि विषयीकरणं तत्र हि बाध्यबाधकभावो भवति यथा 'आहवनीये जुहोति' इति सामान्यविधिना होममात्रस्याहवनीयान्वयविधानपरेण पदहोमस्यापि विषयीकरणाद् 'अश्वस्य पदे जुहोति' इति पदहोमान्वयविशेषविधिना सामान्यविधेर्बाधः इह तु भवन्मते न हिंस्यादिति निषेधेन क्रत्वर्थहिंसाया अविषयीकरणेन कथं तयोर्बाध्यबाधकभावाभिधानम्

तत्सिद्धमेतद्—न हिंस्यादितिनिषेधः क्रत्वर्थहिंसामपि विषयीकरोतीति ।

सत्यप्यनयोः सामान्यविशेषभावे विषयभेदान्न विरोध इति न बाध्यबाधकभाव इत्यभिहितं प्रागिति नात्र किञ्चिद्वचनीयम्— ।

---

१ अ. प्र. पा. ३ सू. २५ ।

२ ननु 'एकस्य तूभयत्वे संयोगपृथक्त्वम्' अ. ४. पा. ३ सू. ५ इति जैमिनीय एकस्य वस्तुनः क्रत्वर्थत्वपुरुषार्थत्वे विनियोजकवाक्यभेदस्य नियामकत्वकथनान्न सर्वत्रोभयार्थतेत्याशङ्कमानं प्रत्याह "क्रत्वर्थहिंसाया" इति । वस्तुतस्तु ब्राह्मणहननसुरापादिनिषेधानामुभयार्थत्वोपगमेन 'दीक्षितो न ददाति न जुहोति' इत्यादौ प्रतिषेधस्य क्रत्वर्थत्वेपि प्रतिषेध्यानां दानादीनां पुरुषार्थत्वाभ्युपगमेन च प्रतिषेधप्रतिषेध्ययोः समानविषयकत्वनियमः न सार्वत्रिक इति बोध्यम् ।

(३) अ. प्र. सू. २ शास्त्रदीपिकाकारोक्तिरियम्—

(४) अ. ३ पा. १ सू. २५ शङ्कराचार्य्योक्तिरियम्—

५ यत्र हि सामान्यशास्त्रं विशेषशास्त्रविषयं क्रोडीकरोति यथा—'आद् गुण' इति सामान्यशास्त्रं 'वृद्धिरेचि' इति विशेषशास्त्रविषयं गङ्गौघ इति, तत्रैव बाध्यबाधकभावो नान्यत्रेत्यर्थः ।

६ नन्वेवं सामान्यविशेषभावसत्त्वात्कथं न बाध्यबाधकभाव इत्याशङ्क्याह "सत्यपि" इति, यथा सत्यपि सामान्यविशेषभावे लिङः सीयुटो न "सुट् तिथोः" इति

यत्तु नानृतं वदेद् इति पुनराम्नातं तत्तु 'यथा क्रतुमध्ये निषिद्धकलञ्जभक्षणेन न क्रतोर्वैकल्यमपि तु पुरुषस्यैव प्रत्यवायस्तथा निषिद्धानृतवदनेपि न क्रतोर्वैगुण्यमिति न मन्तव्यमपि त्वत्रानृतवदने दर्शपौर्णमासापूर्वमेव वैगुण्यान्न स्यादित्यवश्यमत्र वर्जनीयमनृतवदनम्' इत्यर्थकं, न तु 'सामान्यनिषेधः पुरुषार्थ एव न क्रत्वर्थ' इत्याशयकम् ।

तथा चाहुस्तन्त्रवार्तिककाराः "दर्शपौर्णमासयोरनृतं वदन् नरकं च प्राप्नुयाद् दर्शपौर्णमासफलं चाविकलमेवाप्नुयादिति च स्मृत्यर्थः, श्रौतः पुनः प्रकरणप्रयुक्तपुरुषधर्म इति, अत्रैषोर्थो विज्ञायते—वर्जितानृतवचनकेन पुरुषेण कृतौ दर्शपौर्णमासौ फलं साधयत इति, प्रकरणसामर्थ्याद्धि पुरुषगतमपूर्वसाधनत्वं लक्षयित्वाऽनृतं प्रतिषिद्धमतस्तदतिक्रमे दर्शपूर्णमासापूर्वमेव वैगुण्यान्न स्याद्" इति ।

एतदुक्तं भवति—यः सामान्येन निषेधस्तस्योभयार्थत्वे सत्यपि तन्निषेधातिक्रमे पुरुषस्यैव प्रत्यवायो न क्रतोर्वैकल्यं यस्तु विशेषेण क्रतुप्रकरणे निषेधस्तदतिक्रमे च क्रतोरपि वैगुण्यमिति । तथा च न हिंस्यादिति निषेधस्य सामान्यतयोभयार्थत्वेपि विशिष्य क्रतुप्रकरणेऽपठनात् तन्निषेधातिक्रमे पुरुषस्यैव प्रत्यवायो न क्रतोर्वैगुण्यमिति— ।

न चैवमेकस्यैव वाक्यस्य क्रत्वर्थपुरुषार्थनिषेधबोधकतया क्रत्वर्थपुरुषार्थत्वापत्त्या स्वातन्त्र्यपारतन्त्र्यलक्षणं[2] वैरूप्यं स्यादिति वाच्यम्, अविशेषेण प्रतिषेधे वैरूप्याभावात्,–

तथा चाहुः—शास्त्रदीपिकाकाराः[3] (यदि हि क्रत्वर्थत्वपुरुषार्थत्वरूपविशेषेणोद्दिश्य प्रतिषेधः क्रियेत ततः स्यादपि वैरूप्यं प्रतिषेध्योपस्थापितक्रतुपुरुषगोचरत्वात्प्रतिषेधस्य, यदा तु हिंसामात्रमुद्दिश्य प्रतिषेधः क्रियते तदास्य किं वैरूप्यं, तद् यथा—या भोजनार्थं मांसोत्पादने हिंसा या च वैरिनिर्य्यातनार्थतया साक्षात्पुरुषार्था तस्यामुभय्यामप्यविशेषेण प्रतिषिध्यमानायामपि नास्ति वैरूप्यमेवमिहापि, इतरथा तत्रापि भोजनाङ्गता

सुटा बाधो, लिङो यासुद तकारथकारयोः सुडिति विषयभेदात् तथाऽत्रापि विषयभेदान्न बाध्यबाधकभावः ।

(१) अ. ३ पा. ४ विधिर्वा संयोगान्ताद् १ ३. इतिसूत्रे कुमारिलस्वामिनः ।

२ क्रत्वर्थनिषेधत्वे हि क्रत्वर्थत्वात्पारतन्त्र्यम्,पुरुषार्थनिषेधत्वे च पुरुषार्थत्वात् स्वातन्त्र्यम् इत्यर्थः ।

३ प्रथमलक्षणे धर्मलक्षणाख्यानपरे द्वितीयसूत्रे पार्थसारथिमिश्राः ।

पुरुषार्थता च प्रतिषेधस्य स्यादिति वैरूप्यं स्यात्, तस्माद् यैव काचिद् येन केनापि प्रकारेण प्रसक्ता हिंसा सा सर्वा सामान्येन प्रतिषिध्यते) इति,

यत्त्वेतदग्रिमग्रन्थे "अग्नीषोमीयहिंसाप्यसति विधेयत्वे प्रतिषेधगोचरः स्याद् विधेयत्वे तु विधेर्विशेषविषयत्वात्सामान्यविषयो निषेधस्तद्विरोधाद् हिंसान्तराण्यवलम्बत" इत्यभिहितं तत्तु विषयभेदाद् इष्टहेतुत्वानिष्टहेतुत्वयोरेकत्रवृत्तौ[1] विरोधाभावेन च न बाध्यबाधकभाव इत्येवं पूर्वं समाहितत्वेनाकिञ्चित्करम्– ।

यत्पुनरग्रे "सत्यमङ्गविधिमात्रालोचनायां नास्ति विरोधो ज्योतिष्टोमविधिस्तु साङ्गं प्रधानं पुरुषस्य विदधत्पुरुषार्थहिंसानिषेधमग्नीषोमीयहिंसायामवतरन्तं निरुणद्धि" इत्यभिहितं, तदपि विधिना विधेयस्य साङ्गप्रधानस्य बलवदनिष्टाजनकत्वबोधनेपि स्वल्पानिष्टाजनकत्वबोधनाभावाद् विध्यर्थस्याक्षतेरित्येवं पूर्वं समाहितत्वेन न पुनः समाधानीयम्–

एतेन[2] (काम्यप्रकरणे यागे रागात्प्रवृत्तिरङ्गे तु वैधी प्रवृत्तिरिति वैधहिंसाया न प्रत्यवायजनकत्वम्) इति प्रभाकरोक्तमपि निरस्तं वेदितव्यं, हिंसाया वैधत्वेपि विधिनेष्टोत्पत्तिनान्तरीयकानिष्टजनकत्वस्यानिषेधाद्,

किञ्च—यागे रागात्प्रवृत्तिरित्यङ्गीकारे यागस्य वेदविहितत्वाभावेन कथं यागस्य धर्मत्वमित्यपि स प्रष्टव्यः ।

दूषणान्तरं च शास्त्रदीपिकायां व्यक्तमिति[3] तत्रैवान्वेष्यम्,

यदपि शारीरकीये भाष्ये (हिंसादियुक्तत्वेन वैदिककर्मणोऽशुद्धत्वेन तत्प्रयुक्त एव स्वर्गादवरोहतां व्रीह्यादिभावेन प्रादुर्भाव) इत्याशङ्कायाम् 'अशुद्धमिति चेन्न शब्दाद्' इति सूत्रमवतार्य्य (शास्त्राद् हिंसानुग्रहात्मक-

---

१ क्रतूपकारकत्वपुरुषानर्थहेतुत्वयोरेकत्र वृत्तेः पूर्वमभिहितत्वादिति भावः ।

२ एतेन=विधिना विधेयस्य बलवदनिष्टाजनकत्वबोधनेपि स्वल्पानिष्टाजनकत्वबोधने मानाभावेनेत्यर्थः ।

३ 'काम्येष्वपि विधिरेव प्रवर्तको न फलं तस्य विध्यधीनोत्पत्तिकत्वेन यागापेक्षाभावाद्, विधिस्तु यागाधीननिष्पत्तित्वाद् यागमनुष्ठापयतीति युक्तं, यदि च विधिरप्रवर्तकः काम्येषु स्यादितिकर्तव्यताप्यविधेया स्यात् तस्यामपि फलत एव प्रवृत्तिसिद्धेः साङ्गप्रधानसाध्यत्वात्फलस्य, वक्ष्यति हि 'तदयुक्ते तु फलश्रुतिस्तस्मात्सर्वचिकीर्षा' इति, ततश्चाग्नीषोमीयहिंसायामपि विध्यभावेन निषेधविषयत्वात् तदयुक्तस्य ज्योतिष्टोमस्याप्यनर्थपत्तापत्तेः 'कोर्थो यो निःश्रेयसाय ज्योतिष्टोमादिर्' इति भाष्यानुपपत्तेर् इत्येवं शास्त्रदीपिकायां व्यक्तम् ।

(४) अ. ३ पा. १ सू. २५ ।

ज्योतिष्टोमस्य धर्मत्वावधारणाच्च वैदिकं कर्माशुद्धम्) इत्येवं शङ्कराचार्य्यैर्योगस्याविशुद्धियुक्तत्वविरहाभिधानं तदपि भट्टपक्षसंरक्षणमात्रं न व्यासाशयानुगुणं, योगभाष्ये भगवता व्यासेन स्पष्टं यागादेः शुक्लकृष्णत्वप्रतिपादनेन धर्माधर्मात्मत्वाभिधानेनात्र तद्विपरीताशयवर्णनस्यायुक्तत्वात् ।

कस्तर्ह्यत्र व्यासाशयानुसारी सूत्रार्थ इति चेच्छ्रूयतामवधानेन—छान्दोऽग्ये[1] इष्टादिकर्मकारिणां प्रेत्य धूममार्गेण चन्द्रलोकमारूढानां तत्र यावत्कर्मफलं भुक्तभोगानाम् "अथैतमेवाध्वानं पुनर्निवर्तन्त" इत्यादिना पुनरवरोहमाम्नाय तदनु कथमवरोहन्तीत्याकाङ्क्षायाम् आकाशवायुधूममेघसमतामासाद्य वर्षधाराद्वारा भूमिं प्रविश्य व्रीहियवाद्यन्नसंसर्गिणो भूत्वा भक्षणद्वारा रेतःसिक्[2]पुरुषयोगेन शुक्रमधिष्ठाय मिथुनीभावद्वारा स्त्रीयोनौ प्रविश्य रमणीयाचरणशीला ब्राह्मणादियोनिमापद्यन्ते कुत्सिताचरणशीलाश्च शूकरादियोनिमापद्यन्त इत्यभिहितं, तत्र स्वर्गादवरोहतां यो व्रीहियवादिरूपः स्थावरभाव आम्नातः स किं तेषां व्रीह्यादिरूपेणोत्पत्तिरुतान्यैर्जीवैरधिष्ठितेषु व्रीह्यादिषु संसर्गमात्रमिति संशये—

"त इह जायन्त" इति जनिश्रुतेर्[3]मुख्यमेव व्रीह्यादिरूपेण तेषां जन्मेति प्राप्ते "अन्याधिष्ठिते पूर्ववदभिलापात्" इति सूत्रेण[4] (अन्यैर्दुराचारैरधिष्ठितेषु व्रीह्यादिषु संसर्गमात्रमेव न मुख्यं जन्म) इत्येवं सिद्धान्तिते, पुनः "शारीरजैः कर्मदोषैर्याति स्थावरतां नर" इति स्थावरभावस्य पापफलत्वेन मनुना स्मरणात् कथं पापफलमशुद्धं व्रीह्यादिभावमवरोहन्तः प्राप्नुयुरिति, न च व्रीह्यादिरूपेण जनिरेव पापफलं तत्र स्मर्य्यते ननु व्रीह्या-

१ पञ्चमप्रपाठके दशमखण्डे ।

२ रेतः=शुक्रं–वीर्य्यं 'सिञ्चतीति' रेतःसिगित्यर्थः ।

३ "त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्त" इति जनिश्रुतेरित्यर्थः

(४) अ. ३ पा. १ सू. २४–'पूर्ववदभिलापात्=यथा पूर्वत्र "वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा वर्षति" इत्यादौ वाय्वादिसंसर्गमात्रं तथात्रापि व्रीह्यादिसंसर्गमात्रमेव न मुख्यं जन्म, कुतः पूर्ववदभिलापात्—आकाशादिमेघपर्य्यन्तवत् केवलतद्भावाभिलापात्,—यत्र हि भोक्तृत्वमभिप्रेतं तत्र तत्साधनभूतं कर्माभिलप्यते 'रमणीयचरणाः कपूयचरणा' इति, इह चाकाशादिवन्नाभिलप्यते कर्मातो न मुख्यं जन्मेत्यर्थः, ।

दिसंसर्गमात्रं पापफलमिति साम्प्रतं, विशेषानुपलब्धेः—नहि दुष्कृतकर्माणः स्थावरादिभावमापन्ना व्रीह्यादिरूपेण परिणमन्ते किन्तु व्रीह्यादीनधिष्ठाय तदवच्छेदेन दुःखादिभाजो भवन्ति स चावच्छेदः संसर्गविशेषः, सचो-भयोः[1] समान इति नास्ति विशेषः, नच सञ्चितदुरितवतामेवावरोहतामयं स्थावरादिभावोऽभिहित इति वक्तुं युक्तं सञ्चितसुकृतवतामपि तदभ्यु-पगमात्[2], तथाच कथमशुद्धं पापफलं तेषां व्रीह्यादिजन्मेति शङ्कायाम् "अशुद्धमिति चेन्न शब्दात्" इति सूत्रम्, अस्यायमर्थः—पापफलत्वेना-शुद्धं व्रीह्यादिजन्मेति कथं कृतसुकृतस्तत्प्राप्नुयादिति न शङ्क्यं, कुतः श-ब्दाद्=वेदात् तथाप्रतीतेरसत्त्वादेतस्यार्थस्याऽशङ्कनीयत्वात्।

अयं भावः—द्विविधो हि स्थावरभाव—एको व्रीह्यादीनधिष्ठाय तदभि-मानित्वरूपोऽपरश्च व्रीह्यादिसंसर्गमात्ररूपः, तत्राद्यो व्रीह्याद्यभिमानेन तदवच्छेदेन दुःखभाक्त्वसद्भावात्पापफलरूपः, तदभिप्रायेणैव "शारी-रजैः" इति स्मरणं, द्वितीयस्तु तदभिमानाभावेन न पापफलत्वरूपः किन्तु रेतःसिग्योगयोनिप्रवेशद्वारा पुनर्जन्मग्रहणे द्वारभूतो व्रीह्यादिसं-श्लेपरूपः, समानेपि व्रीह्यादिसंसर्गे "तयोरन्यः[3] पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो-भिचाकशीति" इतिवदभिमानाभावेन न संसर्गिणां दुःखयोगः, अत एव व्रीह्यादिषु लूयमानेषु कण्ड्यमानेषु पच्यमानेषु भक्ष्यमाणेषु च तदभि-मानिनामेवोत्क्रमणं न संसर्गिणां, यो हि जीवो यच्छरीरमभिमन्यते स तस्मिन् पीड्यमाने तत उत्क्रमतीति प्रसिद्धेः, संसर्गिणां तदभिमानित्वे तु व्रीह्यादिदेहनाशे तेषां देहिनामप्युत्क्रान्तेरवश्यम्भावाद् रेतःसिग्यो-गादिना पुनस्तेषां जन्माभिधानं न संभवेत्,

एवं च व्रीह्यादिसंश्लेपरूपजन्मनः पापफलत्वाभावेन नाशुद्धं तदिति सिद्धम्।

---

१ उभयोः=भोक्तृत्वेन व्रीह्यादिशरीरवतः, अवरोहतश्च व्रीह्यादिसंसर्गिणः।

२ व्रीह्यादिभावापत्त्युत्तरं रेतःसिग्योगेन योनिं प्रविश्य गर्भाशयगतानामुत्तरत्र 'रमणीयचरणा' इत्येवं सुकृतवतामपि जन्मकीर्तनादित्यर्थः।

३ यथा समानेपि जीवेश्वरयोरन्तःकरणसंसर्गे देहसंबन्धे वा तयोरेको जीव-स्तदभिमानित्वेन तत्प्रयुक्तं फलं भुङ्क्तेऽन्यस्तु कूटस्थः सन् साक्षितया प्रकाशते एवं समानेपि व्रीह्यादिसंसर्गे तदभिमानिनो लवनकण्डनपेषणादिजन्यं दुःखमनु-भवन्तीतरे तु तत्संसर्गिणो न तत्प्रयुक्तं दुःखमनुभवन्तीत्यर्थः।

यद्वा पशुहिंसादियोगादशुद्धं वैदिकं कर्मेति तस्यानिष्टमपि फलं कल्प्यत इत्यतो मुख्यमेवावरोहतां जन्म न श्लेषमात्रमित्याशङ्कायाम्—

"अशुद्धमिति चेन्न शब्दाद्" इति सूत्रम्,

भवतु वैदिकं कर्माशुद्धं तथापि न तत्फलं व्रीह्यादिजन्म कुतः शब्दाद्—"यावत्संपातमुषित्वा"[1] इति श्रुतौ यावदिति शब्दाद् "प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययं[2] तस्माल् लोकात् पुनरेत्यस्मै लोकाय कर्मणे" इति श्रुतौ यत्किञ्चेह कर्म कृतं तस्यान्तं प्राप्येति शब्दाच्चेहानुष्ठितसाङ्गयागादेः कृत्स्नकर्मणः तत्र भोगेन क्षयित्वश्रवणान्न यागाङ्गहिंसाजन्यपापप्रयुक्तं व्रीह्यादिजन्मेत्यर्थः,

अयं भावः—यद् यदङ्गतयाऽनुष्ठीयते तत् तत्साहित्येनैव फलं जनयति न स्वातन्त्र्येणेति हि समयः, एवं च प्रधानयागाङ्गतयानुष्ठितं पशुवधसोमोच्छिष्टभक्षणादिकं प्रधानकर्मविपाकस्वर्गभोगसमसमयमेवान्तराऽन्तरा दुःखधारां प्रसोतुं पारयति न ततः पृथक्त्वेन,

अत एवाश्वमेधशतफलकस्वाराज्यभोगसमय एवेन्द्रादेरनेकशो रावणवृत्रासुरमहिषासुरादिभ्यो दुःखधारा श्रुतिपुराणादिषूपवर्णिता सङ्गता भवति—

पञ्चशिखाचार्यैरपि 'स्वर्गेप्यपकर्षमल्पमनुभविष्यति' इति वाक्येन स्वर्गभोगसमय एव हिंसादिजन्यपापप्रयुक्तोऽल्पो दुःखप्राप्तिरूपोऽपकर्षोऽभिहितो न स्वातन्त्र्येण

एवं च यागीयहिंसाफलस्य दुःखस्य स्वर्ग एव भुक्तत्वान्न तत्प्रयुक्तं व्रीह्यादिजन्मापि तु सञ्चितसुकृतदुष्कृतवशेन पुनर्जन्मग्रहणाय द्वारभूतः व्रीह्यादिसंश्लेषरूप एवाभ्युपेय इति ध्येयम्—

केचित्तु[3] "शारीर आत्मा प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जेद् याति" इति श्रुत्यनुसारेणेश्वराधिष्ठितानामेव जीवानामारोहावरोहौ भवत इति स्थिरी-

---

१ सम्पतति=गच्छति अस्माल् लोकादमुं लोकं फलोपभोगाय येन कर्माशयेन स सम्पातः चन्द्रलोकप्रापकं कर्मेति यावद्,

२ अयं नरो यत्किञ्चिदिह लोके कर्म करोति तस्य अन्तं=फलं परलोके प्राप्य पुनर्जन्मग्रहणद्वाराऽन्यत्कर्मानुष्ठानायास्मै लोकाय एति=गच्छतीत्यर्थः,

३ स्वमतेन सूत्रस्यार्थद्वयमभिधाय मतान्तरेणार्थान्तरमाह—"केचित्तु" इति=विज्ञानामृतकारा विज्ञानभिक्षव इत्यर्थः,

कृत्य (ननु अशुद्धं नरकाद्यवरोहि पापिजीवजातं तत्र परमेश्वराधिष्ठानं नोचितमिति चेन्न शब्दाद्=न हि शब्दसिद्धेऽर्थे तर्कविरोधो दूषणमित्यर्थः) इत्येवं सूत्रार्थयन्ति—

अन्ये[1] तु–यातनाजीवानामशुद्धत्वादशुद्धमन्नं स्यात् तथा च कथं योग्य-देह इति चेन्न शब्दाद्="देवा अन्नं जुह्वति तस्या आहुते रेतः संभवति" इति देवैराहुतिरूपेण होमवचनाच् छुद्धत्वम्, अन्नस्य हि संस्कारेणैव शुद्धिर् अन्यथा यावज्जीवं का गतिः स्यात्, तस्मात् संस्कारशब्दाच् छुद्धमेवान्नम्, इत्येवं व्याचक्षते ।

(यत्तु–अस्मिन्नेव सूत्रे श्रीभाष्ये रामानुजाचार्य्यैः "स्वर्गोपभोगफलमिष्टा-दिकर्मैवाशुद्धं=पापमिश्रम् अग्नीषोमीयादिहिंसायुक्तत्वाद् अत इष्टादीनां पापमिश्रत्वेनाशुद्धियुक्तानां स्वर्गेऽनुभाव्यं फलं स्वर्गेऽनुभूय हिंसांशस्य फलं व्रीह्यादिस्थावरभावेनानुभूयते स्थावरभावं च पापफलं स्मरन्ति "शारीरजैः कर्मदोषैर्याति स्थावरतां नर" इति, अतो व्रीह्यादिभावेन भोगायानुशयिनो जायन्ते) इत्याशङ्कामुत्थाप्य (तन्न कुतः शब्दाद्=अ-ग्नीषोमीयादेः संज्ञपनस्य[2] स्वर्गलोकप्राप्तिहेतुतया हिंसात्वाभावशब्दात्, प-शोर्हि संज्ञपननिमित्तां स्वर्गलोकप्राप्तिं वदन्तं शब्दमामनन्ति "यज्ञे हिं-सितः पशुर्दिव्यदेहो भूत्वा स्वर्गं लोकं याति" इति, शब्दार्थं कुर्वन्ति "हिरण्यशरीर ऊर्ध्वं स्वर्गं लोकमेति" इत्यादिकम्, अतिशयिताभ्युदयसा-धनभूतो व्यापारोऽल्पदुःखदोपि न हिंसा प्रत्युत रक्षणमेव, तथा च मन्त्र-वर्णः " न वा उ[3] एतन् म्रियसे न रिष्यसि देवान् इदेषि पथिभिः सुगेभिः, यत्र यन्ति सुकृतो नापि दुष्कृतस्तत्र त्वा देवः सविता दधातु" इति,

---

१ अणुभाष्यकारा वल्लभाचार्य्याः,

२ संज्ञपनम्—आलम्भनं, हिंसनमित्यनर्थान्तरम्,

३ यजुर्वे. अ. २३ मं. १६ 'हे अश्व यत् त्वमस्माभिः संज्ञप्यसे एतत् त्वं न म्रियसे–मरणं न प्राप्नोषि न च रिष्यसि–विनश्यसि, वै–उ–निपातौ पादपूरणे, अपि तु सुगेभिः–साधुगमनैः 'सुदुरोरधिकरणे' इति गमेर्डः, पथिभिः–देवयान-मार्गैः देवान् इत्–प्रति गच्छसि, यत्र लोके सुकृतः–पुण्यात्मानो यन्ति–ग-च्छन्ति दुष्कृतश्च न गच्छन्ति तस्मिन् लोके सविता देवस्त्वां दधातु=स्थापयतु' इति मन्त्रार्थः,

चिकित्सकं च तादात्विकाल्पदुःखकारिणमपि रक्षकमेव वदन्ति पूजयन्ति च तज्ज्ञा) इत्येवं सौत्रं शब्दादित्यंशं व्याख्याय हिंसनीयाननुग्राहक-प्राणवियोगकरव्यापारस्यैव हिंसात्वं न यागीयपशुप्राणवियोगानुकूलव्यापारस्य, तस्य पश्वनुग्रहकरत्वादिति बोधितं तत्तु (प्राणवियोगफलोपहितस्तदनुकूलो व्यापारो हिंसा यागीयपश्वालम्भोऽपि भवति तथेति कथं न हिंसा, यथा हि व्रणिनो व्रणच्छेदनादिकं तदनुग्राहकमपि छेदनं भवत्येव न तत्र तदनुग्राहकं यन्न भवति छेदनादि तदेव छिदिधात्वर्थ इति कल्प्यते, एवमत्रापि न हिंसनीयानुग्रहरहितं यत्प्राणवियोजनं सैव हिंसेति कल्पयितुमुचितं, ततश्च यदि यागीयपशोर् 'हिरण्यशृङ्ग' इत्यादिवचनानुसारेण स्वर्गप्राप्तिः प्रतीयते तदा सा भवतु नाम, देवताधिकरणोक्तन्यायेनार्थवादात्प्रतीयमानस्याप्यर्थस्योपगमाद् 'न वा उ एतन् म्रियसे' इत्यादिवाक्य-प्रतिपाद्यं तु तदालम्भस्याहिंसात्वं स्तुत्यर्थमारोप्यत इत्येवमुचितं प्रवृत्ति-निमित्तसद्भावेन तस्य हिंसात्वावश्यम्भवाद्) इत्येवं ब्रह्मविद्याभरणे दूषितत्वादश्रद्धेयमेव,

किञ्च—यागीयहिंसायाः पश्वनुग्रहार्थत्वेन प्रत्यवायकरत्वाभावं ब्रुवतां श्रीभाष्यकाराणां (परानुग्रहकरो व्यापारो धर्मः परपीडाकरश्च व्यापारोऽधर्म' इत्येव धर्माधर्मयोर्निर्वचनमभिमतं भाति तच्च न स्थाने—तपःस्वाध्यायजपादीनां परानुग्रहकरत्वाभावेन धर्मत्वाभावप्रसङ्गाद्, मद्यपानादेश्च परपीडाकरत्वाभावेनाधर्मत्वाभावप्रसङ्गाच्च, परकीयरमणीमनःसन्तोषाय परकीयरमणीरमणे धर्मोत्पादापत्तेश्चातो विहितव्यापारस्य धर्मत्वं निषिद्धव्यापारस्य चाधर्मत्वमित्येवास्थेयं न श्रीभाष्यकृदभ्यूहितं, स्पष्टं चैतत्—

---

१ अस्यार्थस्य लोकसिद्धत्वमाह—"चिकित्सकं च" इति, हिंसात्वे सति ह्युक्त-दोषसम्भवः हिंसात्वाभावादेव दूरोत्सारितो दोषः, अयमेव समीचीनो दुष्प्रधर्षणः परिहारः, अतः श्येनाग्नीषोमीयवैषम्यं चेदमेवाल्पदुःखदोऽप्यतिशयिताभ्युदयसाधको व्यापारो रक्षणम् अनर्थोदर्को व्यापारो हिंसेत्यर्थ, इत्येतद् भाष्यव्याख्याने सुदर्शनाचार्य्यः,

२ अर्थवादवाक्यानां न स्वार्थे प्रामाण्यमपि तु विधेयनिषेध्यस्तवननिन्दनद्वारा प्रवृत्तिनिवृत्तिरूपे तात्पर्य्ये प्रामाण्यमिति कर्ममीमांसकाः, प्रमाणान्तराविरुद्धस्वार्थेऽप्यर्थवादवाक्यानां प्रामाण्यमिति प्रथमाध्यायतृतीयपादेऽष्टमदेवताधिकरणे ब्रह्म-मीमांसका इति भावः,

" अनुग्रहाच्च धर्मत्वं पीडातश्चाप्यधर्मता, २४३
वदतो जपसीध्वादिपानादौ नोभयं भवेत्,
क्रोशता हृदयेनापि गुरुदाराभिगामिनां २४४
भूयान् धर्मः प्रसज्येत भूयसी ह्युपकारिता" इत्यादिना चोदनासूत्रे श्लोकवार्तिक इति तत्रैव निरीक्षणीयम्—

अपि च—एवं कथंचिद् यागीयहिंसाया अहिंसात्वापादनेपि सोमोच्छिष्टभक्षणस्य सौत्रामण्यादिषु सुराग्रहणादीनां चानुच्छिष्टभक्षणत्वासुराग्रहणत्वाद्यापादनस्य वक्तुमशक्यत्वात् तत्प्रयुक्ताशुद्धेर्दुर्वारत्वात्कथं यागादेरविशुद्धियुक्तत्वविरहाभिधानमित्यपि ते प्रष्टव्याः,

किञ्च—केनचिन्निमित्तेन शप्तेन धर्मेण मृगयोनिमापन्नेन (यदि त्वां कश्चिद् यज्ञे हन्यात् तदा तव मृगत्वं नङ्क्ष्यति) इति शापान्तं बुद्ध्वा श्यामाकनीवारादिचरुणा देवयजनं कुर्वाणं कंचिद् वनवासिनं सत्यनामानं ब्राह्मणमुपसृत्य छलेन (पशुपुरोडाशं विना यज्ञोयमङ्गहीनो न स्वर्गफलकः पशुक्रयणासामर्थ्ये तु "मां भोः प्रक्षिप होत्रे त्वं गच्छ स्वर्गमनिन्दित") इत्येवं प्रलोभ्य स्वकीयहिंसायां प्रवर्तितः सः, प्रवृत्तस्य च तस्यानुष्ठितं बहु तपो नष्टमित्येवमाख्यायते भारते, यदि च हिंसनीयानुग्रहकरव्यापारस्यैव प्रत्यवायकरत्वं नेतरस्येत्यभ्युपेयेत तर्हि कथमेतत्संगच्छेत, तदवश्यं चैतन्मन्तव्यं यद् यागीयापि हिंसाऽनर्थजनिकेति,

एवं विचख्नुर्गीतेऽपि "अव्यवस्थितमर्य्यादैर्विमूढैर्नास्तिकैर्नरैः, संशयात्मभिरव्यक्तैर्हिंसा समनुवर्णिता, सर्वकर्मस्वहिंसां हि धर्मात्मा मनुरब्रवीत्" इति हिंसां निन्दित्वा "पायसैः सुमनोभिश्च तस्यापि यजनं मतम्" इत्येवं सात्त्विकं यजनमेवाभिहितं न हिंसादिमिश्रम् ।

---

१ 'विषयानुरूपफलदायिवादिना परस्यात्मनो वा पीडानुग्रहनिबन्धनं धर्माऽधर्मत्वमाश्रितं, ततश्च, जपे सुरापाने च परोपकारापकाराभावाद् धर्माधर्मत्वे न स्यातामित्याह "अनुग्रहाच्च" इति, गुरुदाराभिगमश्च धर्मः स्यादित्याह 'क्रोशता" इति, यद्यपि गुरुदाराभिगामी हृदयक्रोशमल्पमात्मनोऽपकारं करोति तथाप्युपकारभूयस्त्वाद् धर्म एव भूयान् स्याद् इत्येतदर्थ इति न्यायरत्नाकरकारः,

२ शान्तिपर्वणि मोक्षधर्मे २७२ एतदध्याये "तस्य तेनानुभावेन मृगहिंसात्मनस्तदा । तपो महत्समुच्छिन्नं तस्माद् हिंसा न यज्ञिया" इत्येतदष्टादशे श्लोके 'यज्ञियापि हिंसा न धर्माय' इति स्पष्टमभिधानान्न तद्विरुद्धं व्याससूत्रार्थवर्णनं समीचीनमिति भावः,

(३) महाभा० मोक्षध० अ० २६५ श्लो० ५–

तथा पितापुत्रसंवादेपि "तातैतद् बहुशोऽभ्यस्तं जन्मजन्मान्तरेष्वपि, त्रयीधर्ममधर्माढ्यं न सम्यक् प्रतिभाति मे" इत्यादिना यागादेरधर्मयुक्तत्वमभिहितं भारते,

तुलाधारजाजलिसंवादेपि व्यासदेवेनाहिंसैव समनुवर्णिता भारते,

एवं च स्पष्टार्थकव्यासवचोविरुद्धं शाङ्कराणां रामानुजीयानां माध्वानां[1] च व्याससूत्रार्थवर्णनमसमीचीनमिति निष्पन्नम्,

अन्ये तु[2]—'अग्नीषोमीयं पशुमालभेत' इत्यत्रालम्भनं न हिंसनं किन्तु स्पर्शः, अग्निहोत्रप्रकरणपठिते 'वत्समालभेत' इति वाक्ये स्पर्शार्थकत्वनिर्णयाद्, हिंसा त्वङ्गयागविशसनप्रकारोपदेशाभ्यामाक्षेपलभ्या[3] एवं चाक्षेपलभ्यार्थेन विरोधेपि वेदस्याप्रामाण्यप्रसक्त्यभावेन तत्संकोचे न मानम्, अन्यतराप्रामाण्यभीत्या हि सङ्कोच, इत्येवं व्यवस्थापनेन 'न हिंस्याद्' इति सामान्यविधेः सङ्कोचं वारयन्ति ।

ननु 'यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा, यज्ञोऽस्य भूत्यै सर्वस्य तस्माद् यज्ञे वधोऽवधः'[4] 'या वेदविहिता हिंसा नियतास्मिँश्चराचरे, अहिंसामेव तां विद्याद् वेदाद् धर्मो हि निर्बभौ'[5] इति मनुवाक्यैर्यागीयहिंसाया अहिंसात्वबोधनेन पापाभावप्रतिपादकैः (निन्दाप्रायश्चित्तोपदेशासमभिव्याहृतविधिवाक्यबोध्यप्रवर्तनायाः[6] स्वविषयप्रवृत्तिविषये धात्वर्थे सामान्य-

१ मध्वाचार्य्यैरपि 'हिंसारूपत्वात्पापसम्भवाद् दुःखं भवत्विति चेन्न शब्दविहितत्वाद् 'हिंसा त्ववैदिकी या तु तयानर्थो ध्रुवं भवेद्, वेदोक्तया हिंसया तु नैवानर्थः कथञ्चन" इत्येवं व्याससूत्रार्थकरणात् तदीयोप्यर्थः शाङ्करभाष्यानुसारीति भावः,

२ शाब्दिकमञ्जूषाकारा नागोजिभट्टाः ।

३ विशसनं—हननं, तत्प्रकारोपदेशश्च "हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस" इत्यादिश्रुत्युक्तो बोध्यः,

(४) अ. ४ श्लो. ३९

(५) अ. ४ श्लो. ४४ ।

६ 'श्येनेनाभिचरन् यजेत' इति वाक्यबोध्यप्रवर्तनाया अभिचारस्योपपातकत्वेन गणनान्निन्दासमभिव्याहृतत्वेन "अभिचारहीनं च त्रिभिः कृच्छ्रैरिति प्रायश्चित्ताम्नानेन च प्रायश्चित्तोपदेशसमभिव्याहृतत्वेन च न तस्याः स्वप्रवृत्तिविषये धात्वर्थेऽनर्थहेतुत्वप्रतिक्षेपकत्वमिति भावः.

तोऽनर्थहेतुत्वप्रक्षेपकत्वम्) इति कल्पनेन 'न हिंस्याद्' इति सामान्यनिषेधस्य वैधहिंसातिरिक्तहिंसापरत्वमास्थीयते, आक्षेपलभ्याया अपि हिंसाया विधितात्पर्य्यविषयत्वेन तत्राप्यनर्थहेतुत्वप्रतिक्षेपः सूपपादः, अत एव "हिंसा चैवाविधानतः[1]" इत्यवैधहिंसैव पापजनिकोक्ता मनुना न वैधहिंसा, छान्दोग्यश्रुतिरपि "अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्य" इति तीर्थपदाभिधेययज्ञादिभ्योतिरिक्तस्थल एवाहिंसामुपदिशति, अत एव[2] मरणान्तप्रायश्चित्ताहवाभिमुखहननोचितदण्डरूपचौरहननादीनां न पापजनकत्वं, शुद्ध्यर्थं विहितमरणे तस्यायुक्तत्वाद्[3] 'न दोषो हिंसायामाहवे[4]' इति स्मृतेश्च चौराद्यवधे राज्ञो दोषश्रवणाच्च[5], तस्मादगर्हितहिंसातिरिक्तविषयोयं 'न हिंस्याद्' इति निषेधः, अगर्हिता चानुपदिष्टप्रायश्चित्तिका हिंसेति चेद्,

अत्राहुर्मयूखाकाराः—(मनुवचनेऽवध इत्यादावनुदरा कन्येतिवदल्पार्थे नञः सत्त्वाद्, अन्यथा घटोऽघट इतिवदस्याबोधकत्वेनावधपदस्य पापाजनकत्वलक्षणापत्तेः, यज्ञानुपक्रम्य 'अहिंसा परमो धर्मो गीतो वै मनुना पुरा' इति ब्रह्मवैवर्तप्रथमखण्ड उक्ततया च मदुक्तस्यैवौचित्याच्च, परमत्वं च पापाजनकत्वेनास्य, अल्पीयःप्रायश्चित्तेन परिहर्तुं शक्यत्वात् तत्र न द्वेषः, किञ्च महतः फलस्य कामनया क्षुद्रे तत्र न द्वेषः, पशुहिंसाजन्यपापस्याल्पप्रायश्चित्तोपदेशेन[6] बहुव्ययायाससाध्ययागजन्यस्वर्गात्

---

१ "अदत्तानामुपादानं हिंसा चैवाविधानतः । परदारोपसेवा च शारीरं त्रिविधं स्मृतम्" अ. १२ श्लो. ७

२ अतएव=निन्दाप्रायश्चित्तोपदेशसमभिव्याहृतहिंसाया एव पापजनकत्वं न निन्दाद्यसमभिव्याहृतहिंसाया इत्यङ्गीकारादेवेत्यर्थः.

३ 'सुरापस्य ब्राह्मणस्योष्णामासिञ्चेयुः सुरामास्ये मृतः शुद्ध्येद्' इति शुद्ध्यर्थं विहितात्महननस्य पापजनकत्वाभिधानस्यायुक्तत्वादित्यर्थः,

४ परस्पराह्वानपूर्वके धर्मयुद्धे योद्धुमभिमुखस्य हनने दोषाभावस्य कण्ठतएवोक्तेश्चाहवाभिमुखहननस्य न पापजनकत्वमित्यर्थः,

५ अदण्ड्यान् दण्डयन् राजा दण्ड्याँश्चैवाप्यदण्डयन्, अयशो महदाप्नोति नरकं चैव गच्छति' 'स्तेनः प्रकीर्णकेशो मुसली राजानमीयात्कर्माचक्षाणः पूतो वधमोक्षाभ्याम्, अघ्नन्नेनस्वी राजा" इति राज्ञो दण्डरूपचोरहननाननुष्ठाने स्तेनाहनने च दोषस्मरणात् तादृशहननेपि दोषाभावः सिद्ध एवेत्यर्थः,

६ "खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा । सङ्करीकरणं ज्ञेयं मीनाहिमहिषस्य च" इति (अ. १० श्लो. ६९) मनुना खरतुरगादिपशुहननस्य सङ्करीकरणरूप-

प्रथममेवाल्पस्य मनुना यागविषयेऽत्यल्पत्वबोधनात्, एवं च न तद्बलेन विधेः स्वविषयेऽनर्थहेतुताप्रतिक्षेपकत्वम्,

अत एव गीतायां "यज्ञानां जपयज्ञोस्मि" इत्यादिना जपयज्ञस्याहिंसारूपत्वेन प्राशस्त्यमुक्तं,

तथा "स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि, धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यत' इत्युपक्रम्य "सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ । ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि" इत्यनेन विहितेपि युद्धे पापं वदताऽतादृशस्य[1] यज्ञेपि तदुक्तप्रायमेव न चापशब्दज्ञानजाधर्मस्य कूपखानकन्यायेन सुशब्दज्ञानजधर्मेण नाशः फलान्तरं चेति परस्पशायाम्[2] उक्तं, कूपखानकस्तत्खननवेलायां मृदालिप्तस्ततो जलं लब्ध्वा तं लेपं दूरीकरोति फलान्तरं च लभते तेन न्यायेन यज्ञजधर्मेण तत्पापनाशः फलान्तरलाभश्चेति न दोष इति वाच्यम्, अपशब्दज्ञानादधर्मस्यावाचनिकत्वेन केवलं वैपरीत्यमात्रेण कल्प्यस्यातिस्वल्पत्वादुत्कृष्टेन साधुशब्दज्ञानजधर्मेण नाशेपि न हिंस्यादिति वचनबोधितपापस्य तेन धर्मेण वचनं विना नाशायोगाद्, उक्तगीतावाक्याच्च, अत एव इन्द्रादेः शताश्वमेधफलस्वर्गभोगसमयेऽनेकशो रावणमहिषासुरादिभ्यो दुःखधाराः श्रुतिपुराणादिषूपवर्णिताः, यज्ञान्तर्गतहिंसादिजन्यपापफलस्य यज्ञफलभोगान्तरुत्पत्तेरुपपत्तिसिद्धत्वाद्, एतेन (अध्वर इति यज्ञनाम ध्वरतिर्हिंसाकर्मा तत्प्रतिषेधोध्वर) इति निरुक्तम् "अहिंस्र" इति तद्भाष्यमपि व्याख्यातं, नञोऽल्पार्थत्वात्, अत एव "तस्मादभ्युदययोगादहिंस्र इत्युपपद्यत" इति तद्भाष्य उपसंहृतम्, उक्तं च—"स्वर्गेपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृत्तिर्" इति, "अहिंसन्

पापत्वमभिधाय "सङ्करापात्रकृत्यासु मासं शोधनमैन्दवम्" (श्लो. १२६) इति चान्द्रायणानुष्ठानरूपाल्पप्रायश्चित्तोपदेशेनेत्यर्थः,

१ "नैवं पापमवाप्स्यसि" इत्यनेन (एवं फलाभिसन्धिशून्यतयाऽनुष्ठिते पापं न प्राप्नोषि) इत्युक्त्याऽर्थादेतद् गम्यते 'सकामकृते पापं प्राप्नोषि' इति, एवं च अतादृशस्य=सकामस्य यज्ञेपि तत्-पापसत्त्वमुक्तप्रायमित्यर्थः,

२ महाभाष्ये प्रथमाह्निके भगवता पतञ्जलिना "किं पुनः शब्दज्ञाने धर्म आहोस्वित्प्रयोगे" इति पक्षद्वयमुत्थाप्य "ज्ञाने धर्म इति चेत् तथाऽधर्मोपि प्राप्नोति यो हि शब्दान् जानात्यपशब्दानप्यसौ जानाति यथैव शब्दज्ञाने धर्म एवमपशब्दज्ञानेप्यधर्म" इत्याक्षेपे "शब्दप्रमाणका वयं यच्छब्द आह तदस्माकं प्रमाणं शब्दश्च शब्दज्ञाने धर्ममाह नापशब्दज्ञानेऽधर्ममाह" इति समाधाय "अथवा कूपखानकवदेतद् भविष्यति" इति समाधानान्तरमुक्तमित्यर्थः,

सर्वभूतानि" इति श्रुतिस्त्ववैधहिंसात्यागस्येष्टसाधनत्वं वैध्याश्च तत्त्वमाह नतु वैध्या अनिष्टसाधनत्वाभावं, हिंसाविधयोपि हि हिंसायाः स्वर्गसाधनत्वमात्रमाहुर्नत्वनर्थहेतुताप्रतिक्षेपमपि, अल्पायुष्ट्वाद्यनिष्टबोधकस्मृतिविरोधात्, तदुक्तं पातञ्जलभाष्ये—"यदि कथञ्चित्पुण्यावापगता हिंसा भवेत् तदा तत्र सुखप्राप्तौ भवेदल्पायुर्" इति, अत एव क्षत्रियाणामपि युधिष्ठिरादीनां स्वधर्मयुद्धेन जातज्ञातिहिंसायां प्रायश्चित्तश्रवणं, तथा च भागवते मुचुकुन्दं प्रति कृष्णवाक्यं 'क्षत्रधर्मे स्थितो जन्तून्व्यवधीर्मृगयादिभिः, समाहितस्तत्तपसा जह्यघं मदुपाश्रित' इति, आदिना युद्धम्) इति।

अत्रेदं बोध्यं—शुद्ध्यापादकदण्डप्रायश्चित्तरूपहननस्य पापाजनकत्वेप्यदण्डनीयाप्रायश्चित्तिपशुहननस्य पापाजनकत्वे मानाभावान्न तद्दृष्टान्तबलेन यागीयपशुहननस्य पापाजनकत्वमास्थातुं युक्तम्,

वस्तुतस्तु—तैत्तिरीयश्रुतौ "परागावर्ततेऽध्वर्युः पशोः संज्ञप्यमानात्" इति पापभयेनाध्वर्य्योः पशुहननपराङ्मुखत्वाभिधानात्, "रिच्यत इव वा एषः प्रेव वा रिच्यते यो याजयति प्रति वा गृह्णाति याजयित्वा प्रतिगृह्य वानश्नन् त्रिः स्वाध्यायमधीयीत" इति ऋत्विजां प्रायश्चित्तोपदेशाच्च "यत्पशुर्मायुमकृतोरो वा पद्भिराहते, अग्निर्मा तस्मादेनसो विश्वान् मुञ्चत्वंहस' इति मन्त्रवर्णे पशुहननजन्यपापविमोचनायाग्निप्रार्थनाश्रवणाच्च यागीयहिंसाया अपि पापरूपत्वेन प्रायश्चित्तोपदेशसमभिव्याहृतत्वेन गर्हितत्वाच्च "अगर्हितहिंसातिरिक्तविषयोयं न हिंस्यादिति निषेध" इत्यभ्युपगमेपि न निस्तार इत्यलमतिविस्तरेण,—

एवं हिंसाद्यविशुद्धियुक्तत्वेन यागादेर्हिंसादिजन्यदुःखसंभिन्नस्वर्गरूपसुखसाधनत्वेन दृष्टोपायसाम्यमभिधाय धर्मान्तरेणापि साधर्म्यमाख्यातुं "क्षयातिशययुक्त" इत्यभिहितं मूले, तत्र क्षयातिशयदोषयोरुपेये सत्त्वेप्युपाये तद्विरहात्कथमुपायस्य क्षयातिशययुक्तत्वाभिधानमित्यत आह—

---

१ यो. सू. ३४ पा. २

२ मृगयादिभिरित्यत्रादिपदेन युद्धं गृह्यते—तथाचाखेटे रणे च यत्प्राणिहननमाचरितं तत्प्रयुक्तमघं मत्परायणः सन् तपसा विनाशयेत्युक्त्याऽऽहवाभिमुखहननेपि प्रत्यवायोस्तीति बोधितं, यदि नाम 'न दोषो हिंसायामाहवे' इति कण्ठतोऽभिहितेपि दोषाभावे प्रत्यवायसत्ताभ्युपयेते तदा किमु वचनीयं कण्ठतो दोषाभावानभिधानस्थले प्रत्यवायोस्तीति भावः,

३ हन्यमानः पशुर्यद् मायुम्=आर्तनादं कृतवान् यच्च पीडया पादाभ्यां वक्षःस्थलं ताडितवान् तत्पशुपीडाकरपापादग्निर्मा मोचयत्विति भावः,

क्षयातिशयौ च फलगतावप्युपाय उपचरितौ, क्षयित्वं च स्वर्गादेः सत्त्वे सति कार्य्यत्वादनुमितम् । ज्योतिष्टोमादयः स्वर्गमात्रस्य साधनं वाजपेयादयस्तु स्वाराज्यस्येत्यतिशययुक्तत्वम्, परसम्पदुत्कर्षो हि हीनसम्पदं पुरुषं दुःखाकरोति,

---

"क्षयातिशयौ च" इति, क्षयः=नाशप्रतियोगित्वम्, अतिशयः—तारतम्यं, न्यूनाधिक्यमिति यावद्, यद्यपि क्षयातिशयौ फलगतौ=यागफले स्वर्ग एव वर्तमानौ नतु तदुपाये यागे तथापि उपाये=स्वर्गसाधने यागे, उपचरितौ= उपचारेणाभिहिताविल्यर्थः, उपचारश्चात्र स्वाश्रयजनकत्वरूपं, उपायोपेययोरभेदविवक्षा वा ।

एवं च यथा लौकिक उपायः क्षयिसातिशयसुखजनकस्तथा वैदिकोपि यागाद्युपायस्तथाविधसुखजनक इति सिद्धमानुश्रविकस्य दृष्टसाम्यमिति भावः ।

"तद्यथेह" इत्यादिश्रुत्या स्वर्गादेः सिद्धेपि क्षयित्वे दार्ढ्याय तत्र तर्कसहकारमप्याह—"क्षयित्वं च" इति, "स्वर्गादिकं क्षयित्ववद् भावत्वे सति कार्य्यत्वाद् घटादिवद्" इत्यनुमानेन स्वर्गादेः क्षयित्वमवगतमित्यर्थः, ध्वंसे व्यभिचारवारणाय 'सत्त्वे सति' इति विशेषणम्—

स्वर्गादेः क्षयित्वं प्रसाध्य सातिशयत्वं प्रदर्शयति—'ज्योतिष्टोमादय' इति, स्वर्गमात्रस्य=देवभावावाप्तिपुरस्सरामृतपानाप्सरोविहारादिरूपसुखमात्रस्य साधनं ज्योतिष्टोमादयः, स्वाराज्यस्य=स्वर्गाधिपत्यरूपदेवेन्द्रभावस्य साधनं वाजपेयादय इत्यस्ति यागादेरतिशययुक्तत्वमित्यर्थः ।

नन्वस्तु सातिशयत्वमेतावता कथं दुःखसम्भिन्नसुखजनकत्वं यागादेरित्यत आह 'परसम्पदुत्कर्षो हि' इति ।

हि=यतोऽन्यदीयैश्वर्य्याधिक्यमुपलभ्यमानं न्यूनैश्वर्य्यशालिनं जनं दुःखाकरोति=पीडयति अतोऽतिशययुक्तत्वमपि दुःखकरमित्यर्थः,

एवं च स्वर्गादेरपि क्षयातिशययुक्तत्वेन दुःखसंभिन्नत्वात् तदुपाययागादेर्नात्यन्तिकसुखजनकत्वमिति सिद्धमानुश्रविकस्यापि कर्मकलापस्य दृष्टोपायसाम्यमिति बोधितम् ।

स्पष्टीकृतं चैतद् भगवता व्यासेनापि"एवं लोकं परं विद्यान्नश्वरं कर्मनिर्मितं,

---

१ स्वौ–क्षयातिशयौ, तदाश्रयः स्वर्गादिः, तज्जनकत्वं यागादेरित्यर्थः ।

२ 'दुःखात्प्रातिलोम्ये' इति सूत्रेण डाचि दुःखाकरोतीति साधुः,

"अपाम सोमममृता अभूम" इति चामृतत्वाभिधानं चिरस्थेमानमुपलक्षयति,

यदाहुः—"आभूतसंप्लवं स्थानममृतत्वं हि भाष्यत" इति—

सतुल्यातिशयध्वंसं यथा मण्डलवर्तिनां" "श्रुतं च दृष्टवद् दुष्टं स्पर्द्धाऽसूयात्ययव्ययैः, बह्वन्तरायकामत्वात् कृषिवच्चापि निष्फलम्" इत्येवं भागवते।

ननु स्वर्गस्य क्षयित्वे प्रागुक्ताया अमृतत्वबोधिकायाः श्रुतेः का गतिरित्यत आह "अपाम सोमममृता" इति, चिरस्थेमानं=चिरकालस्थायित्वम्, अमृता इत्यत्र नञोऽल्पार्थकत्वेन अल्पं=मर्त्यापेक्षया न्यूनं मृतं=मरणं येषां तेऽमृताश्चिरकालस्थायिन इत्यर्थः,

"नाकस्य पृष्ठे सुकृतेनुभूत्वेमं लोकं हीनतरं वा विशन्ति" 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति' इति श्रुतिस्मृतिभ्यां स्वर्गिणामधःपतनरूपमरणसत्त्वावगमेनैतादृशार्थस्यैवात्रौचित्यमिति भावः,

एतदेव विष्णुपुराणवाक्येन द्रढयति—'यदाहुर्' इत्यादिना—

'आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते, त्रैलोक्यस्थितिकालोयमपुनर्मार उच्यते' इति हि समग्रः श्लोकः 'आभूतसंप्लवं=ब्रह्माहःपर्यन्तं यत् स्थानं तदेवामृतत्वमुपचारादुच्यते, उपचारबीजमाह 'त्रैलोक्ये'ति अपु-

---

१ भाग० स्कं० ११ अ० ३ श्लो० २०। जनकं प्रति प्रबुद्धाख्ययोगेश्वरवाक्यमिदं, 'सतुल्यातिशयध्वंसं–सह तुल्येनातिशयेन ध्वंसेन च वर्तमानम्, अतस्तुल्ये स्पर्धा अतिशयेऽसूया ध्वंसालोचनैर्भयादिकं चापरिहार्यमित्यर्थः, यथा खण्डमण्डलपतीनां स्पर्धादि तद्वत्' इत्येतट्टीकायां श्रीधरः,

२ भा० स्कं० ११ अ० १० श्लो० २१। उद्धवं प्रति श्रीकृष्णवाक्यमिदं, श्रुतं=स्वर्गादि तदपि दुष्टं, स्पर्द्धा–परसुखासहनम्, असूया=परगुणे दोषाविष्करणम्, अत्ययः=नाशः, व्ययः=अपक्षयः तैर्दुष्टं, 'यद्वा व्ययो=नाशः, अत्ययः=अन्यस्यातिशयः, तं दृष्ट्वा तदप्राप्त्या दुःखमित्यर्थः, किञ्च बहवोऽन्तरायाः=वैगुण्यादिरूपा विघ्ना यस्मिन् कामे सुखे तस्य भावस्तत्त्वं तस्मात् कृषिर्यथा बहुविघ्ना तद्वद्' इत्येतदर्थ इति श्रीधरः,

३ विष्णुपु० अंश २ अ० ५ श्लो० ९६। पूर्वत्र 'देवयानमार्गेण जनादिलोकं गता अमृतत्वं भजन्त' इत्यभिहितं, तत्र कीदृशममृतत्वमित्याकाङ्क्षायामुक्तम्

अत एव च श्रुतिः—"न कर्मणा न प्रजया धनेन त्यागे-नैकेऽमृतत्वमानशुः, परेण नाकं निहितं गुहायां विभ्राजते यद् यतयो विशन्ति"

नमारः=पुनर्मृत्युरहितः क्रममुक्तिस्थानत्वाद्' इत्येतद् व्याख्यायां रत्नगर्भ-भट्टः, श्रीधरस्वामी च,

यागादेर्नामृतत्वप्रापकत्वमिति स्वोक्तं दृढीकर्तुमाम्नायसाक्ष्यमाह—"अत एव च श्रुतिर्" इति, यतो न यागादेरमृतत्वोपायत्वमत एव च—श्रुतिरपि तथा शास्तीत्यर्थः,

का सा श्रुतिरित्याकाङ्क्षायां कैवल्यश्रुतिमुदाहरति—"न कर्मणा" इति, कर्मणा=श्रौतेन स्मार्तेन वा कर्मकलापेन नामृतत्वम् आनशुः,=प्राप्तवन्तः पूर्वे महात्मान इति शेषः, एवं प्रजया=पुत्रेणापि न[1], एवं धनेन[2]=दैवेन मानुषेण वा वित्तेनापि नेत्यनुषङ्गः किन्तु एके=मुख्या विवेकिनः त्यागेन=त्यागसाध्येन[3] विवेकज्ञानेनामृतत्वं प्रापुरित्यर्थः,

"सोयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा, कर्मणा पितृलोको विद्यया देवलोक" इति बृहदारण्यकश्रुत्या कर्मादीनामन्यसाधनत्वेनाभिधानाच्च कर्मादीनाममृतत्वोपायत्वमिति तत्त्वम्,—

तदमृतत्वं किं स्वर्ग एव नेत्याह—"परेण नाकम्" इति, नाकं[4]=नाकपदाभिधेयस्वर्गात् परेण=परम्—उत्कृष्टं भिन्नं चेत्यर्थः, स्वर्गाद् भिन्नत्वेपि न ब्रह्मलोकवद् दूरमपि तु सन्निहितमित्याह—"निहितम्" इति, गुहायां=

'आभूतसंप्लवम्' इति, एवं च यदा ब्रह्मलोकनिवासिनामपि गौणममृतत्वं तदा किमु वक्तव्यं स्वर्गिणां गौणं तदिति बोधितम्,

१ "अमृतत्वमानशुर्" इति वक्ष्यमाणस्यानुषङ्ग, एवमग्रेपि,

२ धनं द्विविधम् अपरविद्याभिधेयम्प्राणोपासनादि दैवम्, पशुवित्तादि मानुषमिति,

३ त्यागेन=अभिमानत्यागेन एके केचिदेवामृतत्वमानशुः प्राप्तवन्तो न सर्वे, अभिमानत्यागस्य तत्त्वज्ञानजन्यतया दुर्लभत्वादित्यर्थ इति साङ्ख्यप्रवचनभाष्यकारा विज्ञानभिक्षवः, अ० १ सू० ८५।

४ नाकमित्यविद्यामुपलक्षयति—अविद्यातः परमित्यर्थ इति तात्पर्य्यटीकायां वाचस्पतिमिश्राः, स्वर्गस्योपरि, अथवा परं नाकम्—आनन्दात्मानमित्यर्थ इति दीपिकायां शङ्करानन्दाः,

५ 'निहितं गुहायामिति लौकिकप्रमाणागोचरत्वं दर्शयति इति तात्पर्य्यटीका,

तथा "कर्मणा मृत्युमृषयो निषेदुः प्रजावन्तो द्रविणमीहमानाः, तथाऽपरे ऋषयो मनीषिणः परं कर्मभ्योमृतत्वमानशुर्" इति,

---

बुद्धौ निहितं=ब्रह्मरूपेण स्थितं विभ्राजते=स्वयंप्रकाशत्वेन दीप्यते, तर्हि बुद्धिस्थत्वेनातिसुलभत्वात्सर्वैरेव कथं न प्राप्यमित्यत्राह—"यद् यतयो विशन्ति" इति, यतयः=यत्नशीलाः संन्यासिनो यत्स्वरूपभूतं तत्त्वं विशन्ति=स्वात्मतया साक्षात्कुर्वन्ति, विवेकिनः स्वरूपभूतत्वेन सन्निहितमप्यविवेकिनां दूरभूतमित्यर्थः।

एतच्छ्रुतिसमानार्थकश्रुत्यन्तरमप्यस्तीत्याह—'तथा' इति, तदेव श्रुत्यन्तरं दर्शयति "कर्मणा मृत्युम्" इति, ये प्रजावन्तः=पुत्रिणो गृहस्था द्रविणमीहमानाः=सुवर्णपशुप्रभृति मानुषं वित्तमभिलषन्तः सकामाः ये चैवंविधाः सकामा ऋषयः=वानप्रस्थास्ते सर्वे कर्मणा मृत्युमेव[1] निषेदुः=प्रापुः नामृतत्वमित्यर्थः, यथा सकामा गृहस्था वानप्रस्था वा कर्मणा मृत्युं प्रापुस्तथा तेभ्योऽपरे ये निष्कामा मनीषिणः=पुत्रवित्तादिभ्यो विरज्य संन्यासपुरस्सरं प्रकृतिपुरुषान्यताप्रत्ययशालिनस्ते ऋषयः कर्मभ्यः[2] परं कर्मकलापजन्यस्वर्गादिभ्य उत्कृष्टममृतत्वं आपुरित्यर्थः।

नन्वेवं[3] यागादिजन्यस्वर्गस्य हिंसाजन्यदुरदृष्टप्रयुक्तदुःखेन सातिशयत्वप्रयुक्तदुःखेन च सम्भिन्नत्वात् क्षयित्वेन च ग्रस्तत्वसद्भावादौपचारिकामृतत्वे कथं 'यन्न दुःखेन सम्भिन्नम्" इति श्रुत्यभिहितामृतत्वरूपस्वर्गलक्षणसङ्गतिरिति चेद्—

अत्र ब्रूमः—तत्त्वविद्याप्यनिरतिशयानन्दरूपमुख्यामृतत्वलक्षणसुखविशेषस्यैव 'यन्न दुःखेन' इति श्रुत्या स्वर्गपदार्थत्वेन लक्षितत्वाद् यागादिजन्यसातिशयसुखविशेषरूपस्वर्गे लक्षणसङ्क्रमनाभावेपि दोषाभावान्नाऽसङ्गतिरिति।

---

१ मृत्युमेव=प्रेत्यभावाख्यं पुनर्जन्मैवेत्यर्थः,—

२ यद्वा कर्मभ्य इति ल्यब्लोपे पञ्चमी, कर्माणि संन्यस्येत्यर्थः। तात्पर्य्यटीकायां मिश्रास्तु 'परं कर्मभ्य इति कर्मपरित्यागमपवर्गसाधनं सूचयति, अमृतत्वम् इति चापवर्गो दर्शित' इत्यर्थमाहुः,

३ यदुक्तं पूर्वत्र 'अत्र यद् वचनीयं तत्समाधानावसरे वक्ष्यत' इति तदेव वक्तुमारभते–"नन्वेवम्" इत्यादिना,—

अत्रेदं बोध्यं—स्वर्गशब्दो हि तत्तदर्थविशेषे तत्र तत्र प्रयुज्यमान उपलभ्यते, एकत्र तावद् "अणुः पन्था विततः पुराणो मां स्पृष्टोऽनुवित्तो मयैव, तेन धीरा अपियन्ति ब्रह्मविदः स्वर्गं लोकमित ऊर्ध्वं विमुक्ता" इत्यादौ मोक्षस्थले तत्त्ववित्प्राप्यनिरतिशयब्रह्मानन्दरूपसुखविशेषे, अपरत्र "स्वर्गकामो यजेत" इत्यादौ "नाकस्य पृष्ठे सुकृतेनुभूत्वा" इति वाक्यान्तरसहकारेण कर्मिप्राप्यनाकपृष्ठभोग्यक्षयिसुखविशेषे इतरत्र च 'चन्दनं सूक्ष्मवासांसि च स्वर्गः' इत्यादौ क्षणिकसुखसाधने मनोज्ञे चन्दनादौ, तत्र तत्त्ववित्प्राप्यो यो निरतिशयाऽलौकिकसुखविशेषः स एव स्वर्गशब्दस्य मुख्योऽर्थः, तदभिप्रायेणैव च "यन्न दुःखेन सम्भिन्नम्" इत्यादिलक्षणवाक्यम्, इतरत्र च क्वचित्[2] लक्षणावृत्त्या, क्वचित्[3] गौण्या वृत्त्या स्वर्गशब्दस्य प्रयोगः,

तथाचाहुरप्पयदीक्षिताः "निरतिशयब्रह्मानन्दवाचकस्य स्वर्गशब्दस्य स्वर्गकामादिवाक्येऽनेकमन्त्रलिङ्गाद्यवगतनाकपृष्ठभोग्यसुखविशेषे लक्षणा, तत्प्रशंसार्थं तस्य लक्षणोपपत्तेः, चन्दनं स्वर्गः सूक्ष्मवासांसि स्वर्ग इति सुखसाधनेपि प्रशंसार्थं तत्प्रयोगदर्शनाद्, ऐहिकसुखापेक्षया नाकलोकभोग्यसुखे नितान्तोत्कर्षसत्त्वेन निरतिशयसुखवाचिना तत्प्रशंसौचित्याच्च" इति ।

यत्तु परिमले[4] "स्वर्गकामो यजेत" इत्यादावपि ब्रह्मानन्द एव स्वर्गशब्दार्थः, अन्तःकरणशुद्धिद्वारा कर्मणामपि ब्रह्मप्राप्तिसाधनत्वसम्भवाद्, 'यः कामयेत सर्वमिदं भवेयम्' इत्यादिब्रह्मप्राप्तिरूपकर्मफलश्रवणानामेवोपपादनीयत्वाद्, दर्शपूर्णमासादिष्वपि 'दिवि ज्योतिरजरमारभेताम्' इत्यादिमन्त्रलिङ्गैर्ब्रह्मप्रा-

१ अणुः=सूक्ष्मः—दुर्विज्ञानः, विततः=विस्तीर्णः—विस्पष्टतरणहेतुः, पुराणः=चिरन्तनः श्रुतिसिद्धः, पन्थाः=ज्ञानरूपब्रह्मप्राप्त्युपायः, मां स्पृष्टः=स्पृष्टवान्—मया स्पृष्ट इति वा मया लब्ध इति यावद् मयानुवित्तः=फलपर्य्यवसायिनीं परिपाकदशामानीतः, मयेति शब्दो मन्त्रद्रष्टृऋषिपरामर्शी; तेन=ज्ञानमार्गेण धीराः=प्रज्ञावन्तोऽन्येपि ब्रह्मविद इतः=शरीरपाताद् ऊर्ध्वं, स्वर्गं लोकं=प्रकाशस्वरूपं निरतिशयब्रह्मानन्दम् अपियन्ति=प्राप्नुवन्ति इति मन्त्रार्थः,

२ क्वचिद्–'स्वर्गकामो यजेत' इत्यादौ, लक्षणावृत्त्या=निरतिशयालौकिकसुखविशेषस्य स्वर्गपदाभिधेयत्वेपि भागत्यागलक्षणयाऽलौकिकसुखविशेषरूपमर्थमादाय स्वर्गशब्दस्य प्रयोग इत्यर्थः,

३ क्वचित्=चन्दनं स्वर्ग इत्यादौ, उत्कृष्टत्वमनोज्ञत्वादिकं गुणमादाय स्वर्गशब्दस्य प्रयोग इत्यर्थः,

४ परिमले अ० ४ पा० ३ पञ्चमेऽधिकरणे,

त्तिफलावगमाच्च, उक्तं च वार्तिके "स्वर्गोयमेव प्रागुक्तः[1] स्वर्गकामवचस्यपि, कर्मभिस्तदसिद्धेर्हि वेदान्तज्ञानमिष्यते" इति पक्षान्तरमुपन्यस्तं तत्तु न सर्वेषां स्वान्तमाशान्तयतीति प्रौढिवादत्वेनानादेयमेव[2] ।

'सर्वे वेदा यत्पदमामनन्ति' इति श्रुतिसाहाय्यमवलम्ब्य तात्पर्य्यतया तथाभिधाने तु यथाकथञ्चिदादेयमेव ।

केचित्तु[3] 'यन्न दुःखेन सम्भिन्नम्' इति वाक्येन नाकलोकभोग्यः क्षयी सुखविशेष एव लक्ष्यते न निरतिशयब्रह्मानन्दरूपो मोक्षाख्यः सुखविशेष इत्याशयेन 'दुःखासम्भिन्नत्वं नाम दुःखजनकाधर्माजन्यशरीरजन्यत्वम्[4], अग्रस्तत्वं च—चिरकालस्थायित्वम्, अनन्तरत्वं च—अविरललग्नप्रवाहत्वम्, अभिलाषोपनीतत्वं च—इच्छामात्रयोनित्वम् इत्येवमुपलक्षणतया तात्पर्य्यतया वा वाक्यार्थमुपवर्ण्य दुःखजनकाधर्माजन्यशरीरजन्याविरललग्नप्रवाहचिरस्थायीच्छामात्रयोनिसुखत्वं स्वर्गपदशक्यतावच्छेदकम्' इत्येवं वर्णयन्ति—

अन्ये तु[5] 'न दुःखेन सम्भिन्नं=स्वावच्छेदकशरीरावच्छेदेन स्वसमवायिसमवेतत्वसंबन्धेन दुःखवद्भिन्नं, न च यत्र द्वित्रिक्षणावस्थायिखण्डशरीरावच्छेदेन सुखमेवोत्पन्नं न तु दुःखं तदनन्तरं तच्छरीरविनाशेन तदवयवारब्धशरीरावच्छेदेन दुःखमुत्पन्नं यस्य तस्य तत् खण्डशरीरावच्छिन्नस्य सुखस्यापि स्वर्गत्वापत्तिरिति वाच्यं स्वावच्छेदकशरीरपदेन स्वावच्छेदकवृत्तिशरीरत्वव्याप्यजातिमतो विवक्षणात्, स्वावच्छेदकशरीर[illegible]त्तिद्रव्यत्वादिकमादायासम्भववार-

---

१ प्रागुक्तः=निरतिशयब्रह्मानन्दरूप इत्यर्थः,

२ 'ते तं भुक्त्वा स्वर्गलोकं विशालम्' इत्यादौ स्वर्गशब्दस्य तथाविधार्थासम्भवात्प्रौढिवादोयमिति भावः,

३ जानकीनाथभट्टाचार्य्यविरचितन्यायमञ्जर्याः टीकायां बृहत्तर्कप्रकाशाभिधायां श्रीकण्ठदीक्षिताः,

४ ननु मरणस्य दुःखनियतत्वात्स्वर्गशरीरेपि मरणजन्यदुःखसम्भवः, नच ते नराः सुखमृत्यव इत्यनेन विरोधः, तस्य दुःखाल्पत्वपरत्वाद् इति चेन्न अनुकूलतर्काभावेन मरणस्य दुःखनियतत्वे मानाभावाद् भावे वा मरणजन्यदुःखजनकाधर्मान्याधर्माजन्यशरीरजन्यसुखत्वस्य प्रवृत्तिनिमित्तत्वाद्, एतेन 'स्वर्गेपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिर्' इति 'विष्णुपुराणात्स्वर्गयोनिपुण्यक्षयशङ्कया स्वर्गे दुःखोत्पत्तेः सम्भव इति निरस्तं, तदन्यत्वेनाप्यधर्मस्य विशेषणीयत्वादित्यप्यधिकमत्रावधेयम् ।

५ रघुनन्दनभट्टाचार्यकृतैकादशीतत्त्वटीकायां राधामोहनतर्कालङ्कारा इत्यर्थः,

णाय शरीरव्याप्यत्वं जातिविशेषणं, तादृशी जातिश्चावस्थाभेदेन स्थूलकृशशरीरवृत्तिर्देवदत्तत्वादिरूपा, एवं च निरुक्तखण्डशरीरस्य तत्पूर्वापरकालीनतत्पुरुषीयदुःखावच्छेदकशरीरवृत्तिशरीरत्वव्याप्यजातिमत्त्वान्न तदवच्छेदेनोत्पन्नसुखेऽतिव्याप्तिः, 'न च ग्रस्तमनन्तरम्' इति—अनन्तरं-शरीरप्राप्त्यनन्तरं न च ग्रस्तं=सुखाभावावच्छेदकशरीरावच्छिन्नभिन्नं, शरीरोत्पत्तिकाले स्वर्गीयशरीरे सुखाभावावच्छेदकत्वेनासम्भववारणाय 'शरीरप्राप्त्यनन्तरम्' इति, स्वाश्रयपुरुषसंबन्धवैशिष्ट्यावच्छेदेन सुखाभावावच्छेदकशरीरावच्छिन्नं यत्तदन्यदिति पर्य्यवसन्नं, स्वपदं भेदप्रतियोगिपरम्, एतेन स्वर्गशरीरे सुखायोगव्यवच्छेदलाभः, अभिलाषोपनीतम्=अभिलाषमात्रेण उपनीतम्=उत्पन्नं न तु प्रयासेन, नच वनितादिसम्भोगजनितसुखस्य वनिताद्यधीनत्वेन कथमभिलाषमात्रोपनीतत्वं स्वर्गसुखेष्विति वाच्यं वनितादेरप्ययत्नलभ्यत्वात् स्वर्गजनकादृष्टस्य प्रतिबन्धकत्वादेव तन्नान्तरीयकदुःखादेरनुत्पत्तिः, अत एव न तत्र पातभीरुत्वदुःखशङ्कापि, यद्यप्येतत्त्रितयैकतमस्य स्वर्गपदार्थतावच्छेदकत्वसम्भवस्तथापि कामनाया औत्कट्यप्रयोजकतया मिलितस्यैव स्वर्गपदार्थतावच्छेदकत्वात्, एवं दुःखासम्भिन्नसुखमुद्दिश्य यागादौ कृते विच्छेदेन तादृशसुखोत्पत्त्यापि कामनाविषयसिद्ध्यापत्तिः, एवं प्रथमतः सुखं तदव्यवहितक्षणे दुःखं तदव्यवहितक्षणे सुखमितिरीत्या सुखधारासम्पत्त्यापि द्वितीयविशेषणविशिष्टस्य सम्भवस्तथाऽभिलषितसुखानुत्पत्त्या दुःखानवच्छिन्ननिकृष्टसुखधारा स्यादिति विशेषणत्रयोपादानमिति, इत्येवं परिष्कुर्वते,

मीमांसाबालप्रकाशे भट्टशङ्करस्तु 'यन्न दुःखेन' इत्यादि न स्वर्गलक्षणं विशेषणचतुष्टयव्यावर्त्याभावात् किन्तु स्वरूपकथनमात्रं विशेषणचतुष्टयेनापि हि सांसारिकसुखवैलक्षण्यमस्य ब्रुवता सुखत्वावान्तरजातिः स्वर्गत्वमुपलक्ष्यते, तद्धि दुःखमिश्रमिदं तु न तथा, एवं सांसारिकं राज्यादिसुखं वर्षाद्यवधिप्रमाणभावाच् छत्रुकृतापहारादिशङ्काग्रस्तम् इदन्त्वर्थवादादिप्रमाणतो वर्षादियावत्कालभोग्यतया प्रमितं न तन्मध्येऽपहारादिशङ्काग्रस्तं, तथेदम् अनन्तरम्=अनवच्छिन्नं सन्ततं वर्षादिपर्य्यन्तम्, इतरत्तु न तथा किन्तु सुखदुःखोभयरहितावस्थयावच्छिन्नम्, एवमिदम् अभिलाषमात्रेणोपनीतम्=उपस्थितं न स्रक्चन्दनवनितादिविषयापेक्षम् इतरत्तु विषयापेक्षमेव

१ एतन्मतद्वये नाकलोक एव 'यन्न दुःखेन संभिन्नम्' इति वाक्येन स्वर्गपदार्थोऽभिहितो न मोक्ष इति बोध्यम्,

यद्वा प्रयत्नानपेक्षाभिलाषमात्रोपनीतविषयमितरत्तु प्रयत्नोपनीतविषयम्) इत्येवंभूतार्थवादोदाहरणमिदमित्याह,

इतरे तु 'आद्यपादेनैहिकरत्यन्तकालदुःखसदृशसुखसमानदुःखनिरासः, नच ग्रस्तमित्यनेन तदधिकदुःखनिरासः, अनन्तरमित्यनेन निद्राकालवद्विषयिकोभयरहितदिनरूपकालनिरासः, अन्यथा सकलदुःखाभावस्याद्यपादेनैव प्रतिपादने सिद्धे न च ग्रस्तमित्यस्य वैयर्थ्यापत्तेर्, अभिलाषोपनीतत्वेन विषयसम्पादनक्लेशनिरास' इत्येवं व्याचक्षते,

ननु यन्मते नाकलोकानुभवनीय एव सुखविशेषः स्वर्गपदार्थो नतु निरतिशयब्रह्मानन्दरूपस्तन्मते कथं परविद्याप्रकरणे तत्त्वविदनुभवनीये निरतिशयब्रह्मानन्दे स्वर्गपदप्रयोग इति चेद्

अत्राहुर्बृहदारण्यकभाष्ये शङ्कराचार्य्याः—(स्वर्गलोकशब्दस्त्रिविष्टपवाच्यपि सन्निह प्रकरणान्मोक्षाभिधायकः[3]) इति,

विवृतं चैतद् भाष्यं वार्तिककारैः—"परमानन्द एवातः स्वर्गशब्देन गृह्यते, मोक्षप्रकरणान्नित्यः क्रियार्थोतो न गृह्यते" इति,

एतेन "कर्ममीमांसकमते स्वर्ग एव मोक्षो न तयोर्भेद" इति कस्यचिदुक्तिर्निरस्ता वेदितव्या, क्षयित्वाक्षयित्वसातिशयत्वनिरतिशयत्वाभ्यां भेदस्य प्रतीतिसिद्धत्वेनाभेदग्रहस्य भ्रान्तित्वाद् ।

अतएव[4] श्लोकवार्तिके—"सुखोपभोगरूपश्च यदि मोक्षः प्रकल्प्यते, स्वर्ग एव भवेदेष[5] पर्य्यायेण क्षयी च सः," १०५ न हि कारणवत्किञ्चिदक्षयित्वेन गम्यते, इत्यादिना जन्यस्य स्वर्गसुखस्य क्षयित्वमभिधाय, कुतर्हि

---

१ शाब्दिकमञ्जूषाकारा नागेशभट्टा इत्यर्थः ।

२ 'ब्रह्मविदः स्वर्गं लोकमितऊर्द्ध्वं विमुक्ता' इति पूर्वोक्तायां श्रुतावित्यर्थः,

३ 'यथा ज्योतिष्टोमप्रकरणे श्रुतो ज्योतिःशब्दो ज्योतिष्टोमयागविषयस्तथा मोक्षप्रकरणे श्रुतः स्वर्गशब्दो मोक्षमधिकरोति, रूढ्यङ्गीकारे ब्रह्मविद्याया निकृष्टत्वप्रसङ्गादिति भावः' इत्येतद्भाष्यव्याख्यायामानन्दविज्ञानः,

४ सम्मतश्चायं स्वर्गमोक्षयोर्भेदो मीमांसकशिरोमणेर्भट्टपादस्य कुमारिलस्वामिनोपीत्याह—"अतएव" इति, श्लोकवार्तिके—जैमिनीयदर्शनीयपञ्चमसूत्रे संबन्धाक्षेपपरिहारप्रकरणे साङ्ख्यमतनिराकरणप्रस्तावे श्लोकात्मकवार्तिक इत्यर्थः,

५ आत्मज्ञानेन मुक्तिः क्रियत इति साङ्ख्यमतं निराकर्तुं साङ्ख्याभिमतं मोक्षरूपं निराकरोति "सुखोपभोग" इति.

मुक्तिः किंस्वरूपा चेत्याकाङ्क्षायां-'[1]तस्मात्कर्मक्षयादेव हेत्वभावेन मुच्यते, १०६

नह्यभावात्मकं मुक्त्वा मोक्षनित्यत्वकारणं,
न च क्रियायाः कस्याश्चिदभावः फलमिष्यते १०७

तत्र ज्ञातात्मतत्त्वानां भोगात्पूर्वक्रियाक्षये;
उत्तरप्रचयासत्त्वाद् देहो नोत्पद्यते पुनः १०८

कर्मजन्योपभोगार्थं शरीरं नः प्रवर्तते,
तदभावे न कश्चिद्धि हेतुस्तत्रावतिष्ठते. १०९

इत्यादिना कर्मक्षयनिमित्तं शरीरसंबन्धरूपबन्धप्रध्वंसं मोक्षस्वरूपमभिधाय—

---

१ 'तस्माद्' इति, शरीरसंबन्धो बन्धः, तदभावो मोक्षः, तेन निष्पन्नानां देहानां यः प्रध्वंसाभावः, यश्चानुत्पन्नानां प्रागभावः स मोक्षः, कर्मनिमित्तश्च बन्धः कर्मक्षयादेव न भवति, १०६। सिध्यति चाभावात्मकत्वे मोक्षस्य नित्यता नत्वानन्दात्मकत्वे इत्याह—"नहि" इति, यदि त्वभावरूपस्यापि मोक्षस्य ज्ञानमेव साधनमित्युच्यते, अत आह-"न च क्रियाया" इति १०७। यदि च न क्रियाफलमभावः कुतस्तर्हि तत्सिद्धिः, ननु कर्मक्षयादेव, सत्यं, स एव तु कुतः सिध्यति, तत्राह-'तत्र ज्ञात' इति, यो हि देहाद् विविक्तमजरममरमदुःखमात्मानं जानाति तस्य देहसम्प्रयोगविरक्तस्य पूर्वकृतानां कर्मणां फलोपभोगेन क्षयात् तन्निमित्ते शरीरे पतितेऽनागतानां च कर्मणामननुष्ठानादेवासत्वाद् देहान्तरानुत्पत्तेरत्यन्तासंबन्धः शरीरेण भवति १०८। न चाऽसत्यपि कर्मणि मातापितृसंयोगादेव शरीरनिष्पत्तेर्न मोक्षसिद्धिरत आह-"कर्मजन्य" इति, धर्माधर्मसहितो मातापितृसंयोगः शरीरहेतुर्न तन्मात्रमिति. 'नः=अस्माकं शरीरमित्यन्वयः' १०९। तेन मोक्षार्थिभिर्न विवेकज्ञानमात्रेण कृतार्थं मन्यमानैः स्थातव्यं किन्त्वेवं कर्तव्यमित्याह—"मोक्षार्थी" इति, काम्यनिषिद्धे हि स्वफलयोरभ्युदयप्रत्यवाययोरुपभोगाय शरीरमारभेते, न शरीरारम्भं परिजिहीर्षता ते कर्तव्ये, नित्यनैमित्तिके च पूर्वकृताऽधर्मक्षयाय कर्तव्ये तदैव चात्मोपासनस्यापि पूर्वकृतकर्मक्षयद्वारेणैव मोक्षसाधनत्वम्, उपासनाभिप्रायमेवच 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा' इति भगवद्वासुदेववचनं न विवेकज्ञानाभिप्रायम्' इति श्लोकवार्तिकार्थ इति न्यायरत्नाकरकारः पार्थसारथिमिश्रः। 'स्वर्गादतिरिक्तो मोक्षो मीमांसकैरभ्युपेयत इत्येतस्मिन्नर्थेऽयं कुमारिलग्रन्थः साक्षित्वेनोपन्यस्तो नतूपादेयमिदं मतमित्याशयेन—नैष्कर्म्यसिद्धावेतन्मतस्य दूषितत्वेन विवेकिभिरुपादेयत्वेनानभ्युपगमादित्यपि ध्येयम्'

तदेतत्सर्वमभिप्रेत्याह—"तद्विपरीतः श्रेयान्"

तस्माद्=आनुश्रविकाद् दुःखापघातकादुपायात् सोमपानादेरविशुद्धादनित्यसातिशयफलाद्, विपरीतः=विशुद्धो हिंसादिसङ्कराभावाद्, नित्यनिरतिशयफलोऽसकृदपुनरावृत्तिश्रुतेः,

नच कार्य्यत्वेनानित्यता फलस्य युक्ता, भावकार्य्यस्य तथात्वाद्, दुःखप्रध्वंसस्य तु कार्य्यस्यापि तद्वैपरीत्याद्,

---

'मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः,
नित्यनैमत्तिके कुर्य्यात्प्रत्यवायजिहासया. १००
इत्येवं मुक्तय उपायान्तरमभिहितं,

यदि च यागादिकाम्यकर्मजन्यस्यैव स्वर्गस्य मोक्षत्वमभ्युपेतं भवेत्, तर्हि काम्ययागादित्यागपुरस्सरं 'मोक्षार्थी न प्रवर्तेत" इत्येवं मोक्षायोपायान्तरश्रवणं व्याकुप्येत,

तत्सिद्धमेतद्—आनुश्रविककर्मकलापोपायप्राप्यक्षयिसातिशयसुखविशेषरूपस्वर्गादतिरिक्तोऽक्षयिनिरतिशयसुखरूपो मोक्ष इति, तस्य च कर्मकलापातिरिक्त एव प्रकृतशास्त्रप्रतिपाद्यस्तत्त्वविवेक उपायोऽतः स एव जिज्ञासागोचर इत्याशयेनाभिहितं कारिकायां 'तद्विपरीतः श्रेयान्' इति, तदेवाह—"तदेतत्सर्वम्" इति,

तद् विपरीत इत्यत्रत्य 'तद्' इति शब्दं व्याचष्टे—'तस्माद्' इत्यादिना, विपरीतपदार्थमाह—"विशुद्ध" इति, विशुद्धत्वे हेतुमाह—"हिंसादिसङ्कराभावाद्" इति, विवेकज्ञानस्य नित्यनिरतिशयफलत्वे हेतुमाह—"असकृदपुनरावृत्तिश्रुतेर्" इति 'न स पुनरावर्तते न स पुनरावर्तते" इति पौनःपुन्येन मुक्तस्याऽनावृत्तिश्रवणादित्यर्थः,

ननु यथा यागादिकार्य्यत्वेन स्वर्गादेरनित्यत्वं पूर्वमभिहितं तथा विवेककार्य्यस्य मोक्षस्याप्यनित्यत्वं दुर्वारं तथाच कथं विवेकस्य नित्यफलत्वेन तद्विपरीतत्वमित्याशङ्कां निराकरोति—"नच" इत्यादिना, फलस्य=विवेकज्ञानसाध्यस्य मोक्षस्येत्यर्थः, नच युक्तेत्यत्र हेतुमाह—"भावकार्य्यस्य तथात्वाद्" इति, भावरूपकार्यस्यैव तथात्वाद्=यत्कृतकं तदनित्यमितिव्याप्त्याऽनित्यत्वबोधनादित्यर्थः, घटध्वंसस्य कृतकत्वेपि नित्यत्वसंप्रतिपत्तेर्यत्कृतकं तदनित्य-

---

१ 'तद्विपरीत' इत्यत्र विवेक इत्यध्याहार्य्यम् ।

न च दुःखान्तरोत्पादः, कारणाप्रवृत्तौ कार्य्यानुत्पादात्,

मिति व्याप्तेर्व्यभिचरितत्वेन भावत्वे सति यत्कृतकं तदनित्यमित्यास्थेयं, तथाचात्यन्तिकदुःखोपरमात्मकमोक्षस्य विवेकज्ञानसाध्यत्वेन कृतकत्वेपि भावरूपत्वाभावान्न कृतकत्वमात्रेणानित्यता युक्तेति भावः, तदेवाह—"दुःख-प्रध्वंसस्य" इति, तद्वैपरीत्याद्=उक्तव्याप्तिप्रयुक्तभावरूपकार्य्यगतानित्यत्व-धर्मविभिन्ननित्यधर्मवत्त्वादित्यर्थः,

'मोक्षोऽनित्यः कृतकत्वात्स्वर्गादिवद्' इति प्रयोगो भावत्वोपाधिसंवलि-तत्वेन सोपाधिकत्वाद् दुष्ट इति भावः—

वस्तुतस्तु नरशिरःकपालशुचित्वानुमानवद् मेरोः पाषाणमयत्वानुमान-वच्चागमबाधितत्वेन नायं प्रयोग उत्थातुमर्हतीति बोध्यम्—

यद्यपि साङ्ख्यनये सत्कार्य्यवादाङ्गीकारेण दुःखप्रध्वंसस्य मोक्षत्वाभिधानं व्याहतं तथापि दुःखप्रध्वंसपदेनात्र दुःखातीतावस्थाया एव तात्पर्य्यविष-यत्वेनाभिधानाद् व्याहत्यभावोऽवसेयः, यथाचातीतावस्थाया नित्यत्वं तथा-भिहितं प्रागित्यलमाम्रेडितेन,

नन्वतीतावस्थाया नित्यत्वेन माभूदतीतावस्थं दुःखमुदितावस्थापन्नं दुःखान्तरोत्पत्तिस्तु केन वार्य्यतेत्यत्राह—"नच दुःखान्तरोत्पाद" इति, अन्यद् दुःखं नोत्पद्यत इत्यत्र हेतुमाह—"कारणाप्रवृत्तौ कार्य्यानुत्पादाद्" इति; कारणस्य=दुःखजनकस्य पुम्प्रकृत्योरविवेकस्य, अप्रवृत्तौ=विवेकेन वि-नाशितत्वादनुपस्थितौ सत्यां दुःखरूपकार्य्योत्पत्त्यसम्भवादित्यर्थः,

---

१ यत्रानित्यत्वं घटादौ तत्र भावत्वस्य सद्भावात्साध्यव्यापकत्वं, यत्र च कृतकत्वं घटध्वंसादौ तत्र भावत्वस्याभावात् साधनाव्यापकमिति ज्ञेयं,

२ 'यथा नारं स्पृष्ट्वास्थि सस्नेहं सचैलं जलमाविशेद्' इत्यागमपराहतत्वेन 'नरशिरःकपालं शुचि प्राण्यङ्गत्वाच्छङ्खव'दित्यनुमानानुत्थानं, यथा वा 'देवर्षिगन्ध-र्वैयुतः प्रथमो मेरुरुच्यते, प्रागायतः स सौवर्ण उदयो नाम पर्वत' इतिवचनबाधि-तत्वाद्—मेरुः पाषाणमयः पर्वतत्वाद् विन्ध्यादिवदित्यनुमानानुत्थानं तथाऽपुनरा-वृत्तिबोधकागमपराहतत्वेन मोक्षानित्यत्वानुमानानुत्थानमित्यर्थः,

३ प्राग्—यद्यपि दुःखं न सन्निरुध्यते इत्यस्य व्याख्याने,

विवेकज्ञानोपजननपर्य्यन्तत्वाच्च कारणप्रवृत्तेर्, एतच्चोपरिष्टादुपपादयिष्यते,

अक्षरार्थस्तु—तस्माद्=आनुश्रविकाद् दुःखापघातकाद् हेतोर्, विपरीतः=सत्त्वपुरुषान्यताप्रत्ययः-साक्षात्कारो दुःखापघातको हेतुर्, अत एव श्रेयान्, आनुश्रविको हि वेदविहितत्वान्

ननु भुक्तिविवेकख्यातिनिष्पत्त्यर्थं प्रकृतिप्रवृत्तिरिति हि सिद्धान्तरीतिः तथा च यथा प्रकृत्या जनितेपि भोगे भूयो विवेकख्यात्यर्थं प्रकृतेः प्रवृत्तिरभ्युपेयते तथा जातायामपि विवेकख्यात्यां कथं न भूयः प्रकृतेः प्रवृत्तिरित्याशङ्कायामाह—

'विवेकज्ञान' इति, कारणप्रवृत्तेः=मूलकारणभूतायाः प्रकृतेः प्रवृत्तेर्विवेकज्ञानजननपर्य्यवसानत्वाभ्युपगमान्न विवेकज्ञानोत्तरं प्रकृतिप्रवृत्त्युपपत्तिरित्यर्थः,

कथमेतन्निश्चीयत इत्याकाङ्क्षायामाह—"एतच्च" इति, उपरिष्टाद्='दृष्टा मयेत्युपेक्षक' इति ६६ कारिकाव्याख्यायामित्यर्थः,

तद्विपरीत इत्यस्य तात्पर्य्यमभिधाय साम्प्रतमक्षरार्थमाह—"अक्षरार्थस्तु" इति,

सत्त्वपुरुषान्यताप्रत्ययः=सत्त्वं=बुद्धितत्त्वं, सत्त्वादिगुणत्रयात्मकप्रकृतितत्त्वं वा, जडपरिणामिप्रकृतितत्त्वाद् विभिन्नोऽहमपरिणामी दृशिरूप इत्याकारकः प्रकृत्यवधिकपुरुषान्यतारूपसाक्षात्कार इत्यर्थः, तदेवाह—'साक्षात्कार' इति,

ननु "द्विवचनविभज्योपपदे तरबीयसुनौ" इति सूत्रेण द्वयोर्मध्ये एकस्यातिशये बोधनीये प्रशस्यशब्दादीयसुनि सति 'प्रशस्यस्य श्रः' इत्यनेन श्रादेशे श्रेयश्शब्दनिष्पत्तिस्तथाच कोन्यः प्रशस्यो यदपेक्षयायं विवेकः प्रशस्यतर इत्याकाङ्क्षायामाह—"आनुश्रविको हि" इति, आनुश्रविकः=यागादिः, मात्रया=लेशेन,

---

१ लौकिकाद्वैदिकाद्वा तत्तत्क्रियारूपोपायाद्विपरीतोयस्तत्त्वसाक्षात्काररूपोपायः स एव दुःखात्यन्तोच्छेदकत्वेन श्रेयस्त्वाद् जिज्ञासनीय इति भावः,

२ अविवेकस्य नष्टत्वेपि मूलकारणप्रकृतेर्नित्यत्वेनानिवृत्तत्वात् तत्प्रवृत्तेर्दुर्वारत्वात् तन्निबन्धनदुःखान्तरोत्पादोऽनिवार्य्य इत्याशयेन शङ्कते "ननु" इति, भुक्तिः=शब्दाद्युपभोगः,

मात्रया दुःखापघातकत्वाच्च प्रशस्यः, सत्त्वपुरुषान्यताप्रत्ययोऽपि प्रशस्यः, तदनयोः प्रशस्ययोर्मध्ये सत्त्वपुरुषान्यताप्रत्ययः श्रेयान् ।

कुतः पुनरस्योत्पत्तिरित्यत उक्तं—"व्यक्ताऽव्यक्तज्ञविज्ञानाद्" इति, व्यक्तं चाव्यक्तं च ज्ञश्च व्यक्ताव्यक्तज्ञाः, तेषां विज्ञानं=विवेकेन ज्ञानं, व्यक्तज्ञानपूर्वकमव्यक्तस्य तत्कारणस्य ज्ञानं, तयोश्च पारार्थ्येनात्मा परो ज्ञायत इति ज्ञानक्रमेणाभिधानम्,

---

एवंविधस्य तत्त्वसाक्षात्कारस्य किं कारणमित्याशयेन पृच्छति—"कुतः पुनर्" इति,

ननु ज्ञस्य चेतनत्वेनाभ्यर्हितत्वादल्पाचतरत्वाच्च[1] 'ज्ञाव्यक्तव्यक्तविज्ञानाद्' इति क्रमेण प्रयोक्तव्ये कथं व्यक्ताव्यक्तज्ञविज्ञानादिति विपरीतक्रम आश्रित इत्याशङ्क्य मननोपयोग्यनुष्ठानक्रममादाय[2] पूर्वनिपातविपरीतक्रमाश्रयणमित्याशयेनाह—"व्यक्तज्ञानपूर्वकम्" इति, 'स्थूलात्पञ्चतन्मात्रस्य,'[3] 'बाह्याभ्यन्तराभ्यां तैश्चाहंकारस्य,'[4] 'तेनान्तःकरणस्य,'[5] 'ततः प्रकृतेर्'[6] इति साङ्ख्यसूत्रो-

---

१ अभ्यर्हितमल्पाचकं च पूर्वं प्रयुज्यत इति हि शाब्दिकसङ्केत इति भावः,

२ 'समुद्राभ्राद्धः' इत्यादिनिर्देशेन पूर्वनिपातप्रकरणस्य नियामकत्वाभावात् तात्पर्य्यविशेषमादायान्यथा प्रयोगेऽपि न दोष इति भावः,

(३) अ० १ सू० ६२, स्थूलभूतरूपात्कार्य्यात् तत्कारणतन्मात्रानुमानमित्यर्थः, स्थूलभूतानि स्वविशेषगुणवत्सूक्ष्मद्रव्योपादानकानि स्थूलत्वाद् घटादिवदिति चात्र प्रयोगः,

(४) सू० ६३ बाह्याभ्यन्तराभ्यामिन्द्रियाभ्यां, तैश्च तन्मात्रैस्तत्कारणाहङ्कारानुमानं, तन्मात्रेन्द्रियाण्यभिमानवद्द्रव्योपादानकान्यभिमानकार्य्यद्रव्यत्वाद् यन्नैवं तन्नैवं यथा पुरुष इति, इन्द्रियादीनां प्रवृत्तेरहंकारपूर्वकत्वं प्रसिद्धमेव,

(५) सू० ६४–तेनाभिमानेन अन्तःकरणस्य बुद्ध्याख्यमहत्तत्वस्यानुमानम्, अभिमानस्य निश्चयपूर्वकत्वाद्

(६) सू० ६५ ततः=बुद्धेश्च सुखाद्यात्मकत्वेन गुणत्रयात्मकतत्कारणभूतप्रधानानुमानमित्यर्थः,

एतदुक्तं भवति—श्रुतिस्मृतीतिहासपुराणेभ्यो व्यक्तादीन् विवेकेन श्रुत्वा शास्त्रयुक्त्या च व्यवस्थाप्य दीर्घकालनैरन्तर्यादरसेविताद् भावनामयाद् विज्ञानादिति,

तथा च वक्ष्यति "एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्, अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्" इति ॥ २ ॥

क्तप्रकारेणोत्तरोत्तरकार्येण पूर्वपूर्वकारणानुमानं, तयोश्च=व्यक्ताव्यक्तयोः 'संहतपरार्थत्वात्पुरुषस्य' इतिसूत्राभिहितपारार्थ्यहेतुनाऽसंहतपुरुषार्थत्वज्ञानादात्मज्ञानमित्यर्थः,

विज्ञानमित्यनेन न श्रवणमात्रेण व्यक्तादीनां स्वरूपज्ञानं विवक्षितमपि तु निदिध्यासनपर्य्यवसन्नं स्वसाक्षात्कारजनकं भावनारूपमपेक्षितमित्याशयेन विज्ञानादित्येतत् स्पष्टयति—"एतदुक्तं भवति" इति,

श्रुत्वा=श्रवणेन तत्त्वसङ्ख्यां तत्त्वस्वरूपं चावगत्येत्यर्थः, मननमाह—'शास्त्रयुक्त्या=प्रकृततत्राभिहितपरस्परतत्त्ववैधर्म्यालोचनरूपमननेन, व्यवस्थाप्य=प्रमेयासम्भावनानिरासमुखेन तत्त्वस्वरूपं विनिश्चित्येत्यर्थः, निदिध्यासनमाह—'दीर्घकाल' इति, अदीर्घकालसेवने, दीर्घकालत्वेपि विच्छिद्य विच्छिद्य सेवने च नैरन्तर्य्येपि श्रद्धातिशयाभावे च सङ्गदोषाद् विजातीयप्रत्ययप्राबल्येनादृढभूमिरभ्यासः फलाय न प्रभवेत् प्रत्युत विपरीतभावनातः स्वरूपात्प्रच्यवेतातो विशेषणत्रयविशिष्टोऽभ्यासः सम्पादनीय, एतादृशाच्च भावनामयाद्विज्ञानात् तत्त्वसाक्षात्कारो जायत इत्यर्थः।

एतच्चाग्रे मूलकृता विस्पष्टयिष्यत इत्याह—"तथा च वक्ष्यति" इति ॥२॥

---

(१) सू० ६६। एतच्च "संघातपरार्थत्वाद्" इति १७ कारिकायां व्यक्तीभविष्यति,

२ एतेन—"स तु दीर्घकालनैरन्तर्य्यसत्कारासेवितो दृढभूमिः" इति पातञ्जलसूत्रार्थो वर्णित इति ज्ञेयम्—

३ 'जहात्येनां भुक्तभोगाम्' इत्यस्य व्याख्यायां प्राङ् निरूपितमिदमित्यपि ध्येयम्—

तदेवं प्रेक्षावदपेक्षितार्थत्वेन शास्त्रारम्भं समाधाय शास्त्रमारभमाणः श्रोतृबुद्धिसमवधानाय तदर्थं सङ्क्षेपतः प्रतिजानीते—"मूलप्रकृतिर्" इत्यादिना—

मू० 'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त, षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः । ३ ।'

सङ्क्षेपतो हि शास्त्रार्थस्य चतस्रो विधाः, कश्चिदर्थः प्रकृतिरेव, कश्चिदर्थो विकृतिरेव, कश्चित् प्रकृतिविकृतिः, कश्चिदनुभयरूपः तत्र का प्रकृतिरेवेत्यत उक्तम्—'मूल' इति, मूलं चासौ प्रकृतिश्चेति मूलप्रकृतिः, विश्वस्य कार्यसङ्घातस्य सा मूलं न त्वस्या मूलान्तरमस्ति, अनवस्थाप्रसङ्गात, नचानवस्थायां प्रमाणमस्तीति भावः,

---

येषां व्यक्ताव्यक्तज्ञतत्त्वानां विज्ञानाच्छ्रेयस्करः साक्षात्कारः समुदेति तेषां तत्त्वानामवान्तरं विशेषमभिधातुम्प्रवृत्तां तृतीयां कारिकामवतारयति—"तदेवम्" इत्यादिना । प्रेक्षावदपेक्षितार्थत्वेन=मतिमतामभीप्सितो यो दुःखात्यन्तोच्छेदरूपोऽर्थस्तद्रूपत्वेन हेतुना—प्रकृतशास्त्रानारम्भशङ्कां निरस्येत्यर्थः ।

तदर्थं=प्रकृतशास्त्राभिधेयविवेकानुयोगिप्रतियोगिभूततत्त्वजातमित्यर्थः ।

कारिकां व्याख्यास्यन् तत्त्वानामवान्तरविशेषमाह—"सङ्क्षेपतो हि" इति। शास्त्रार्थस्य=एतच्छास्त्राभिधेयतत्त्वग्रामस्य अवान्तरप्रकाराश्चत्वार इत्यर्थः, तानेव प्रकारभेदानाह—"कश्चिदर्थ" इत्यादिना ।

कस्य मूलमित्यत्राह—"विश्वस्य" इति, पुरुषस्यापि विश्वान्तःपातित्वादतिप्रसङ्ग इत्यत आह—"कार्यसङ्घातस्य" इति ।

ननु प्रकृतिशब्दस्य कारणार्थकत्वात्प्रकृतिरित्येतावतैव प्रधानस्य जगत्कारणत्वे लब्धे पुनः कारणार्थकमूलपदोपादानं किमर्थमित्याशङ्कायामाह—"नत्वस्या मूलान्तरम्" इति, कारणमेव प्रधानं न कस्य चित्कार्य्यमिति विशेषबोधनाय मूलपदोपादानमित्यर्थः ।

प्रधानस्य कार्य्यत्वे दोषमाह—"अनवस्थाप्रसङ्गाद्" इति, ननु बीजाङ्कुरवदनवस्थाया अदोषत्वमित्यत्राह—"न चानवस्थायां प्रमाणम्" इति, व्यवस्थायां सत्यामनवस्थाभ्युपगमस्याप्रामाणिकत्वादित्यर्थः ।

---

१ अनन्यथासिद्धप्रयोजनवत्त्वादेतच्छास्त्रमारम्भणीयमितिसिद्धान्तीकृत्येति भावः

२ विवेकानुयोगी—पुरुषः, प्रतियोगिनश्च प्रकृतिमहदादयो विकारा इत्यर्थः,

३ 'अजामेकाम्' इत्यादिश्रुत्या 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि' इति-

कतमाः पुनः प्रकृतिविकृतयः कियत्यश्च इत्यत—

अयमाशयः—प्रधानकारणत्वेनाभिमतं यत् तत्त्वान्तरं तस्मिन् प्रधानापेक्षया कश्चिद् अतिशयविशेषोऽभ्युपेयते न वा, न वेति चेद् न तस्य कारणभावोऽतिशयाभावाद्, नह्यतिशयमन्तरेण कार्य्यकारणभावः कुत्रापि दृष्टचरः, अस्त्यतिशय इति चेत्, किंरूपोसाविति कथनीयं, निर्गुणत्वचेतनत्वापरिणामित्वरूपोऽसाविति चेत्, तथापि न कारणत्वम्, अपरिणामिनः कार्य्यजनकत्वस्यादृष्टत्वात्, शक्तिरूपोऽतिशय इति चेत्, सापि जन्याऽजन्या वा, जन्येति चेत् तदवस्थानवस्था, अजन्येति चेत् सैव शक्तिः प्रकृतिरजाविद्या प्रधानमिति नाममात्रे विवादः, अत्र यदन्यद् वचनीयं तदभिहितं प्रा[1]गित्यलमाम्रेडनेन,

तथाचाहुः=महर्षिकपिलाचार्य्याः—"मूले मूलाभावादमूलं मूलम्[2]" पारम्पर्य्येप्येकत्र परिनिष्ठेति संज्ञामात्रम्" इति,

ननु 'अविकृतिर्' इत्युक्त्यैवाजन्यत्वलाभात्पुनर्मूलपदोपादानं किम्प्रयोजनमिति चेच्छृणु—त[3]त्त्वान्तरोपादानत्वं हि प्रकृतित्वं—तच्च महदादिविकारेष्वप्यस्तीत्यत उक्तं—'मूलम्' इति, त[4]त्त्वं च तत्त्वान्तरानुपादेयत्वं तदेव स्पष्टयितुमुक्तं मूले 'अविकृतिर्' इति,

"कतमा" इति, चतुर्विंशतितत्त्वानां मध्ये प्रकृतिविकृतयः का इति नाम-

---

स्मृत्या च प्रकृतेरजन्यत्वेनानादित्वेन च तत्रैव कारणपरम्परायाः विश्रान्तेः, सत्त्वाद् व्यवस्थायाः सऽम्भवेनानवस्थाया मूलक्षयकरीरूपाया अनभ्युपगमादित्यर्थः, बीजाङ्कुरस्थले व्यवस्थासम्भवेनानायत्या तथास्वीकारेपि व्यवस्थास्थलेनवस्थाकल्पने मानाभावादिति तत्त्वम्—

१ प्राग्=अजामेकाम्' इत्यस्य व्याख्यायाम्—

(२) अ० १ सू. ६७। ६८। त्रयोविंशतितत्त्वानां मूलम्=उपादानम्—अमूलम्=मूलशून्यम् अनवस्थापत्त्या मूले मूलान्तरासम्भवादित्यर्थः ॥ ६७। ननु 'तस्मादव्यक्तमुत्पन्नम्' इत्यादिना प्रधानस्यापि पुरुषादुत्पत्तिश्रवणात्पुरुष एव प्रकृतेर्मूलं भवतु, पुरुषस्य नित्यतया च नानवस्था, अविद्याद्वारकतया च न पुरुषकौटस्थ्यहानिः, तथा च स्मर्य्यते 'तस्मादज्ञानमूलोऽयं संसारः पुरुषस्य हि' इति, इत्याशङ्कयाह 'पारम्पर्य्येपि' इति—अविद्यादिद्वारेण परम्परया पुरुषस्य जगन्मूलकारणत्वेप्यविद्यादौ यत्र कुत्रचिन्नित्ये द्वारे परम्परायाः पर्य्यवसानं भविष्यति पुरुषस्यापरिणामित्वाद् यतो यत्र पर्य्यवसानं सैव नित्या प्रकृतिः, प्रकृतिरिह मूलकारणस्य सञ्ज्ञामात्रमित्यर्थः ॥ ६८। इति साङ्ख्यप्रवचनभाष्ये विज्ञानभिक्षवः,

३ तत्त्वान्तरं=विजातीयतत्त्वम्—एतत् तत्त्वमग्रे व्यक्तीभविष्यति,

४ तत्त्वं च=मूलत्वं च,

उक्तम्—"महदाद्याः प्रकृतिविकृतयः सप्त" इति, । प्रकृतयश्च विकृतयश्च ता इति प्रकृतिविकृतयः सप्त,

तथाहि—महत्तत्त्वमहङ्कारस्य प्रकृतिः, विकृतिश्च मूलप्रकृतेर्, एवमहङ्कारतत्त्वं तन्मात्राणामिन्द्रियाणां च प्रकृतिर्, विकृतिश्च महतः, एवं पञ्चतन्मात्राणि तत्त्वानि भूतानामाकाशादीनां प्रकृतयो, विकृतयश्चाहङ्कारस्य,

अथ का विकृतिरेव कियती चेत्यत उक्तं—"षोडशकस्तु विकार" इति, षोडशसङ्ख्यापरिमितो गणः षोडशकः[१], तु—शब्दोऽवधारणे भिन्नक्रमः, पञ्च महाभूतानि एकादशेन्द्रियाणीति षोडशको गणो विकार एव न प्रकृतिः,

यद्यपि पृथिव्यादीनामपि गोघटवृक्षादयो विकाराः एवं तद्विकारभेदानां पयोबीजादीनां दध्यङ्कुरादयः, तथापि न पृथिव्यादिभ्यस्तत्त्वान्तरं,

---

जिज्ञासा, कियत्य इति चेयत्ताजिज्ञासा । तत्त्वान्तरोपादानत्वे सति तत्त्वान्तरोपादेयत्वं प्रकृतिविकृतित्वं, तच्च महदादीनां सप्तानामित्याशयेन स्पष्टयति—"तथाहि" इति, ।

'भिन्नक्रमः'=पाठस्थानाद् अन्यः क्रमः=निवेशस्थानं यस्यासौ भिन्नक्रमः, विकार इत्यस्याग्रेऽवधारणार्थकस्तुशब्दो निवेशनीय इत्यर्थः, तदेवाह—"पञ्च" इत्यादिना । ननु षोडशको गणो विकार एवेत्यवधारणमनुपपन्नम्, एकादशेन्द्रियाणां कं प्रति प्रकृतित्वाभावेपि षोडशान्तःपातिनां पञ्चस्थूलभूतानां गोघटवृक्षादीन् प्रति प्रकृतित्वस्य सम्प्रतिपन्नत्वादित्याशयेन शङ्कते—"यद्यपि" इति । तद्विकारभेदानां=पृथिव्यादिविकारभूतगोवृक्षादेर्विकारविशेषाणां दुग्धादीनां दध्यादयो विकारा इत्यर्थः,

अन्यदेव प्रकृते प्रकृतिलक्षणमित्याशयेन समाधत्ते "तथापि" इति,—न पृथिव्यादिभ्यस्तत्त्वान्तरम् इत्यत्र गोघटादयो विकारा इति शेषो बोध्यः,

---

१ 'तदस्य परिमाणम्' ५ । १ । ५७ । इत्यधिकारे 'सङ्ख्यायाः सञ्ज्ञासङ्घसूत्राध्ययनेषु' ५ । १ । ५८ । इत्यनेन सङ्घार्थे कन्प्रत्यये साधुरयम्—

तत्त्वान्तरोपादानत्वं च प्रकृतित्वमिहाभिप्रेतमिति न दोषः,

ननु मा भूद् गोघटादीनां पृथिव्यादिभ्यस्तत्त्वान्तरत्वं तथापि गोघटादिजनकत्वेन कुतो न पृथिव्यादीनां प्रकृतित्वमित्याशङ्क्य प्रकृताभिप्रेतं प्रकृतिलक्षणमाह—"तत्त्वान्तरोपादानत्वम्" इति,

ननु—"सत्त्वरजस्तमसां साम्यावस्था प्रकृतिर्" इत्यादिसाङ्ख्यसूत्रे (सत्त्वादीनि द्रव्याणि न वैशेषिका गुणाः[1] संयोगविभागवत्त्वाद् लघुत्वचलत्वगुरुत्वादिधर्मकत्वाच्च, तेष्वत्र शास्त्रे श्रुत्यादौ च गुणशब्दः पुरुषोपकरणत्वात् पुरुषपशुबन्धकत्रिगुणात्मकमहदादिरज्जुनिर्मातृत्वाच्च प्रयुज्यते, तेषां सत्त्वादिद्रव्याणां या साम्यावस्था=अन्यूनानतिरिक्तावस्था न्यूनाधिकभावेनासंहतावस्थेति यावद्, अकार्य्यावस्थेति निष्कर्षः, अकार्य्यावस्थोपलक्षितं गुणसामान्यं प्रकृतिरित्यर्थः, यथाश्रुते वैषम्यावस्थायां प्रकृतित्वनाशप्रसङ्गाद् 'सत्त्वं रजस्तम इति एषैव प्रकृतिः सदा, एषैव संसृतिर्जन्तोरस्याः पारे परं पदम्' इत्यादिस्मृतिभिर्गुणमात्रस्यैव प्रकृतित्ववचनाच्च, सत्त्वादीनामनुगमाय सामान्येति, पुरुषव्यावर्तनाय गुणेति, महदादिव्यावर्तनाय च 'उपलक्षितान्तम्' इति, महदादयोपि हि कार्य्यसत्त्वादिरूपाः पुरुषोपकरणतया च गुणा भवन्तीति' इति तद्भाष्ये च

> "प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः[3],
> सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्तिता ।
> गुणे प्रकृष्टसत्त्वे च प्रशब्दो वर्तते श्रुतौ,
> मध्यमे रजसि कृश्च तिः शब्दस्तमसि स्मृतः ।

---

१ गुणत्वे तु संयोगविभागवत्त्वं न स्याद्, गुणे गुणानङ्गीकारादित्यर्थः,

(२) अ. १ सू. ६१ ।

३ ब्रह्मवैवर्ते प्रकृतिखण्डे प्रथमाध्याये, देवीभागवते नवमस्कन्धे प्रथमाध्याये चेमे ५ । ६ । ७ । ८ । श्लोकाः 'तत्र प्रथमतस्तटस्थलक्षणमाह–प्रकृष्टवाचक' इति, प्रापूरण इति धातोः पचाद्यचि निष्पन्नः प्रशब्दः, कृतिशब्दस्य व्यापारसामान्यार्थकत्वात् सृष्टिव्यापारार्थकत्वं, तथाच–प्रा=प्रकृष्टा मुख्या कृतौ=सृष्टौ या सा प्रकृतिरिति व्यधिकरणपदबहुव्रीहिणा त्वेतस्यार्थस्य लाभः, पृषोदरादित्वात्प्राशब्दस्य ह्रस्वत्वं, तथा च मुख्यत्वेन सृष्टिकर्त्री या सा प्रकृतिरित्यर्थः । ५ । स्वरूपलक्षणमाह—'गुणे सत्त्वे इति, प्रकृष्टे सत्त्वे गुणे प्रशब्दो वर्तते, व्युत्पत्तिस्तु पूर्ववदेव, मध्यमे रजसि मध्यमः कृशब्दो वर्तते मध्यमत्वसादृश्यात्, तमसि तमोगुणे चरमेति शब्दो वर्तते चरमत्वतादित्वसादृश्यादित्यर्थः । ६ । पदार्थमुक्त्वा वि-

त्रिगुणात्मस्वरूपा या सर्वशक्तिसमन्विता,
प्रधानं सृष्टिकरणे प्रकृतिस्तेन कथ्यते ।
प्रथमे वर्तते प्रश्च कृतिश्च सृष्टिवाचकः,
सृष्टेराद्या च या देवी प्रकृतिः सा प्रकीर्तिता ।

इत्येवमादिपौराणिकवाक्येषु च श्रूयमाणं प्रकृतिलक्षणमपहाय कुतस्तद्विपरीतं प्रकृते प्रकृतेर्लक्षणान्तरमाश्रितमित्याक्षेपापोहायाह—"इहाभिप्रेतम्" इति, प्रकृतिविकृतिभूते महदादावपि प्रकृतित्वव्यवहृतिनिष्पत्त्यर्थं तत्त्वान्तरोपादानत्वरूपमेव प्रकृते प्रकृतित्वलक्षणमाश्रितं न सूत्राद्यभिहितमित्यर्थः ।

अत्रेदमभिप्रेतम्—प्रकृतिशब्दो हि—साम्यावस्थोपलक्षितगुणत्रयात्मकत्वलक्षणो मूलकारणे प्रधाने, तत्त्वान्तरोपादानत्वलक्षणश्चाहङ्कारादिकारणे महदादौ, उपादानत्वमात्रलक्षणश्च घटकटकादिकारणे, मृत्कनकादौ, इत्येवं तत्तल्लक्षणः तत्तदर्थविशेषे तत्र तत्र प्रयुज्यमान उपलभ्यते, तत्र यदि साम्यावस्थोपलक्षितगुणत्रयात्मकत्वरूपं सूत्राद्यभिहितमेव प्रकृतिलक्षणमत्राश्रीयेत तदा प्रधाने प्रकृतित्वव्यवहारसंपत्तावपि महदादौ प्रकृतित्वव्यवहारो न संघटेत, यदि चोपादानत्वमात्रमेव प्रकृतिलक्षणमत्राश्रीयेत तदा महदादौ प्रकृतित्वव्यवहारसंपत्तावपि मृत्कनकादेरपि प्रकृतित्वव्यवहारापत्तिस्स्याद्, अत उभयदोषपरिहाराय तत्त्वान्तरोपादानत्वरूपमेव प्रकृतित्वलक्षणमत्रास्थीयते नान्यदिति, तथा च न कुत्रापि दोष इत्याह—"इति न दोष" इति, एतादृशलक्षणकरणे महदादौ प्रकृतित्वव्यवहारानापत्तिरूपो दोषः, पृथिव्यादौ च प्रकृतित्वव्यवहारापत्तिरूपो दोषश्च नेत्यर्थः,

---

शिष्टार्थमाह—त्रिगुणात्मा निरतिशयावरणविक्षेपादिशक्तिरहिता गुणत्रयसाम्यावस्थात्मिका सृष्टिकरणे प्रधाना या सा प्रकृतिशब्देनोच्यत इत्यर्थः। तथा च प्रसंयुक्तः कृः प्रकृः=सत्त्वेन गुणेन सहितो रजोगुणः, शाकपार्थिवादित्वात्संयुक्तपदलोपः, पुनः प्रकृयुक्तः तिः=सत्त्वगुणरजोगुणेन युक्त; तिः=तमोगुणो यस्यां वर्तत इति बहुव्रीहिणा गुणत्रयात्मिकेत्यर्थः, पृषोदरादित्वात्साधुत्वम् । ७ ॥ पुनर्लक्षणान्तरमाह—'प्रथमे वर्तत' इति, प्रशब्दव्युत्पत्तिः पूर्ववत् तथा च प्रा=प्रथमा सृष्टेर्या सा प्रकृतिः सृष्टेरादिभूतेत्यर्थः, व्यधिकरणबहुव्रीहिः, पृषोदरादित्वात्साधुत्वम् ॥ ८ ॥)
इत्येतेषामर्थ इति देवीभागवतव्याख्यायां नीलकण्ठः,

सर्वेषां गोघटादीनां स्थूलतेन्द्रियग्राह्यता च समेति न तत्त्वान्तरत्वम्,

---

सूत्राद्यभिहितलक्षणस्य प्रधानमात्रपरत्वेनानुगतत्वाभावात्सर्वानुगतं तत्त्वान्तरोपादानत्वरूपमेव लक्षणमाश्रयणीयं, मृत्कनकादौ च प्रकृतित्वव्यवहारो लाक्षणिको गौणो वेति भावः,

किमिदं तत्त्वान्तरत्वमिति चेद् 'तत्त्वत्वं च द्रव्यत्वं तत्त्वान्तरत्वं च स्वावृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं, पञ्चविंशतितत्त्वेषु पञ्चविंशतिजात्यनङ्गीकारे च तत्त्वान्तरत्वं स्वावृत्तिद्रव्यविभाजकोपाधिमत्त्वम्' इति योगवार्तिकोक्तं गृहाण,

अत्र लक्षणे स्वशब्द उपादानत्वाभिमततत्त्वपरः, तथा च यथाऽहङ्कारादेः स्वोपादानमहदाद्यवृत्तिद्रव्यत्वसाक्षाद्व्याप्याहङ्कारत्वादिजातिमत्त्वेन महदादिभ्यस्तत्त्वान्तरत्वं न तथा गोघटादीनां पृथिव्यादिभ्यस्तत्त्वान्तरत्वं तेषां स्वोपादानपृथिव्यादिवृत्तिद्रव्यत्वसाक्षाद्व्याप्यपृथिवीत्वादिजातिमत्त्वेनोपादानावृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वाभावादित्यत्र फलितम्,

एतदेव हृदि निधाय गोघटादीनां तत्त्वान्तरत्वाभावे स्वोपादानपृथिव्यादिवृत्तिधर्मवत्तारूपं हेतुमाह—"सर्वेषाम्" इत्यादिना, 'समेति'—इतिशब्दो हेत्वर्थे यतो घटादीनां स्थूलतेन्द्रियग्राह्यता च पृथिव्यादिभिः समातो न घटादीनां पृथिव्यादिभ्यस्तत्त्वान्तरत्वमित्यर्थः,

ननु यथा पृथिवीतद्विकारघटयोरुभयोरपि स्थूलत्वादिरूपसमानधर्मवत्त्वेन न पृथिव्यपेक्षया घटस्य तत्त्वान्तरत्वं तथा महत्तद्विकाराहङ्कारयोरुभयोरपि सूक्ष्मत्वातीन्द्रियत्वादिरूपसमानधर्मवत्त्वेन समानतत्त्वात् कथं महदपेक्षयाहङ्कारस्य तत्त्वान्तरत्वम् इति चेद्—

---

१ ननु तत्त्वान्तरोपादानत्वस्यैव प्रकृतित्वे मृत्प्रकृतिको घटः कनकप्रकृतिकं कटकमित्यादौ मृदादौ प्रकृतित्वव्यवहारस्य को निर्वाह इत्यत्राह—"मृत्कनकादौ च" इति,—लाक्षणिकः=तत्त्वान्तरोपादानत्वरूपेर्थे शक्तमपि प्रकृतिपदं भागत्यागलक्षणयोपादानत्वमात्रमर्थमादाय मृदादौ लाक्षणिकः प्रकृतित्वव्यवहारः, एकदेशभूतोपादानत्वरूपसाधर्म्यमादाय गौणो वा व्यवहार इत्यर्थः,

२ घटादेरपि पृथिव्यवृत्तिघटत्वादिजातिमत्त्वेन तत्त्वान्तरत्वं मा भूदित्याशयेन जातौ द्रव्यत्वसाक्षाद्व्याप्येति विशेषणमिति ध्येयं, द्रव्यत्वसाक्षाद्व्याप्यजातयश्च महत्त्वाहङ्कारत्वपृथिवीत्वादयो ज्ञेयाः, जात्यनङ्गीकारे च महत्त्वादीनां पदार्थविभाजकोपाधित्वमास्थेयमिति भावः।

अनुभयरूपमाह—"न प्रकृतिर्न विकृतिः पुरुष" इति, एतत्सर्वमुपरिष्टादुपपादयिष्यत इति ॥ ३ ॥

दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्,
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥ ४ ॥

अत्राभिधीयते—स्थूलत्वेन्द्रियग्राह्यत्वसहकृतपदार्थविभाजकपृथिवीत्वरूपोपाधेः पृथिवीघटयोरुभयोरपि वृत्तित्वेन तयोः समानधर्मवत्त्वान्न घटादेः पृथिव्यास्तत्त्वान्तरत्वमित्यर्थे तात्पर्य्येणोक्तदोषाभावाद्

तथा च पृथिव्यादेस्तत्त्वान्तरपरिणामवत्त्वाभावान्न प्रकृतित्वमपि तु विकृतित्वमेवेति निष्पन्नं,

तथाचाहुर् योगभाष्ये व्यासदेवाः[1] "न विशेषेभ्यः परं तत्त्वान्तरमस्तीति विशेषाणां नास्ति तत्त्वान्तरपरिणामः, तेषां तु धर्मलक्षणावस्थाः परिणामा व्याख्यायिष्यन्ते" इति,

प्रकारत्रयमभिधाय[2] तुरीयं प्रकारमभिधातुमाह—"अनुभयरूपम्" इति, कश्चिदनुभयरूप इत्यनेनाभिहितो यः तत्त्वान्तरानुपादानत्वे सति तत्त्वान्तराऽनुपादेयरूपः पुरुषस्तमाहेत्यर्थः[3],

ननु प्रकृत्यादीनां सामान्यतोऽभिधानेपि किन्तत्वं कस्य प्रकृतिः कस्य वा विकृतिरिति विशेषानभिधानान्न तत्त्वविवेकदार्ढ्यमित्यत आह—"एतत्सर्वम्" इति, उपरिष्टाद्='प्रकृतेर्महान्' (२२) इत्यादावित्यर्थः ॥ ३ ॥

---

(१) पा. २ सू. १९ अत्र विशेषपदेन भूतेन्द्रियाणि ग्राह्याणि, तत्किमिदानीमपरिणामिन एव विशेषास्तथा च नित्याः प्रसज्येरन्नित्यत आह 'तेषान्तु धर्मलक्षणावस्था' इति, तत्र भूतानां पृथिव्यादीनां धर्मिणां गवादिर्घटादिर्वा धर्मपरिणामः, धर्माणां चातीतानागतवर्तमानता लक्षणपरिणामः, वर्तमानलक्षणापन्नस्य गवादेर्बाल्यकौमारयौवनवार्धकमवस्थापरिणामः, घटादीनामपि नूतनपुरातनताऽवस्थापरिणामः, एवमिन्द्रियाणामपि तत्तन्नीलाद्यालोचनं धर्मपरिणामः, धर्मस्य वर्तमानतादिर्लक्षणपरिणामः, रूपाद्यालोचनस्य स्फुटत्वादिरवस्थापरिणाम इत्येवं ध्येयमित्यर्थः, व्याख्यायिष्यन्ते=तृतीये पादे त्रयोदशसूत्र इत्यर्थः,

२ प्रकारत्रयम्—प्रकृति-प्रकृतिविकृति-विकृतिरूपं प्रकारत्रयमित्यर्थः,

३ अनुभयरूपमुक्तं तदाह' इति पाठे तु तत्त्वमित्यध्याहार्यम्—

तमिममर्थं प्रामाणिकं कर्तुमभिमताः प्रमाणभेदा लक्षणीयाः, न च सामान्यलक्षणमन्तरेण शक्यं विशेषलक्षणं कर्तुम् इति प्रमाणसामान्यं तावल्लक्षयति—"प्रमाणमिष्टम्" इति,

---

तदेवं विवेकानुयोगिप्रतियोगितत्त्वजातमभिधाय तदिदं तत्त्वजातं न प्रमाणापेतमपि तु प्रमाणोपेतमित्याशयेन प्रवृत्तां तुरीयकारिकामवतारयति—"तमिममर्थम्" इति,

ननु कणादाक्षपादादिभिः प्रमाणविशेषाणां निरूपितत्वात् तैरेव प्रकृते निर्वाहसम्भवात् तन्निरूपणं नातीवोपयुक्तमित्यपेक्षायामाह—"अभिमता" इति, महर्षिमनुप्रमुखसम्मता इत्यर्थः,

'प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम्,
त्रयं सुविदितं कार्य्यं धर्मशुद्धिमभीप्सता ।'

इति मनुना प्रमाणत्रयस्यैवाभ्युपेतत्वेन तद्विपरीतेयत्तावन्तः कणादादिनिरूपिताः प्रमाणभेदा न सतां सम्मता इति भावः,

'सामान्यलक्षणं त्यक्त्वा विशेषस्यैव लक्षणं, न शक्यं केवलं वक्तुमितोप्यस्य न वाच्यता' इति कुमारिलोक्तिमाश्रित्याह—"नच सामान्यलक्षणम्" इति,

ननु कारिकायां प्रमाणानामियत्तावधारणं विभज्यवचनं चेत्येतद् द्वयमेव निरूपितं प्रतीयते न प्रमाणसामान्यलक्षणं तत्कथं न तदकथनप्रयुक्ता न्यूनता कथं वाभिहितं भवता प्रमाणसामान्यं तावत् लक्षयतीति चेत्यत

---

१ 'न वयं षट्पदार्थवादिनो वैशेषिकादिवद्' अ. १ सू. २५ इति साङ्ख्यसूत्रात्कणादादिदर्शनानां पूर्वभावित्वादित्यर्थः, एतेन कणादादिदर्शनानामर्वाचीनत्वान्न तन्निरूपितप्रमाणभेदैरत्र निर्वाह इति शङ्कापोदिता,

(२) अ. १२ श्लो. १०५

(३) जै. सू. ५ श्लोकवार्तिके शब्दपरिच्छेदे श्लो. २

४ इयत्तावधारणं—त्रिविधं प्रमाणमिति, विभज्यवचनं च दृष्टमनुमानमित्यादीति बोध्यम् ।

अत्र च प्रमाणमिति समाख्या लक्ष्यपदं, तन्निर्वचनं च लक्षणं, प्रमीयतेऽनेनेति निर्वचनात् प्रमां प्रति करणत्वमवगम्यते, असन्दिग्धाविपरीतानधिगतविषया चित्तवृत्तिः बोधश्च पौरुषेयः फलं प्रमा,

---

आह—"अत्र च प्रमाणमिति समाख्या लक्ष्यपदम्" इति, अत्र=कारिकायामित्यर्थः,

समाख्या=यौगिकः[1] शब्द इति मीमांसकसङ्केतः, लक्ष्यबोधकं पदं लक्ष्यपदं, प्रमाणमिति यौगिकं पदं लक्ष्यबोधकमित्यर्थः,

ननु लक्ष्यपदस्य लक्षणपदप्रयोगसापेक्षत्वाल् लक्षणपदमन्तरेण कथं लक्ष्यपदप्रयोग इत्याशङ्क्य प्रमाणपदस्य यौगिकत्वेन तदवयवार्थमादाय लक्षणपदमपि तदेवेत्याह—"तन्निर्वचनं च" इति, प्रमाणपदावयवभूतप्रकृतिप्रत्ययार्थश्च लक्षणमित्यर्थः, निर्वचनप्रकारमेवाह—"प्रमीयतेऽनेनेति" इति, तथा च लक्षणपदमपि प्रमाणमित्येवेति बोध्यम्—

सकृदुच्चरितमपि प्रमाणपदं तन्त्रेणोच्चरितत्वात् प्रमाणं प्रमाणमिति द्विरावर्त्य[2] प्रमाणं=प्रमाकरणं यत् तत् प्रमाणं=प्रमाणपदप्रतिपाद्यमित्यर्थमादायैकमेव प्रमाणपदं लक्ष्यलक्षणपरमिति भावः,

'प्रमाणमिति समाख्यया लक्ष्यपरम्' इति पाठे तु 'समा=तुल्या समानानुपूर्वीवती, आख्या=उच्चारणं, तया समाख्यया=तुल्योच्चारणेनेति यावत्, तथा च सकृदुच्चरितमपि प्रमाणपदं तुल्योच्चारणेन तन्त्रयुक्त्या लक्ष्यपरं लक्षणपरं चेत्यर्थो बोध्यः

प्रमाणघटकप्रमां लक्षयति–"असन्दिग्ध" इत्यादिना,

असन्दिग्धः=किंस्विदितिवितर्कात्मकानवधारणज्ञानविषयः सन्दिग्धः स न भवतीत्यसन्दिग्धः,

अविपरीतः=स्वरूपाप्रतिष्ठितो मिथ्याज्ञानात्मकविपर्य्ययज्ञानविषयो, विकल्पात्मकज्ञानविषयश्च विपरीतः[3] स न भवतीत्यविपरीतः,

अनधिगतः=निश्चयात्मकज्ञानविषयोऽधिगतः स न भवतीत्यनधिगतः, एवंविधः पदार्थो विषयो यस्याश्चित्तवृत्तेः साऽसन्दिग्धाऽविपरीताऽनधिगतविषया चित्तवृत्तिः प्रमेत्यग्रिमेणान्वयः,

---

१ सं=समीचीना–अवयवार्थवती-आख्या समाख्या, तदेवाह–"यौगिक" इति,

२ अनेकार्थबुबोधयिषया सकृदुच्चारणं तन्त्रोच्चारणम्, ईदृक्स्थल उच्चारयितुस्तन्त्रेणोच्चारणं बोद्धुश्चावृत्त्या बोध इति व्यवस्थामनुरुध्याह "द्विरावर्त्य" इति,

३ "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" यो. पा. १ सू. ९ इति लक्षितविकल्पात्मज्ञानस्यापि विपर्य्ययविशेषत्वेन तद्विषयोपि विपरीत इत्यनेन सङ्गृहीत इति ध्येयम् ।

संशय-विपर्य्यय-विकल्प-स्मृतिरूपचित्तवृत्तिभिन्ना या चित्तवृत्तिः सा प्रमेत्यर्थः,

एवमिन्द्रियसन्निकर्षजन्यामप्रमुख्यां बौद्धप्रमामाख्याय चित्तवृत्तिफलभूतां मुख्यां पौरुषेयप्रमामाख्याति—"बोधश्च पौरुषेयः फलं प्रमा" इति,

चित्तवृत्तेः फलं यः पुरुषवर्ती बोधः सा मुख्या प्रमेत्यर्थः,

"द्वयोरेकतरस्य वाऽप्यसन्निकृष्टार्थपरिच्छित्तिः प्रमा" इति साङ्ख्यसूत्रे प्रमाद्वैविध्यस्याभिहितत्वेन बुद्धिवृत्तिः पौरुषेयबोधश्चेत्युभयमपि प्रमेति भावः,

ननु पुरुषवर्ती बोधः कथं चित्तगताया वृत्तेः फलं, नहि खदिरगोचर-व्यापारेण परशुना पलाशे छिदा क्रियते समानाधिकरणभावाभावादिति चेद्, अत्राहुः—नहि चित्तवृत्त्या पुरुषगतो बोधो जन्यतेऽपि तु चैतन्यमेव तत्तदर्थोपरक्तबुद्धिदर्पणप्रतिबिम्बितं सद् बुद्धिवृत्त्याऽर्थाकारया तदाकारतामा-पद्यमानं फलमित्यभिधीयते, तच्च चित्तप्रतिबिम्बितं फलभूतं चैतन्यं चिति-चित्तयोरभेदग्रहाच्चित्तात्मकं प्रमाणभूता चित्तवृत्तिरपि चित्तात्मिकेति सा-मानाधिकरण्यसद्भावाद् युक्तः पौरुषेयबोधस्य चित्तवृत्तेः फलभाव इति,

अत्रेदं बोध्यं—पौरुषेयो बोध इत्यनेन न बोधस्य पुरुषनिष्ठत्वमाख्यायते येन प्रमातृत्वादिधर्मेण पुरुषस्य परिणामित्वं स्याद् अपि तु बुद्धौ प्रतिबिम्बित-त्वेन तत्तादात्म्यापत्त्या पुरुषस्य ज्ञानादिमत्त्वोपचारात्पौरुषेय इत्यभिधीयते एवं च चितिचित्तयोरभेदग्रहात्पुरुष उपचर्य्यमाणोपि वस्तुतो बुद्धिवृत्त्यात्मक एव बोधो न पुरुषधर्म इति,

---

(१) अ. १ सू. ८१। 'तत्साधकतमं यत् तत् त्रिविधं प्रमाणम्' इति सूत्रशेषः, (असन्निकृष्टः=प्रमातर्य्यनारूढः—अनधिगत इतियावद् एवंभूतस्य अर्थस्य=व-स्तुनः परिच्छित्तिर्=अवधारणं प्रमा, सा च द्वयोः=बुद्धिपुरुषयोरुभयोरेव धर्मो भवतु किं वैकतरमात्रस्य, उभयथैव तस्याः प्रमाया यत्साधकतमं=फलायोगव्य-वच्छिन्नं कारणं तच्च त्रिविधं वक्ष्यमाणरूपेणेत्यर्थ) इति साङ्ख्यप्रवचनभाष्यकारः,

२ साङ्ख्यनये महत्तत्त्वपदाभिधेयबुद्धितत्त्वस्य चित्ततत्त्वस्य चैकत्वेन पर्य्या-यत्वात् क्वचिद् बुद्धिवृत्तिः क्वचिच्च चित्तवृत्तिरित्येवं पर्य्यायेण लेखेपि न क्षतिरिति बोध्यम्-

३ अत्रेदमवधेयं—साङ्ख्यनये कश्चिदर्थः प्रमाणं यथा चक्षुरादिः, कश्चित् प्र-माप्रमाणोभयरूपो यथा चित्तवृत्तिर्, (एषा हि चक्षुरादिजन्यत्वेन प्रमेति पौरु-षेयबोधं प्रति करणत्वेन च प्रमाणमिति व्यवह्रियते) कश्चित्प्रमैव यथा पौरुषेयो बोधः, कश्चित्प्रमातैव यथा बुद्धिप्रतिबिम्बितं चैतन्यम्, कश्चित्साक्षी यथा बुद्धि-वृत्त्युपहिता चितिरिति,—

तथा चाहुः कृष्णद्वैपायनाः "फलमविशिष्टः पौरुषेयश्चित्तवृत्तिबोधः, बुद्धेः प्रतिसंवेदी पुरुषः," इति, बोधस्य बुद्धिवृत्त्यात्मकत्वेपि यथा पौरुषेयत्वं तथा "द्रष्टा दृशिमात्रः शुद्धोपि प्रत्ययानुपश्यः" "चितेरप्रतिसङ्क्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम्" इत्यादियोगसूत्रतद्भाष्ययोः "अपरिणामिनी हि भोक्तृशक्तिरप्रतिसङ्क्रमा च परिणामिन्यर्थे प्रतिसङ्क्रान्तेव तद्वृत्तिमनुपतति तस्याश्च प्राप्तचैतन्योपग्रहरूपाया बुद्धिवृत्तेरनुकारमात्रतया बुद्धिवृत्त्यविशिष्टा हि ज्ञानवृत्तिरित्याख्यायते" इति पञ्चशिखाचार्य्यवाक्ये च स्पष्टमिति तत्रैव कणेहत्यालोचनीयम्,

तथा च यथा ह्यन्तरेणापि चन्द्रमसः क्रियामुपसङ्क्रान्तचन्द्रप्रतिबिम्बममलं जलं स्वयं चलत्सदचलमपि चन्द्रप्रतिबिम्बं चलमिवावभासयत्येवं विनापि चितिव्यापारमुपसङ्क्रान्तचितिप्रतिबिम्बा बुद्धिरसङ्गतामपि चितिशक्तिं स्वगतया ज्ञानादिक्रिययाऽवभासयन्ती सती प्रमातृभावमापादयति परमार्थतस्तु न पुरुषस्य प्रमातृत्वं न वा तन्निष्ठो बोधः फलमिति,

---

(१) पा. १ सू. ७ योगभाष्यकारा इत्यर्थः,

२ चित्तवृत्तिबोधः=इन्द्रियप्रणालिकयाऽर्थसन्निकर्षानन्तरं जायमाना याऽयं घट इत्याकारा चित्तवृत्तिस्तद्विषयको योऽहं घटं जानामीत्याकारोऽनुभवः स प्रमाणभूतायाश्चित्तवृत्तेः फलं, स चायमनुभवः पौरुषेयः=चितिचित्तयोरभेदग्रहात्पुरुष उपचर्य्यमाणत्वेन पुरुषवर्ती, तदेवाह—अविशिष्टः=चित्तवृत्त्या सहाविशिष्टः-बुद्धिवृत्त्यात्मक इत्यर्थः, तत्र हेतुमाह—"बुद्धेः प्रतिसंवेदी पुरुष" इति, संवेदिन्या बुद्धेः प्रतिरूपः, तत्तादात्म्यापन्नत्वेन तत्समानाकार इत्यर्थः,

(३)पा.२सू.२०प्रत्ययानुपश्यः=बुद्धिवृत्तितादात्म्यापत्त्या बुद्धिवृत्त्यनुकारीत्यर्थः,

(४) पा. ४ सू. २२ अप्रतिसञ्चाराया अपरिणामिन्या अपि चितेः स्वीयबुद्धिवृत्तिविषयकं ज्ञानं बुद्धिवृत्त्याकारतापत्त्यैव भवति न स्वत इति भावः,

५ 'भोक्तृशक्तिः=पुरुषाख्या चितिः हि=यतः स्वभावतः परिणामरहिताऽतः अप्रतिसङ्क्रमा=संचाररहिता विषयदेशे गमनाभाववती, तथापि परिणामिनि बुद्धिरूपेर्थे प्रतिसंक्रान्ता=प्रतिबिम्बिता सती विषयाकारां बुद्धिवृत्तिमनुपतति=अनुगच्छति, प्राप्तश्चैतन्योपग्रहः=चैतन्यप्रतिबिम्बाख्योपरागो येन रूपेण तत् तथा, प्राप्तचैतन्योपग्रहं रूपं यस्याः सा तथोक्ता, एवंभूतायास्तस्या बुद्धिवृत्तेरनुकारमात्रतया बुद्धिवृत्त्यविशिष्टा=बुद्धितादात्म्यमापन्ना सती ज्ञानवृत्तिः=ज्ञानरूपवृत्तिमती प्रमात्रीत्याख्यायते" इत्यर्थः,

तत्साधनं प्रमाणमिति,
एतेन संशयविपर्ययस्मृतिसाधनेष्वप्रसङ्गः,

एतेन यदत्र[1] योगवार्तिके च विज्ञानभिक्षुणा—"पुरुषनिष्ठो बोधः फलम्" इति, "प्रमाता चेतनः शुद्ध" इति च जल्पितं तन्निराकृतं वेदितव्यं, पूर्वोक्तयुक्त्युपेतवाक्यजातेभ्यो बुद्धितत्त्वप्रतिबिम्बितस्य पुंसः कथञ्चित्प्रमातृत्वेपि शुद्धस्य प्रमातृत्वायोगाद् "ध्यायतीव लेलायतीव" इत्यादिश्रुतिष्वौपाधिकप्रमातृत्वादिश्रवणाच्च, "असङ्गो ह्ययं पुरुष" इत्यत्रासङ्गत्वाम्नानाच्च,, "पुरुषस्तु प्रमासाक्ष्येव न प्रमाता" इति साङ्ख्यप्रवचनभाष्यस्थस्वोक्तिविरोधाच्च

यच्चोक्तं—"बुद्धेरेव प्रमातृत्वे पुरुषो न सिद्ध्येद्" इति, तदति फल्गु, न वयं केवलं बुद्धितत्त्वं प्रमात्रित्याचक्ष्महे येनैवमुपालभ्येमहि किन्तु "उपरागात्कर्तृत्वं चित्सान्निध्याद्" इति साङ्ख्यसूत्राद् उपसङ्क्रान्तचितिप्रतिबिम्बमेव तत्प्रमातृ, इति ब्रूमहे तथा च प्रतिबिम्बत्वान्यथानुपपत्त्या साक्षितया च पुरुषसिद्धेः कथंकारमुपालभ्येमहीत्यलं बहुना,

एवं प्रमां लक्षयित्वा प्रमाणं लक्षयति —"तत्साधनं प्रमाणम्" इति, तस्याश्चित्तवृत्तेर्यत् साधनं=सन्निकर्षरूपव्यापारवच्चक्षुरादि, यच्च पौरुषेयबोधकरणं चित्तवृत्तिरूपं तदुभयमपि प्रमाणमित्यर्थः,

विज्ञानभिक्षुस्तु—न व्यापारवत्कारणं करणमपि तु फलायोगव्यवच्छिन्नमेव कारणं करणम् इत्याशयेन (यदि प्रमारूपं फलं पुरुषनिष्ठमात्रमुच्यते तदा बुद्धिवृत्तिरेव प्रमाणं यदि च बुद्धिनिष्ठमात्रमुच्यते तदा तूक्तेन्द्रियसन्निकर्षादिरेव प्रमाणं, यदि च पौरुषेयो बोधो बुद्धिवृत्तिश्चोभयमपि प्रमोच्यते तदातूक्तमुभयमेव प्रमाभेदेन प्रमाणं भवति, चक्षुरादिषु तु प्रमाणव्यवहारः परम्परयैव सर्वथा) इत्याह,

चित्तवृत्तिरूपप्रमालक्षणघटकासन्दिग्धेत्यादिविशेषणानां कृत्यमाह—"एतेन" इति, एतेन=असन्दिग्धेत्यादिविशेषणदानेन संशयविपर्य्ययस्मृतिरूपवृत्तिभिन्नचित्तवृत्तेरेव प्रमात्वाभिधानेन तत्करणस्यैव च प्रमाणत्वप्रति-

---

(१) अत्र=अ. १ सू. ८७ साङ्ख्यप्रवचनभाष्ये, पा. १ सू. ७ योगवार्तिके चेत्यर्थः, ।

(२) अ. १ सू. ८७ ।—

(३) पा. १ सू. ७ योगवार्तिके विज्ञानभिक्षूक्तिरियम्,

(४) अ. १ सू १६४ ।

सङ्ख्याविप्रतिपत्तिं निराकरोति—"त्रिविधम्" इति,

तिस्रो विधा यस्य प्रमाणसामान्यस्य तत् त्रिविधं, न न्यूनं नाप्यधिकमित्यर्थः,

विशेषलक्षणानन्तरं चैतदुपपादयिष्यामः,

कतमाः पुनस्तिस्रो विधा इत्यत आह—"दृष्टमनुमानमाप्तवचनं च" इति,

एतच्च लौकिकप्रमाणाभिप्रायं,

पादनेन, संशयविपर्ययस्मृतिरूपवृत्तीनां साधनेषु=साधारणज्ञानादिरूपकरणेषु, अप्रसङ्गः=न प्रमाणलक्षणसंगमनरूपो दोष इत्यर्थः, संशयादिवृत्तीनां प्रमात्वाभावात् तत्साधनानां न प्रमाणत्वमिति भावः ।

प्रमाणेयत्तावधारणपरं कारिकांशमवतारयति—"सङ्ख्याविप्रतिपत्तिम्" इति, कियत्सङ्ख्याकं प्रमाणमिति वितर्कं शमयतीत्यर्थः,

ननु "आम्नायविधातॄणामृषीणामतीतानागतवर्तमानेष्वतीन्द्रियेष्वर्थेषु धर्मादिषु ग्रन्थोपनिबद्धेष्वनुपनिबद्धेषु चात्ममनसोः संयोगाद् धर्मविशेषाच्च यत् प्रातिभं यथार्थनिवेदनं ज्ञानमुत्पद्यते तद् आर्षम् इत्याचक्षते" इति गुणग्रन्थे बुद्ध्यधिकारे कणाददर्शने प्रशस्तपादाचार्य्यैरार्षविज्ञानस्याप्यभ्युपेतत्वेन कथं त्रिविधमित्यवधारणमित्यत्राह—"एतच्च" इति, । एतच्च=प्र-

---

१ संशयसाधने—उच्चैस्त्वादिसाधारणधर्मज्ञाने, विपर्य्ययसाधने दुष्टेन्द्रियसन्निकर्षादौ च, स्मृतिसाधने संस्कारे तद्द्वाराऽनुभवे वा न प्रमाणत्वव्यवहारप्रसङ्ग इत्यर्थः,

२ आम्नायो=वेदः तस्य विधातारः=कर्तारो ये ऋषयस्तेषामतीतेष्वनागतेषु-वर्तमानेष्वतीन्द्रियेषु=धर्माधर्मदिक्कालप्रभृतिषु ग्रन्थोपनिबद्धेषु=आगमप्रतिपादितेषु अनुपनिबद्धेषु=आगमाप्रतिपादितेषु चात्ममनसोः संयोगाद् यत् प्रातिभं ज्ञानं यथार्थनिवेदनं=यथास्वरूपवेदनं संशयविपर्य्ययरहितं ज्ञानमुत्पद्यते तदार्षमित्याचक्षते विद्वांसः । इन्द्रियलिङ्गाद्यभावे यदर्थप्रतिभानं सा प्रतिभा प्रतिभैव प्रातिभमित्युच्यते तत्रभवद्भिः, तस्योत्पत्तिरनुपपन्ना कारणाभावादित्यनुयोगे सतीदमुक्तं "धर्मविशेषाद्" इति, विशिष्यत इति विशेषो धर्म एव विशेषो धर्मविशेषः विद्यातपःसामाधिजः प्रकृष्टो धर्मस्तस्मात्प्रतिभोदय) इत्यर्थ इत्येतद्भाष्यव्याख्याने कन्दलीकारः श्रीधराचार्य्यः,

लोकव्युत्पादनार्थत्वाच्छास्त्रस्य तस्यैवात्राधिकाराद्, आर्षं तु विज्ञानं योगिनामूर्द्ध्वस्रोतसां न लोकव्युत्पादनायालमिति सदपि नाभिहितमनधिकाराद्,

---

माणत्रैविध्याभिधानं च, लौकिकप्रमाणाभिप्रायम्=योगिजनभिन्नसाधारण-जनानां यानि प्रमाकरणानि तदभिप्रायं, साधारणजनज्ञानजननोपयोगीनि प्रमाणानि त्रीण्येवेति तात्पर्य्यकमित्यर्थः, । तत्र हेतुमाह—"लोकव्युत्पाद-नार्थत्वाद्" इत्यादिना, शास्त्रस्य साधारणजनबोधनप्रयोजनत्वात् तस्यैव=लौ-किकप्रमाणत्रयस्यैव, अत्र=प्रकृतशास्त्रे अधिकाराद्=निरूपणयोग्यत्वादित्यर्थः ।

के पुनरार्षविज्ञानाधिकारिण इत्याकाङ्क्षायामाह—"आर्षन्तु" इति, । तु-शब्दः पुनरर्थे । यत्पुनर्—ऊर्ध्वस्रोतसां ऊर्ध्व=विषयेभ्यो बहिः परे तत्त्वे स्रोतः=वृत्तिप्रवाहो येषां तेषां योगिनां सम्बन्ध्यार्षं विज्ञानं तत्तु सामान्यज-नबोधनाय नालं=न समर्थम् इति हेतोः सदपि=विद्यमानमपि तदार्षं विज्ञा-नमत्र नोक्तम् अनधिकाराद्=उपयोगाभावाद् इत्यर्थः ।

तथा चाहुः प्रशस्तपादाचार्य्याः—"तत्तु (आर्षविज्ञानं तु) प्रस्तारेण[2] देवर्षीणां कदाचिदेव लौकिकानां यथा कन्यका ब्रवीति श्वो मे भ्राताऽऽ-गन्तेति हृदयं मे कथयतीति[3]" इति ।

अत्रेदं बोध्यम्–बुद्धितत्त्वं हि प्रकाशस्वभावत्वेन सर्वार्थदर्शनसमर्थमपि तमसाऽऽवृतं सत्सर्वदा सर्वं न गृह्णाति, यत्र तु रजसोद्घाट्यते सत्वेन चोद्रिच्यते तत्रैव गृह्णाति, यदा त्वभ्यासवैराग्याभ्यामपास्तसमस्तरजस्तमो-मलस्य योगजधर्मानुगृहीतस्यास्यानवद्यवैशारद्यमुद्योतते तदाऽस्यातीतानाग-तविप्रकृष्टव्यवहितसूक्ष्मपदार्थग्रहणसमर्थस्य प्रकाशानन्त्ये सति किन्नाम तद् यन्न गोचरोऽपि तु सर्व एवास्य गोचर, ईदृग्विधमेव ज्ञानम् (आर्षम्) (ऋतम्भरा प्रज्ञा) इति चाख्यायते, इदं च योगजप्रत्यक्षत्वात्प्रत्यक्षान्तर्ग-

---

१ यद्वा "अहरहर्नयमानो गामश्वं पुरुषं पशुम्" इत्यादौ विनापि चकारं समु-च्चयस्य दृष्टत्वाद् 'ऊर्ध्वस्रोतसाम्' इति पृथक्कोटिर्, ऊर्ध्वं=स्थूलेभ्यो विषयेभ्यो बहिरतीन्द्रियेऽर्थे स्रोतो=ज्ञानं येषां तेषां देवर्षीणां योगिनां चेत्यर्थो बोध्यः ।

२ प्रस्तारेण=बाहुल्येन,

३ इदं च कन्यकाज्ञानं न संशय उभयकोटिसंस्पर्शाभावाद्, न च विपर्य्ययः, संवादाद्, अतः प्रमाणमेवेति बोध्यम् ॥

स्यादेतद्–माभून्न्यूनम्, अधिकं तु कस्मान्न भवति, सङ्गिरन्ते हि प्रतिवादिन उपमानादीन्यपि प्रमाणानि, इत्यत आह—"सर्वप्रमाणसिद्धत्वाद्" इति । एष्वेव दृष्टानुमानाप्तवचनेषु सर्वेषां प्रमाणानां सिद्धत्वाद्=अन्तर्भावादित्यर्थः ।

तमेव, अत एव तन्मात्रलक्षणविषयगोचरस्य योगिज्ञानस्याग्रे[1] प्रत्यक्षत्वमभिधास्यते, तथा च प्रत्यक्षान्तर्भावान्न तत् पार्थक्येनाभिहितं, प्रत्यक्षादतिरिक्तत्वे[2] तु लोकोपयोगाभावान्नात्राभिहितमिति,

एवं सिद्धज्ञानमपि प्रत्यक्षान्तर्भूतत्वान्न ज्ञानान्तरं, तथा चाहुः प्रशस्तपादाचार्य्याः—"सिद्धदर्शनं न ज्ञानान्तरं, कस्मात् प्रयत्नपूर्वकमञ्जनपादलेपखड्गगुलिकादिसिद्धानां दृश्यद्रष्टॄणां[3] सूक्ष्मव्यवहितविप्रकृष्टेष्वर्थेषु यद् दर्शनं तत्प्रत्यक्षमेव, अथ दिव्यान्तरिक्षभौमानां प्राणिनां ग्रहनक्षत्रसंचारादिनिमित्तं धर्माधर्मविपाकदर्शनमिष्टं तदप्यनुमानमेव,[4] अथ "लिङ्गानपेक्षं धर्मादिषु दर्शनमिष्टं तदपि प्रत्यक्षार्षयोरन्यतरस्मिन्नन्तर्भूतम्[5]" इति,

नन्वार्षविज्ञानस्यालौकिकत्वेन लोकोपयोगाभावादत्रानिरूपणेऽप्युपमानादीनां लोकोपयुक्तत्वेनावश्यं निरूपणीयत्वेन तदनिरूपणप्रयुक्ता कथं न न्यूनतेत्याशयेन शङ्कते "स्यादेतद्" इत्यादिना,

प्रतिवादिनः=गोतमादयः, सङ्गिरन्ते=प्रतिजानते, "समः प्रतिज्ञाने" । १ । ३ । ५२ । इति सूत्रेण प्रतिज्ञानार्थे गिरतेस्तङ् इति बोध्यम् ।

---

१ अग्रे=पञ्चमकारिकाव्याख्यायां–'विषयाः पृथिव्यादयः सुखादयश्च, अस्मदादीनामविषयास्तन्मात्रलक्षणा योगिनामूर्ध्वस्रोतसां च विषयाः, विषयं विषयं प्रति वर्तते यदिन्द्रियं तदाश्रितं ज्ञानं प्रत्यक्षम्' इत्यर्थस्य स्पष्टत्वादिति भावः,

२ आर्षज्ञानस्य प्रत्यक्षान्तर्भावे कथं प्रशस्तपादैः 'विद्यापि चतुर्विधा प्रत्यक्षलैङ्गिकस्मृत्यार्षलक्षणा' इति प्रत्यक्षादतिरेकेणाभिधानमित्याशङ्कायामाह–"प्रत्यक्षादतिरिक्तत्वे तु" इति, । गोबलीवर्दन्यायेन पृथगभिधानमित्यपि केचिद् ।

३ दृश्यानां=दर्शनयोग्यानां स्वरूपवतां पदार्थानां द्रष्टारो य अञ्जनादिसिद्धास्तेषां यत्सूक्ष्मादिष्वर्थेषु दर्शनम्=इन्द्रियाधीनानुभवस्तत्प्रत्यक्षमेवेत्यर्थः,

४ एतादृशं दैवज्ञानं यदि सिद्धज्ञानमभिमतं तर्हि तदनुमानमेव, ग्रहसंचारादीनां लिङ्गत्वाद्,

५ यदि धर्मादिदर्शनमिन्द्रियजं तदा प्रत्यक्षान्तर्भूतम्, अथेन्द्रियानपेक्षं तदाऽऽर्षम् इत्यर्थः ।

एतच्चोपपादयिष्यत इत्युक्तम्,

अथ प्रमेयव्युत्पादनाय प्रवृत्तं शास्त्रं कस्मात्प्रमाणं सामान्यतो विशेषतश्च लक्षयति इत्यत आह—"प्रमेयसिद्धिः प्रमाणाद्धि"—सिद्धिः=प्रतीतिः,

---

"अन्तर्भावाद्" इति, एतेन "तत्सिद्धौ सर्वसिद्धेर्नाधिक्यसिद्धिर्"[1] इति साङ्ख्यसूत्रार्थः संगृहीतः,

साङ्ख्यचन्द्रिकाकारो नारायणतीर्थस्तु (सर्वप्रमाणसिद्धत्वाद्—सर्वैः प्रमाणैः=प्रमातृभिः पतञ्जलिप्रभृतिभिः सिद्धत्वात्—प्रत्यक्षानुमानागमाः प्रमाणानीति स्वीकृतत्वाद्, उपमानादिकं तु न सर्वप्रमाणसिद्धम्) इत्येवमिदं व्याचख्यौ,

"मनुर्वै यत् किञ्चावदत् तद् भेषजम्"[2] इति श्रुत्यभिहितमहत्त्वेन सर्वेषां प्रमाणभूतेन मनुवचनेन[3] सिद्धत्वाद्=त्रीण्येव प्रमाणानीति निश्चितत्वात् प्रमाणत्रयमेवेष्टमित्यर्थोऽपि यदि[4] मतिमतां मतिमारोहेत् तर्ह्ययमप्यादेयः,

यद्वा सर्व—शब्दोऽत्र बहुपर्य्यायः, तथा च मनुकपिलपतञ्जलिमुनिवचनरूपैर्बहुभिः प्रमाणैः सिद्धत्वात्प्रमाणत्रयमेवेष्टं नतु एकैकमुनिवचनरूपैकैकप्रमाणसिद्धं प्रमाणचतुष्टयादिकमित्यर्थो बोध्यः,

कथमन्तर्भाव इत्यत्राह—"एतच्च" इति,

ननु पदवाक्यप्रमाणप्रमेयभेदभिन्नेषु[5] विद्याप्रस्थानेषु साङ्ख्ययोगवेदान्तरूपप्रस्थानत्रयस्य प्रमेयप्रतिपादनपरत्वादत्र प्रमाणप्रतिपादनं विपश्चित्संकेतपराहतम्, इत्याशयेन शङ्कते—"अथ प्रमेय" इति

'प्रमाणाद्धि' इति, हि=यतः प्रमेयावगतिः प्रमाणाधीनातः प्राधान्येन

---

(१) अ० १ सू० ८८। त्रिविधप्रमाणसिद्धौ सर्वप्रमाणानां प्रमेयव्यवस्थासिद्धेर्नाधिक्यसिद्धिः पृथक्प्रमाणत्वेन, त्रिविधप्रमाणेष्वन्येषामन्तर्भावाद्' इत्यर्थ इति वृत्तिकारोऽनिरुद्धो महादेवश्च। त्रिविधप्रमाणसिद्धौ च सर्वस्यार्थस्य सिद्धेर्न प्रमाणाधिक्यं सिध्यति गौरवादित्यर्थ इति विज्ञानभिक्षुः।

२ ताण्ड्यमहाब्राह्मणे २३ अध्याये १६ खण्डे श्रुतिरियम्।

३ "प्रत्यक्षमनुमानं च शास्त्रं च विविधागमं, त्रयं सुविदितं कार्य्यम्" इति पूर्वाभिहितेन मनुवचनेनेत्यर्थः।

४ यदीत्युक्त्याऽयमप्यर्थः संभवति परं नासौ मूलकाराभिप्रेत इति सूचयति।

५ पदविद्या—व्याकरणम्, वाक्यविद्या—मीमांसा, प्रमाणविद्या—न्यायकाणाददर्शनं, प्रमेयविद्या—साङ्ख्ययोगवेदान्ताः।

सेयमार्य्याऽर्थक्रमानुरोधेन पाठक्रममनादृत्यैवं व्याख्याता॥४॥

सम्प्रति प्रमाणविशेषलक्षणावसरे प्रत्यक्षस्य प्रमाणेषु ज्येष्ठत्वात् तदधीनत्वाच्चानुमानादीनां, सर्ववादिनामविप्रतिपत्तेश्च तदेव तावल् लक्षयति—"प्रतिविषयाध्यवसायो दृष्टम्" इति,

प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातं, तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनं तु ॥ ५ ॥

अत्र 'दृष्टम्' इति लक्ष्यनिर्देशः । परिशिष्टन्तु लक्षणम्,

प्रमेयप्रतिपादनपरमप्येतत् तत्रं तदुपयोगितयाऽऽपाततः प्रमाणमपि प्रतिपादयतीत्यर्थः ।

पाठानुपूर्वीमुपेक्ष्य कुतो विपरीतक्रमेणेयं कारिका व्याख्यातेति शङ्कायामाह—"सेयमार्य्या" इति, आर्य्या='आर्य्याख्यछन्दोबद्धा कारिका' "अर्थक्रमानुरोधेन" इति, ॥ यथा च पाठक्रमादर्थक्रमस्य बलीयस्त्वं तथा "अर्थाच्च" इति सूत्रे जैमिनीये व्यक्तमिति ततोऽवसेयम्,

आकाङ्क्षायोग्यतादिकमेव परस्परान्वयकारणं नानन्तरश्रवणमात्रमिति भावः ॥ ४ ॥

पञ्चमार्य्यामवतारयति—"सम्प्रति" इत्यादिना, प्रमाणानां ये विशेषाः=प्रत्यक्षादयो भेदास्तेषां यानि, लक्षणानि तन्निरूपणावसरे सति तदेव=प्रत्यक्षमेव तावत्=प्रथमं लक्षयतीत्यन्वयः,

प्रत्यक्षस्य प्रथमनिरूपणे हेतुमाह—"प्रत्यक्षस्य प्रमाणेषु ज्येष्ठत्वाद्" इति, ज्येष्ठत्वाद्=पूर्ववर्तित्वाद्, निखिलप्रमाणोपजीव्यत्वादिति यावद्, तदेवाह—"तदधीनत्वाच्च" इति, अनुमानादीनां प्रत्यक्षसापेक्षत्वादित्यर्थः । हेत्वन्तरमाह—"सर्ववादिनामविप्रतिपत्तेश्च" इति, प्राकृतचार्वाकादेरपि प्रत्यक्षे विवादाभावेन सर्वसम्मतत्वाच्चेत्यर्थः, । परिशिष्टं='प्रतिविषयाध्यवसाय' इत्यवशिष्टो भाग इत्यर्थः,

---

(१) अ० ५पा० १ सू० २ । अग्निहोत्रं जुहोति, यवागूं पचति इति होमपाकयोः पाठक्रमेण पौर्वापर्य्यसत्त्वेऽप्यर्थक्रममादाय पक्त्वैव होतव्यमिति हि तत्र व्यक्तम्,

२ अनुमानादीनामिति बहुवचनन्तु पराभिमतोपमानाद्यभिप्रायेण नेयम् ।

समानासमानजातीयव्यवच्छेदो लक्षणार्थः, अवयवार्थस्तु-विसिन्वन्ति=विषयिणमनुबध्नन्ति-स्वेन रूपेण नि-रूपणीयं कुर्वन्तीति यावद्, विषयाः-पृथिव्यादयः, सुखादयश्च,

---

लक्षणकरणस्य प्रयोजनमाह—"समानासमानजातीय" इति, समानजातीयेभ्योऽसमानजातीयेभ्यश्च पदार्थेभ्यो यो व्यवच्छेदः=व्यावर्तनं—विभज्य लक्ष्यस्थापनं स लक्षणार्थः=लक्षणकरणप्रयोजनमित्यर्थः,

एतेन 'समानासमानजातीयव्यवच्छेदकत्वं लक्षणत्वम्' इति लक्षणशब्दार्थोऽप्यनेन ज्ञापितो वेदितव्यः,

लक्षणं हि व्यतिरेकिहेतुवचनं [1]सत्सजातीयविजातीयेभ्योऽर्थेभ्यो व्यावर्त्य लक्ष्यं व्यवस्थापयतीति भवति लक्षणस्य सजातीयविजातीयव्यवच्छेदकत्वम् ।

'नीलमुत्पलम्' इत्यत्र सजातीयमात्रव्यवच्छेदके विशेषणेऽतिप्रसङ्गवारणाय "असमानजातीय" इति. रूपं गुण इत्यादौ विजातीयद्रव्यव्यवच्छेदकधर्मेऽतिव्याप्तिवारणाय 'समानजातीय' इति,

यथा चास्य प्रत्यक्षलक्षणस्य सजातीयविजातीयव्यवच्छेदकत्वं तथा प्रत्यक्षलक्षणावसानेऽत्रैव व्यक्तमिति नात्र मया किञ्चिद् वचनीयम्,

लक्षणपदघटकशब्दार्थमाह—"अवयवार्थस्तु" इति, 'विसिन्वन्ति' इति 'षिञ् बन्धने' इत्यस्य रूपं, तस्य विवरणमाह—"विषयिणमनुबध्नन्ति" इति । विषयिणं=चित्तवृत्तिरूपं ज्ञानम् । 'अनुबध्नन्ति' इत्यस्यार्थमाह—"स्वेन रूपेण निरूपणीयं कुर्वन्ति" इति ।

स्वेन रूपेण=स्वकीयेनाकारेण, निरूपणीयं=निरूपणार्हं स्वाकारोपरक्तं कुर्वन्तीति यावद्,

घटादयो विषया हीन्द्रियसन्निकर्षादिना विषयिणं चित्तं स्वाकारेणोपरञ्जयन्ति, यदिदमुपरञ्जनं=विषयिणि चित्ते विषयाणां स्वाकारार्पणमेतदेव स्वेन रूपेण निरूपणीयत्वमिति तत्त्वम्,

---

१ अत एव पृथिव्या लक्षणं गन्धवत्त्वं 'पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वाद्' इत्येवं व्यतिरेकिहेतुवचनं सत् पृथिवीमितरेभ्यो व्यावर्त्य व्यवस्थापयति,

असदादीनामविषयाश्च तन्मात्रलक्षणा योगिनामूर्द्ध्वस्रोतसां च विषयाः, विषयं विषयं प्रति वर्तत इति प्रतिविषयम्=इन्द्रियम्, वृत्तिश्च सन्निकर्षः, अर्थसन्निकृष्टमिन्द्रियमित्यर्थः,

---

विषयशब्देन न केवलं स्थूला विषया गृह्यन्तेऽपि तु सूक्ष्मा अपीत्याह— "अस्मदादीनाम्" इति, तन्मात्रलक्षणाः=सूक्ष्मभूतात्मका ये पदार्था अस्मदादीनामविषयास्तेपि योगिनामूर्द्ध्वस्रोतसां च विषया इति तेपि विषयपदेन गृह्यन्त इत्यर्थः ।

एवं विषयपदार्थमाख्याय प्रतिविषयपदार्थमाह—"विषयं विषयं प्रति" इति,

विषयं विषयं प्रति वर्तत इत्यनेन यदिन्द्रियाणां विषयं प्रति वर्तनमभिहितं तन्नेन्द्रियाणां स्वस्थानपरित्यागपूर्वकं विषयदेशगमनं तथा सत्यन्धत्वादिप्रसङ्गाद् अपि तु संबन्धविशेषे इत्याह—"वृत्तिश्च सन्निकर्ष" इति, 'वर्तते' इतिपदघटकवृत्धात्वर्थरूपा वृत्तिश्चात्र सन्निकर्ष एव नत्विन्द्रियाणां विषयदेशगमनमित्यर्थः ।

अयमेव सन्निकर्षो व्यापार इत्यभिधीयते,

तथा चाहुः—'वृत्तिस्तु सन्निकर्ष' इति न्यायभाष्यमुपादाय तात्पर्यटीकाकाराः "वृत्तिरिति हि व्यापारः, स तु व्यापार उच्यते यः कारकैः फले जनयितव्ये चरमभावी धर्मभेदः फलोत्पादानुकूलोऽपेक्ष्यते, यथा पटे जनयितव्ये तन्तुभिश्चरमभाविनः संयोगविशेषाः, स्वर्गे जनयितव्ये यागेनापूर्वमात्मधर्मः, तथेहापीन्द्रियादिना प्रमाणेन प्रमायां फले प्रवृत्तेन तदुत्पादनानुकूलः सन्निकर्षो ज्ञानं वा चरमभावी धर्मोऽपेक्ष्यत इति भवति व्यापारः स एव वृत्तिरित्याख्यायते" इति,

एवमवयवार्थमाख्याय प्रतिविषयमिति समुदायस्य निर्गलितमर्थमाह— "अर्थसन्निकृष्टमिन्द्रियम्" इति ।

अर्थः=घटादिविषयः तत्संबद्धमिन्द्रियमित्यर्थः, प्रतिविषयेऽध्यवसाय इति

---

१ स च संबन्धविशेषो नोच्छिन्नमूलोऽपि त्वच्छिन्नमूलः, तथाचाहुर्वाचस्पतिमिश्राः "निर्गताप्यच्छिन्नमूला चक्षुःसन्ततिः कार्य्याय समर्था न च्छिन्नमूला" इति, एतेन यदि च चक्षुःप्राप्यार्थं गृह्णीयात् तदोन्मील्य निमीलितनयनोपि रूपं पश्येद् इत्याशयेन "यदि च स्यात् तदा पश्येदप्युन्मील्य निमीलनाद्" इत्यभिहितं तन्निराकृतं वेदितव्यम्, अच्छिन्नमूलसन्तत्यङ्गीकारे चान्धत्वादिप्रसङ्गोपि नेत्यपि ज्ञेयम्,

तस्मिन्नध्यवसायः—तदाश्रित इत्यर्थः,
अध्यवसायश्च बुद्धिव्यापारो ज्ञानम्,
उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्यां बुद्धेस्तमोभिभवे सति यः सत्त्वसमुद्रेकः सोऽध्यवसाय इति वृत्तिरिति ज्ञानमिति चाख्यायते,

---

सप्तमीतत्पुरुषमाश्रित्याह—"तस्मिन्नध्यवसाय" इति, तस्मिन्=प्रतिविषय इत्यर्थः। समासान्तर्गतलुप्तस्यार्थमाह—"तदाश्रित" इति, विषयव्यापृतेन्द्रियाधीन इत्यर्थः।

तदाश्रित इत्यनेनाध्यवसायस्येन्द्रियनिष्ठत्वाभिधानेनाध्यवसाय इन्द्रियधर्म इति नाम्ध्येयमपि त्विन्द्रियमाश्रित्य बुद्धौ वर्तमानत्वेन बुद्धेरेव स धर्मोऽभ्युपेय इत्याह—"अध्यवसायश्च" इति, अध्यवसायपदाभिधेयं ज्ञानं च बुद्धेरेव व्यापारो नेन्द्रियधर्म इत्यर्थः,

यथा—बीजकालसलिलधरणीसंयोगादिसन्निधाने जायमानोप्यङ्कुरो न कालाङ्कुरः, सलिलाङ्कुरः, धरण्यङ्कुर इति वा व्यपदिश्यते तस्य कालादिधर्मत्वाभावाद् अपि तु बीजेनैव व्यपदिश्यते यवाङ्कुरः शाल्यङ्कुर इति तस्य तद्धर्मत्वात्, तथा बुद्धिविषयेन्द्रियालोकसंयोगादिसन्निधानेन जायमानमपि ज्ञानं नेन्द्रियधर्मो विषयधर्म आलोकधर्म इति वा व्यपदिश्यते तस्य तद्धर्मत्वाभावादपि तु बुद्धिधर्मत्वेनैव व्यपदिश्यते बुद्धिवृत्तिरिति बुद्धिव्यापार इति, इति भावः,

अध्यवसायपदाभिधेयबुद्धिव्यापारस्य ज्ञानस्य लक्षणमाह—"उपात्तविषयाणाम्" इति,

उपात्तः=गृहीतः—प्रतिबिम्बरूपेण लब्धो विषयो यैस्तेषामिन्द्रियाणां वृत्तौ सत्यां=विषयाकाराकारितत्वे सति यो बुद्धेस्तमोरूपावरणानादरपुरस्सरसत्त्वात्मकप्रकाशबाहुल्यरूपो धर्मविशेषः सोऽध्यवसाय इति वृत्तिरिति ज्ञानमिति चाभिधीयत इत्यर्थः।

---

१ आस्ये प्रयत्न आस्यप्रयत्नः, शब्दे संज्ञा शब्दसंज्ञा, इत्यादिप्रयोगेषु महाभाष्यकारादिभिः सप्तमीतत्पुरुषस्याश्रितत्वादनुक्तोपि "सप्तमी शौण्डैः," इत्यत्र योगविभाग ऊहनीयः, 'सुप् सुपा' इति वा समासः,

२ तस्य=अङ्कुरस्य, तद्धर्मत्वाद्–बीजधर्मत्वाद्,

३ यद्वा उपात्तशब्दः सन्निहितवाची सन्निहितविषयाणामिन्द्रियाणां वृत्तौ=सन्निकर्षे सतीत्यर्थः, सन्निहित एव विषये सन्निकर्षो जायते न व्यवहित इत्याशयेन चैतदभिधानमिति ज्ञेयम्,

इदं तावत् प्रमाणम्,

तमोऽभिभवसमसमयभवो यो बुद्धेः सत्वसमुद्रेकः स एव वृत्तिपदार्थत्वेनात्राभिप्रेतो नत्वितरत् तस्य तमोनिरसनमुखेन वृत्त्युत्पत्तिहेतुत्वेपि वृत्तिलक्षणघटकत्वाभावात्, तेन नानुमानागमवृत्तिषु वृत्तिलक्षणाव्याप्तिरिति,

अत्रेदं बोध्यं—यथा स्वभावतश्चलनशीलमपि जलाशयस्थं सलिलं निर्गममार्गासत्वरूपप्रतिबन्धकबलात्स्वयं क्षेत्रमनुपसर्पदपि छिद्रे सति तद्द्वारा निर्गत्य कुल्यात्मना क्षेत्रमुपसृप्य केदाराकारेण परिणमते तथा स्वभावतः सर्वार्थग्रहणसमर्थमपि बुद्धितत्वं तमसा प्रतिबद्धं सत् स्वयं विषयमनुपसर्पदपीन्द्रियार्थसन्निकर्षादिना तमोनिरासे इन्द्रियप्रणालिकया विषयमुपसृप्य तदाकारेण परिणमते, योयं बुद्धितत्त्वस्य विषयाकारपरिणामः स एवाध्यवसाय इति वृत्तिरिति ज्ञानमिति प्रमाणमिति चाभिधीयते,

तत्रैतावान् विशेषः—इन्द्रियसन्निकर्षद्वारा यस्तमोभिभवसमसमयसत्त्वसमुद्रेकप्रयुक्तो बुद्धेर्विषयाकारपरिणामः स प्रत्यक्षप्रमाणमिति व्यवह्रियते व्याप्तिज्ञानजन्यश्च यस्तथाविधः परिणामः सोनुमानप्रमाणमिति व्यपदिश्यते, वाक्यजन्यश्च यस्तादृशः परिणामविशेषः स आगमप्रमाणमित्यभिधीयते,

तदेवाह—"इदं तावत् प्रमाणम्" इति ।

तावद्—इति वाक्यालङ्कारे, इदम्=इन्द्रियसन्निकर्षादिना जायमानं यद् बुद्धितत्वगतसत्वाधिक्यप्रयुक्तं बुद्धेर्विषयाकारपरिणामशीलत्वं तदिदं प्रमाणमित्युच्यत इत्यर्थः ।

नन्वन्तःकरणस्य चित्तस्य निरवयवत्वेन पुरुषवदपरिणामित्वात्कथं विषयाकारपरिणामशीलत्वं तस्येति चेत, प्रधानवन्निरवयवत्वेपि परिणामित्वोपपत्तेरिति गृहाण, । अपरिणामित्वे चेतनत्वं तत्र न निरवयवत्वमिति तत्वम्,

---

१ ननूपात्तविषयाणाम् इत्यादिना विषयेन्द्रियसन्निकर्षजन्यस्यैव बुद्धेः सत्वोद्रेकस्य वृत्तिलक्षणत्वे लिङ्गादिजन्यानुमानादिवृत्तेरिन्द्रियजन्यत्वाभावेन तत्र वृत्तिलक्षणाव्याप्तिरित्याशङ्कायामाह—"तमोऽभिभव" इत्यादि,

२ इतरद्—उपात्तविषयाणामिन्द्रियाणामित्यादिनेन्द्रियसन्निकर्षाद्यभिधानं, । तस्य=इन्द्रियसन्निकर्षादेः, 'तमोनिरसनमुखेन' तथा च सत्त्वोद्रेक एव वृत्तिपदार्थः, तत्र च तमोऽभिभवनं कारणं तमोऽभिभवे चेन्द्रियसन्निकर्षव्याप्तिज्ञानादिकं निमित्तमित्यत्र फलितम्,

(३) तथाविधः=विषयप्रकाशकः सत्त्वोद्रेकरूपः,

(४) चित्तमपरिणामि निरवयवत्वादात्मवद् इति प्रयोगश्चेतनत्वोपाधिसंवलितत्वेन दुष्ट इति भावः,

अनेन यश्चेतनाशक्तेरनुग्रहस्तत्फलं प्रमा बोध इति।

वस्तुतस्तु—"हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गं, सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्" इति साङ्ख्यस्मरणात्प्रकृत्यतिरिक्तस्य सर्वस्यैव बुद्ध्यादेः सावयवत्वेन मध्यमपरिमाणत्वान्न विषयाकारपरिणामानुपपत्तिः, मध्यमपरिमाणत्वेप्यतिनिर्मलविरलतैजसद्रव्यत्वेन तरणिकिरणवत् सत्वरप्रसरोपपत्तेर्न विलम्बेन विप्रकृष्टध्रुवादिविषयप्रतिभासानुपपत्तिश्च,—

ध्रुवादिविषयपर्य्यन्तगमनेप्यच्छिन्नमूलसन्तत्यङ्गीकारेणान्तःकरणस्य देहसंबन्धसद्भावान्न देहस्य निर्जीवत्वापत्तिरित्यपि ध्येयम्,

एतेन (अन्तःकरणस्याणुपरिमाणत्वे प्राणनक्रियाधारस्य तस्य दूरवर्त्तिविषयप्रदेशगमने प्राणस्यापि निर्गतत्वेन देहपातापत्तिः, तस्य विभुत्वे च निष्क्रियत्वेन बहिर्निर्गमनासंभवेन विषयाकारपरिणामानापत्तिः, तस्य मध्यमपरिमाणत्वे च देहवन्मन्दगामित्वेन झटिति विषयप्रतिभासानुपपत्तिर्) इति शङ्काप्यपोदिता वेदितव्या,

यथा चान्तःकरणस्य नाणुत्वं विभुत्वं वा तथा 'न व्यापकत्वं मनसः करणत्वादिन्द्रियत्वाद् वा', 'सक्रियत्वाद् गतिश्रुतेः', 'न निर्भागत्वं तद्योगाद्' इत्यादि साङ्ख्यसूत्रेषु स्पष्टम्,

एवं प्रमाणसामान्यं लक्षयित्वा तत्फलभूतां प्रमामाह—' "अनेन" इति, अनेन=विषयाकारपरिणामधारिणा बुद्धितत्त्वेन चेतनाशक्तेः=चेतनस्य पुरुषस्य योऽनुग्रहः=स्वोपगृहीतानां विषयाणां स्वप्रतिबिम्बिते चेतने समर्पणं तत् फलमिति बोध इति प्रमेति चाभिधीयत इत्यर्थः।

अन्तःकरणस्यायं स्वभावो यदिन्द्रियैरुपनीतान् विषयान् स्वस्वामिन आत्मने समर्पयति, यथाहुः—"गृहीतानिन्द्रियैरर्थानात्मने यः प्रयच्छति, अन्तःकरणरूपाय तस्मै विश्वात्मने नम" इति,

इन्द्रियसन्निकर्षादिना जायमानोयं घट इत्यादि बौद्धो बोधः प्रमाणं, तदनूपजायमानो घटमहं जानामीत्यादिपौरुषेयो बोधश्च प्रमेति भावः।

---

(१) अ० १ सू० २४। स्पष्टं चैतद् १० इति कारिकायामग्रे,

२ सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च (अ० २। सू० ३१) इति साङ्ख्यसूत्रादन्तःकरणत्रयव्यापारस्यैव प्राणत्वादन्तःकरणनिर्गमे प्राणनिर्गमावश्यंभावादित्यर्थः,

(३) अ० ५ सू० ६९।

(४) सू० ७०।

(५) सू० ७१ निर्भागत्वं=निरवयवत्वं मनसो नेत्यर्थः,

६ विष्णुपुराणे प्रथमेंशे चतुर्दशेऽध्याये—३५ श्लो०

बुद्धितत्त्वं हि प्राकृतत्वादचेतनम् इति तदध्यवसायोप्यचेतनो घटादिवत्, एवं बुद्धितत्त्वस्य सुखादयोपि परिणामभेदा अचेतनाः, पुरुषस्तु सुखाद्यननुषङ्गी चेतनः, सोयं बुद्धितत्त्ववर्तिना ज्ञानसुखादिना तत्प्रतिबिम्बितस्तच्छायापत्त्या ज्ञान-

---

अनुग्रहपदार्थं स्पष्टयति, "बुद्धितत्त्वं" इति, हि=यतः बुद्धितत्त्वं प्राकृतत्वाद्=जडप्रकृतिकार्य्यत्वादचेतनम् इति=अतस्तद्धर्मोऽध्यवसायोप्यचेतन इत्यर्थः,

कस्तर्हि चेतन इत्यत्राह—"पुरुषस्तु" इति, बुद्धितत्त्वाद्विलक्षणः पुरुष इति द्योतनार्थस्तुशब्दः, तदेवाह "चेतन" इति,

'चेतनोऽहं जानामि सुखी' इति चैतन्यसामानाधिकरण्येन ज्ञानसुखादेरनुभूयमानत्वेन पुरुषस्यैव ज्ञानसुखादिमत्त्वोपपत्तेः कथमभिहितं बुद्धेः परिणामविशेषा ज्ञानसुखादय इति, इत्याशङ्क्याह—' "सुखाद्यननुषङ्गी" इति, "असङ्गो ह्ययं पुरुष" इति श्रुतेर्ज्ञानसुखाद्यनाधार इत्यर्थः, कथन्तर्हि चेतनोहं जानामीति प्रतीतिरित्यत्राह —"सोयम्" इति, चित्तगतेन ज्ञानादिना पुरुषस्य ज्ञानादिमत्त्वप्रतीतिरित्यर्थः,

अन्यगतस्याऽन्यत्र भाने निमित्तमाह—"तच्छायापत्त्या" इति, बुद्धितत्त्वतादात्म्यापत्त्येत्यर्थः, चितिचित्तयोरभेदग्रहादित्यावद्, अयमेवास्मिताख्योऽविवेक इत्यभिधीयते, यथाहुः—'दृक्दर्शनशक्त्योरेकात्मतेवास्मिता' इति, 'बुद्धितः परं पुरुषमाकारशीलविद्यादिभिर्विभक्तमपश्यन् कुर्य्यात् तत्रात्मबुद्धिं मोहेन' इति च,

बुद्धितादात्म्यापत्तौ प्रयोजकमाह—"तत्प्रतिबिम्बित" इति, बुद्धितत्त्वे प्रतिबिम्बित इत्यर्थः ।

एवं च बुद्धावेव प्रमाख्यं फलं जायते न पुरुषे तस्याऽसङ्गत्वेन प्रमाधारत्वाभावात्, चितिचित्तयोरभेदग्रहाच्च पौरुषेयो बोध इत्युपचर्य्यत इत्यत्र फलितम् ।

---

(१) यो० सू० ६ पा० २ । दृक्शक्तिः=पुरुषः, दर्शनशक्तिः=बुद्धिर्, इत्येतयोरेकस्वरूपापत्तिरिवास्मितेत्यर्थः—

(२) पुरुषस्य आकारः=स्वरूपं—सदा विशुद्धिः, शीलम्—औदासीन्यं, विद्या=चैतन्यम्, बुद्धिर् अविशुद्धा अनुदासीना जडा च, इति सत्यपि बुद्धिपुरुषयोर्विभागे तथापि मोहेन=अस्मिताख्याऽविवेकेन विभक्तमपश्यन् तत्रात्मबुद्धिं करोतीति, पञ्चशिखोक्तेरर्थः,

सुखादिमानिव भवतीति चेतनोऽनुगृह्यते,

विज्ञानभिक्षुस्तु–'न बुद्धौ प्रमाख्यं फलं जायते तथा सति पौरुषेयशब्दस्य यथाश्रुतार्थत्यागापत्तेः, प्रतिबिम्बस्य तुच्छतयाऽर्थभानानुपपत्तेश्च, प्रतिबिम्बस्य प्रकाशाद्यर्थक्रियायाः क्वाप्यदर्शनाद्, अपित्विन्द्रियसन्निकर्षादिना पूर्वं बुद्धेरर्थाकारा वृत्तिर्जायते तदनु चार्थोपरक्ता बुद्धिवृत्तिः प्रतिबिम्बरूपेण पुरुषारूढा सती भासते, "तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः, इमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः' इत्यादिस्मृतिषु परस्परं प्रतिबिम्बस्य सिद्धत्वाद्' इत्येवं वाचस्पत्यं निराचष्ट, एतच्च पूर्वोपन्यस्त 'चितेरप्रतिसङ्क्रमाया' इति योगसूत्रतद्भाष्यपञ्चशिखाचार्य्यवचनेभ्यो बुद्धौ चैतन्यप्रतिबिम्बस्य प्रामाणिकत्वेपि पुरुषे बुद्धिप्रतिबिम्बस्याप्रामाणिकत्वादयुक्तम्,

यास्तु 'तस्मिंश्चिद्दर्पणे' इत्यादिस्मृतयस्ता अपि सूत्राद्यानुगुण्येन 'बुद्धिदर्पणप्रतिबिम्बितत्वेन तत्तादात्म्यापन्ने दर्पणवत् स्वच्छे चेतन इमा वस्तुदृष्टयः=बुद्धेर्धर्मभूतानि ज्ञानान्यविवेकात्प्रतिभासन्ते' इत्येवमर्थपरतया नेयाः।

किंच नहि पारमार्थिकत्वघटितमेव पुरुषनिष्ठत्वं यथाश्रुतः पौरुषेयशब्दार्थः किंतर्हि पुरुषस्वत्वं पुरुषनिष्ठत्वं वा, तच्च पारमार्थिकं वौपचारिकं वेति नाग्रहः, प्रकृते च मुख्यस्यासम्भवादौपचारिकं तन्निष्ठत्वमाश्रीयतेऽतो न यथाश्रुतार्थत्यागापत्तिः,

अपिच 'आरोपितया क्रियया कल्पितं दर्शनकर्तृत्वं वस्तुतस्तु बुद्धेः साक्ष्येव पुरुष' इति स्वोक्त्या सह विरोधादश्रद्धेयं पुरुषस्य मुख्यप्रमाश्रयत्वेन प्रमातृत्वाभिधानम्,—

यच्चोक्तम् 'प्रतिबिम्बस्यार्थक्रियाकारित्वं नास्ति' इति तदपि न, जडप्रतिबिम्बस्यार्थक्रियाकारित्वाभावेपि चेतनप्रतिबिम्बस्यार्थक्रियाकारित्वसम्भवादित्यलमधिकेन,

(१) पा० १ सू० ४ । ७ । योगवार्त्तिके, अ० १ सू० ८७ साङ्ख्यप्रवचनभाष्ये च स्पष्टोयमर्थः,

२ यथा बुद्धौ चित्प्रतिबिम्बमेवं चितावपि बुद्धिप्रतिबिम्बं स्वीकार्य्यमिति भावः,

३ यच्चोक्तं पुरुषस्य प्रमाश्रयत्वाभावे पौरुषेयशब्दस्य यथाश्रुतार्थत्यागापत्तेरिति, तद् दूषयति—"नहि" इति,

४ पुरुषस्यायमित्यर्थे 'तस्येदम्' इत्यणि पुरुषस्वत्वं पौरुषेयशब्दार्थः, पुरुषे भव इत्यर्थे 'तत्र भव' इत्यणि पुरुषनिष्ठत्वं पौरुषेयशब्दार्थ इति विवेकः,

चितिच्छायापत्त्या चाचेतनापि बुद्धिस्तदध्यवसायोऽप्यचेतनश्चेतनवद् भवतीति,

तथा च वक्ष्यति—

"तस्मात् तत्संयोगादचेतनं चेतनावदिव लिङ्गं,

गुणकर्तृत्वेपि तथा कर्तेव भवत्युदासीनः" 'का.२०'इति ।

अत्राध्यवसायग्रहणेन संशयं व्यवच्छिनत्ति, संशयस्यानवस्थितग्रहणेनानिश्चितरूपत्वाद्, निश्चयोऽध्यवसाय इति चाऽनर्थान्तरम्,

---

यद्यपि पूर्वत्र चित्तवृत्तिः पौरुषेयबोधश्चेति प्रमाद्वयमभिहितं तथापि योगभाष्ये पौरुषेयबोधस्यैव फलत्वाभिधानेन प्रमाद्वयस्वीकारो नावश्यक इत्याशयेनात्र चित्तवृत्तेः प्रमाणत्वं पौरुषेयबोधस्य च प्रमात्वमिति प्रमैक्यमभिहितमिति बोध्यम्, अत एव 'द्वयोरेकतरस्य वा' इत्यनियमोऽभिहितो वाकारेण सूत्रकारेण,

नन्वस्तु बुद्धितादात्म्यापत्त्या पुरुषस्य ज्ञानादिमत्त्वं तथापि कथमचेतनस्य बुद्धितत्त्वस्य तद्धर्मस्य चाध्यवसायस्य चेतनत्वेन भानमित्यत्राह— "चितिच्छायापत्त्या च" इति,

एवं प्रत्यक्षलक्षणमभिधाय लक्षणं समन्वयितुं लक्षणघटकपदानां कृत्यमाह— "अत्र" इति, प्रतिविषयाध्यवसाय इति दृष्टलक्षणे, संशयम्=एकधर्मिकविरुद्धभावाभावप्रकारकमनवधारणात्मकं ज्ञानं, व्यवच्छिनत्ति=व्यावर्तयतीत्यर्थः, कथं व्यावृत्तिरित्यत्राह—"संशयस्य" इति, अनवस्थितग्रहणेन=एकधर्मिकनानाधर्मरूपनानाकोटिप्रकाशनेन, अनिश्चितरूपत्वाद्=एककोटिकत्वासत्त्वरूपानवधारणात्मकत्वादित्यर्थः, निश्चयपदाभावे कथमनिश्चयज्ञानवारणमित्यत्राह="निश्चयोऽध्यवसाय इति चाऽनर्थान्तरम्" इति, अन्योऽर्थोऽर्थान्तरम् नार्थान्तरमनर्थान्तरम्=न भिन्नार्थकम्-एकार्थकमिति यावद् ।

---

१ पर्वतजलाशयौ वह्नितदभाववन्ताविति ज्ञानमपि विरुद्धभावाभावप्रकारकमिति तदपि संशयः स्यादत उक्तम् 'एकधर्मिक' इति, वृक्षः संयोगवान् तदभाववाँश्चेत्यत्र व्यभिचारवारणाय 'विरुद्ध' इति, घटो द्रव्यं पृथिवी चेति ज्ञानस्य संशयत्वनिरासाय "भावाभावप्रकारकम्" इति, इच्छानिरासाय ज्ञानमिति ।

विषयग्रहणेन चासद्विषयं विपर्य्ययमपाकरोति,

प्रतिग्रहणेन चेन्द्रियार्थसन्निकर्षसूचनादनुमानस्मृत्यादयश्च पराकृता भवन्ति,

तदेवं समानासमानजातीयव्यवच्छेदकत्वात् 'प्रतिविषयाध्यवसाय' इति दृष्टस्य संपूर्णं लक्षणम्,

अध्यवसायपदव्यावर्त्यं प्रदर्श्य विषयपदव्यावर्त्यमाह—"विषयग्रहणेन च" इति, असद्विषयं=न विद्यते सन् विषयो यस्य तादृशं मिथ्याज्ञानात्मकं विपर्य्ययमपाकरोतीत्यर्थः,

विषयं विषयं प्रति वर्तत इति प्रतिपदादानकृत्यमाह—"प्रतिग्रहणेन च" इति, ।

प्रत्यक्षलक्षणे लक्षणलक्षणं समन्वयन् प्रकृतमुपसंहरति—"तदेवं" इति, यस्माद् लक्षणान्तर्गतविशेषणपदैरलक्ष्यनिरासस्तस्मादित्यर्थः,

प्रत्यक्षत्वेन समानजातीयाः संशयादयः विजातीयत्वेनासमानजातीया अनुमानस्मृत्यादयः, तेषां व्यवच्छेदकत्वाद्=व्यावर्तकत्वात् प्रतिविषयाध्यवसाय इति दृष्टस्यादुष्टं लक्षणमित्यर्थः,

ननु शास्त्रान्तरे 'प्रत्यक्षं कल्पनापोढमभ्रान्तम्[1]' 'सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षम्[2]' 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्[3]' इत्येवंविधानि यानि प्रत्यक्षलक्षणानि तानि किं दुष्टान्यदुष्टानि वा, दुष्टानि चेत् कथं न दूषितानि तानि भवता, अदुष्टानि चेत् कथं लक्षणान्तराश्रयणमित्याशङ्क्य यद्यपि दुष्टानि

---

१ सौगतदिङ्नागाभिहितमिदं लक्षणं, न्यायबिन्दावप्येतदेवोपलभ्यते, कल्पनाया अपोढम्=अपेतं कल्पनास्वभावरहितं, यत् किल न नाम्नाऽभिधीयते नच जात्यादिभिर्व्यपदिश्यते तत् प्रत्यक्षमित्यर्थः,

(२) जै० सू० ४ 'अनिमित्तं विद्यमानोपलम्भनत्वाद्' इति सूत्रशेषः, पुरुषस्येन्द्रियाणां सति=विद्यमाने विषये संप्रयोगे सति यद् बुद्धेः=ज्ञानस्य जन्म तत्प्रत्यक्षम्, एतत्प्रत्यक्षं धर्मज्ञाने न निमित्तं, प्रत्यक्षप्रमासाधनानीन्द्रियाणि धर्मप्रमां न साधयन्ति, तत्र हेतुमाह–"विद्यमान" इति, वर्तमानस्यैव वस्तुन इन्द्रियैरुपलम्भाद् धर्मस्य च ज्ञानकालेऽसत्त्वेनेन्द्रियायोग्यत्वादित्यर्थः,

(३) न्या० सू० ४ अव्यपदेश्यं=निर्विकल्पकं, व्यवसायात्मकं=सविकल्पकमिति विभाग, इतरच्च प्रत्यक्षलक्षणम्'

तन्त्रान्तरे लक्षणान्तराणि तैर्थिकानां न दूषितानि, विस्तरभयाद् इति ।

नाऽनुमानं प्रमाणमिति वदता लौकायतिकेनाऽप्रतिपन्नः सन्दिग्धो विपर्य्यस्तो वा पुरुषः कथं प्रतिपद्येत, नच पुरुषान्तरगता अज्ञानसन्देहविपर्य्ययाः शक्या अर्वाग्दृशा प्रत्य-

तानि तथापि विस्तरभयान्न दूषितानीत्याह—"तन्त्रान्तरे" इति, 'तन्त्रान्तरेषु' इत्यपि पाठः । तन्त्रान्तरे=साङ्ख्यातिरिक्तन्यायप्रभृतिशास्त्रे, तैर्थिकानां=[1]दार्शनिकानां—शास्त्रप्रणेतॄणां गौतमप्रमुखमुनीनां यान्यन्यानि प्रत्यक्षलक्षणानि तानि विस्तरभयान्न दूषितानीत्यर्थः,

प्रत्यक्षलक्षणोपसंहारावसरे न्यायवार्त्तिके तात्पर्य्यटीकायां, तत्त्वप्रदीपिकायां च लक्षणान्तराणां दुष्टत्वस्य स्पष्टं व्यवस्थापनादिति तत्रैव कणेहत्यालोचनीयमिति तु वयम्,

अनुमाननिर्वचनपरं कारिकांशं व्याख्यातुकामस्तावदनुमानाप्रामाण्यवादिनं [3]चार्वाकं शिक्षयति—"नाऽनुमानं प्रमाणम्" इति,

लोक आयतं=विस्तीर्णमिव यत् प्रसिद्धं प्रत्यक्षप्रमाणं तत् लोकायतं, तत्प्रतिपादकं चार्वाकशास्त्रमपि लोकायतं, तदधीते तद् वेद यः स लौकायतिकः, तेन=प्रत्यक्षातिरिक्तं न प्रमाणमिति वादिना चार्वाकेण, अप्रतिपन्नः=अज्ञानयुक्तः, सन्दिग्धः=संशययुक्तः, विपर्य्यस्तः=भ्रान्तियुक्तः पुरुषः कथं प्रतिपद्येत=ज्ञायेत, प्रत्यक्षेण ज्ञायेतेत्याशङ्क्याह—"नच" इति, पुरुषान्तरगताः=परपुरुषवर्तिनोऽज्ञानादयो गौरत्वादिवद् देहधर्मा अपि न प्रत्यक्षेण

१ 'तीर्थं स्याद् दर्शनेष्वपि' इत्युक्तेस्तीर्थपदं दर्शनपरं, दर्शनं च गौतमादिप्रणीतं शास्त्रं तदध्येतारो वेत्तारश्च दार्शनिकास्तैर्थिका वेत्यभिधीयन्ते, तदेवाह—'दार्शनिकानाम्' इति,

२ गौतमीयलक्षणस्य तत्र दुष्टत्वानुक्तेराह "तत्त्वप्रदीपिकायाम्" इति,द्वितीयपरिच्छेदे चित्सुखाचार्य्यैर्' मानाधीना मेयसिद्धिर्' इति कारिकाव्याख्यायामित्यर्थः,

३ चारु=शास्त्रीयसंस्कारविधुरनरमनोहरम् अङ्गनालिङ्गनजन्यं सुखं पुरुषार्थ इत्येवंविधं वाक्यं यस्य स चार्वाकः, देहाद्यात्मवादी प्रत्यक्षैकप्रमाणमानी प्राकृतः पुरुषः, पृषोदरादित्वात्साधुः, राजपुत्रव्यामोहनाय बृहस्पतिना लोकायतं शास्त्रं प्रणीतमिति महाभारतीयखिले हरिवंशे स्पष्टम्, दुर्योधनसखश्चार्वाको राक्षसस्त्वन्य एव ।

(४) लोकायतशब्दस्योक्थादिगणे पाठात् (क्रतूक्थादिसूत्रान्ताट्ठक्) इत्यनेन ठकि लौकायतिक इति साधुः,—

क्षेण प्रतिपत्तुं, नापि प्रमाणान्तरेण, अनभ्युपगमाद्, अनवधृताऽज्ञानसंशयविपर्य्यासस्तु यं कञ्चन पुरुषं प्रति वर्तमानोऽनवधेयवचनतया प्रेक्षावद्भिरुन्मत्तवदुपेक्ष्येत, तदनेनाज्ञानादयः परपुरुषवर्तिनोऽभिप्रायभेदाद् वचनभेदाद् लिङ्गादनुमातव्या

प्रतिपत्तुं=ज्ञातुं शक्या रूपादिमत्त्वाभावाद्, योगिना ज्ञायेतापि प्रत्यक्षेण परकीयाज्ञानादिकं नतु चार्वाकेण तच्छक्यमित्याह—"अर्वाग्दृशा" इति, बाह्यस्थूलवस्तुविषयकज्ञानवताऽयोगिना चार्वाकेणेत्यर्थः,

माभूदध्यक्षेण ज्ञानं तद्वचनात्तु तज्ज्ञानं कुतो न जायेतेत्याशङ्क्य वचनस्यापि प्रत्यक्षातिरिक्तत्वेन तेनानभ्युपगमादित्याह—"नापि मानान्तरेण" इति,

परपुरुषवर्तिनोऽज्ञानादीनपरिज्ञायैव परपुरुषबोधनाय वचनं प्रयुञ्जानस्तून्मत्तवदुपहसनीयः स्यादित्याह—"अनवधृताऽज्ञान" इत्यादिना, अनवधृताः=अपरिज्ञाताः परपुरुषवर्तिनोऽज्ञानसंशयविपर्य्यासाः येन सोऽनवधृताऽज्ञानसंशयविपर्य्यास इत्यर्थः,

नन्वेतावता कथमनुमानाभ्युपगमस्यावश्यकत्वमित्यत्राह—"तदनेन" इति, यतो न प्रत्यक्षेण परपुरुषगताज्ञानादिप्रतिपत्तिः संभवति ततोऽनेन चार्वाकेण परपुरुषवर्तिनोऽज्ञानादयोऽनुमातव्याः=अनुमानेनैव ज्ञातव्या इति=यत एवमतोऽकामेनापि तेनानुमानं प्रमाणमङ्गीकरणीयमित्यर्थः,

केन लिङ्गेन परकीयाज्ञानाद्यनुमितिरित्यत्राह—"अभिप्रायभेदाद्" इति, वक्तृतात्पर्य्यविशेषाद् लिङ्गाद्, इत्यर्थः, तात्पर्यज्ञानं कुतस्त्यमत आह—"वचनभेदाद्" इति,—

अयमीदृशाभिप्रायवानेतादृशवचनप्रयोक्तृत्वात् संप्रतिपन्नवदित्येवं तात्पर्य्यविशेषमनुमायायमेतद्विषयाज्ञानादिमानीदृशाभिप्रायवत्त्वादित्येवमज्ञानाद्यनुमानमित्यर्थः,

यद्वा—अभिप्रायभेदः=अज्ञानादिविशेषः, तस्माज् जातो यो वचनभेदः तस्माद् लिङ्गादित्यर्थः,

तथा च 'एतद्वचनमेतदन्तःकरणस्थाज्ञाननिमित्तमसंबद्धवचनत्वान्मदीयासंबद्धवचोवद्, एतद्वच एतदन्तःकरणस्थासंशयनिमित्तमनिश्चितवचनत्वान्मदीयानिश्चितवचोवद्, एतद्वाक्यमेतदन्तःकरणस्थविपर्य्ययनिमित्तं मदीयभ्रान्तिवचोवद्' इत्येवमज्ञानादिप्रतिपत्तिरनुमेयेति फलितम्,

---

१ अभिप्रायभेदाद् वचनभेदलिङ्गाद्' इति पाठे तु—'वचनभेदो लिङ्गं यस्य तादृशादभिप्रायभेदरूपलिङ्गादज्ञानाद्यनुमानमित्यर्थो बोध्यः,

इत्यकामेनाप्यनुमानं प्रमाणमभ्युपेयम्,

विशदीकृतश्चात्रत्योऽयमर्थो[1] ग्रन्थान्तरे विस्तरेण शब्दान्तरैर्मिश्रैरिति तदेवात्रोद्धृत्य प्रदर्श्यते—(प्रतिपन्नं[2] पुमांसमपहायाप्रतिपन्नसन्दिग्धाः प्रेक्षावद्भिः प्रतिपाद्यन्ते, न चैषामित्थंभावो[3] भवत्प्रत्यक्षगोचरः, न खल्वेते गौरत्वादिवत्प्रत्यक्षगोचराः, किन्तु वचनचेष्टादि-लिङ्गानुमेयाः, नच लिङ्गं प्रमाणं यत एते सिध्यन्ति, न पुंसामित्थंभावमविज्ञाय यं कंचन पुरुषं प्रतिपिपादयिषतोऽनवधेयवचनस्य प्रेक्षावत्ता नाम, अपि[4] च पशवोपि हिताहितप्राप्तिपरिहारार्थिनः कोमलशष्पश्यामलायां भुवि प्रवर्तन्ते परिहरन्ति चाश्यानतृणकण्टकाकीर्णां, नास्तिकस्तु पशोरपि पशुरिष्टानिष्टसाधनमविद्वान्, न खल्वस्मिन्ननुमानगोचरप्रवृत्तिनिवृत्तिगोचरे प्रत्यक्षं प्रभवति, न च परप्रत्यायनाय शब्दं प्रयुञ्जीत, शब्दस्यार्थस्याप्रत्यक्षत्वात्, तदेवं माभून्नास्तिकस्य जन्मान्तरमस्मिन्नेव जन्मन्युपस्थितो मूकत्वप्रवृत्तिनिवृत्तिविरहरूपो महान्नरक) इति। (अनुमानमप्रमाणमिति[5] वाक्यप्रयोगोऽङ्ग विप्रतिपन्नं सन्दिग्धं वा पुरुषं प्रत्यर्थयान्, न च परपुरुषवर्तिनो देहधर्मा अपि सन्देहा-

---

१ शारीरकीयतृतीयाध्यायीयतृतीयपादे—'५४' इति सूत्रे भामत्याम्, न्यायदर्शनीयतुरीयसूत्रे तात्पर्य्यटीकायां चेत्यर्थः,

२ भामतीग्रन्थमुद्धरति—"प्रतिपन्नम्" इति, प्रतिपन्नः=सम्प्रतिपत्तिमान् पुमान्, तं विहायाप्रतिपत्तिविपरीतप्रतिपत्तिसंशयितवन्तः पुमांसः प्रेक्षावद्भिर्व्युत्पाद्यन्त इत्यर्थः,

३ इत्थंभावः=अप्रतिपत्तिमत्त्वादिरूपः,

४ न केवलं चार्वाकस्य परप्रबोधाय प्रवृत्त्यभाव एव दोषोऽपि तु लोकयात्राविरोधोपीत्याह—"अपि च" इति, शष्पं=बालतृणम्, आश्यानम्=ईषत् शुष्कम्, इष्टानिष्टसाधनमविद्वान् पशोरपि पशुरित्यर्थः। अनुमानगोचरश्चासौ प्रवृत्तिगोचरश्चेष्टानिष्टसाधनत्वं, तत्र प्रत्यक्षं नहि प्रभवतीति योजना, 'अयमोदनः क्षुन्निवर्तक ओदनत्वात्प्रागभुक्तौदनवद्' इत्याद्यनुमानादिष्टसाधनत्वावगमः, ततः प्रवृत्तिर् अनिष्टसाधनत्वानुमानाच्च निवृत्तिरिति, शब्दप्रामाण्यानिष्टेर्मूकत्वमापन्नं, प्रवृत्तिनिवृत्तिविरहश्चानुमानप्रामाण्यविरहादापन्न इति विभागः,

५ टीकाग्रन्थोयम्.

तत्र प्रत्यक्षकार्य्यत्वाद् अनुमानं प्रत्यक्षानन्तरं निरूपणीयं, तत्रापि सामान्यलक्षणपूर्वकत्वाद्विशेषलक्षणस्यानुमानसामान्यं तावल्लक्षयति—"तल्लिङ्गलिङ्गिपूर्वकम्" इति,

---

ज्ञानविपर्य्यासा गौरत्वादिवत्प्रत्यक्षा वीक्ष्यन्ते नच तद्वचनात्प्रतीयन्ते वचनस्यापि प्रत्यक्षादन्यस्याप्रामाण्योपगमात्, पुरुषविशेषमनधिकृत्य तु वचनमनर्थकं प्रयुञ्जानो नायं लौकिको न परीक्षक इत्युन्मत्तवदनवधेयवचनः स्यात्) इति,

किञ्च–अनुमानमप्रमाणमितिवदन् वादी 'कस्य हेतोरप्रमाणम्' इत्येवं पर्य्यनुयोगे यदि 'प्रमितिकरणत्वाभावाद्' इति हेतुपदं प्रयुञ्जीत तदा गलेपतितमनुमानमिति चार्वाकत्वमेवात्मनः स जह्यात्,

तथा चाहुः[3]—(**दृष्टप्रामाण्याप्रामाण्यविज्ञानव्यक्तिसाधर्म्येण हि कासांचिद् व्यक्तीनां प्रामाण्यमप्रामाण्यं वा विदधीत, दृष्टसाधर्म्यं चानुमानमेवेति कथं तेनैव तस्याप्रामाण्यम्" इति,**

यदि च हेतुपदप्रयोगमन्तरेणवानुमानमप्रमाणमिति ब्रूयात् तर्हि न प्रतिज्ञामात्रेणार्थसिद्धिरिति कथं स्वपक्षसंरक्षणमिति,

किञ्च अनुमाननिष्ठाप्रामाण्यस्य रूपादिमत्त्वाभावेन चक्षुराद्यगोचरत्वात्कथमनुमानाप्रामाण्यमवधारितवान् भवान् इति स प्रष्टव्यः,

यथाहुर्मिश्राः—(**नाप्रत्यक्षं प्रमाणमिति ब्रुवाणः प्रष्टव्यो जायते कुतो भवाननुमानादीनामप्रामाण्यमवधारितवान् इति, प्रत्यक्षं हि लिङ्गादिरूपमात्रग्राहि नाप्रामाण्यमेषां विनिश्चेतुमर्हति, न हि धूमज्ञानमिवैषामिन्द्रियार्थसन्निकर्षादप्रामाण्यज्ञानमुदेतुमर्हति, किन्तु देशकालावस्थारूपभेदेन व्यभिचारोपेक्षया, नचैतावान् प्रत्यक्षस्य व्यापारः संभवति) इति,**

एवमनुमानप्रामाण्यं प्रसाध्यानुमानलक्षणपरमार्य्यां यत्रमवतारयति—"तत्र" इति, तत्र=युक्तियुक्तत्वेनानुमानस्यावश्याभ्युपेयत्वे सतीत्यर्थः,

प्रत्यक्षानन्तरमनुमानं निरूपणीयमित्यन्वयः, तत्र हेतुमाह–"प्रत्यक्षकार्य्यत्वाद्" इति, तत्रापि=लक्षणद्वारा निरूपणीये सत्यपीत्यर्थः,

'लिङ्गलिङ्गिपूर्वकम्' इत्यनुमानलक्षणं विवृणोति—

---

१ संस्कारवदिति शेषः.

२ हेतुपदप्रयोगस्थल एवानुमानत्वव्यवहारस्य सर्वसंमतत्वाद्.

३ तात्पर्य्यटीकायां मिश्राः.

४ भामत्यामिति शेषः.

लिङ्गं=व्याप्यं, लिङ्गि=व्यापकम्,

शङ्कितसमारोपितोपाधिनिराकरणेन वस्तुस्वभावप्रतिबद्धं व्याप्यम्,

---

"लिङ्गं व्याप्यम्" इति । लिङ्ग्यते=गम्यते-ज्ञायतेऽप्रत्यक्षोऽर्थोऽनेनेति लिङ्गं

'यदनुमेयेन संबद्धं प्रसिद्धं च तदन्विते,
तदभावे च नास्त्येव तल्लिङ्गमनुमापकम्'

इति प्रशस्तपादलक्षितं पक्षवृत्तित्वसपक्षसत्त्वविपक्षव्यावृत्तत्वादिधर्मोपपन्नं धूमादिवस्त्विति यावद्, एतदेव च पक्षवृत्तित्वादिधर्मैर्व्याप्यमानत्वाद् व्याप्यमित्यभिधीयते,

यस्य च वह्न्यादेस्तद् धूमादि लिङ्गमस्ति तद् वह्न्यादि लिङ्गि व्यापकमिति चोच्यत इत्यर्थः,

'स्वभावप्रतिबन्धे सत्यर्थोऽर्थं गमयेत् तदप्रतिबद्धस्य तदव्यभिचारनियमाभावाद्' इति न्यायबिन्दावभिहितत्वेन 'स्वभावप्रतिबन्धो व्याप्तिर्' इति भादन्ताः, 'अनौपाधिकः संबन्धो व्याप्तिर्' इति जरन्तस्तार्किकाः, तदेतादृग् व्याप्त्याश्रयं च व्याप्यमित्यभिप्रेत्य परिष्कृत्य व्याप्यं निर्वक्ति-"शङ्कित" इत्यादिना,

शङ्कितः=शङ्काविषयत्वेन सन्दिग्धः, समारोपितः=सम्यगारोपितत्वेन निश्चितः,

तथाचाहुः-तत्त्वचिन्तामणिकाराः—(सचायं द्विविधः निश्चितः सन्दिग्धश्च, साध्यव्यापकत्वेन साधनाव्यापकत्वेन च निश्चितो व्यभिचारनिश्चयाधायकत्वेन निश्चितोपाधिः, यथा वह्निमत्त्वेन धूमव-

---

(१) अनुमेयः=प्रतिपिपादयिषितधर्मविशिष्टो धर्मी पर्वतादिः पक्षः, तेन संबद्धं, तस्मिन् वर्तमानम् इति यावत्, पक्षवृत्तीत्यर्थः, तदन्विते=साध्यधर्मान्विते सपक्षे महानसादौ प्रसिद्धं, सपक्षे सत्तावदित्यर्थः, तदभावे=साध्यधर्मस्याभावे, विपक्षे जलहृदादौ नास्ति=विपक्षावृत्तीत्यर्थः,

(२) लिङ्गं यस्यास्ति तल्लिङ्गि इत्यभिप्रेत्य लिङ्गिपदार्थमाह—'यस्य च' इति,

(३) स्वभावेन प्रतिबन्धः स्वभावप्रतिबन्धः, साधनं कृतेति समासः, स्वभावप्रतिबद्धत्वं प्रतिबद्धस्वभावत्वमित्यर्थः, इति न्यायबिन्दुटीकायां धर्मोत्तराचार्यः,

(४) भादन्ताः बौद्धाः,

येन च प्रतिबद्धं तद् व्यापकम्,

त्त्वे साध्य आर्द्रेन्धनप्रभववह्निमत्त्वं, यत्र साधनाऽव्यापकत्वसन्देहः साध्यव्यापकत्वसंशयो वा तदुभयसन्देहो वा तत्र हेतुव्यभिचारसंशायकत्वेन सन्दिग्धोपाधिः, यथा मित्रातनयत्वेन श्यामत्वे साध्ये शाकाद्याहारपरिणतिजत्वम्[१]) इति,

एवंविधौ यावुपाधी तयोर्निराकरणेनेत्यर्थः, एतेनानौपाधिकः संबन्धो व्याप्तिरित्यंशः सङ्गृहीतः,

स्वभावप्रतिबन्धो व्याप्तिरित्यंशं संगृहीतुमाह—'वस्तुस्वभाव' इति वस्तुनः=धूमादेर्यः स्वभावः=वह्न्यादिना विनाभावाभावः (अविनाभावनियमः) तेन प्रतिबद्धम्=आक्रान्तमित्यर्थः, यद्[२] वस्तु यद्वस्त्वन्तराविनाभूतं तद् वस्तु तद्व्याप्यमिति यावद्,

'स श्यामो मित्रातनयत्वात् दृष्टश्यामत्वविशिष्टमित्रातनयवद्' इत्यत्र मित्रातनयत्वमपि श्यामत्वप्रतिबद्धत्वेन व्याप्यं स्यात् तन्माभूदत उक्तं 'शङ्कितोपाधिनिराकरणेन' इति, 'अयं धूमवान् वह्नेर्महानसवद्' इत्यत्र वह्नेरपि महानसादौ धूमाविनाभूतत्वदर्शनाद् वह्नेरपि धूमव्याप्यत्वं स्यादत उक्तं (समारोपितोपाधिनिराकरणेन) इति,

स्वाभाविकः संबन्धोऽभिप्रेतो नौपाधिक इत्यर्थः,

तथाचाहुर्मिश्राः—(धूमादीनां वन्ह्यादिसंबन्धः स्वाभाविको नतु वह्न्यादीनां धूमादिभिः, ते हि विनापि धूमादिभिरुपलभ्यन्ते, यदा त्वार्द्रेन्धनादिसंबन्धमनुभवन्ति तदा धूमादिभिः सह संबध्यन्ते तस्माद् वह्न्यादीनामार्द्रेन्धनाद्युपाधिकृतः संबन्धो न स्वाभाविकस्ततो न नियतः, स्वाभाविकस्तु धूमादीनां वह्न्यादिसंबन्ध उपाधेरनुपलभ्यमानत्वाद्) इति,

व्याप्यं निरुच्य व्यापकं निराह[३] "येन च" इति, येन च वह्न्यादिना प्रतिबद्धम्=अविनाभूतं धूमादिकं तद् वह्न्यादिकं व्यापकमित्यर्थः,

---

(१) शाकाद्याहारपरिणतिजत्वम्=शाकादिसंयोगघटितशाकपाकजश्यामसामग्रीमत्त्वमित्यर्थ' इत्युपाधिविभागरहस्ये मथुरानाथः,

(२) यद् वस्तु=धूमादिवस्तु, यद्वस्त्वन्तरं=वह्न्यादिकम्,

(३) निराह=निर्वक्ति—लक्षयतीत्यर्थः,

लिङ्गलिङ्गिग्रहणेन च विषयवाचिना विषयिणं प्रत्ययमुपलक्षयति,

धूमादिर्व्याप्यो वन्ह्यादिर्व्यापक इति यः प्रत्ययस्तत्पूर्वकम्,

लिङ्गिग्रहणं चावर्तनीयं, तेन लिङ्गमस्यास्तीति पक्षधर्मताज्ञानमपि दर्शितं भवति,

तद् व्याप्यव्यापकभावपक्षधर्मताज्ञानपूर्वकमनुमानमित्यनुमानसामान्यं लक्षितम्,

अनुमानविशेषाँस्तन्त्रान्तरे लक्षितान् स्मारयति–'त्रिविधमनुमानमाख्यातं तद्' इति,

तत्=सामान्यतो लक्षितमनुमानं विशेषतस्त्रिविधं,=पूर्ववत्–शेषवत्—सामान्यतो दृष्टं च,

---

ननु लिङ्गादिज्ञानस्यैवानुमितिहेतुत्वेन कथं लिङ्गादिवस्तुनोऽत्रोल्लेख इत्याशङ्क्य ज्ञानज्ञेययोरविनाभावदर्शनेन ज्ञेयनिर्देशो ज्ञानोपलक्षणार्थ इत्याह "लिङ्गलिङ्गिग्रहणेन च" इति,

गृह्यते=ज्ञायतेऽनेनेति ग्रहणं=शब्दः, विषयवाचिना=वस्तुबोधकेन लिङ्गलिङ्गिशब्देन, विषयिणं प्रत्ययं=लिङ्गलिङ्गिरूपविषयोद्दीपकं ज्ञानम् उपलक्षयति=उपलक्षणविधया बोधयति कारिकाकार इति शेषः।

एवं सति यत्फलितं तदाह "धूमादिर्व्याप्य" इत्यादिना,

ननु हेतोः पक्षवृत्तित्वज्ञानमन्तरा कथमनुमित्युदय इत्याशङ्क्य तल्लाभोपायमाह 'लिङ्गिग्रहणं च' इति,

निर्गलितार्थमाह 'तद्' इति, यस्मादेवं तत्=तस्माद् व्याप्यव्यापकभावज्ञानपुरस्सरं यद् व्याप्यस्य पक्षवृत्तित्वज्ञानं तत्पूर्वकं यद् ज्ञानं तद् अनुमानमित्यनुमानसामान्यं लक्षितमित्यर्थः,

त्रिविधमित्याद्यंशमवतारयति, "अनुमानविशेषान्" इति,

तन्त्रान्तरे=अक्षपाददर्शने, 'अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववत् शेषवत् सामान्यतो दृष्टं च' इति सूत्रे इत्यर्थः,

---

(१) तत्पूर्वकम्=प्रत्यक्षादिपूर्वकम्,

तत्र प्रथमं तावद् द्विविधं वीतमवीतं च । अन्वयमुखेन प्रवर्तमानं विधायकं वीतम्, व्यतिरेकमुखेन प्रवर्तमानं निषेधकमवीतम् ।

'तत्रान्तरे लक्षितानभिमतान्' इति क्वाचित्कः पाठः । अवान्तरविशेषमाह—"तत्र" इति, तत्र=पूर्ववदादिभेदेनानुमानस्य त्रैविध्ये सत्यपि प्रथमं=पूर्वम्—आदौ तावदनुमानं द्विविधं, ततो द्विविधमध्य ऐकं द्विविधम् एकं चैकविधमित्येवं त्रिविधं बोध्यमित्यर्थः, तदेव दर्शयति "वीतमवीतं" च इत्यादिना,

वीतं=वि-विशेषेण इतं=ज्ञातं—प्रसिद्धम्—अन्वयव्याप्तिहेतुकमित्यर्थः,

तदेवाह-'अन्वयमुखेन' इति, तत्सत्त्वे तत्सत्त्वमित्याकारान्वयसहचार एव मुखं=मुखमिव प्रधानभूतं, तेन—साध्याधिकरणनिरूपितवृत्तित्वरूपान्वयव्याप्तिप्राधान्येन योयो धूमवान् स स वह्निमान् इत्येवं प्रवर्तमानं सद् यद् विधायकं=वह्नेः साधकं तद् वीतमित्यर्थः,

अन्वयेन प्रवर्तमानं वीतमित्युक्ते केवलान्वयिन एव वीतत्वं स्यान्नत्वन्वयव्यतिरेकिणोऽतोऽभिहितं 'मुखेन' इति, अन्वयव्याप्तिप्राधान्यमेव केवलं वीतत्वे प्रयोजकं नतु तत्र व्यतिरेकव्याप्त्यसत्त्वमप्यभिप्रेतमित्यर्थः, निषेधविधायकेऽवीतेऽतिप्रसङ्गभङ्गायाह-"अन्वयमुखेन प्रवर्तमानम्" इति,

न वीतमवीतं=व्यतिरेकव्याप्तिहेतुकमित्यर्थः, तदेवाह-"व्यतिरेकमुखेन" इति, तदसत्त्वे तदसत्त्वमित्याकारो व्यतिरेकसहचार एव मुखं=आरम्भः तेन साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिप्राधान्येन यत्रेतरभेदाभावस्तत्र गन्धाभाव इत्येवं प्रवर्तमानं गन्धाभावरूपव्यापकस्य पृथिव्यां निवृत्त्या तद्व्याप्यक्षितिभेदस्य निषेधकं यत् पृथिवीतरभेदवती गन्धवत्त्वादित्याद्यनुमानं तदवीतमित्यर्थः,

वर्णा न क्षणिकास्त एवेति प्रत्यभिज्ञायमानत्वादिति क्षणिकत्वनिषेधके वीतेऽतिव्याप्तिव्युदासायाभिहितं "व्यतिरेकमुखेन" इति, निषेधकमपीदमनुमानं न व्यतिरेकमुखेन प्रवर्तमानमिति नातिप्रसङ्गः,

---

(१) प्रथमशब्दो न पूर्वाभिहितत्रिविधमध्ये प्रथमीभूतपूर्ववत्परोऽपि तु 'आदौ' इत्यर्थकः, तदेवाह—'आदौ' इति,

(२) एकं=वीतं पूर्ववत् सामान्यतोदृष्टभेदेन द्विविधमित्यर्थः,

तत्रावीतं शेषवत्, शिष्यते=परिशिष्यते इति शेषः, स एव विषयतया यस्यास्त्यनुमानज्ञानस्य तच्छेषवद् ।

यदाहुः—"प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणे सम्प्र-

वीताऽवीतभेदेनानुमानद्वैविध्यमभिधाय तदवान्तरभेदमादाय तत् त्रैविध्यमभिधातुं सूचीकटाहन्यायेनादावबीतं[1] निरूपयति "तत्रावीतं शेषवद्" इति, तत्र=तयोर्वीतावीतयोर्मध्ये यदवीतं तत् शेषवत्संज्ञकमेकमेवेत्यर्थः ।

शेषवद् इत्यस्य शेषविषयम् इत्यर्थं दर्शयितुं व्युत्पत्तिमाह—"शिष्यत" इति, कर्मघञन्तात् शेषशब्दान्मतुपि शेषवदिति साधनीयमित्यर्थः,

संबन्धेऽस्तिविवक्षायां मतुपो विधानात्[2] ज्ञाने च पदार्थानां विषयतासंबन्धेनैव भाननियमाद् 'विषयतया' इत्यर्थादायातमिति बोध्यम् ।

'शेषवन्नामपरिशेष' इति वात्स्यायनवचनाच्छेषवत एव नामान्तरं परिशेष इति परिशेषलक्षणपरं न्यायभाष्यमुपन्यस्यति—

"यदाहुः प्रसक्तप्रतिषेधे" इति ।

(शब्दः समवायिकारणजन्यो गुणत्वाद् रूपवद् इत्यत्र सामान्येन समवायिकारणेऽवगते शब्दाश्रयत्वेन प्रसक्तानां पृथिव्यादीनां दिक्कालमनसां च तदाश्रयत्वप्रतिषेधे अन्यत्र=गुणादावप्रसङ्गाच्छिष्यमाणे नभसि यः प्रत्ययः=शब्दोऽष्टद्रव्यव्यतिरिक्तद्रव्याश्रितोऽष्टद्रव्यागुणत्वे सति गुणत्वाद् रूपवदिति यत्केवलव्यतिरेक्यनुमानं स परिशेष इत्यर्थ) इति न्यायमकरन्दव्याख्यायां चित्सुखाचार्य्याः ।

अयं भावः—शब्दो गुणो मानुषचाक्षुषप्रत्यक्षाविषयत्वे[3] सति बहिरिन्द्रि-

---

(१) वीतमवीतं चेति पूर्वाभिहितरीत्या वीतस्य पूर्वं निरूपणार्हत्वेपि स्वल्पायासनिर्वर्तनीयसूचीनिर्माणानन्तरमधिकायाससाध्यकटाहनिर्माणवत्पूर्वमवीतं निरूपयतीर्थः,

(२) "भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने, संबन्धेऽस्तिविवक्षायां भवन्ति मतुबादय" इतिकात्यायनमुनिवचनादित्यर्थः ।

(३) घटादौ व्यभिचारवारणाय "चाक्षुषेत्यादि," शब्दस्य सर्पेण चक्षुषा ग्रहणादाह 'मानुषेति,' आत्मनि व्यभिचारापहाराय "बाहिरिन्द्रियेति," रसत्वादौ व्यभिचारवारणाय "जातिमत्त्वादिति,"

त्ययः परिशेष" इति ।

यग्राह्यजातिमत्त्वात्स्पर्शवद् इत्येवं शब्दस्य गुणत्वे स्थिते गुणत्वेन च समवायिकारणजन्यत्वादनिर्धारितयत्किञ्चिद्द्रव्याश्रितत्वे च साधिते तदाश्रयीभूतं द्रव्यं किमित्यपेक्षायां सम्भावनामात्रेण तदाश्रयत्वेन प्रसक्तानां पृथिव्याद्यष्टद्रव्याणां प्रतिषेधे=(प्रत्यक्षत्वेसत्यकारणगुणपूर्वकत्वाद्, अयावद्द्रव्यभावित्वाद्, आश्रयादन्यत्रोपलब्धेश्च न स्पर्शवद्विशेषगुणः । बाह्येन्द्रियप्रत्यक्षत्वाद्, आत्मान्तरग्राह्यत्वाद्, आत्मन्यसमवायाद्, अहङ्कारेण च विभक्तग्रहणाच्च नात्मगुणः । श्रोत्रग्राह्यत्वाद् वैशेषिकगुणभावाच्च न दिक्कालमनसाम्) इति प्रशस्तपादोक्तरीत्या तदाश्रयत्वनिरासे, अन्यत्र=द्रव्यातिरिक्ते गुणादौ, अप्रसङ्गाद्=(गुणादीनां पञ्चानामपि निर्गुणत्वनिष्क्रियत्वे) इत्येवं शब्दगुणाश्रयत्वप्राप्त्यभावात्, परिशिष्यमाणे नभोद्रव्ये यः सम्प्रत्ययः= शब्दोऽष्टद्रव्यातिरिक्तद्रव्याश्रितोऽष्टद्रव्यानाश्रितत्वे सति गुणत्वाद् यन्नैवं न तदेवं यथा गन्धादि इति केवलव्यतिरेकिप्रयोगप्रयोज्यं यदनुमानं स परिशेष इति,

(१) स्पर्शवतां=पृथिव्यप्तेजोवायूनां विशेषगुणः शब्दो नेत्यर्थे हेतूनाह— "प्रत्यक्षत्वे" इत्यादिना, पटरूपादयो हि स्वाश्रयस्य यत्समवायिकारणं तद्गुणपूर्वका दृष्टा अयन्तु न तथाऽतो न रूपादिवत्पृथिव्यादिगुणः शब्दः, पार्थिवपरमाणुरूपादयोपि स्पर्शवद्विशेषगुणा अकारणगुणपूर्वकाश्च परमाणोरकार्यत्वात्, तद्व्यवच्छेदाय "प्रत्यक्षत्वे सति" इति,

(२) यथा रूपादयो यावत्स्वाश्रयद्रव्यं वर्तन्ते न तथा शब्दो यावद्द्रव्यं वर्तते विद्यमानेपि स्वाश्रये शङ्खादौ विनाशदर्शनादतो न स्पर्शवद्विशेषगुणः, यथा रूपादयः स्वाश्रयादन्यत्र नोपलभ्यन्ते नैवं शब्दः, तस्य स्वाश्रयाच्छङ्खादेरन्यत्र कर्णशष्कुलीदेशे समुपलभ्यमानत्वादतोपि न स्पर्शवद्विशेषगुण इत्यर्थः,

(३) अनेकप्रतिपत्तृसाधारणत्वादित्यर्थः, या खलु वीणावेण्वादिजा शब्दव्यक्तिः सन्ततिद्वारेणैकेन पुरुषेण प्रतीयते सैवापरेणापि तद्देशवर्तिना प्रतीयते नत्वेवमात्मगुणः सुखादिरित्यात्मगुणवैधर्म्यान्नात्मगुण इत्यर्थः,

(४) रूपादिवद् आन्तरत्वेनानवगमादात्मनि समवेतत्वाभावान्नात्मगुण इत्यर्थः,

(५) यः खल्वात्मगुणः सोऽहङ्कारेण समानाधिकरणो गृह्यते सुख्यहमित्यादि नत्वेवं शब्दस्य ग्रहणमतो नात्मगुण इत्यर्थः,

(६) ये किल दिक्कालमनसां गुणाः संयोगादयस्ते श्रोत्रग्राह्या न सन्त्ययन्तु तद्ग्राह्योतो न तद्गुण इत्यर्थः,

(७) शब्दो न दिगादिगुणो विशेषगुणत्वात्सुखादिवदिति भावः,

अस्य चावीतस्य व्यतिरेकिण उदाहरणम् अग्रेऽभिधास्यते,

यत्तु न्यायभाष्ये (सदनित्यमित्येवमादिना द्रव्यगुणकर्मणामविशेषेण सामान्यविशेषसमवायेभ्यो निर्भक्तस्य शब्दस्य तस्मिन् द्रव्यगुणकर्मसंशये न द्रव्यमेकद्रव्यत्वाद्, न कर्म शब्दान्तरहेतुत्वाद् यस्तु शिष्यते सोयम् इति शब्दस्य गुणत्वप्रतिपत्तिः) इत्येवं शब्दस्य गुणत्वावधारणं परिशेषोदाहरणं प्रदर्शितं, तत्तु (इदन्तु परिशेषोदाहरणं नादरणीयं व्यतिरेकिणो हि नामान्तरमिदं परिशेष इति, एष पुनरन्वयव्यतिरेकी द्रव्यकर्मान्यत्वे सति सदाद्यभेदस्य सपक्षे रूपादौ सत्त्वाद् विपक्षे सामान्यादावभावात्, तस्मादात्मतन्त्रतासाधनमिच्छादीनां परिशेषोदाहरणं द्रष्टव्यम्) इत्येवं तात्पर्यटीकायाम्मिश्रैर्दूषितत्वादनादेयमेव ।

अत्रेदं बोध्यं—इच्छादीनां गुणत्वेन पारतन्त्र्यप्रतिपत्तिः सामान्यतो दृष्टानुमानेन साधनीया, आत्मतन्त्रताप्रतिपत्तिस्तु परिशेषानुमानादिति ।

ननु साङ्ख्यकृतान्त इच्छादीनामात्मधर्मत्वाभावेनावीतोदाहरणासम्भवात् तदतिरिक्तं प्रकृतकृतान्तोपयुक्तमवीतोदाहरणं किमित्यपेक्षायामाह—"अस्य चावीतस्य" इति, । अग्रे='अमदकरणाद्' इत्यार्य्याव्याख्यायां 'न पटस्तन्तुभ्यो भिद्यत' इत्यारभ्य (तान्येतान्यभेदसाधनान्यवीतानि) इत्यन्तेन ग्रन्थेनाभिधास्यते मयेत्यर्थः,

---

(१) "सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः," इति काणादसूत्रात् सत्तावत्त्वे सत्यनित्यत्वादि द्रव्यगुणकर्मणां साधर्म्यं, तथा च सत्ताऽनित्यत्वादीनां शब्दे वर्तमानत्वात्सामान्यविशेषसमवायेभ्योऽतिरिक्तः शब्दो द्रव्यं वा भवेद् गुणो वा स्यात्कर्म वेति भवति संशय इत्यर्थः,

(२) द्विविधमेव हि द्रव्यम्—अद्रव्यमनेकद्रव्यं च अद्रव्यं परमाण्वादि, अनेकद्रव्यं च घटादि शब्दस्त्वेकद्रव्यं तस्मान्न द्रव्यं रूपादिवदित्यर्थ इति मिश्राः,

(३) शब्दांतरहेतुत्वादित्यस्य समानजातीयारंभकत्वादित्यर्थ इत्युद्योतकराचार्यः

(४) एषः=शब्दस्य गुणत्वसाधकः (शब्दो गुणो द्रव्यकर्मान्यत्वे सति सत्तादिमत्त्वाद् रूपवद्) अयं प्रयोगोऽन्वयव्यतिरेकीत्यर्थः, तदेवाह—"द्रव्यकर्मान्यत्वे सति" इत्यादिना—

(५) उद्योतकराचार्य्योक्तं विशेषमाह—"इच्छादीनाम्" इत्यादिना, इच्छादयो गुणा अनित्यत्वे सत्यस्मदाद्यचाक्षुषप्रत्यक्षत्वाद् गन्धवत्, ते च क्वचिदाश्रिता गुणत्वाद् रूपादिवदिति सामान्यतो दृष्टानुमानद्वाराऽनिर्धारिते कस्मिंश्चिदाश्रये सिद्धे नतावत्पृथिव्यादिचतुष्टयगुणाः प्रत्यक्षत्वे सत्यकारणगुणपूर्वकत्वाद् नाप्याकाशविशेषगुणा बाह्येन्द्रियाप्रत्यक्षत्वाद्, नापि दिक्कालमनसां गुणा विशेषगुणत्वादित्येवं प्रसक्तप्रतिषेधे सति इच्छादयोऽष्टद्रव्यातिरिक्तद्रव्याश्रिता इत्याद्युक्तरीत्याऽऽत्मतन्त्रतासिद्धिरित्यर्थः,

वीतं च द्वेधा—पूर्ववत् सामान्यतो दृष्टं च, तत्रैकं दृष्टस्वलक्षणसामान्यविषयं यत् तत्पूर्ववत्, पूर्वं=प्रसिद्धं—दृष्टस्वलक्षणसामान्यमिति यावत्, तदस्य विषयत्वेनास्त्यनुमानज्ञानेस्यति पूर्ववद्,

यथा धूमाद् वह्नित्वसामान्यविशेषः पर्वतेऽनुमीयते, तस्य च

एवमवीतं निरूप्य सम्प्रति वीतं विभजते—"वीतं च द्वेधा" इति,

आद्यं वीतं स्पष्टयितुमाह—"तत्रैकम्" इति, तत्र=तयोर्वीतयोर्मध्ये एकं यद् दृष्टस्वलक्षणसामान्यविषयं तत्पूर्ववन्नामकं वीतमित्यर्थः,

पूर्ववदितिशब्देन कथमेतादृगर्थाधिगतिरित्याकाङ्क्षायां व्युत्पत्त्या तल्लाभमाह—"पूर्वं प्रसिद्धम्" इत्यादिना, प्रसिद्धपदार्थमाह—"दृष्टस्वलक्षणसामान्यम्" इति,

स्वलक्षणशब्दः स्वम्=असाधारणं लक्षणं=रूपमिति व्युत्पत्त्या तत्तदवयवसन्निवेशविशेषालिङ्गिततत्तद्व्यक्तिपरः, तदुक्तं न्यायबिन्दौ (यस्यार्थस्य सन्निधानाऽसन्निधानाभ्यां ज्ञानप्रतिभासभेदस्तत्स्वलक्षणम्) इति,

'अर्थशब्दो विषयपर्यायः, यस्य ज्ञानविषयस्य सन्निधानं=निकटदेशावस्थानम्, असन्निधानं=दूरदेशावस्थानं, तस्मात्सन्निधानादसन्निधानाच्च ज्ञानप्रतिभासस्य=ग्राह्याकारस्य भेदः=स्फुटत्वाऽस्फुटत्वाभ्यां, यो हि ज्ञानस्य विषयः सन्निहितः सन् स्फुटमाभासं ज्ञानस्य करोति, असन्निहितस्तु योग्यदेशावस्थित एवास्फुटं करोति तत्स्वलक्षणं, (सर्वाण्येव हि वस्तूनि दूरादस्फुटानि दृश्यन्ते समीपे स्वस्फुटानि तान्येव स्वलक्षणानि) इत्येतदर्थ इति धर्मोत्तराचार्यः,

अयं भावः—वस्तुनो हि द्विविधं रूपम्—असाधारणं साधारणं च, तत्र यदसाधारणं पृथुबुध्नोदराकारं तत्स्वलक्षणं, यच्च सकलव्यक्तिसाधारणं घटकत्वादिकं तत्सामान्यलक्षणमिति, तथा च दृष्टं=पूर्वमधिगतं, स्वलक्षणम्=असाधारणं रूपं यस्य सामान्यस्य तद् दृष्टस्वलक्षणं सामान्यं, तद्विषयकं यज् ज्ञानं तत्पूर्ववदनुमानमित्यत्र फलितम्,

एतदेवोदाहरणेन विशदयति—"यथा" इत्यादिना,

"वह्नित्वसामान्यविशेष" इति, ननु 'सामान्यावधारणप्रधाना वृत्तिरनुमानम्' इति योगभाष्याद् वह्नित्वरूपसामान्यस्यैवानुमेयत्वावगतेः कथम-

---

(१) एतादृग=दृष्टस्वलक्षणसामान्यविषयमित्येतादृगित्यर्थः,

वह्नित्वसामान्यस्य स्वलक्षणं वह्निविशेषो दृष्टो रसवत्याम् ।

अपरं च वीतं सामान्यतो दृष्टम्—अदृष्टस्वलक्षणसामान्यविषयं, यथेन्द्रियविषयमनुमानम्,

अत्र हि रूपादिविज्ञानानां क्रियात्वेन करणवत्त्वमनुमीयते, यद्यपि करणत्वसामान्यस्य छिदादौ वास्यादि स्वलक्षणमुपलब्धं

भिहितं वह्नित्वसामान्यविशेषोऽनुमीयत इति व्यक्तिरूपविशेषस्यानुमेयत्वमिति चेद्, नात्र वह्नित्वसामान्यस्य विशेषोऽनुमेय इति विवक्षितं किन्तर्हि वह्नित्वरूपः सामान्यविशेषोऽनुमीयत इत्यभिप्रेतमिति गृहाण—

कथं वह्नित्वस्य सामान्यविशेषोभयात्मकत्वमिति चेद्, अत्राहुः—पदार्थधर्मसङ्ग्रहकाराः[1]—(सामान्यं द्विविधं परमपरं चानुवृत्तिप्रत्ययकारणं, तत्र परं सत्ता महाविषयत्वात्, स चानुवृत्तेरेव हेतुत्वात्सामान्यमेव, द्रव्यत्वाद्यपरमल्पविषयत्वात्, तच्च व्यावृत्तेरपि हेतुत्वात्सामान्यं सद्विशेषाख्यामपि लभते) इति,

अयमर्थः—अत्यन्तव्यावृत्तानां तत्त्वानां यतः कारणादन्योन्यास्वरूपानुगमः प्रतीयते तत्सामान्यमित्यभिधीयते, तच्च द्विविधम् एकं द्रव्यादित्रिकवृत्तिसत्ताख्यं परम्, एतच्च स्वाश्रयस्यानुवृत्तेरेव हेतुत्वात्सामान्यमित्येव कीर्त्यते, अपरं च द्रव्यत्वपृथिवीत्वगोत्वादिरूपमपरं सामान्यम्, एतच्च स्वाश्रयस्य विजातीयेभ्योपि व्यावृत्तेरपि हेतुत्वाद् विशेष इत्यपि व्यवह्रियते, तथा च सिद्धं वह्नित्वादेः सामान्यविशेषरूपत्वमिति ।

लक्ष्ये लक्षणं समन्वयति—"तस्य च" इति, रसवत्याम्=पाकशालायामित्यर्थः,

द्वितीयं वीतं निरूपयति "अपरं च" इति, सामान्यतो दृष्टमित्यस्यार्थमाह–"अदृष्टस्वलक्षणसामान्यविषयम्" इति, न दृष्टं स्वलक्षणं यस्य सामान्यस्य तत्तथा तद्विषयमित्यर्थः,

उदाहरति "यथेन्द्रियविषयकम्" इति, रूपादिज्ञानानि करणवन्ति क्रियात्वाच् छिदिक्रियावदितीन्द्रियसाधकमनुमानं सामान्यतो दृष्टमित्यर्थः । तदेवाह–"अत्र" इति,—अत्र=इन्द्रियसाधकेऽनुमान इत्यर्थः,

ननु छेदनादिक्रियायां कुठारादिस्वलक्षणस्य करणस्य दृष्टत्वात्कथमदृष्टस्वलक्षणसामान्यविषयमेतदनुमानमित्याशङ्कते—"यद्यपि" इति, छिदादौ=

---

(१) काणादसूत्रभाष्यकाराः प्रशस्तपादा इत्यर्थः,

तथापि यज्जातीयस्य रूपादिज्ञाने करणत्वमनुमीयते तज्जातीयस्य करणस्य न दृष्टं स्वलक्षणं प्रत्यक्षेण, इन्द्रियजातीयं हि तत्करणं, न चेन्द्रियत्वसामान्यस्य स्वलक्षणमिन्द्रियविशेषः प्रत्यक्षगोचरोऽर्वाग्दृशां, यथा वह्नित्वसामान्यस्य स्वलक्षणं वह्निः,

सोयं पूर्ववतः सामान्यतो दृष्टात्सत्यपि वीतत्वेन तुल्यत्वे विशेषः,

---

छेदनादिक्रियायां करणत्वसामान्यस्य स्वलक्षणं वास्यादि=कुठारादि उपलब्धमित्यन्वयः, तथाचेदमपि दृष्टस्वलक्षणसामान्यविषयत्वान्न पूर्ववतोऽतिरिक्तमिति भावः,

सामान्यतो दृष्टत्वेपि विशेषेणाऽदृष्टत्वान्नेदं पूर्ववदित्याशयेन परिहरति "तथापि" इति, रूपादिज्ञाने यज्जातीयस्य=यादृग्जातिमतः करणत्वमनुमेयं तादृग्जातिमतः करणस्य स्वरूपं प्रत्यक्षेण न दृष्टमित्यर्थः,

किंजातीयं तत्करणं यन्नाध्यक्षगोचर इत्याकाङ्क्षायामाह—"इन्द्रियजातीयम्" इति, इन्द्रियत्वजातिमद् हि तत्करणं=रूपज्ञाने करणं। भवत्विन्द्रियं करणं तेन किमायातमित्यत्राह—"न चेन्द्रियत्वसामान्यस्य" इति,

अर्वाग्दृशाम्=अयोगिनामिन्द्रियविशेषो न प्रत्यक्षगोचरो निरवयवत्वेनातीन्द्रियत्वात्, तथाचायातमिन्द्रियस्यादृष्टत्वमिति,

तत्र व्यतिरेकिदृष्टान्तमाह—"यथा" इति, यथा वह्नित्वसामान्यस्य स्वलक्षणं वह्निरध्यक्षगोचरो न तथेन्द्रियत्वसामान्यस्य स्वलक्षणमिन्द्रियमध्यक्षगोचरः, ततसिद्धं पूर्ववतोऽनुमानादस्यातिरिक्तत्वमिति तत्त्वम्।

तदेवाह "सोयम्" इति, वीतत्वेनोभयोः समानत्वेपि सोयम्=अनन्तराभिहित एव दृष्टस्वलक्षणसामान्यविषयत्वरूपः पूर्ववतः=पूर्ववदनुमानस्य सामान्यतो दृष्टानुमानाद् विशेषः=प्रभेद इत्यर्थः,

ननु सामान्यतो दृष्टमितिव्याख्येयवाक्यस्थदृष्टपदस्याऽदृष्टस्वलक्षणसामान्यविषयमिति व्याख्यानवाक्येनाऽदृष्टार्थपरत्ववर्णनमयुक्तं, दृष्टपदस्य तद्विरुद्धाऽदृष्टार्थकत्वासम्भवादित्याशङ्कायां न दृष्टपदस्याऽदृष्टार्थत्वमभिहितमपि तु 'सामान्यत' इत्यस्य षष्ठ्यन्तप्रकृतिकतसन्तत्वेन 'सामान्यस्य' इत्यर्थ-

---

(१) जात्यन्ताच्छे प्रत्यये सति यथा ब्राह्मणजातीय इत्यादौ ब्राह्मणत्वजात्याधारभूत इत्यर्थो दृष्टस्तथाऽत्रापीति ध्येयम्।

अत्र च दृष्टं=दर्शनं, सामान्यत इति सामान्यस्य, सार्वविभक्तिकस्तसिर्, अदृष्टस्वलक्षणस्य सामान्यविशेषस्य दर्शनं सामान्यतो दृष्टमनुमानमित्यर्थः ॥

परत्वं 'दृष्टम्' इत्यस्य च भावक्तान्तत्वेन 'दर्शनम्' इत्यर्थपरत्वञ्चादाय 'सामान्यस्य दर्शनम्' इत्यर्थलाभाद् आयातमर्थाद् विशेषस्यादृष्टत्वमित्यार्थिकार्थमभिप्रेत्य तथाभिधानान्न दोष इति समाधानं मनसि निधायाह—"अत्र" इति, अत्र=सामान्यतो दृष्टमिति वाक्ये,

तथाच विशेषदर्शनस्थले पूर्ववदनुमानं सामान्यदर्शनस्थले च सामान्यतो दृष्टानुमानमिति दृष्टत्वाऽदृष्टत्वप्रयुक्तस्तयोर्भेद इति फलितम्,

न्यायवार्तिककारास्तु—(पूर्ववदिति वतिप्रत्यय एषं, यथा पूर्वं प्रत्यक्षेण दृष्टोऽर्थस्तथानुमानेनापि तमेवार्थं प्रतिपद्यत इति पूर्ववद् दृष्टो भवति, यदितरधर्मदर्शनाद् धर्मिणोऽधिगतिस्साधनं तत्सामान्यतो दृष्टं यथेच्छादिभिरात्मा) इत्यादिग्रन्थेन 'यत्र साध्यतावच्छेदकहेतुतावच्छेदकरूपपुरस्कारेण व्याप्तिग्रहस्तत्पूर्ववदनुमानं, यत्र च साध्यतावच्छेदकहेतुतावच्छेदकरूपव्यापकधर्मपुरस्कारेण व्याप्तिग्रहस्तत्सामान्यतो दृष्टमनुमानम्' इत्येवं तयोर्भेदमाहुः,

(पूर्ववद् इति—यत्र कारणेन कार्य्यमनुमीयते यथा मेघोन्नत्या भविष्यति वृष्टिरिति, शेषवत् तद् यत्र कार्य्येण कारणमनुमीयते—पूर्वोदकविपरीतमुदकं नद्याः पूर्णत्वं शीघ्रत्वं च दृष्ट्वा स्रोतसोऽनुमीयते भूता वृष्टिरिति

(१) यत् स्वलक्षणं तदेव विशेषशब्देनात्र व्यवह्रियत इति ज्ञेयम् ।

(२) पूर्वेण तुल्यं वर्तत इति पूर्ववत् क्रियातुल्यतायां च वतिः, तथा पूर्वमन्यतरदर्शनेन सहाऽन्यतरदर्शनं दृष्टान्तधर्मिणि, एवं साध्यधर्मिण्यन्यतरसाधनधर्मदर्शनेनान्यतरसाध्यधर्मस्यानुमितिदर्शनमिति भवति क्रियातुल्यतेत्यर्थः,

(३) यथा पर्वते पक्षे धूमेन हेतुना वह्नौ साध्ये धूमत्ववह्नित्वरूपपुरस्कारेण महानसादौ व्याप्तिग्रहः,

(४) यथेच्छादिभिरात्मनि साध्य इच्छात्वाऽऽत्मत्वव्यापकाभ्यां गुणत्वद्रव्यत्वाभ्यां व्याप्तिग्रहः,

(५) तयोः=पूर्ववत्सामान्यतो दृष्टयोरित्यर्थः ।

(६) वृष्टिमन्त एते मेघा गम्भीरध्वानवत्त्वे सति बहुबलाकावत्त्वे सति अचिरप्रभवत्त्वे सति उन्नतिमत्त्वाद् वृष्टिमन्मेघवद् इति न्यायवार्तिककारीयो न्यायाकारोऽत्र बोध्यः ।

(७) उपरि वृष्टिमद्देशसंबन्धिनी नदी स्रोतःशीघ्रत्वे सति पूर्णफलकाष्ठादिवहनशीलत्वे सति पूर्णत्वात् पूर्णवृष्टिमन्नदीवद्, इत्येवमत्र प्रयोगोऽवसेयः—

सर्वं चैतदस्माभिर्न्यायवार्तिकतात्पर्यटीकायां व्युत्पादितमिति नेहोक्तं विस्तरभयाद् ।

प्रयोजकवृद्धशब्दश्रवणसमनन्तरं प्रयोज्यवृद्धप्रवृत्तिहेतुज्ञानानुमानपूर्वकत्वाच्छब्दार्थसंबन्धग्रहणस्य, स्वार्थसंबन्धज्ञानसहकारिणश्च शब्दस्यार्थप्रत्यायकत्वादनुमानपूर्वकत्वम् इत्यनुमानानन्तरं शब्दं लक्षयति "आप्तश्रुतिराप्तवचनन्तु" इति,

---

सामान्यतो दृष्टं=व्रज्यापूर्वकमन्यत्र दृष्टस्यान्यत्र दर्शनमिति, तथाचादित्यस्य तस्मादस्त्यप्रत्यक्षाप्यादित्यस्य व्रज्येति) इति न्यायभाष्योक्तं व्याख्यान्तरमप्यत्रानुसन्धेयम् ।

वृत्तिकृतस्तु[2]—पूर्ववदित्यन्वय्यनुमानं, शेषवदिति व्यतिरेक्यनुमानं, सामान्यतो दृष्टमित्यन्वयव्यतिरेक्यनुमानम्. इत्येवमपि व्याचक्षते ।

अत्र न्यायदर्शनीयतुर्यसूत्रीयन्यायभाष्यमुपादाय प्रवृत्ते न्यायवार्तिके तत्तात्पर्यटीकायां च बहुविस्तरो वागाडम्बरः प्रदर्शित इति तत्रैव कर्णहत्यालोचनीयमित्याशयेनाह—"सर्वं चैतदस्माभिर्न्यायवार्तिकतात्पर्यटीकायाम्" इति ।

उद्देशक्रमप्राप्तं शब्दप्रमाणं निरूपयितुमुपक्रमते "प्रयोजकवृद्ध" इति, अनुमानानन्तरं शब्दं लक्षयतीति संबन्धः ।

(उभयं महाविषयं शब्दः प्रत्यक्षं च कथमिति, प्रत्यक्षेणापि सामान्यविशेषतद्वतां ग्रहणं, शब्देनापि) इत्युद्द्योतकराचार्योक्तेः प्रत्यक्षशब्दयोः सारूप्येणानुमानस्य च सामान्यविषयत्वेन वैरूप्यात्प्रत्यक्षानन्तरमेवागमो निर्वक्तव्यो नानुमानानन्तरमित्याशङ्कायामाह—"अनुमानपूर्वकत्वमिति" इति, इति=यतः शब्दस्यानुमानपूर्वकत्वमतस्तदनन्तरमेवागमनिरूपणं युक्तमित्यर्थः,

आगमस्य प्रत्यक्षसारूप्येऽप्यनुमाननिरूपणमन्तराऽऽगमस्याऽशक्यनिरूपणत्वात्तस्य[3]ानुमानपूर्वकत्वात् तयो[4]रुपजीव्योपजीवकभावसङ्गतिरिति भावः ।

---

(१) देशान्तरप्राप्तिमानादित्यः द्रव्यत्वे सति क्षयवृद्धिप्रत्ययाविषयत्वे च प्राङ्मुखोपलभ्यत्वे च तदभिमुखदेशसंबन्धादनुत्पन्नपादविहारस्य परिवृत्य तत्प्रत्यविषयत्वान्मण्यादिवदिति चात्र न्यायाकारः ।

(२) विश्वनाथन्यायपञ्चानना इत्यर्थः ।

(३) तस्य=शब्दस्य,

(४) तयोर्=अनुमानागमयोः,

तत्राप्तवचनमिति लक्ष्यनिर्देशः, परिशिष्टं लक्षणम् ।

आप्ता=प्राप्ता-युक्तेति यावद्, आप्ता चासौ श्रुतिश्चेत्याप्तश्रुतिः ।

श्रुतिर्-वाक्यजनितं वाक्यार्थज्ञानं ।

कथं तस्यानुमानपूर्वकत्वमित्यत्राह—"स्वार्थसंबन्धज्ञानसहकारिणश्च शब्दस्याऽर्थप्रत्यायकत्वाद्" इति, स्वं=शब्दश्चार्थश्च स्वार्थौ=तयोर्यः संबन्धः=शक्तिवृत्त्यादिप्रयुक्तो वाच्यवाचकत्वादिरूपः संसर्गविशेषः, तज्ज्ञानसहकृतस्यैव शब्दस्यार्थज्ञानजनकत्वादित्यर्थः,

अस्तु शक्तिधीसहकृतस्य शब्दस्यार्थप्रत्यायकत्वमेतावता कथमुपजीव्योपजीवकभाव इत्यत्राह—"शब्दार्थसंबन्धग्रहणस्य प्रयोजकवृद्धशब्दश्रवणसमनन्तरं प्रयोज्यवृद्धप्रवृत्तिहेतुज्ञानानुमानपूर्वकत्वाद्" इति,

प्रयोजकवृद्धः=प्रेरक आचार्यादिः, प्रयोज्यः=प्रेर्यः शिष्यादिः, प्रयोज्यवृद्धस्य या प्रवृत्तिस्तस्यैव हेतुर्यस्य प्रवर्तकज्ञानस्य तस्य यदनुमानं तत्पूर्वकत्वाच्छब्दार्थबन्धज्ञानस्येत्यर्थः,

अयं भावः-प्रयोजकप्रयुक्तगामानयेत्यादिवाक्यश्रवणसमनन्तरं प्रयोज्यवृद्धस्य गवानयनमुपलभ्य पार्श्वस्थो व्युत्पित्सुर्बाल इत्थमाकलयति-इयमस्य प्रवृत्तिर्ज्ञानपूर्विका स्वतन्त्रप्रवृत्तित्वान्मदीयप्रवृत्तिवद् इति, तदनु चायं प्रवर्तकप्रत्यय आचार्योच्चरितवाक्यजन्यस्तदनन्तरभावित्वादित्येवं स्वात्मदृष्टान्तेन प्रवर्तकप्रत्यये शब्दपूर्वकत्वं चानुमाय शब्दानन्तरभाविनि तस्मिन् शब्दस्य शक्तिं गृह्णाति तदनु च गां बधान समिधं चानय इत्यादिप्रयोगान्तरेषु आनयनगोशब्दयोरुद्धारे तदर्थयोरप्युद्धारात् प्रक्षेपे च प्रक्षेपदर्शनादन्वयव्यतिरेकाभ्यां गवादिविशेषेषु पदविशेषस्य सामर्थ्यमवगच्छतीति स्फुटं संबन्धज्ञानस्यानुमानपूर्वकत्वमिति ।

लक्ष्यलक्षणभावेन मूलवाक्यस्य विभागमाह-"तत्र" इति, तत्र=आप्तश्रुतिराप्तवचनन्तु इति मूलवाक्ये, परिशिष्टम्=आप्तश्रुतिरित्याकारम् । युक्ता=तथ्यार्थप्रत्यायनसमर्थत्वेन समीचीना, दोषहीनेति वा ।

ननु साङ्ख्यनये ज्ञानरूपाया बुद्धिवृत्तेरेव प्रमाणत्वव्यवहारात्कथं श्रुतेरागमप्रमाणत्वमित्याशङ्कायामाह-"श्रुतिर्-वाक्यजनितं वाक्यार्थज्ञानम्" इति।

---

(१) प्रवृत्तिलिङ्गकप्रवर्तकज्ञानानुमानपूर्वकत्वादित्यर्थः ।

'श्रुतिः स्त्री वेद आम्नाय' इत्यभिधानाद् वेदवाक्ये शक्तमपि श्रुतिपदमत्र लक्षणया सामान्यवाक्यपरं तन्नीत्वा पुनरुपचाराद् वाक्यजन्यबोधपरत्वेन व्याख्येयमित्यर्थः।

यद्वा यथा द्विरेफः शब्दायत इत्यादौ तार्किकैः पूर्वं द्विरेफपदेन रेफद्वय-घटितं भ्रमरपदं लक्ष्यते पुनश्च भ्रमरपदेन स्वशक्यसंबन्धी जन्तुविशेषरूपोऽर्थो लक्ष्यते तथाऽत्रापि पूर्वं श्रुतिपदेन वाक्यं लक्ष्यते पुनश्च वाक्येन तज्जन्यं ज्ञानं लक्ष्यत इत्येवं लक्षितलक्षणासमाश्रयणेनायं ग्रन्थो नेयः,

यद्यपि (श्रुतो हि भगवान् बहुशः श्रुतिस्मृतीतिहासपुराणेष्विदानीं मन्तव्यो भवति) इति कुसुमाञ्जलिग्रन्थमाङ्गल्याय व्याख्यतृभिः (स्मृत्यन्य-प्रमाणशब्दत्वेन शक्तमपि श्रुतिपदं 'श्रोतव्यः श्रुतिवाक्येभ्य' इत्यत्र प्रमाणशब्दत्वेन श्रुतिस्मृती बोधयच्च लाक्षणिकम्) इत्येवं लक्षणामन्तरैव श्रुतिपदस्य श्रुतिस्मृत्यादिवाक्यपरत्वमुपवर्णितं तथाप्यत्र तथाऽऽस्थातुं न युक्तम्, आप्तेतिविशेषणस्य तथा सत्यसङ्गतत्वाऽऽपातात्, शाक्यादिवाक्यानां हि प्रमाणत्ववारणायाऽऽप्तपदमुपात्तमित्युत्तरत्र व्यक्तं, श्रुतिशब्देन श्रुतिस्मृत्यादि-वाक्यानां ग्रहणे तु शाक्यादिवाक्यानां ग्रहणाप्रसक्त्या तद्वारकमाप्तेति पदं पुनरुक्तं सदसङ्गतं स्याद्,

यद्वा श्रूयत इति श्रुतिः=श्रोत्रग्राह्यं वाक्यमिति व्युत्पत्त्या श्रुतिपदस्य वाक्यमिति वाच्योऽर्थः, तज्जन्यं ज्ञानं च लाक्षणिकोऽर्थ इति पन्था अत्राऽऽश्रयणीयः, सर्वथापि श्रुतिपदमत्र वाक्यजन्यज्ञानपरमिति ग्राह्यमिति तत्त्वम्,

---

(१) पटैकदेशे दग्धे पटो दग्ध इति व्यवहारात्समुदाये प्रवृत्तानां शब्दानामेकदेशेपि प्रवृत्तिदर्शनात्समग्रवेदे शक्तमपि श्रुतिपदं वेदैकदेशतद्वाक्येपि प्रवृत्तं भवतीत्याशयेन 'वेदवाक्ये शक्तम्' इत्यभिहितम्,

(२) लक्षणया=अनभिप्रेतभागत्यागरूपया जहदजहल्लक्षणयेत्यर्थः,

(३) कुतश्चिन्निमित्तादतत्त्वेपि तत्त्वव्यवहार उपचारः, यथा प्राणसाधनत्वेप्यन्नस्योपचाराद् 'अन्नं प्राणा' इति प्रयोगस्तथात्रापि वाक्यजन्ये ज्ञाने वाक्यमित्युपचारेण प्रयोगः, स्पष्टं चैतत् "सहचरण" इति (२।२।५९) सूत्रे न्यायभाष्ये,

(४) श्रुतिवाक्येनात्मनः श्रोतव्यत्वोक्तेः कथं श्रुतिस्मृतीतिहासपुराणादिवाक्येनात्मनः श्रुतत्वमभिहितमित्येवं कुसुमाञ्जलिग्रन्थस्यासङ्गतत्व आपादिते सति श्रुतिपदं शब्दप्रमाणवाचकमित्येवं तत्साङ्गत्यायेत्यर्थः,

तच्च स्वतःप्रमाणम्—अपौरुषेयवेदवाक्यजनितत्वेन सकलदोषाऽऽशङ्काविनिर्मुक्तेर्युक्तं भवति,

---

एवमाप्तवचनमित्यत्राप्युपचारेणाप्तवचनजन्यं ज्ञानं ग्राह्यम्,

नचैवं पौनरुक्त्यं, शङ्क्यं लक्ष्यलक्षणभावस्थले पौनरुक्त्याऽनङ्गीकाराद् अन्यथा प्रमाकरणं प्रमाणमित्यादौ का गतिः स्यात, "शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादाद्" इति न्यायसूत्रेऽनुवादपदमुपलक्षणमिति तत्त्वम्। वाक्यजनितं ज्ञानमित्येतावतैव सिद्धेऽलमन्तर्गडुना 'वाक्यार्थ' इत्यनेन, न हि वाक्यार्थज्ञानभिन्नमन्यत्किंचिद् वाक्यजन्यं ज्ञानं यद् वाक्यार्थेतिविशेषणेन व्यावर्त्येद् इति तु न शङ्कनीयं, वाक्येनाऽर्थ्यते=स्वकीयतात्पर्यविषयतया प्रार्थ्यते योऽभिधेयस्तज्ज्ञानस्यैव वाक्यजन्यस्याऽऽगमप्रमाणत्वं न यथाश्रुतवाक्यजन्यज्ञानस्येत्यर्थबोधनार्थं तस्यार्थवत्त्वाद् युक्तं चैतद् अन्यथा 'गावः सत्रमासत' 'यजमानः प्रस्तर' इत्याद्यर्थवादवाक्यजन्यज्ञानस्य प्रामाण्यं न स्याद्, यथाश्रुतस्य तस्य प्रत्यक्षादिविरुद्धत्वेनासम्भवग्रस्तत्वाद्, तात्पर्यविषयीभूतस्य वाक्यजन्यार्थज्ञानस्यागमप्रमाणत्वाभ्युपगमे त्वर्थवादवाक्यानामपि स्वबोध्यतात्पर्यविषयीभूतप्राशस्त्यादिरूपार्थज्ञानजनकत्वसम्भवादुपपन्नमर्थवादवाक्यजन्यस्यापि ज्ञानस्यागमप्रमाणत्वमिति।

आगमप्रमाणस्यावान्तरविशेषप्रदर्शनपुरस्सरं तस्य युक्तत्वमाख्याति—"तच्च स्वतःप्रमाणम्" इत्यादिना, तच्च=वाक्यार्थज्ञानं च यत् स्वतःप्रमाणं तद् युक्तं भवति इत्यग्रिमेणान्वयः, वाक्यजन्यं ज्ञानं द्विविधम्—एकमन्यप्रमाणनिरपेक्षस्वार्थबोधनसमर्थमाम्नायवाक्यजन्यं स्वतःप्रमाणम्, अपरं चाम्नायरूपमूलप्रमाणसापेक्षस्मृत्यादिवाक्यजन्यं परतःप्रमाणं, तत्र स्वतःप्रमाणस्य युक्तत्वे हेतुमाह—"सकलदोषाऽऽशङ्काविनिर्मुक्तेर्" इति,

---

(१) श्रुतिशब्दस्य शाब्दबोधपरत्वे कथमाप्तवचनमित्यनेन सामानाधिकरण्यं नहि वचनमेव ज्ञानमित्याशङ्कायामाह—"अत्राप्युपचारेण" इति,

(२) प्रमाणपदस्यापि प्रमाकरणत्वरूपार्थबोधकत्वात्स्पष्टं पौनरुक्त्यम्।

(३) अ० ५ आ० २ सू १४।

(४) अन्तर्=मध्ये गडुना=ग्रीवाप्रदेशजातमांसपिण्डेनेव निरर्थकेनेत्यर्थः,

(५) तस्य=अर्थवादवाक्यजन्यज्ञानस्य,

(६) तस्य=आगमप्रमाणस्य,

सकला ये भ्रमप्रमादविप्रलिप्साकरणापाटवादयः पुन्दोषाः—तेषां याऽऽशङ्का=सम्भावनामात्रेण प्रसक्तिः—तस्या विनिर्मुक्तेः=विरहाद्, अयुक्तत्वापादकपुन्दोषराहित्यादित्यर्थः,

कुतः पुन्दोषशङ्काकलङ्कविमोक इत्यपेक्षायां हेतुमाह "अपौरुषेयवेदवाक्यजनितत्वेन" इति,

कापिलनये जैमिनीयनये चेश्वरानङ्गीकाराद् वेदस्य पुरुषविशेषेश्वरप्रणीतत्वाभावेनापौरुषेयत्वं ज्ञेयं,

तथाच सूत्रं—"न पौरुषेयत्वं तत्कर्तुः पुरुषस्याभावाद्" इति,

एवं च प्रणेतृपुरुषासत्त्वेन निराश्रयाणां दोषाणां वेदेऽभाव इति 'अपौरुषेय' इत्यनेन बोधितम्,

तदुक्तं भट्टपादैः—'यद्वा वक्तुरभावेन न स्युर्दोषा निराश्रयाः' ६३ इति, यथा च वेदस्य स्वतःप्रमाणत्वमपौरुषेयत्वं च तथा स्पष्टं—'यदा स्वतःप्रमाणत्वं तदाऽन्यन्नैव गृह्यते, निवर्तते हि मिथ्यात्वं दोषाज्ञानादयत्नतः' ५२ इत्यादिना चोदनासूत्रे श्लोकवार्तिके,

ननु "एतस्य महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेद" इत्यादिश्रुत्या महतो भूतस्य=महत्तत्त्वाख्यादिविकारस्य पुरुषस्य निश्वासभूता वेदा इति प्रतीतेः कथमपौरुषेयत्वमिति चेद्—

अत्राहुः—"यस्मिन्नदृष्टेपि कृतबुद्धिरुपजायते तत्पौरुषेयम्" इति सूत्रे साङ्ख्यप्रवचनभाष्यकाराः—(दृष्ट इवादृष्टेपि यस्मिन् वस्तुनि कृतबुद्धिः=

(१) भ्रमश्च उच्चारणीयवाक्यार्थगोचरो भ्रमः, प्रमादोऽनवधानता–साच वाक्यार्थज्ञानस्वरूपयोग्यस्य वक्तुरुच्चारणीयवाक्यार्थनिश्चयव्यतिरेकः, शुकीयवाक्यार्थनिश्चयव्यतिरेकवारणाय पञ्चम्यन्तनिवेशः, अन्यथा प्रतीतस्यार्थस्यान्यथाप्रतिपिपादयिषा प्रतारणा सैव विप्रलिप्सा, इच्छाविषयीभूतपूर्ववर्णानुकूलकण्ठताल्वाद्यभिघातनुत्पादकालीनापरवर्णानुकूलकण्ठताल्वाद्यभिघातः करणापाटवं, करणं–कण्ठताल्वाद्यभिघातः तस्यापाटवम्–असामर्थ्यम्, इच्छाविषयीभूतवर्णाननुकूलत्वमिति यावद् इत्यर्थ इति तर्कप्रकाशे श्रीकण्ठः,

(२) सां० अ० ५। सू० ४६

(३) चोदनासूत्रे कुमारिलस्वामिभिरित्यर्थः,

(४) कापिलैरीश्वरानङ्गीकारात् तन्मतेन महतो भूतस्यार्थान्तराख्यानम्, पुरुषोपाधित्वेन महानपि पुरुष उच्यते,

(५) अ० ५। सू० ५०

बुद्धिपूर्वकत्वबुद्धिर्जायते तदेव पौरुषेयमिति व्यवह्रियते इत्यर्थः, एतदुक्तं भवति, न पुरुषोच्चरितत्वमात्रेण पौरुषेयत्वं श्वासप्रश्वासयोः सुषुप्तिकालीनयोः पौरुषेयव्यवहाराभावात् किन्तु बुद्धिपूर्वकत्वेन, वेदास्तु निश्वासवद्देवादृष्टवशादबुद्धिपूर्वका एव स्वयम्भुवः सकाशात्स्वयं भवन्तीत्यतो न पौरुषेया इति। जैमिनीयास्तु सम्प्रदायाविच्छेदे सत्यस्मर्यमाणकर्तृकत्वमपौरुषेयत्वं वेदानामित्येवमातिष्ठन्ते,

वेदान्तिनस्तु-सत्यपीश्वरविवर्तत्वे वेदानां प्रमाणान्तरेणार्थमुपलभ्य विरचितत्वाभावरूपं, पूर्वकल्पीयानुपूर्वीसमानानुपूर्वीघटितत्वरूपं वा अपौरुषेयत्वं वेदानामित्येवं प्रतिजानते,

एवमवान्तरविशेषेपि पुरुषाऽस्वातन्त्र्यमात्रमपौरुषेयत्वं सर्वत्र समानमिति ध्येयम्।

तथाचाहुर्मिश्राः-(यथाऽत्रसर्गे नियतानुपूर्व्यं वेदाध्ययनमभ्युदयनिःश्रेयसहेतुरन्यथा तदेव वाग्वज्रतयाऽनर्थहेतुरेवं सर्गान्तरेष्वपीति तदनुरोधात्सर्वज्ञोपि सर्वशक्तिरपि पूर्वपूर्वसर्गानुसारेण वेदान् विरचयन्न स्वतन्त्रः, पुरुषास्वातन्त्र्यमात्रं चापौरुषेयत्वं रोचयन्ते जैमिनीया अपि, तच्चास्माकमपि समानमन्यत्राभिनिवेशात्) इति।

तथाचापौरुषेयाम्नायवाक्यजन्यत्वेन निरस्तसमस्तदोषाशङ्कतया युक्तमाम्नायवाक्यजन्यस्य ज्ञानस्य युक्तत्वमित्यत्र फलितम्।

येतु 'तच्च स्वतः प्रमाणम्' इति पृथग् वाक्यमिति मत्वा 'तद् वाक्यार्थज्ञानं स्वग्राहकसामग्रीग्राह्यप्रामाण्यविशिष्टं ननु तार्किकादिवत्परतः प्रमाणम्' इत्येवं प्रामाण्यवादविचारप्रकारमत्र संयोजयन्ति ते (युक्तं भवति) इत्यत्र किं कर्तृपदं यद् भवति इति क्रियया संबध्येत इति प्रष्टव्याः,

किं च नहि वाक्यार्थज्ञानमेव स्वतःप्रमाणमपि तु, 'स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यताम्' इत्युक्तप्रकारेण ज्ञानमात्रं, तथा च केवलस्याग-

(१) अज्ञातकर्तृके जीर्णकूपारामादौ व्यभिचारवारणाय-'सम्प्रदायाविच्छेदे सति' इति भारतादिषु व्यभिचारपरिहाराय-(अस्मर्यमाणकर्तृकत्वम्) इति,

(२) यथा वृत्तमर्थजातं पूर्वमुपलभ्य पुनर्विरचिता भारतादयो, यथा वा पूर्वकल्पीयानुपूर्वीविभिन्नानुपूर्वीघटिता भारतादयस्तथा न वेदा इत्यर्थः,

(३) शास्त्रयोनित्वाधिकरणे भामतीकार इत्यर्थः,

(४) ये=स्थलविशेषे स्वल्पटिप्पणकाराः श्रीभारतीनामानस्तारानाथादयश्च,

एवं वेदमूलस्मृतीतिहासपुराणवाक्यजनितमपि ज्ञानं युक्तं भवति ।

मज्ञानस्य तत्कथनं न शोभनम्, अपि च 'प्रमाणत्वाऽप्रमाणत्वे स्वतः साङ्ख्याः समाश्रिता" इत्यभियुक्तोक्तेः प्रमाणत्वस्येवाप्रमाणत्वस्यापि स्वतस्त्वादत्र तदेकमात्रत्वाभिधानमसमीचीनम् ।

किञ्चैवं सति बुद्धादिवाक्यजन्यं ज्ञानमपि स्वतःप्रमाणमापद्येत, तथा च मदभिहितैव व्याख्या ज्यायसीति ध्येयम् ।

एवं स्वतःप्रमाणस्य युक्तत्वमाख्याय परतःप्रमाणस्य युक्तत्वमाह—"एवं वेदमूलस्मृति" इत्यादिना ।

स्मृत्यादीनां पुरुषबुद्धिप्रभवत्वेन पौरुषेयदोषाक्रान्ततया कथं तेषां युक्तत्वमित्याकाङ्क्षायां 'वेदमूल' इति हेतुगर्भविशेषणम् ।

किञ्चित्स्मृत्यादिकं प्रत्यक्षवेदमूलकं, किञ्चिदुच्छिन्नवेदशाखामूलकम् इत्यर्थः,

यथा च प्रत्यक्षवेदमूलकत्वेपि स्मृतीनां नानुवाददोषग्रस्तत्वं तथा "विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्" "हेतुदर्शनाच्च" इत्यादिसूत्रेषु (शाखान्तरविप्रकीर्णानि हि पुरुषान्तरप्रत्यक्षाण्येव वाक्यानि पुरुषधर्मानुष्ठानक्रमेणापठितानि वेदसमाम्नायविनाशभयात्स्वरूपेणानुपन्यस्यार्थोपनिबन्धनद्वारलभ्यानि विदिष्टत्वनिस्थानीयेन तेनैव परोक्षाण्यपि व्यज्यमानानि पिण्डीकृत्य स्मर्यन्ते) इत्यादिना तन्त्रवार्तिके स्पष्टम्.

---

(१) तच्चेत्यनेन सामान्यवाक्यजन्यज्ञानस्यात्र परामृष्टत्वाद्,

(२) ननु यदि सर्व एव स्मार्तोऽर्थो वेदेऽभिहितस्तर्ह्यनुवादकत्वेनाज्ञातज्ञापकत्वाभावात्कथं स्मृत्यादीनां प्रामाण्यमित्याशङ्कायामाह "यथाच" इति,

(३) जै० अ० १ पा० ३ । सू० ३।४।

(४) कस्यांचिच्छाखायामष्टकादिकर्मस्वरूपं निरूपितं, कुत्रचिच्च तन्मन्त्राः, क्वचिच्च तद्देवतादिकमित्येवं विभिन्नानामर्थानामेकत्रोपसंहरणं मन्वादयः कृतवन्त इत्यर्थः,

(५) यदि हि स्वरूपत एव वेदवाक्यान्युद्ध्रियेरंस्तदा वेदीयनियतानुपूर्वीविनाशेन तत्स्वाध्यायस्य प्रत्यवायकरत्वं स्यादित्यालोच्य तत्तदर्थोपनिबन्धेन वेदवाक्यानि सङ्गृहीतानीति भावः,

आदिविदुषश्च कपिलस्य कल्पादौ कल्पान्तराधीतश्रुतिस्मरणसम्भवः ।

स्मृतीनामुच्छिन्नशाखामूलकत्वे च 'विवादपदं स्मृतिः स्मृत्यर्थानुभावकवेदमूलाऽक्लृप्तमूलान्तरत्वे सति महाजनपरिगृहीतत्वात्प्रत्यक्षवेदमूलस्मृतिवद्' इति वर्द्धमानोपाध्यायोक्तमनुमानं बोध्यम्,

यथा च वेदशाखोच्छेदसम्भवस्तथा "स्मृत्यनुष्ठानानुमितानां शाखानामुच्छेददर्शनाद्" इत्यादिना कुसुमाञ्जलिग्रन्थे विस्तरः,

एवमितिहासपुराणयोरपि वेदमूलकत्वं ज्ञेयम्,

स्मृतित्वाविशेषात्कापिलस्मृतेरपि 'अजामेकाम्' 'असङ्गो ह्ययं पुरुष' इत्यादिवेदमूलकत्वेन युक्तत्वमवसेयम्,

ननु यथा मन्वादिभिर्वेदमधीत्य तदर्थं चावगत्य तत्र तत्र विप्रकीर्णवेदवाक्यान्यर्थतः पिण्डीकृत्योपनिबद्धानि न तथा कपिलमुनिना, "ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति" इत्यादिश्रुत्योत्पन्नमात्रस्यैव तस्य ज्ञानसम्पन्नत्वश्रवणाद् वेदाध्ययनमन्तरेव प्रकृतशास्त्रस्य प्रणीतत्वात्, तथा च कथं वेदमूलकत्वं, नच वेदवाक्यवत्स्वतःप्रमाणत्वम्, पुरुषबुद्धिप्रभवस्य तस्य तत्त्वायोगाद् इत्याशङ्कायामाह "आदिविदुषश्च कपिलस्य कल्पान्तराधीतश्रुतिस्मरणसम्भव" इति,

तथा च कापिलस्मृतेरपि वेदमूलकत्वाद् युक्तमेतस्या अपि युक्तत्वमित्यत्र फलितम्,

महाप्रलयान्तरिते कथं वेदानां स्मरणमित्याशङ्कायाम् (आदिविदुष) इति हेतुगर्भितं विशेषणम्,

अतीतकल्पानुष्ठितप्रकृष्टधर्मबलेन सर्गादावेव विज्ञानसम्पन्नः कपिलः किलाविर्बभूवेति स आदिविद्वानित्यर्थः,

---

(१) विवादपदमिति, एतच्च प्रत्यक्षवेदमूलस्मृत्यंशे लोभादिमूलस्मृत्यंशे च सिद्धसाधनबाधादिवारणार्थं, तादृप्यसिद्धयेऽनुभावकान्तं, न्यायादिमूलकस्मृतौ व्यभिचारवारणाय अक्लृप्तेति, असम्भवन्मूलान्तरत्वे सतीत्यर्थः, भ्रम एवात्र मूलमित्यसिद्धिशङ्कानिरासाय 'महाजनपरिगृहीतपदम्' इत्येतट्टीकायाम्मकरन्दकारो रुचिदत्त',

(२) द्वितीयस्तवके तृतीयकारिकायामिति शेषः । याश्शाखा उपलभ्योपनिबद्धा मन्वादिभिर्धर्मास्ता इदानीमुत्सन्ना इति भावः,

(३) इतिहासपुराणानां वैदिकोपाख्यानोपबृंहणपरत्वान्न पौनरुक्त्यं, तथाचाहुः 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेद्' इति,

(४) तस्य=कापिलवाक्यस्य, तत्त्वायोगात्=स्वतःप्रमाणत्वायोगाद्,

सुप्तप्रबुद्धस्येव पूर्वेद्युरवगतानामर्थानामपरेद्युः,

तथाचाऽऽवट्यजैगीषव्यसंवादे भगवान् जैगीषव्यो दशमहाकल्पवर्त्ति जन्मस्मरणमात्मन उवाच—"दशसु महाकल्पेषु विपरिवर्तमानेन मया" इत्यादिना ग्रन्थसन्दर्भेण ।

आप्तग्रहणेन चाऽयुक्ताः शाक्यभिक्षुनिर्ग्रन्थकसंसारमोचकादीनामागमाभासाः परिहृता भवन्ति ।

तत्र दृष्टान्तमाह "सुप्तप्रबुद्धस्येव" इति, पूर्वं सुप्तस्य पश्चात्प्रबुद्धस्य इव=यथा पूर्वेद्युः=पूर्वस्मिन्नहि समधिगतानामर्थानाम् अपरेद्युः=अपरस्मिन्नहि स्मरणं तथेत्यर्थः, यथा चैतत् तथा 'समाननामरूपत्वाद्'(1) इति ब्रह्मसूत्रभाष्यभामत्यादौ स्पष्टम्—

प्रकृष्टयोगजधर्मबलेन कल्पान्तरानुभूतमपि स्मर्यत इत्यत्र प्रसिद्धं संवादमाह—"तथाचाऽऽवट्य" इति,

केन वचनेनोवाचेत्याकाङ्क्षायां योगभाष्य(2)स्थितं तद्वचनमाह—"दशसु महाकल्पेषु" इति,

(भगवतो जैगीषव्यस्य संस्कारसाक्षात्करणाद् दशसु महासर्गेषु जन्मपरिणामक्रममनुपश्यतो विवेकजं ज्ञानं प्रादुरभवद्, अथ भगवानावट्यस्तनुधर(3)स्तमुवाच दशसु महासर्गेषु भव्यत्वा(4)दनभिभूतबुद्धिसत्त्वेन त्वया नरकतिर्यक्सम्भवं दुःखं सम्पश्यता देवमनुष्येषु पुनः पुनरुत्पद्यमानेन सुखदुःखयोः किमधिकमुपलब्धमिति, भगवन्तमावट्यं जैगीषव्य उवाच—दशसु महासर्गेषु भव्यत्वादनभिभूतबुद्धिसत्त्वेन मया नरकतिर्यग्भवं दुःखं संपश्यता देवमनुष्येषु पुनः पुनरुत्पद्यमानेन यत्किञ्चिदनुभूतं तत्सर्वं दुःखमेव प्रत्यवैमि) इत्यादिग्रन्थसन्दर्भेणेत्यर्थः,

आप्तश्रुतिरित्यत्राप्तपदस्य कृत्यमाह—"आप्तग्रहणेन च" इति, अयुक्ताः परिहृता भवन्तीत्यन्वयः,

के तेऽयुक्ता इत्यत्राह—"शाक्यभिक्षु" इत्यादिना,

---

(१) अ० १ पा० ३। सू० ३०

(२) पा० ३ सू० १८ ।

(३) लिङ्गशरीरमात्रविहार्यपि योगबलेन परीक्षार्थं निर्माणकायं धृत्वेत्यर्थः,

(४) भव्यत्वात्=कुशलत्वात्,

अयुक्तत्वं चैतेषां विगानाद् विच्छिन्नमूलत्वात्, प्रमाणविरुद्धार्थाभिधानाच्च कैश्चिदेव म्लेच्छादिभिः पुरुषापसदैः पशु-

---

पञ्चविंशतिबुद्धप्रभेदानामन्यतमो यः शाक्यसिंहाभिधानः शुद्धोदननृपतनयस्तन्मतानुयायिनो ये सौत्रान्तिकवैभाषिकयोगाचारमाध्यमिकाः "कृत्तिः कमण्डलुर्मौण्ड्यं चीरं पूर्वाह्णभोजनं, सङ्घो रक्ताम्बरत्वं च शिश्रिये बौद्धभिक्षुभिर्"–इत्युक्तवृत्तिमन्तो बौद्धसंन्यासिनस्ते शाक्यभिक्षव इत्यभिधीयन्ते,

निर्ग्रन्थकाः=ग्रन्थेभ्यो–वेदादिसच्छास्त्रेभ्यो निष्क्रान्ताः–त्रयीबाह्या नग्ना जैनविशेषाः,

संसारमोचकाः–(संसारमोचकादेश्च हिंसा पुण्यत्वसम्मता) इत्यभिहिता हिंसादिपरायणाः 'घटभङ्गे तदन्तर्वर्तिसलिलविलयवद् देहभङ्गे तदन्तर्गतजीवभङ्ग एव मोक्ष' इत्येवं ब्रुवाणाश्चार्वाकविशेषाः, आदिना देहाद्यात्मवादिनश्चार्वाकविशेषा ग्राह्याः,

कथमेतेषामागमाभासानामयुक्तत्वमित्याशङ्क्य "विगानाच्छिन्नमूलत्वात्कैश्चिदेव परिग्रहाद्" इति श्लोकवार्तिकोक्तं हेतुमाह–"अयुक्तत्वं चैतेषां विगानाद्" इति, वि=विरुद्धं गानं=शब्दनं, तस्मादित्यर्थः,

'कैश्चिदेव परिग्रहणं विप्रलिप्सुना बुद्धेनाऽऽगमः प्रणीत इति विरुद्धस्मरणं च विगानम्' इति न्यायरत्नाकरकारः,

तथाच "या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः, सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि तास्स्मृता" इत्यादिविगानदर्शनाद् बौद्धाद्यागमाभासा अयुक्ता इत्यत्र फलितम्,

सर्वास्तित्वविज्ञानमात्रास्तित्वादिपरस्परविरुद्धवदनमपि विगानमत्र ज्ञेयम् ।

---

(१) अस्योदन्तो ललितविस्तरे सविस्तर इति तत्रैवाधिकमालोच्यम्,

(२) कृत्तिः=मृगचर्मादिकम्, वृत्तिरिति पाठान्तरम् ।

(३) जैमिनीये० सू० ५ श्लो० ५ ।

(४) जै० सू० २ श्लो० १३२ ।

(५) मानवे अ० १२ । श्लो० ९५

(६) बाह्यवस्तुजातमध्यक्षगोचर इति सौत्रान्तिकः, आन्तरमेव वस्तु सद् बहिस्त्वनुमेयमिति वैभाषिकः, सर्वं विज्ञानमात्रमिति योगाचारः, शून्यतैव तत्त्वमिति माध्यमिक इत्येवं परस्परविगानं बोध्यमित्यर्थः,

जैमिनीयादिषड्दर्शनेष्वपि समानं विगानमित्याशङ्क्याह—"छिन्नमूलत्वाद्" इति, वेदमूलकत्वाभावादित्यर्थः,

नच सर्वज्ञसुगतप्रणीत आगम एव मूलमिति साम्प्रतं, सर्वज्ञस्मरणस्यासम्भवन्मूलत्वात्

तथाचाहुः कुमारिलस्वामिनः[2] ॥

सर्वज्ञोऽसाविति ह्येव तत्काले तु बुभुत्सुभिः,
तज्ज्ञानज्ञेयविज्ञानरहितैर्गम्यते कथम् ॥ १३४ ॥
कल्पनीयाश्च सर्वज्ञा भवेयुर्बहवस्तव,
य एव स्यादसर्वज्ञः स सर्वज्ञं न बुध्यते ॥ १३५ ॥
सर्वज्ञोऽनवबुद्धश्च येनैव स्यान्न तं प्रति,
तद्वाक्यानां प्रमाणत्वं मूलाज्ञानेऽन्यवाक्यवत् ॥ १३६ ॥
रागादिरहिते चास्मिन् निर्व्यापारे व्यवस्थिते,
देशनाऽन्यप्रणीतैव स्यादृते प्रत्यवेक्षणाद् ॥ १३७ ॥

छिन्नमूलतां विवृणोति—"सर्वज्ञ" इति, तज्ज्ञानज्ञेयं यत्सर्वं तद्विषयज्ञानरहितैर्नरैः कथं सर्वज्ञो ज्ञायतामतो न सर्वज्ञे कस्यचित्किंचित्प्रमाणं संभवतीति निर्मूलैव स्मृतिरिति, यदि त्वन्योपि कश्चित्सर्वज्ञ इष्यते बुद्धस्य सर्वज्ञत्वज्ञानार्थं नतस्तेनैव प्रकारेणान्यस्यान्यस्य कल्पनायां बहुसर्वज्ञापत्तिरित्याह—"कल्पनीयाश्च" इति, एवं सर्वज्ञो न केनचित्प्रमातुं शक्यते इत्युक्तम्, एवं च सम्यङ्मूलत्वाऽज्ञानात् तदागमस्यापि रथ्यापुरुषवाक्यवन्न प्रामाण्यं सिध्यतीत्याह—"सर्वज्ञ" इति, इतश्च तदागमस्याऽप्रामाण्यमित्याह—"रागादि" इति, लाभपूजाख्यातिरागनिमित्तं ह्यागमप्रणयनं स्वयूथ्यस्पर्द्धानिमित्तं वा प्रक्षीणरागादिदोषस्य बुद्धस्य न सम्भवति, निर्व्यापारश्चायं नासावर्थप्रतिपादनाय शब्दं समुच्चारयितुं शक्नोति, कथं, प्रत्यवेक्षणपर्यायस्य विकल्पस्याऽसम्भवाद्, अस्येदं साधनमनेन च शब्देनेदं प्रतिपादयितुं शक्यमिति यावन्न विकल्प्यते न तावद् वाक्यप्रणयनं संभवति न चायं विकल्पो निर्विकल्पकेन प्रत्यक्षेणाखिलं जगदध्यक्षयतो बुद्धस्यास्ति तस्मादन्येन केनचित्प्रणीतो देशनाधर्मोपदेश इत्यप्रामाण्यमिति) इत्येतदर्थ इति पार्थसारथिमिश्राः ।

(१) 'ईश्वराऽसिद्धेः' 'एतेन योगः प्रत्युक्त' इत्यादिकं विगानं तत्र तत्र स्फुटमेवेत्यर्थः,

(२) धर्मलक्षणाधिकरणे भट्टपादा इत्यर्थः,

प्रायैः परिग्रहाद् बोद्धव्यम् ।

तु-शब्देनानुमानाद् व्यवच्छिनत्ति,

एवं जैनाद्यागमानामपि छिन्नमूलत्वमवसेयम्,

अयुक्तत्वे हेत्वन्तरमाह—"प्रमाणविरुद्धार्थाभिधानाच्च" इति, प्रत्यभिज्ञाप्रमाणादिविरुद्धार्थक्षणिकत्वाद्यभिधानाच्चेत्यर्थः ।

यथाच बौद्धाद्यागमाभासानामयुक्तत्वं तथा "समुदाय उभयहेतुकेपि तदप्राप्तिर्"[1] इत्यादिब्रह्मसूत्रभाष्यादिषु निरीक्ष्यमिति,

महाजनापरिगृहीतत्वाच्चायुक्तत्वमित्याशयेन विगानं विवृणोति—"कैश्चिदेव म्लेच्छादिभिर्" इति,

'गोमांसखादको यस्तु विरुद्धं बहु भाषते, सर्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते' इति बौधायननिरुक्तम्लेच्छसमानैः, पुरुषेषु अपसदैः=नीचैर् अत एव पशुकल्पैरिति, एवंविधैः कैश्चिदेव परिग्रहादयुक्तत्वं बोद्धव्यम् इत्यर्थः,

यैः पशुदेशीयैर्यैर्यैर्हेतुभिर्बौद्धाद्यागमाः परिगृहीतास्ते त उदयनाचार्यैः कुसुमाञ्जलौ 'भूयस्तत्र कर्मलाघवमित्यलसाः, इतः पतितानामप्यनुप्रवेश इत्यनन्यगतिकाः, भक्ष्याद्यनियम इति रागिणः, स्वेच्छया परिग्रह इति कुतर्काभ्यासिन' इत्यादिना ग्रन्थसन्दर्भेण निरूपिता इति तत एवाधिकमालोकनीयम्,

ये किल शाक्या 'द्विविधं सम्यग् ज्ञानं प्रत्यक्षमनुमानं च' इत्येवं निरूपयन्त आगमप्रमाणमपलपन्ति ये चौलूक्या[3] अनुमाननिरूपणानन्तरम् "एतेन शाब्दं व्याख्यातम्"[4] इत्येवमनुमानान्तर्भूतमेवागमप्रमाणमिति मन्यन्ते तान् न्यक्कर्तुमाह 'तुशब्देन' इति, 'आप्तवचनन्तु' इति तुशब्देनेत्यर्थः, व्यवच्छिनत्ति=पृथक् करोति, आगमप्रमाणमिति शेषः,

---

(१) अ० २ पा० २ सू० १८

(२) द्वितीयस्तबके तृतीयकारिकायामिति शेषः,

(३) औलूक्याः=कणादाचार्य्याः,

(४) अ० ९ आ० २ सू० ३ । (शाब्दं=शब्दकरणकं ज्ञानमिदमिति यन्नैयायिकादीनामभिमतं तदपि एतेन=लैङ्गिकत्वेन-लिङ्गप्रभवत्वेनैव व्याख्यातं, यथा व्याप्तिपक्षधर्मताप्रतिसन्धानापेक्षं लैङ्गिकं तथा शाब्दमपीत्यर्थ,' इत्युपस्कारकारः शङ्करमिश्रः,

वाक्यार्थो हि प्रमेयो न तु तद्धर्मो वाक्यं येन तल्लिङ्गं भवेद्। नच वाक्यं वाक्यार्थं बोधयत्संबन्धग्रहणमपेक्षते, अभिनवकविविरचितस्य वाक्यस्याऽदृष्टपूर्वस्याऽननुभूतचरवाक्यार्थ-

---

कथमनुमानाद् व्यवच्छेद इत्यत्राह–"वाक्यार्थो हि" इति, । हिरवधारणे, इदं वाक्यं संसृष्टार्थज्ञापकम् आप्तवाक्यत्वाद् वाक्यान्तरवद् इत्येवं परस्परपदार्थसंसर्गरूपो वाक्यार्थ एव प्रमेयः=अनुमानेन मेयः, सचासम्भवी वाक्यत्वस्य लिङ्गत्वासम्भवादित्यर्थः,

कथं लिङ्गत्वासम्भव इत्यत्राह–"नतु तद्धर्मो वाक्यम्" इति, यथा प्रमेयवह्नेर्धर्मो धूमो न तथा तद्धर्मः=प्रमेयवाक्यार्थस्य धर्मो वाक्यं येन तस्य वाक्यार्थस्य लिङ्गं भवेदित्यर्थः,

एतच्च (पदानामेव पदार्थस्मरणावान्तरव्यापाराणां वाक्यार्थप्रमां प्रति करणतया प्रमाणत्वात् तेषां चापक्षधर्मतया लिङ्गत्वानुपपत्तेः) इत्यादिना तात्पर्यटीकायां 'कथं च पक्षधर्मत्वं शब्दस्येह निरूप्यते' इत्यादिना श्लोकवार्तिके च व्यक्तम् ।

ननु मेघोन्नत्यादिना वृष्ट्यादेरभेयत्वदर्शनान्न धर्मधर्मिणोरेव लिङ्गलिङ्गिभावनियमोऽपि तु ययोरव्यभिचरितसहचाररूपसंबन्धग्रहणं तयोर्लिङ्गलिङ्गिभावसमयः, तथा च यथा धूमधूमध्वजयोस्तादृक्[1]संबन्धग्रहणाल्लिङ्ग[2]-लिङ्गिभावस्तथा वाक्यवाक्यार्थयोरपि तादृक्संबन्धग्रहणात्कथं न तयोस्तद्भाव[3] इत्याशङ्कामपनेतुमाह–"न च वाक्यम्" इति,

यथा पर्वते वह्निं बोधयन् धूमः पूर्वं महानसादौ वह्निना सह स्वसंबन्धग्रहणमपेक्षते तथा वाक्यं स्वार्थं बोधयत् पूर्वकालिकसंबन्धग्रहणं नचापेक्षत इत्यर्थः ।

तथाचाहुः शालिकनाथमिश्राः[4] (नह्यत्र गम्येनार्थेन गमकशब्दस्य संबन्धनियमोवगतो, नापि गम्यस्यार्थस्य किञ्चित्प्रत्येकदेशत्वं, नापि च गमकस्येति सामग्रीभेदादनुमानाशङ्कापि नास्ति) इति,

उक्तार्थे[5] हेतुमाह–"अभिनव"इत्यादिना, यस्य वाक्यस्य पूर्वं स्वार्थेन सह

---

(१) धूमध्वजः=वह्निः,

(२) अव्यभिचरितसहचाररूपसंबन्धग्रहणाद्,

(३) तयोः=वाक्यवाक्यार्थयोः, तद्भावः=लिङ्गलिङ्गिभावः,

(४) प्रकरणपञ्चिकायां प्रमाणपारायणे पञ्चमे प्रकरण इति शेषः ।

(५) उक्तार्थे=संबन्धनियममन्तरेव वाक्यस्य स्वार्थबोधकत्वमित्यर्थे इत्यर्थः,

बोधकत्वादिति ।

एवं प्रमाणसामान्यलक्षणेषु तद्विशेषलक्षणेषु च सत्सु—यानि प्रमाणान्तराण्युपमानादीनि प्रतिवादिभिरभ्युपेयन्ते तान्युक्तलक्षणेष्वेव प्रमाणेष्वन्तर्भवन्ति,

तथाहि—उपमानं तावद् यथा गौस्तथा गवय इति वाक्यं तज्जनिता धीरागम एव ।

संबन्धो न गृहीतस्तथाविधस्याभिनवस्य=नूतनोच्चरितवाक्यस्यात एवाऽदृष्टपूर्वस्य=पूर्वमश्रुतस्य=पूर्वमननुभूतनूतनवाक्यार्थबोधकत्वदर्शनादित्यर्थः,

शब्दादमुमर्थं प्रत्येमीतिविलक्षणानुभवबलाद् आकाङ्क्षायोग्यतादिसामग्रीवैलक्षण्याच्च नागमस्यानुमानविधया प्रामाण्यमित्यन्यत्र विस्तरः ।

प्रमाणसामान्यतद्विशेषनिर्वचननिरूपणप्रकरणमुपसंहरन् 'सर्वप्रमाणसिद्धत्वाद्' इत्यत्राभिहितं प्रमाणत्रयेऽन्यप्रमाणान्तर्भावं स्मारयति="एवम्" इत्यादिना ।

कथमन्तर्भाव इत्यत्राह—"तथाहि" इति, यथान्तर्भावस्तथा प्रदर्शयामीत्यर्थः,

तत्र ये किलान्वीक्षिकीकुशलाः 'प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानम्' इत्यक्षपादीयसूत्रानुसारिणः (कीदृशो गवय इति नागरिकेण पृष्ट आरण्यकः प्रसिद्धेन गवा साधर्म्यादप्रसिद्धं गवयं येन वाक्येन बोधयति यथा गौरेवं गवय इति तद् वाक्यमुपमानम्) इत्येवमुपमानं वर्णयन्ति तान् प्रत्याह—"उपमानं तावद्" इति, यथा गौस्तथा गवय इति यद् वाक्यं तज्जन्यं यद् वाक्यार्थज्ञानं तदागमप्रमाणमेवेत्यर्थः,

---

(१) पूर्वं दृष्ट इति दृष्टपूर्वः, भूतपूर्ववत्समासः, तथा न भवतीत्यदृष्टपूर्वः, वाक्यस्येति विशेष्यबलेन दर्शनमत्र श्रावणज्ञानमित्याशयेनाह—"अश्रुतपूर्वस्य" इति, 'अदृष्टपूर्वाननुभूतचर' इति पाठे तु 'अदृष्टपूर्व' इत्यस्य 'अननुभूतचर' इति व्याख्यानं ज्ञेयं, हेतुहेतुमद्भावेन वा नेयम् ।

(२) अन्यत्र='अननुभूतचरे स्मरणायोगाद्' इत्यादिना कुसुमाञ्जलिग्रन्थे इत्यर्थः,

(३) न्या० सू० ५ ।

(४) साङ्ख्यनये चित्तवृत्तेरेव प्रमाणत्वाद् वाक्यजन्यं ज्ञानमेवागमप्रमाणं नतु वाक्यमात्रमित्यर्थः,

योऽप्ययं गवयशब्दो गोसदृशस्य वाचक इति प्रत्ययः सोऽप्यनुमानमेव,

यो हि शब्दो यत्र वृद्धैः प्रयुज्यते सोऽसति वृत्त्यन्तरे तस्य वाचकः यथा गोशब्दो गोत्वस्य, प्रयुज्यते चैष गवयशब्दो गो-सदृश इति तस्यैव वाचक, इति तज्ज्ञानमनुमानमेव ।

तथाचागमान्तर्भावान्नोपमानं पृथक् प्रमाणमित्यत्र फलितम् ।

तथाचाहुः प्रशस्तपादाचार्याः–(आप्तेनाप्रसिद्धगवयस्य गवा गवयप्रति-पादनादुपमानमाप्तवचनमेव) इति,

कुमारिलस्वामिनश्च–(पुरुषप्रत्ययेनैव तत्रार्थः सम्प्रतीयते, तदीयवचन-त्वेन तस्मादागम एव स) इति,

ये च तार्किकयूथ्याः (समाख्यासंबन्धप्रतिपत्तिरुपमानार्थ) इति न्याय-वार्तिकमनुसरन्तः (यथा गौस्तथा गवय इति श्रुतातिदेशवचनस्य ग्रामी-णस्य कानने गोसमानं पिण्डमालोकमानस्य नूनमयमसौ गवयपदाभिधेयो यः पुरारण्यकेन गोसदृशो गवय इत्युपदिष्ट इति या प्रमितिरुपजायते तत्कर-णमुपमानम्) इत्येवमुपमानकृत्यं निरूपयन्ति तान् शिथिलयितुमाह–"यो-ऽप्ययम्" इति,

योपि गवयशब्दो गोसदृशस्य वाचक इत्ययं प्रत्ययः सोपि (गवयपदं गोसदृशपिण्डवाचकं लक्षणागुणवृत्त्योरसद्भावे सति वृद्धैस्तत्र प्रयुज्यमान-त्वाद् गोत्वे प्रयुज्यमानगोपदवद्) इत्यनुमानप्रयोगसाध्यत्वादनुमानमे-वेत्यर्थः,

सञ्ज्ञासञ्ज्ञिसंबन्धज्ञानरूपोपमानफलस्यानुमानेनैव निष्पन्नत्वान्न तदर्थं पृथगुपमानं मानान्तरमुपेयमिति भावः,

उपमानफलस्यानुमानसाध्यत्वं स्पष्टयितुमुक्तानुमानप्रयोगसामग्रीमाह–"यो हि शब्द" इति, एतेन व्याप्तिस्वरूपोपदर्शनमुखेन (असति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वाद्" इति हेतुस्वरूपमत्रोपदर्शितमिति ज्ञेयम्,

गङ्गायां घोषः प्रतिवसति–सिंहोयं बलवर्मा इत्यादिषु यथाक्रमं लक्षणया गुणवृत्त्या चावाच्येष्वपि तीरादिषु प्रयुज्यमानैर्गङ्गादिपदैर्व्यभिचारपरिहाराय

---

(१) अविदितगवयस्य नागरिकस्य पुरुषस्येत्यर्थः,

(२) सञ्ज्ञासञ्ज्ञिसंबन्धज्ञानमुपमानफलमिति वार्तिकार्थः,

यत्तु गवयस्य चक्षुःसन्निकृष्टस्य गोसादृश्यज्ञानं तत्प्रत्यक्षमेव,

---

'असनिवृत्त्यन्तर' इति हेतुविशेषं--, नच लक्षणया तथाप्रयोग इति विशेषणासिद्धो हेतुरिति शङ्क्यम्, आरण्यकानां तथाप्रयोगाभावप्रसङ्गाल्लक्षणाया अनङ्गीकाराद्,

अयं भावः--गोसादृश्यवाचकस्य सतः तदविनाभूते गवयत्वे लक्षणया गवयशब्दस्य प्रयोग इति हि शङ्कितुरभिमतं तच्चासम्भवि, अदृष्टगोव्यक्तीनामरण्यैकनिकेतनानां गोसादृश्यानधिगमे गवयपदाप्रयोगप्रसङ्गादिति,

एवं हेतुमुपदर्श्योदाहरणमाह--"यथा गोशब्दो गोत्वस्य" इति,

उपनयमाह--"प्रयुज्यते चैव गोशब्दो गोसदृशे" इति, निगमनमाह--"इति तस्यैव वाचक" इति, इति--शब्दः तस्मादित्यर्थकः,

उपसंहरति "इति तज्ज्ञानम्" इति, इति=इत्येवं तज्ज्ञानं=सञ्ज्ञासञ्ज्ञिसंबन्धज्ञानम् अनुमानम्=अनुमानफलमेवेत्यर्थः,

एतेन (संबन्धस्य परिच्छेदः सञ्ज्ञया सञ्ज्ञिना सह, प्रत्यक्षादेरसाध्यत्वादुपमानफलं विदुः' इत्युदयनाचार्योक्तमपि पराकृतं वेदितव्यम्, अनुमानसाध्यत्वसम्भवेन 'प्रत्यक्षादेरसाध्यत्वाद्' इत्युक्तेरसाङ्गत्यात्,

ये च पूर्वमीमांसकाः 'उपमानमपि सादृश्यमसन्निकृष्टार्थे बुद्धिमुत्पादयति यथा गवयदर्शनं गोस्मरणस्य' इति शाबरभाष्यानुयायिनः (नगरानुभूतचरगोपिण्डस्य नरस्यारण्यं प्राप्तस्य तत्र साक्षाद्गवयमीक्षमाणस्य प्रत्यक्षदृष्टगवयसादृश्यविशिष्टासन्निकृष्टगोपिण्डग्रहणरूपं यदनेन सदृशी मदीया गौरिति ज्ञानं तदुपमानम्) एत्येवं मन्यन्ते तेषाम्मतोत्थानपार्थीकर्तुमाह--"यत्तु गवयस्य" इत्यादि,

गवयनिष्ठं गोसादृश्यज्ञानमुपमानं, गोनिष्ठं च गवयसादृश्यज्ञानमुपमानफलमिति हि मीमांसकाभिमतं, तत्र यद् गवयनिष्ठं गोसादृश्यज्ञानं तत्प्रत्यक्षज्ञानमेव न प्रमाणान्तरमित्यर्थः,

---

(१) गोसदृशे गवयपदप्रयोग इत्यर्थः,

(२) न्यायकुसुमाञ्जलौ तृतीयस्तबके दशमश्लोकोयमिति ज्ञेयम्,

(३) (यत्सादृश्यं दृश्यमानमसन्निकृष्टार्थे बुद्धिमुत्पादयति तदुपमानं=प्रमेयबुद्धिजनकमेव सादृश्यमिन्द्रियप्रत्यक्षमुपमानं, यथा गवयदर्शनं=सादृश्यविशिष्टगवयदर्शनं गोस्मरणस्य जनकम्' इति भाष्यार्थ इति न्यायरत्नाकरकारः ।

(४) प्रत्यक्षेण दृष्टो यो गवयस्तत्सादृश्यविशिष्टतयाऽसन्निकृष्टस्य नगरगतगोपिण्डस्य यद् ग्रहणं तदुपमानमित्यर्थः,

अत एव स्मर्यमाणायां गवि गवयसादृश्यज्ञानं प्रत्यक्षं,

न ह्यन्यद् गवि सादृश्यमन्यच्च गवये, भूयोऽवयवसामान्य-योगो हि जात्यन्तरवर्ती जात्यन्तरे सादृश्यमुच्यते, सामान्ययोगश्चैकः, स चेद् गवये प्रत्यक्षो गव्यपि तथा,

---

तत्र हेतुगर्भितं विशेषणमाह–"चक्षुःसन्निकृष्टस्य" इति,

यथा चक्षुःसन्निकृष्टायां गवि तन्निष्ठं गोत्वमध्यक्षीभवति तथा चक्षुस्सन्निकृष्टे गवये तन्निष्ठं सादृश्यमपि प्रत्यक्षमेवेत्यर्थः ।

(सामान्यवच्च सादृश्यमेकैकत्र समाप्यते, प्रतियोगिन्यदृष्टेपि यस्मात् तदुपलभ्यते) इति भट्टपादोक्तेः सादृश्यं हि सामान्यवत् प्रत्येकव्यक्तिसमाप्तं न संयोगवदुभयत्र व्यासज्य वर्तते तेन प्रतियोगिनो गोपिण्डस्यादर्शनेपि भवति गवयव्यक्तौ गोसदृशोयमिति प्रत्यक्षप्रतीतिरिति भावः,

नन्वस्तु गवयनिष्ठं गोप्रतियोगिकसादृश्यज्ञानमध्यक्षं तथापि गोनिष्ठगवयसादृश्यज्ञानरूपं यदुपमानफलं तत्केन साध्यमित्याशङ्कायामाह–"अत एव" इति,

अतएव=वक्ष्यमाणहेतोरेव, यथा गवयगतं सादृश्यमध्यक्षं तथा स्मृत्यारूढायां गवि गतं सादृश्यमपि प्रत्यक्षमेवेत्यर्थः,

चक्षुःसन्निकर्षाभावेन कथं गोगतं सादृश्यं प्रत्यक्षमित्याशङ्क्य अतएव इत्यभिहितं हेतुमाह–"नह्यन्यद्" इति, हि=यतो गव्यन्यादृशं सादृश्यं गवये चान्यादृशं सादृश्यमिति नास्त्यत उभयोरेकत्वेन तदपि प्रत्यक्षमेवेत्यर्थः,

कथमुभयोरैक्यमित्यत्राह–"भूयोऽवयवसामान्ययोगो हि" इति,

(सादृश्यस्य च वस्तुत्वं न शक्यमपबाधितुं, भूयोऽवयवसामान्ययोगो जात्यन्तरस्य तद्) इति कुमारिलस्वाम्युक्तेर्गवयसकाशाज्जात्यन्तरे गोपदार्थे

---

(१) पञ्चमसूत्र उपमानपरिच्छेदे ३५ श्लो०, प्रतियोगिनि गव्यदृष्टे कथं गवयगतं सादृश्यं प्रत्यक्षमित्याशङ्कायामिदमभिहितमिति ज्ञेयम्,

(२) श्लो० १८। 'गवयात्सकाशाज् जात्यन्तरस्य गोपदार्थस्य यो गवयगतभूयोऽवयवसामान्यैर्योगस्तत्सादृश्यम्, अतः सादृश्यस्य वस्तुत्वमपबाधितुमशक्यमिति भट्टोक्तेरर्थः, सादृश्यस्य पदार्थान्तरत्वाभावेपि सामान्यपदार्थेऽन्तर्भावाङ्गीकारात् तस्य वस्तुत्वमभ्युपेयमिति भावः' ।

इति नोपमानस्य प्रमेयान्तरमस्ति यत्र प्रमाणान्तरमुपमानं भवेद्, इति न प्रमाणान्तरमुपमानम् ।

एवमर्थापत्तिरपि न प्रमाणान्तरम्,

तथाहि-जीवतश्चैत्रस्य गृहाभावदर्शनेन बहिर्भावस्याऽदृ-

वर्तमानो यो भूयोऽवयवसामान्ययोगः=भूयसामवयवानां यानि सामान्यानि-खुरत्वलाङ्गूलत्वादीनि तेषां यः संबन्धस्तदेव जात्यन्तरे गवये सादृश्यमुच्यते, स च भूयोवयवसामान्ययोगो गोत्वादिवदेकः स चेद् गवये साक्षात्कृतस्तर्हि गव्यपि साक्षात्कृत एवेत्यर्थः,

द्रव्यादिचतुष्टयपदार्थवादिभट्टनये सादृश्यस्य सामान्यपदार्थविशेषरूपत्वेन गोत्वादिवदाश्रयग्रहणेनैव गृह्यमाणत्वात्पूर्वं गृहीतमेव गवि सादृश्यं पुनः परामृश्यते, तत्रतावान् विशेषः-पूर्वमनेन सदृशी मदीया गौरिति प्रतियोगिवैशिष्ट्यव्यतिरेकेण गोत्ववन्निर्विकल्पेन सादृश्यमाकलितं पुनर्गवयरूपप्रतियोगिदर्शने तु सविकल्पकेन तत्प्रत्यभिज्ञायते, तत किमपरमवशिष्यते यत्रोपमानमिष्येतेत्याशयेनाह-"इति नोपमानस्य" इति, इति=इत्येवं प्रत्यक्षसिद्धे सादृश्यज्ञाने,

सामान्यपदार्थादतिरिक्तं सादृश्यमिति प्रभाकरमते तु गोगतसादृश्यज्ञानं स्मरणरूपं बोध्यमिति तत्त्वम्,

यदपि (प्रत्यक्षेणावबुद्धेऽपि सादृश्ये गवि च स्मृते, विशिष्टस्यान्यतोऽसिद्धेरुपमानप्रमाणता) इति भट्टपादैः स्मर्यमाणैव गौर्गवयसादृश्यविशिष्टा, तद्विशिष्टं वा सादृश्यमुपमानस्य प्रमेयम् इत्येवमुपमानकृत्यं दर्शितं तदपि (सा गौर्गवयसदृशी गोत्वाद् गवयेन सहोपलभ्यमानगवान्तरवद्) इत्याद्यनुमानेन निष्पादितत्वान्नोपमानकृत्यमित्यन्यत्र विस्तरः,

एवमुपमानं यथायथं प्रत्यक्षादिष्वन्तर्भाव्यार्थापत्तिमनुमानेऽन्तर्भावयितुमुपक्रमते-"एवमर्थापत्तिरपि न प्रमाणान्तरम्" इति,

तत्र शबरस्वामिप्रदर्शितमर्थापत्तिस्वरूपमाह-"जीवत" इत्यादिना ।

---

(१) श्लो० ३८।

(२) तत्त्वप्रदीपिकायां द्वितीयपरिच्छेदे ३० इति कारिकायां, कुसुमाञ्जलितृतीयस्तबके ९ इति कारिकायां चेत्यर्थः,

दृष्टस्य कल्पनमर्थापत्तिरभिमता वृद्धानां, साऽप्यनुमानमेव।

शतवर्षजीवी चैत्र इति दैवज्ञवाक्यात्संप्रतिपन्नजीवनस्य चैत्रस्य गृहासत्त्वदर्शनेनादृष्टस्य बहिर्भावस्य कल्पनारूपा याऽर्थापत्तिर्वृद्धानां=मीमांसाभाष्यकाराणामभिमता साप्यनुमानमेवेत्यर्थः,

अयं भावः—उपपाद्यज्ञानप्रभवमुपपादकज्ञानमर्थापत्तिः, तत्र योऽर्थोऽन्येन केनचित्कल्पनीयेन विना नोपपद्यते सोऽर्थ उपपाद्य इति, यस्य च कल्पनीयार्थस्याभावे सत्युपपाद्यं नोपपद्यते स कल्पनीयोऽर्थ उपपादक इति, तत्रोपपाद्यज्ञानं करणतयाऽर्थापत्तिप्रमाणम्, उपपादकज्ञानं च फलतयाऽर्थापत्तिप्रमा, सा चार्थापत्तिर् (अर्थापत्तिरपि यत्र दृष्टः श्रुतो वार्थोऽन्यथा नोपपद्यत इत्यर्थकल्पना) इति शाबरभाष्याद् द्विविधा, एका "प्रमाणषट्कविज्ञातो यत्रार्थो नान्यथा भवेद्, अदृष्टं कल्पयेदन्यं सार्थापत्तिरुदाहृता" इति लक्षिता दृष्टार्थापत्तिर्, अपरा च "पीनो दिवा न भुङ्क्ते चेत्येवमादिवचःश्रुतौ, रात्रिभोजनविज्ञानं श्रुतार्थापत्तिरुच्यते", इति लक्षिता श्रुतार्थापत्तिः, दृष्टशब्दस्य प्रत्यक्षाद्यवगतयावत्प्रमितमात्रपरत्वेपि गोबलीवर्दन्यायेन दृष्टाद् भेदेन श्रुतोपादानाद् आगमप्रमाणावगतश्रुतातिरिक्तप्रमाणपञ्चकप्रमितपरत्वेन दृष्टशब्दो नेयः, तथाच प्रमाणपञ्चकपूर्विका दृष्टार्थापत्तिः

(१) दैवज्ञः -ज्योतिश्शास्त्रवेत्ता,

(२) योऽर्थः—गृहासत्त्वरूपोर्थः—येनान्येन =बहिःसत्त्वरूपेण कल्पनीयार्थेन विना नोपपद्यते स गृहासत्त्वरूपोऽर्थ उपपाद्य इत्युच्यते, यस्य च बहिस्सत्त्वरूपस्य कल्पनीयार्थस्याभावे सति उपपाद्यं=गृहासत्त्वं नोपपद्यते स च बहिस्सत्वरूपोर्थ उपपादक इत्युच्यत इत्यर्थः,

(३) अर्थस्य=बहिस्सद्भावस्य आपत्तिः-कल्पना यस्मादिति समासेनार्थापत्तिशब्द उपपाद्यज्ञानरूपकरणपरत्वेन प्रमाणवाची, अर्थस्यापत्तिरिति समासेन चोपपादकज्ञानरूपार्थापत्तिप्रमितिपर इति भावः,

(४) श्लोकवार्तिकेऽर्थापत्तिपरिच्छेदे प्रथमः श्लोकोयम्,

(५) श्लो० ५१

(६) एतेन यद् वेदान्तपरिभाषायां जैमिनीयमतेन बहिस्सत्त्वकल्पनस्य श्रुतार्थापत्तित्वाभिधानं तदुपेक्ष्यमिति ज्ञेयम्,

(७) ननु पूर्वोक्तवार्तिकाद् दृष्टशब्दस्य प्रमाणषट्कविज्ञातार्थपरत्वे सति शब्दप्रमाणावगतश्रुतस्यापि दृष्टान्तर्भावसम्भवात्कथं दृष्टात्पृथक् श्रुतोपादानमित्याशङ्कायामाह—"दृष्टशब्दस्य" इति,

यदा खलु सन्नेकत्र नास्ति तदाऽन्यत्रास्ति, यदाऽव्यापक एकत्रास्ति तदान्यत्र नास्तीति सुकरः स्वशरीरे व्याप्तिग्रहः,

---

पञ्चविधा, आगमप्रमाणपूर्विका च श्रुतार्थापत्तिरेकविधेत्येवं षड्विधाऽर्थापत्तिरित्यायातं, तत्रानुपलब्धिप्रमाणपूर्विका या (जीवतश्चैत्रस्य गृहाभावदर्शनेन बहिर्भावस्यादृष्टस्य कल्पना) इत्येवंरूपा दृष्टार्थापत्तिश्शबरस्वामिनोदाहृता साऽनुमानमेवेति,

एतदुक्तं भवति–यदा किल देवदत्तो ग्रामाद्बहिरेव जीवन्नस्ति कचिच्चैत्र इत्याप्तवाक्यादनिर्धारितदेशविशेषनिष्ठतया चैत्रसत्त्वमवगत्य पुनश्च ग्रामं प्रविश्य गृहं चागत्य गृहान्तश्च तस्य जीवतोऽभावमवलोकयति तदा बहिरवस्थानं विनाऽनुपपद्यमानगृहाभावज्ञानात् तदुपपादकबहिरवस्थानज्ञानं तस्य जायत इति यदर्थापत्तिफलत्वेनाभिमतं बहिस्सत्त्वज्ञानं तदनुमानफलमेवेति,

अनुमानप्रयोगश्च (चैत्रो बहिरस्ति जीवनवत्त्वे सति गृहासत्त्वाद् अहमिव) इत्याकारो बोध्यः,

एतस्मिन्ननुमाने 'यदा जीवनो गृहासत्त्वं तदा बहिस्सत्त्वम्' इत्यन्वयव्याप्तिं 'यदा तु बहिस्सत्त्वासत्त्वं तदा जीवनो गृहसत्त्वम्' इति व्यतिरेकव्याप्तिं च दर्शयितुं दृष्टान्ते व्याप्तिग्रहप्रकारमाह–"यदा खलु सन्नेकत्र" इति,

सन्=विद्यमानः–जीवन् मच्छरीरो यदा एकत्र=गृहे नास्ति तदाऽन्यत्र=बहिरस्तीत्यर्थः, मृते व्यभिचारपरिहाराय जीवन्नित्यर्थवाची सन्निति, एतेन यदाहं नेह तदान्यत्रेत्यन्वयव्याप्तिर्दर्शिता,

व्यतिरेकव्याप्तिमाह–"यदाऽव्यापक एकत्र" इति। "नियम्यत्वनियन्तृत्वे भावयोर्यादृशीमते, विपरीते प्रतीयेते त एव तदभावयोः" इत्युक्तेरन्वये जीविगृहासत्त्वं व्याप्यं बहिस्सत्त्वं च व्यापकं, व्यतिरेके तु बहिरसत्त्वं व्याप्यं गृहसत्त्वं च व्यापकमिति सिद्धान्तबलादत्र यत्तदोर्विभिद्य संबन्धः कार्यः, तथा च यदाऽन्यत्र=बहिर् नास्ति तदा एकत्र=गृहेऽस्तीत्येवं योजनयात्र व्यतिरेकव्याप्तिर्ज्ञेया,

---

(१) 'यदा खल्वव्यापक' इति पाठः सर्वत्रोपलभ्यमानोपि तात्पर्य्यटीकानुरोधादसंबद्धत्वाच्चात्रोपेक्षित इति ज्ञेयम्,

(२) प्रत्यक्षावगता दाहक्रिया दहनशक्तिमन्तरानुपपन्ना सती वह्नौ दहनशक्तिं कल्पयति, अनुमानावगतं चादित्यगमनं गमनशक्तियोग्यतां विनाऽनुपपन्नं सदादित्ये गमनशक्तियोग्यतां कल्पयति, इत्यादिकानि प्रत्यक्षादिपूर्विकाणामर्थापत्तीनामुदाहरणानि श्लोकवार्तिके ज्ञेयानि,

तथाच सतो गृहाभावदर्शनेन लिङ्गेन बहिर्भावदर्शनमनुमानमेव,

नच चैत्रस्य क्वचित्सत्त्वेन गृहाभावः शक्योऽपह्नोतुं यतोऽसिद्धो गृहाभावो बहिर्भावे न हेतुस्स्याद् ।

नच गृहाभावेन वा सत्त्वमपह्नूयते । येन सत्त्वमेवानुपपद्यमानमात्मानं न बहिरवस्थापयेत् ।

'अव्यापक' इति तु यथाश्रुतपाठमादायार्थकरणपक्षे गगने व्यभिचारापहारायेति बोध्यं, गगनं ह्येकत्र विद्यमानमपि नान्यत्राविद्यमानं भवतीति ।

व्याप्तिं प्रदर्श्य हेतुस्वरूपं दर्शयन् बहिर्भावानुमितिमाह—"तथा च सत" इति, तथाच=अनन्तरोक्तेन प्रकारेण व्याप्तिग्रहे सिद्धे सति सतः=जीवतश्चैत्रस्य गृहाभावज्ञानरूपेण लिङ्गेन=जीविते सति गृहासत्त्वादिति हेतुना बहिर्भावदर्शनमनुमानमेव=अनुमानसाध्यमेवेत्यर्थः, लिङ्गजमुख्या बौद्धप्रमैव वात्रानुमानम्[1] ।

पूर्वोक्तानुमाने हेतौ पक्षधर्मतां दर्शयितुं स्वरूपासिद्धिं[2] वारयति—"नच चैत्रस्य" इति, । चैत्ररूपे पक्षे वर्तमानो यो गृहाभावरूपो हेतुः स चैत्रस्य क्वचित्सत्त्वेनापह्नोतुम्=अपनेतुं न शक्यो येनासिद्धः=स्वरूपासिद्धः सन् गृहाभावो बहिर्भावे हेतुर्न स्यादित्यर्थः,

सिद्ध एव गृहाभाव इति न हेतोः पक्षवृत्तित्वाभाव इति भावः ।

साध्यासिद्धिं वारयति,—"नच गृहाभावेन" इति । सत्त्वं=बहिरस्तीति साध्यैकदेशश्चैत्रसद्भावोऽपि न गृहाभावेनापह्नूयते येन[3] सत्त्वमेवानिष्पन्नं सत् स्वात्मानं बहिर्देशे नावस्थापयितुं शक्नुयादित्यर्थः, बहिस्सत्त्वरूपसाध्यसम्भवान्न साध्याप्रसिद्धिरिति भावः ।

क्वचित्सत्त्वेन गृहासत्त्वमपनेतुमशक्यं, गृहासत्त्वेन च क्वचित्सत्त्वमपनेतुम-

---

(१) गृहासत्त्वज्ञानस्यैव बहिस्सत्त्वज्ञानरूपानुमितिकरणत्वेनानुमानपदाभिधेयत्वात्कथं बहिर्भावदर्शनरूपाया अनुमितेरत्रानुमानाभिधानमित्यत्राह—"अनुमानसाध्यम" इति, साङ्ख्यमतेनाह—"बौद्धप्रमैव वा" इति,

(२) पक्षे हेत्वभावः स्वरूपासिद्धिः,

(३) येन=गृहासत्त्वापनयनरूपेण कारणेन,

(४) येन=सत्त्वापनयनरूपेण कारणेन,

तथाहि—चैत्रस्य गृहासत्त्वेन सत्त्वमात्रं विरुध्यते, गृहसत्त्वं वा, न तावद् यत्र क्वचन सत्त्वस्यास्ति विरोधो गृहासत्त्वेन, भिन्नविषयत्वाद् ।

देशसामान्येन गृहविशेषाक्षेपोपि पाक्षिक इति समानविषयतया विरोध इति चेद्, न, प्रमाणविनिश्चितस्य गृहेऽसत्त्वस्य पाक्षिकतया सांशयिकेन गृहसत्त्वेन प्रतिक्षेपायोगाद्,

---

शक्यं विरोधाभावादित्यभिहितं विरोधाभावमेव स्पष्टयितुं द्वेधा विकल्पयति—"तथाहि चैत्रस्य" इति । सत्त्वमात्रं=यत्र क्वचन सत्त्वमित्यर्थः,

आद्यं विकल्पं निराकरोति "न तावद्" इति ।

गृहासत्त्वेन सह यत्र क्वचन सत्त्वस्य विरोधो नास्तीत्युक्तौ हेतुमाह—"भिन्नविषयत्वाद्" इति ।

असत्त्वस्य गृहात्मकप्रदेशो विषयः, सत्त्वस्य च बाह्यप्रदेशो विषय इत्येवं समानविषयत्वाभावान्न विरोध इत्यर्थः,

विरोधमापादयितुमुभयोरेकविषयत्वसंपत्तये यतमानो मीमांसकः शङ्कते—"देशसामान्येन" इति,

जीवी चैत्रः कश्चिद्गृहे नास्तीत्याप्तवाक्यादाक्षिप्यमाणेन सत्त्वस्याश्रयीभूतेन देशसामान्येन तन्मध्यवर्तिना गेहरूपदेशविशेषस्याऽऽक्षेपः=अर्थाल्लाभोऽपि पाक्षिकः=पक्षे प्राप्त इति=अत उभयोः सत्त्वासत्त्वयोः समानविषयतया विरोध इति शङ्कार्थः ।

एवं यथाकथञ्चिद् विरोधापादनेऽपि नाक्षिप्तेन गृहसत्त्वेन प्रमितस्य गृहासत्त्वस्य प्रतिक्षेपोऽपि तु प्रमितगृहासत्त्वेनाप्रमितगृहसत्त्वस्यैवेत्याशयेन समाधत्ते "न प्रमाणविनिश्चितस्य" इति,

अनुपलब्धिप्रमाणेन प्रत्यक्षप्रमाणेन वा निश्चितस्य गृहेऽसत्त्वस्य गृहसत्त्वेन प्रतिक्षेपायोगाद्=प्रतिरोधस्यायुक्तत्वादिति संबन्धः,

---

(१) उभयोः=गृहासत्त्वक्वचित्सत्त्वयोः,

(२) आक्षिप्यमाणेन=लभ्यमानेन,

(३) देशसामान्यान्तःपातिनः,

(४) भाट्टवेदान्तिनोर्मतेऽनुपलब्धिप्रमाणेन, साङ्ख्यादिनये तु प्रत्यक्षप्रमाणेनेति विभागः,

नापि प्रमाणविनिश्चितो गृहाभावः पाक्षिकमस्य गृहसत्त्वं प्रतिक्षिपन् सत्त्वमपि प्रतिक्षेप्तुं सांशयिकत्वं च व्यपनेतुमर्हतीति युक्तं,

गृहासत्त्वस्य प्रतिक्षेप्यत्वाभावे 'प्रमाणविनिश्चितस्य' इति हेतुगर्भं विशेषणमुक्त्वा गृहसत्त्वस्य प्रतिक्षेपकत्वाभावेपि हेतुगर्भं विशेषणमाह–"पाक्षिकतया सांशयिकेन" इति, संभावनामात्रेण पक्षे प्राप्ततया संशयमापन्नेन[१]–सन्दिग्धेन—अनिश्चितेनेति यावद्,

प्रमिताप्रमितयोरेकत्र सन्निपाते प्रमितेनाप्रमितस्यैव प्रतिक्षेपो युक्तो नाप्रमितेन प्रमितस्येति भावः ।

यथा प्रमितं गेहासत्त्वं गृहसत्त्वं प्रतिक्षिपति तथा सत्त्वमात्रमपि प्रतिक्षिपेदित्याशङ्कामपनयति–"नापि प्रमाणविनिश्चित" इति,

प्रमाणेन निर्णीतो गृहाभावोऽस्य=चैत्रस्य पाक्षिकं गृहसत्त्वं प्रतिक्षिपन्=प्रतिरुन्धानः सन् सत्त्वं=सत्त्वमात्रमपि प्रतिक्षेप्तुं=निराकर्तुमर्हति तथा गृहसत्त्वस्य सांशयिकत्वं च व्यपनेतुं=दूरीकर्तुमर्हतीति न युक्तमित्यर्थः ।

ननु 'गृहसत्त्वं प्रक्षिपन्' इत्येवं पूर्वं प्रमितेन गृहासत्त्वेन गृहसत्त्वस्य प्रतिक्षेपमङ्गीकृत्य पुनः कथं तद्विपरीतं 'सांशयिकत्वं चापनेतुमर्हतीति न युक्तम्'[२] इत्येवं गृहसत्त्वस्य सांशयिकतास्वीकरणं, न हि यस्य बाधस्तस्य सांशयिकत्वं कुत्रचित्संप्रतिपन्नं. किञ्च गृहसत्त्वस्य सन्दिग्धत्वे स्थाणुर्वा पुरुषो वा इतीव चैत्रस्य गृहसत्त्वं वा गृहासत्त्वं वा इति संशयशरीरो वाच्यः. तथा च गृहसत्त्वमिव गृहासत्त्वमपि संशयविषयीभूतमापद्येत, तच्चासाम्प्रतं, न हि यद् यत्र विशेषतः प्रमितं तस्य तत्रैव विपरीतप्रमाणविषयत्वरूपः संशयः समुदेतुं प्रभवति[३], न खलु स्थाणुत्वनिर्णये सति स्थाणुर्वा पुरुषो वेत्येवं संशयाना जनास्समुपलभ्यन्त इति चेद् न, गृहसत्त्वस्य सांशयिकत्वास्वीकारेण त्वदुक्तशङ्काया एवानुत्थानाद्,

(१) 'संशयमापन्नः' ५।१।७३ इति सूत्रेण ठञि सांशयिक इति प्रयोगनिष्पत्तिः, सामान्यतोऽवगतं गृहसत्त्वं विशेषतोऽवगतगृहासत्त्वेन बाध्यं न वेति संशयाक्रान्तेन गृहसत्त्वेनेत्यर्थः,

(२) नच सांशयिकत्वं चापनेतुमर्हति इति पाठः प्रमादादापतित इति वाच्यं तात्पर्यटीकायामपि तथैवोपलम्भाद् ।

(३) यद्=गृहासत्त्वं यत्र=चैत्रे प्रमितं तस्य=गृहासत्त्वस्य=तत्र चैत्रे विपरीतप्रमाणात्मकसंशयज्ञानविषयत्वं नोत्पत्तुं प्रभवतीत्यर्थः,

गृहावच्छिन्नेन चैत्राभावेन गृहसत्त्वं विरुद्धत्वात् प्रतिक्षिप्यते नतु सत्त्वमात्रं, तत्र तस्यौदासीन्याद्,

तस्माद् गृहाभावेन लिङ्गेन सिद्धेन सतो बहिर्भावोऽनुमीयत इति युक्तम् ।

अयं भावः—नात्र सर्वस्यैव शङ्काग्रन्थस्य 'न युक्तम्' इत्यनेनायुक्तत्वाभिधानं किन्तर्हि शङ्कांशस्येति ।

एतदुक्तं भवति—'सत्त्वमपि प्रतिक्षेप्तुमर्हति' इति, 'गृहसत्त्वस्य सांशयिकत्वं चापनेतुमर्हति' इति च यद् शङ्कायामंशद्वयं तत्र प्रथमांशस्यैव (न युक्तम्) इत्यनेनायुक्तत्वाभिधानं नांशान्तरस्य, तेन गृहसत्त्वस्य सांशयिकत्वापनयनस्य स्वीकृतत्वेन तस्य बाध एवात्राभिप्रेतो न सांशयिकतेति,

एतदभिप्रायेणैव सहेतुकं गृहसत्त्वस्य बाधं सत्त्वमात्रस्य चाबाधमाह-"गृहावच्छिन्नेन" इति,

गृहेणाऽवच्छिन्नेन=इतरेभ्योऽवच्छिद्य स्वस्मिन् स्थापितेन—गृहनिष्ठेन चैत्राभावेन गृहसत्त्वमेव प्रतिक्षिप्यते=बाध्यते, तत्र हेतुः-विरुद्धत्वात्=प्रमितेन गृहासत्त्वेन सहावस्थातुमशक्तत्वात्, सत्त्वमात्रं तु न प्रतिक्षिप्यते, कुतः ? 'तत्र तस्यौदासीन्याद्' तत्र=सत्त्वमात्रनिरासे, तस्य=गृहासत्त्वस्य, औदासीन्याद्=निर्व्यापारत्वाद् इत्यर्थः, विरोधाभावान्न सत्त्वमात्रस्य प्रतिक्षेप इति भावः ।

एतेनान्तिमकल्पोऽङ्गीकृत इति ज्ञापितम् । फलितमाह—"तस्माद्" इति, यतो गृहाभावः सिद्धस्तस्मात्सिद्धेन तेन लिङ्गेन सतः=जीवतश्चैत्रस्य बहिर्भावोऽनुमीयत इति युक्तमित्यर्थः,

ये तु (जीवी चैत्रः क्वचिदस्तीत्येवं सामान्येन स्थितिबोधकस्यागमप्रमाणस्य योग्यं गृहासत्त्वावेदकेन प्रत्यक्षप्रमाणेन सह विरोधस्तत्परिहारायाऽऽगमस्य बहिर्देशविषयत्वकल्पनमर्थापत्तिकृत्यम्) इति मन्यन्ते तान् प्रत्याह—

---

(१) तस्य=गृहसत्त्वस्य,

(२) 'चैत्रस्य गृहागत्त्वेन सत्त्वमात्रं विरुद्धयते गृहसत्त्वं वा' इति पूर्वोदितकल्पद्वयेऽन्तिमकल्पः स्वीकृत इति भावः,

(३) अनुमानप्रयोगश्च पूर्वत्रोक्तः,

एतेन विरुद्धयोः प्रमाणयोर्विषयव्यवस्थयाऽविरोधापादनमर्थापत्तेर्विषय इति निरस्तम्,
अवच्छिन्नाऽनवच्छिन्नयोर्विरोधाभावाद् ।
उदाहरणांतराणि चार्थापत्तेरेवमेवाऽनुमानेऽतर्भावनीयानि,
तस्मान्नानुमानात्प्रमाणान्तरमर्थापत्तिरिति सिद्धम् ।
एवमभावोपि प्रत्यक्षमेव,

"एतेन" इति,—एतेन=वक्ष्यमाणेन हेतुना, सम्भावनामात्रेण विरुद्धयोः= विरोधाक्रान्तयोः प्रत्यक्षागमप्रमाणयोर्या विषयव्यवस्था=आगमस्य बहिस्सत्त्वं विषयः प्रत्यक्षस्य च गृहासत्त्वं विषय इत्येवं व्यवस्था तया विरोधाभावसम्पादनमर्थापत्तेर्विषयः=फलमिति निरस्तम् इत्यर्थः,

'एतेन' इत्यनेन सूचितं निरासे हेतुमाह—"अवच्छिन्नाऽनवच्छिन्नयोर्" इति, गेहावच्छिन्नमसत्त्वमध्यक्षं तदनवच्छिन्नं सत्त्वमात्रं चागमिकमित्येवं तयोर्विरोधाभावादित्यर्थः,

एतच्च 'न मानयोर्विरोधोस्ति' इति कारिकायां विरोधे हि रज्जुसर्पादिवदेकस्य बाध एव स्यान्नतूभयोः प्रामाण्यम् इत्यादिना कुसुमाञ्जलौ व्यक्तम् ।

एवं पीनोयं दिवा न भुङ्क्ते इति वाक्यावगतेन पीनत्वेन यद् रात्रिभोजनकल्पनरूपं श्रुतार्थापत्तेः कृत्यं तदपि (देवदत्तो नक्तं भोजी दिवाऽभुञ्जानत्वे सति पीनत्वाद् यः किल नक्तं न भुनक्ति स दिवाऽभुञ्जानः सन् पीनोपि न भवति यथा नवरात्रोपवासी) इत्यनुमानसाध्यत्वान्नार्थापत्तेः फलमित्याशयेनाह—"उदाहरणान्तराणि च" इति,

उपसंहरति "तस्माद्" इति,

ये किल कुमारिलस्वामिनस्तदनुयायिनो वेदान्तिनश्च यद्यत्र घटः स्यात्तर्ह्युपलभ्येत यतो नोपलभ्यतेऽतो नास्तीत्येवं योग्यवस्तूपलम्भाभावजन्यमिह भूतले घटो नेत्यर्थाभावज्ञानमनुपलब्धिप्रमाणकृत्यम् इत्येवमातिष्ठन्ते तेषामास्थामपनेतुमाह—"एवमभावोपि" इति,

यथा प्रभाकरादिसम्मतार्थापत्तिर्न प्रमाणान्तरं तथा भट्टाद्यभिमताऽनुपलब्धिरपि न प्रमाणान्तरमपि तु प्रत्यक्षमेवेत्यर्थः,

---

(१) तृतीयस्तबके १९ श्लो०,

(२) भट्टपादानुयायित्वं वेदान्तिनां न निखिलांशेऽपि तु प्रमाणेयत्तादिकियदंश इति बोध्यम्,

नहि भूतलस्य परिणामविशेषात्कैवल्यलक्षणादन्यो घटा-भावो नाम,

प्रतिक्षणपरिणामिनो हि सर्व एव भावा ऋते चितिशक्तेः,

ननु प्रतिविषयाध्यवसाय इत्यत्रार्थसन्निकृष्टेन्द्रियाश्रिताध्यवसायस्यैव प्रत्यक्षत्वाभिधानादत्र चाभावेन सहेन्द्रियसन्निकर्षाभावात्कथमभावस्य प्रत्यक्षत्वमित्याशङ्कामपनयति "नहि" इति,

हि=यतो भूतलस्य परिणामविशेषादन्यः कश्चिद् घटाभावरूपः पदार्थो नाम नास्त्यतः प्रत्यक्षमिति संबन्धः, तथा च भूतलग्रहणेनैव तद्ग्रहणान्न तदर्थं पृथक् सन्निकर्षापेक्षेति,

परिणामिना भूतलेन सममिन्द्रियसन्निकर्षसत्त्वात् तत्परिणामविशेषोऽभावोपीन्द्रियसन्निकृष्ट एवेति भावः,

ननु यस्य यत्कार्य्यं तस्य तत्परिणाम इति हि राद्धान्तस्तत्कथमकार्य्यस्याभावस्य भूतलपरिणामत्वमित्याशङ्कायां 'परिणामविशेषाद्' इति विशेषपदं, विशिष्यतेऽन्यस्मात्परिणामादिति विशेषः, तस्मादित्यर्थः,

वैशेष्यमेवाह—"कैवल्यलक्षणाद्" इति, कैवल्यं=भावान्तरासंसृष्टस्वरूपं सद्वितीयत्वरूपधर्मापेक्षया धर्मान्तरं, तदेव लक्षणं=स्वरूपं यस्य तत्कैवल्यलक्षणं तस्मादित्यर्थः,

धर्मादिभेदेन परिणामत्रैविध्यस्य सम्प्रतिपन्नत्वात् कार्य्यमेव परिणाम इति नियमाभावात् कैवल्यलक्षणोऽवस्थाविशेषोपि भूतलस्य परिणाम एवेति भावः ।

अत्रेदं बोध्यम्—"अवस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मान्तरोत्पत्तिः परिणाम" इति हि योगभाष्योक्तं परिणामसामान्यलक्षणम्, एवं च सद्वितीयत्वरूपपूर्वधर्मनिवृत्तौ यद् भूतलस्य कैवल्यरूपधर्मान्तरेणावस्थानं तदपि भूतलपरिणाम एवेति नाभावस्य परिणामविशेषत्वहानिरिति ।

सद्वितीयत्वरूपधर्मवतो भूतलस्य कथं तद्विरुद्धकैवल्यलक्षणधर्मवत्त्वमित्याशङ्कायामाह—"प्रतिक्षणपरिणामिन" इति,

---

(१) घटशरावादयो मृत्परिणामाः कटककुण्डलादयश्च कनकपरिणामा इत्येवं कार्ये परिणामशब्दप्रयोगदर्शनादिति भावः,

(२) धर्मपरिणामो, लक्षणपरिणामोऽवस्थापरिणाम इत्येवं परिणामत्रैविध्यं पूर्वत्र (७८ पृ०) इत्यत्रोक्तम् ।

(३) पा. ३ सू. १३ ।

स च परिणामभेद ऐन्द्रियक इति नास्ति प्रत्यक्षानवरुद्धो विषयो यत्राऽभावाख्यं प्रमाणान्तरमभ्युपेयेतेति।

सर्वस्य त्रिगुणात्मकत्वाच्, चलञ्च गुणवृत्तम्⁽¹⁾ इत्यभ्युपगमात्प्रतिक्षणमन्यथाऽन्यथाप्रथाशीलाः सर्वे भावा इत्यर्थः,

कस्मिंश्चित्समये⁽²⁾ सद्वितीयस्वरूपावस्थया भूतलमवतिष्ठते कदाचिच्च⁽³⁾ केवल्यरूपधर्मान्तरेण परिणमत इति समयभेदेनावस्थाद्वयवत्त्वं भूतलस्य न विरुद्धमिति भावः।

सर्वस्य क्षणिकत्वे हि तथागत⁽⁴⁾मतसाम्यं स्यात् तन्माभूदित्याशयेनाह- "ऋते चितिशक्तेः" इति, चेतनात्पुरुषाद् विनेत्यर्थः,

अपरिणामित्वेन कूटस्थनित्यायाश्चितिशक्तेरतिरिक्तस्य प्रतिक्षणपरिणामित्वाभ्युपगमान्न सर्वक्षणिकत्वाभिमानिबौद्धसाम्यप्रसङ्ग इति भावः,

किञ्च–यथा वैनाशिकै⁽⁵⁾र्धर्मिणः प्रतिक्षणं निरन्वयनाशो⁽⁶⁾ऽभ्युपेयते न तथा साङ्ख्यैः, अपि त्ववस्थितस्यैव धर्मिणस्तत्तद्धर्मलक्षणावस्थाख्याः परिणामा अभ्युपेयन्ते, नचैतावता धर्मिनाशः, कटककुण्डलकेयूरादिषु परिणामेषु धर्मिणः कनकादेरन्वितत्वेन प्रतीतेः सर्वानुभवसिद्धत्वादि⁽⁷⁾ति न लेशेनापि बौद्धसाम्यापत्तिरिति।

अस्त्वभावस्य प्रतियोग्यनुपरक्तताख्यकैवल्यात्मकभूतलपरिणामविशेषत्वमेतावता कथमनुपलब्धेर्मानान्तरत्वविरह इत्यत्राह–"स च परिणामभेद" इति, सः=कैवल्यात्मकः परिणामविशेषश्च ऐन्द्रियकः=भूतलस्वरूपत्वेन इन्द्रियाश्रिताध्यवसायविषयः प्रत्यक्ष इति यावद्, इति=अतो नास्ति प्रत्यक्षा-

---

(१) गुणवृत्तं=गुणानां स्वभावः,

(२) प्रतियोगिसत्त्वदशायाम्,

(३) प्रतियोगिविरहकाले,

(४) तथागतः=बुद्धः,

(५) वैनाशिकैः=बौद्धैः;

(६) स्वरूपेणैव धर्मिनाशः,

(७) धर्मधर्मिणोर्भेदाभेदाभ्युपगमादित्यर्थः, व्यक्तं चैतद् (१३) इति योगसूत्रे वाचस्पत्ये,

सम्भवस्तु–यथा खार्य्यां द्रोणाढकप्रस्थाद्यवगमः,

नवरुद्धः=प्रत्यक्षाऽगोचरोऽभावरूपो विषयो यत्र=यस्मिन्नभावरूपविषयज्ञानेऽभावाख्यं प्रमाणान्तरमभ्युपेयं भवेदित्यर्थः,

प्रभाकरमतेप्यभावस्याधिकरणात्मकत्वेनेन्द्रियग्राह्यत्वान्न तदर्थमनुपलब्धेः प्रमाणत्वेनाश्रयणमित्यपि ध्येयम्,

आरम्भवादिनः[1] केचिदाचार्यास्तु अनुमानेऽनुपलब्धिमन्तर्भाव्य तस्याः प्रमाणान्तरत्वं वारयन्ति,

स्पष्टं चैतद् "शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानर्थान्तरभावाचाप्रतिषेध"[2] इत्यादिनाऽक्षपादीये (अभावोऽप्यनुमानमेव) इत्यादिना प्रशस्तपादीये च।

न्यायवार्तिककारास्तु[3] 'समवाये चाभावे च विशेषणविशेष्यभावाद्' इति-वदन्तस्संयुक्तविशेषणताख्यसन्निकर्षेणाभावस्य प्रत्यक्षत्वमित्येवम्मन्यन्ते,

यथा चाभावप्रतीतिः प्रत्यक्षात्मिका तथा कुसुमाञ्जलौ[4] व्यक्तम्,

पौराणिकाभिमतसम्भवप्रमाणस्यानुमानानतिरिक्ततां दर्शयितुं सम्भवस्वरूपमाह–"सम्भवस्तु यथा खार्य्याम्" इति, खारीद्रोणादयः[5] परिमाणविशेषाः, खार्य्याख्ये महापरिमाणेऽल्पपरिमाणा द्रोणादयोऽन्तस्सम्भवन्तीत्येवंविधो योऽवगमः=अवबोधः स सम्भव इत्यर्थः,

एतादृशात्संभवाख्यात्प्रमाणाद् यत् खारीज्ञानेन द्रोणादिज्ञानं तत् सम्भवप्रमाणफलं सम्भवप्रमितिरित्याख्यायत इत्यपि ज्ञेयम्,

सम्भवोऽनुमानान्नातिरिच्यतेऽविनाभावबलेनार्थावबोधकत्वाद् न[6] यदेवं-

---

(१) परिणामवादे परिणामपरिणामिनोरभेदाद् भवतु भूतलस्वरूपवदभावस्य प्रत्यक्षत्वम् आरम्भवादे त्वभावस्य भूतलातिरिक्तत्वेन कथं तस्य प्रत्यक्षत्वमित्याकाङ्क्षायामाह–"आरम्भवादिन" इति,

(२) न्या० अ० २ आ० १ सू० २। ऐतिह्यादीनां न प्रमाणत्वप्रतिषेधोपि तु प्रमाणान्तरत्वप्रतिषेधः, कुतः शब्द ऐतिह्यान्तर्भावाद् अनुमाने चार्थापत्त्यादीनामन्तर्भावादित्यर्थः,

(३) प्रत्यक्षलक्षणपरे सूत्र इति शेषः,

(४) तृतीयस्तबके (२०) इति कारिकाया गद्यव्याख्याने।

(५) द्रोणचतुष्टयं खारी, चतुराढकश्च द्रोणः, चतुःप्रस्थं चाढकं, चत्वारः कुडवाश्च प्रस्थं, मुष्टिचतुष्टयं च कुडव इति ज्ञेयम्।

(६) यदनुमानं न न तदविनाभावबलेनार्थप्रतिपादकमित्यर्थः, यत्र यत्र खारीत्वं तत्र तत्र द्रोणादिसत्त्वमिति व्याप्यव्यापकभावोऽप्यत्र ज्ञेयः,

स चानुमानमेव, खारीत्वं हि द्रोणाद्यविनाभूतं प्रतीतं खार्यां द्रोणादिसत्त्वमवगमयति ।

यच्चानिर्दिष्टप्रवक्तृकं प्रवादपारम्पर्य्यमात्रम् 'इति होचुर्वृद्धा' इत्यैतिह्यं, यथा 'इह वटे यक्षः प्रतिवसति' इति,

न तत् प्रमाणम्, अनिर्दिष्टप्रवक्तृकत्वेन सांशयिकत्वात् ।

विधं न तदेतादृग यथा प्रत्यक्षमिति न्यायमाश्रित्य सम्भवस्यानुमानेऽन्तर्भावमाह—"सच" इति, सः=सम्भवश्चानुमानमेव न प्रमाणान्तरमित्यर्थः,

तथाचाहुः प्रशस्तपादाः—"सम्भवोऽप्यविनाभावित्वादनुमानमेव" इति । अनुमानान्तर्भावप्रकारमुपपादयति—"खारीत्वम्" इति, यथा वह्निनाऽविनाभूतो धूमो ज्ञातः सन् वह्निमनुमापयति तथा द्रोणाद्यविनाभूतं खारीत्वं=खारीप्रमाणं प्रतीतं सत् द्रोणादिसत्त्वम् अवगमयतीत्यनुमानसमानधर्मत्वात्तानुमानादतिरिक्तं सम्भवाख्यं प्रमाणमित्यर्थः.

ऐतिह्यमिकाभिमतैतिह्यस्य प्रमाणान्तरत्वं निरसितुं न्यायभाष्योक्तमैतिह्यस्वरूपमाह—"यच्चानिर्दिष्टप्रवक्तृकम्" इति । असावुच्चारयितेतद्गोचरप्रमावान् इत्येवं विशेषेण न निर्दिष्टः=निश्चितः प्रवक्ता यस्य तदनिर्दिष्टप्रवक्तृकं प्रवादपारम्पर्यमात्रं=प्रचुरजनरवस्य पौर्वापर्येणानुक्रममात्रं यद् 'वृद्धा इति ह कथयन्ति' इत्येवंविधं वचनं तदैतिह्यमित्यर्थः.

'पारम्पर्योपदेशे स्यादैतिह्यमितिहाव्ययम्' इत्यमराद्, 'इतिह' इति निपातसमुदायः पारम्पर्योपदेशार्थकः. तस्माद् 'अनन्तावसथेतिह भेषजाञ्ञ्यः' इति स्वार्थे ञ्यप्रत्यय ऐतिह्यमिति साधनीयम्.

किमूचुर्वृद्धा इत्याकाङ्क्षां शमयन्नैतिह्योदाहरणमाह "यथेहवटे" इति.

ऐतिह्यस्य कुत्रान्तर्भाव इत्याशङ्कायामाह "न तत्प्रमाणम्" इति, प्रमाणस्य सतः प्रमाणत्रयान्तर्भावविचारः युक्त ऐतिह्यस्य त्वप्रमाणत्वेन नात्र प्रमाणान्तर्भावविचारावसर इति भावः,

ऐतिह्यस्याप्रमाणत्वे हेतुमाह—"अनिर्दिष्टप्रवक्तृकत्वेन सांशयिकत्वाद्" इति, अनिश्चितोच्चारयितृत्वेन सन्दिग्धत्वादित्यर्थः,

(१) परम्परैव पारम्पर्यं स्वार्थेष्यञ्, पारम्पर्येणोपदेशः पारम्पर्योपदेशस्तत्रैतिहशब्दोऽव्ययमित्यमरटीकायां भरतः । भानुजिदीक्षितस्तु परम्पराया आगतः (तत आगत) इत्यण्, चतुर्वर्णादित्वात् ष्यञ्, पारम्पर्य्यश्चासावुपदेशश्चेति पारम्पर्योपदेश इत्याह ।

(२) ५।४।२३।

आप्तवक्तृकत्वनिश्चये त्वागम एव, इत्युपपन्नं त्रिविधं प्रमाणम् इति ॥ ५ ॥

एवं तावद् व्यक्ताव्यक्तज्ञलक्षणप्रमेयसिद्ध्यर्थं प्रमाणानि लक्षितानि, तत्र व्यक्तं पृथिव्यादि स्वरूपतः पांशुलपादको हालिकोपि प्रत्यक्षतः प्रतिपद्यते, पूर्ववता चानुमानेन धूमादि-

अथैतन्मतम्-आप्तोक्तिमूलक एव पारम्पर्योपदेश ऐतिह्यं प्रमाणं नतु प्रवादपरम्पराप्रतीतमिति, तत्राह—"आप्तवक्तृत्वनिश्चये तु" इति,

सुदृढेन प्रमाणेनावधारितपदार्थेन्थंभाव आप्तः, स वक्ता=आद्योपदेष्टा यस्य पारम्पर्योपदेशस्य स आप्तवक्तृकः, तस्य भावस्तत्त्वं, तस्य निश्चये तु आगम एव=आप्तश्रुतित्वेनागमप्रमाणान्तर्भूतमेव तदैतिह्यमिति न तत्प्रमाणान्तरमित्यर्थः,

तदुक्तम्—"ऐतिह्यमप्यवितथमाप्तोपदेश एव" इति,

प्रमाणनिरूपणप्रकरणमुपसंहरन् मूलं सङ्गतयति, "इत्युपपन्नम्" इति, यतोऽन्यैः पृथक्प्रमाणत्वेनाभिमतानामुपमानादीनाम्प्रमाणत्रय एवान्तर्भावसंभव इति=अतः 'त्रिविधं प्रमाणमिष्टम्' इति मूलोक्तं युक्तमित्यर्थः ॥ ५ ॥

वृत्तवर्तिष्यमाणार्थयोस्सङ्गतिं कीर्तयन् सप्तमीमार्यापीठिकामारचयति—"एवन्तावद्" इति,

तावद्—इति वाक्यालङ्कारे, व्यक्तम्=इन्द्रियगृहीतं पृथिव्यादि, अव्यक्तम् अतीन्द्रियं प्रधानादि, ज्ञः=चेतनः पुरुषः, एतत्त्रिविधलक्षणप्रमेयसिद्ध्यर्थं प्रमाणानि लक्षितानीत्यर्थः,

किं त्रिविधमेव प्रमेयं प्रकृततन्त्रव्युत्पाद्यमुतैष्वन्यतमं किञ्चिद् इत्यत्राह—"तत्र" इति,

तत्र=त्रिविधप्रमेयमध्ये यद् व्यक्तं पृथिव्यादि तत् स्वरूपतः=कटघटपटात्मकस्थूलरूपेण पांशुलपादकः=धूलिधूसरितचरणः हालिकोपि=हलव-

(१) पारम्पर्योपदेशस्याप्तोक्तत्वनिश्चये त्वित्यर्थः,

(२) प्रशस्तपादैरिति शेषः,

(३) अवितथम्=आप्तोक्तिमूलकत्वेन यथार्थभूतम्, अवितथमिति कथनेन वितथमप्रमाणमेवेति बोधितम्,

(४) धूलिवाचकात्पांशुशब्दान्मत्वर्थे 'सिध्मादिभ्यश्च' ५।२।९७ इति लचि पांशुल इति, पांशुलौ पादौ यस्य स पांशुलपादकः,

(५) 'तद् वहति' इत्यधिकारे 'हलसीराट्ठक्' ४।४।८१ इति ठकि हालिक इति साधुः,

दर्शनाद् वह्न्यादीनि, इति तद्व्युत्पादनाय मन्दप्रयोजनं शास्त्रम्, इति दुरधिगममनेन व्युत्पादनीयं, तत्र यत्प्रमाणं यत्र शक्तं तदुक्तलक्षणेभ्यः प्रमाणेभ्यो निष्कृष्य दर्शयति– "सामान्यतस्तु" इति,

सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात्,
तस्मादपि चासिद्धं परोक्षमाप्तागमात्सिद्धम् ॥ ६ ॥

तु-शब्दः प्रत्यक्षपूर्ववद्भ्यां विशिनष्टि, सामान्यतो दृष्टा-

हतशीलो निरक्षरोऽपि नरः प्रत्यक्षतः=प्रत्यक्षेण प्रतिपद्यते=जानाति, एवं पूर्ववत्संज्ञकेन चानुमानेन व्यवहितानि वह्न्यादीन्यपि प्रतिपद्यते, यत एवम् इति=अतः तद्व्युत्पादनाय=एतादृग्व्यक्तपृथिव्यादिबोधनाय यद्येतच्छास्त्रं स्यात् तर्हि मन्दप्रयोजनम्=अल्पफलं निष्फलं वैतच्छास्त्रं भवेद्, इति=अतः शास्त्रस्य सफलत्वाय दुरधिगमम्=दुरवबोधं प्राकृतनराविदितमव्यक्तादिक-मेवानेन तन्त्रेण व्युत्पादनीयं न व्यक्तमित्यर्थः ।

तथाच–अव्यक्ते ज्ञेयत्वमर्थमित्यत्र फलितम्,

एवं पीठिकामारच्य्यार्थमवतारयति-"तत्र" इति, तत्र=व्यक्तस्याप्रति-पाद्यत्वेऽव्यक्तपुरुषयोश्च प्रतिपाद्यत्वे स्थिरे सति, अव्यक्तप्रधानादिमध्ये वा, यत्र=यस्मिन्नतीन्द्रिये यत्प्रमाणं शक्तं=समर्थं तत् प्रमाणमुक्तप्रमाणेभ्यो नि-ष्कृष्य=विभज्य दर्शयतीत्यर्थः ।

कारिकां व्याचक्षाणः 'सामान्यतस्तु' इति तु-शब्दस्य कृत्यमाह–"तु-शब्द" इति, तु शब्द इत्युपलक्षणं, सामान्यतोदृष्टाद् इत्यनुमानविशेष-णोपादानं चेत्यपि ज्ञेयं, तथा च तुशब्दः प्रत्यक्षाद् विशिनष्टि, सामान्यतो दृष्टादितिविशेषणं च पूर्ववन्नामकादनुमानाद् विशिनष्टि=व्यवच्छिनत्ति–सा-मान्यतो दृष्टानुमानमिति शेषः,

नापि प्रत्यक्षात्प्रधानादीनां प्रतीतिर्नापि पूर्ववदनुमानादपि तु सामा-न्यतो दृष्टादनुमानादित्येवं व्यवस्थापयतीति भावः ।

---

(१) यतः शास्त्रसंस्कारविधुरोऽपि नरो व्यक्तं पृथिव्यादिकं जानात्यत इत्यर्थः,

(२) मन्दम्–अल्पं प्रयोजनं=फलं यस्य तन्मन्दप्रयोजनं तदेवाह–(अल्पफ-लम्) इति, मन्देषु=खलेषु-प्राकृतेषु प्रयोजनम् यस्येत्यर्थेन निष्फलमित्यर्थो वा ।

(३) किं व्यवच्छिनत्तीत्याकाङ्क्षां शमयति–"सामान्यतो दृष्टमितिशेष" इति,

दनुमानाद्=अध्यवसायाद् अतीन्द्रियाणां=प्रधानपुरुषादीनां[1] प्रतीतिः=प्रतिपत्तिः, (चिच्छायापत्तिर्बुद्धेरध्यवसाय इत्यर्थः)[2] उपलक्षणं चैतत् शेषवत इत्यपि द्रष्टव्यम् ।

तथाच साङ्ख्यसूत्रं[3]—"सामान्यतोदृष्टादुभयसिद्धिः[4]" इति,

साङ्ख्यनये बुद्धिवृत्तेरेव प्रमाणत्वादाह—"अध्यवसायाद्" इति, लिङ्गज्ञानजन्यबौद्धबोधात्मकादनुमानादित्यर्थः, प्रतीतिः=पौरुषेयबोधात्मकफलरूपानुमितिरित्यर्थः,

कथं पुनर्जडाया बुद्धेर्ज्ञानरूपोऽध्यवसाय इत्यत्राह="चिच्छायापत्तिर्" इति, चित्सन्निधानेन या बुद्धेश्चिततादात्म्यापत्तिस्तद्बलादेव बुद्धेर्ज्ञानरूपो व्यापार इत्यर्थः, प्रपञ्चितं चैतत् प्रागिति[5] नात्र किञ्चिद्वक्तव्यम् ।

यथा च प्रधानपुरुषयोस्सामान्यतो दृष्टानुमानादेः प्रतीतिस्तथोत्तरत्र[6] व्यक्तमित्यलमत्राम्रेडनेन[7],

ननु तन्मात्रेन्द्रियाण्यभिमानवद्द्रव्योपादानकानि अभिमानकार्यद्रव्यत्वाद् यन्नैवं तन्नैवं यथा पुरुष इत्येवं शेषवदनुमानादपि केषाञ्चिदतीन्द्रियाणां प्रतीतेः सत्त्वात्कथमभिहितं सामान्यतो दृष्टानुमानात्प्रतीतिरिति, इत्याशङ्कायामाह "उपलक्षणं चैतद्" इति, शेषवतः=केवलव्यतिरेक्याख्यपरिशेषानुमानादपि केषाञ्चिदतीन्द्रियाणां प्रतीतिरित्यपि बोध्यमित्यर्थः,

---

(१) आदिना महत्तत्त्वादयो ग्राह्याः,

(२) ( ) एतत्कोष्ठकान्तर्गतः पाठः कथंचिद् योजितोऽपि न स्वान्तं रञ्जयति, नच प्रतीतेर्विवरणमिदमिति भ्रमितव्यं, प्रतीतेरनुमितिरूपायाः पौरुषेयत्वेन बुद्ध्यध्यवसायत्वाभावात्, टिप्पणीदायातो वाऽयं पाठः,

(३) अ० १ । सू० १०३ ।

(४) उभयोः—प्रकृतिपुरुषयोस्सिद्धिरिति,

(५) यथाच बौद्धबोधस्य प्रमाणत्वं पौरुषेयबोधस्य च प्रमात्वं तथा प्राग् (५) इति कारिकायां प्रत्यक्षलक्षणावसरे विशदीकृतमित्यर्थः,

(६) १४।१५।१६।१७ इति कारिकासु,

(७) कथितस्य पुनः पुनः कथनमाम्रेडनम्.

तत्किं सर्वेष्वतीन्द्रियेषु सामान्यतो दृष्टमेव प्रवर्तते, तथा च यत्र तन्नास्ति महदाद्यारम्भक्रमे स्वर्गापूर्वदेवतादौ च तेषामभावः प्राप्त, इत्यत आह–"तस्मादपि" इति,

'तस्मादपि' इत्येतावतैव सिद्धे चकारेण शेषवत इत्यपि समुच्चितम् ॥ ६ ॥

स्यादेतद्–यथा गगनकुसुमकूर्मरोमशशविषाणादिषु प्रत्यक्षमप्रवर्तमानं तदभावमवगमयत्येवं प्रधानादिष्वपि, तत्कथं तेषां सामान्यतो दृष्टादिभ्यः सिद्धिरिति, अत आह–"अतिदूराद्" इति—

अतिदूरात्सामीप्यादिन्द्रियघातान्मनोनवस्थानात्,
सौक्ष्म्याद् व्यवधानादभिभवात्, समानाभिहाराच्च ॥७॥

आर्य्योत्तरार्द्धमुत्थापयितुं शङ्कते "तत्किम्" इति, तद्–इत्यव्ययं 'तर्हि' इत्यर्थकम्,

ओमिति वदन्तं प्रत्याह "तथाच" इति, तथाच=एवं सति यत्र=यस्मिन्नतीन्द्रिये तत्=सामान्यतो दृष्टानुमानं नास्ति=न प्रवर्तते तेषामभावः प्राप्तः स्यादित्यन्वयः,

कुत्र तन्नास्तीत्याकाङ्क्षायां यत्रेत्यस्य विवरणमाह–"महदाद्यारम्भक्रम"–इति, प्रकृतेर्महान्महतोऽहङ्कार इत्याद्याविर्भावक्रमे, स्वर्गादिपरलोके च, अपूर्वाख्यधर्माधर्मयोश्च, इन्द्रादिदेवतासु च, आदिना यागादीनां स्वर्गादिसाधनत्वे, क्षीरसमुद्रादौ चेत्यर्थः,

न्यूनतां पूरयति–"चकारेण" इति, तस्मात्=सामान्यतो दृष्टानुमानात् चकारेण शेषवदनुमानाच्च यदतीन्द्रियमप्रतीतं भवेत् तदागमप्रमाणात्सिद्धं भवतीत्यर्थः ॥ ६ ॥

शङ्कते–"स्यादेतद्" इत्यादिना, एतद्=वक्ष्यमाणं भवेद्[2],

तदभावम्=आकाशकुसुमाद्यभावम्, एवं प्रधानादिष्वप्यप्रवर्तमानं प्रत्यक्षं प्रधानाद्यभावमवगमयेदित्यर्थः,

---

(१) अपूर्वम्=अदृष्टं–विहितनिषिद्धक्रियाजन्यं सूक्ष्मं कर्मेत्यर्थः,

(२) एतद्=पूर्वोक्तं भवत्वित्यर्थो वा बोध्यः, परन्तु पूर्वोक्तस्य भवने शङ्काया अनुत्थितेर्वक्ष्यमाणं स्यादित्यर्थः सम्यक् प्रतिभाति,

'अनुपलब्धिर्' इति वक्ष्यमाणं सिंहावलोकनन्यायेनानुषञ्जनीयं, यथा उत्पतन् वियति पतत्री अतिदूरतया सन्नपि प्रत्यक्षेण नोपलभ्यते,

सामीप्यादित्यत्राप्यतिरनुवर्तनीयः, यथा लोचनस्थमञ्जनमतिसामीप्यान्न दृश्यते,

इन्द्रियघातः=अन्धत्वबधिरत्वादिः,

'मनोऽनवस्थानाद्' यथा कामाद्युपहतमनाः स्फीतालोकमध्यवर्तिनमिन्द्रियसन्निकृष्टमर्थं न पश्यति,

'सौक्ष्म्याद्' यथेन्द्रियसन्निकृष्टं परमाण्वादि प्रणिहितमना अपि न पश्यति,

'व्यवधानाद्' यथा कुड्यादिव्यवहितं राजदारादि न पश्यति,

अतिदूरत्वादिहेतुभ्यः किम्भवतीत्याशङ्कायामाकाङ्क्षासमापकपदानुसंधानेन वाक्यं पूरयति "अनुपलब्धिर्" इति, वक्ष्यमाणं=उत्तरार्य्यायां विद्यमानमनुपलब्धिरिति पदमत्र वाक्ययोजनापूरणायानुषञ्जनीयं=संबन्धनीयमित्यर्थः,

उत्तरवाक्यगतपदानां पूर्वत्रानुषङ्गे न्यायमाह "सिंहावलोकनन्यायेन" इति, सिंहो ह्यरण्ये व्रजन् सन्नन्तराऽन्तरा हिंसकभीत्या पृष्ठभागमप्यवलोकयति यथा तथोत्तरवाक्यस्थपदानां पूर्ववाक्येप्यनुसन्धानं संभवतीत्यर्थः,

अतिदूरादनुपलब्धिरित्यस्योदाहरणमाह "यथोत्पतन्" इति, सन्नपि=विद्यमानोपि पतत्री=पक्षी वियति=गगने उत्पतन्=उड्डीयमान अत्यूर्ध्वं गतः सन्नतिदूरतया[1] प्रत्यक्षेण नोपलभ्यत इत्यर्थः,

'अन्धत्वबधिरत्वादिर्' इत्यत्र 'तस्मादिन्द्रियघाताद् विद्यमानं रूपं न पश्यति शब्दं च न शृणोति' इति शेषो ज्ञेयः,

मनोनवस्थानाद्=इतरव्यासङ्गेनेन्द्रियसंयोगाभावात्, कामाद्युपहतमनाः=कामादिविकारेण उपहतं=दूषितं मनो यस्य स तथा, स्फीतः=प्रचण्डत्वेन विस्तृतो य आलोकः सूर्य्यादिप्रकाशस्तदभ्यन्तरे वर्तमानमित्यर्थः,

सौक्ष्म्याद्=निरवयवद्रव्यत्वात्, प्रणिहितमनाः=समाहितचित्तः,

---

(१) अतिदूराद् इति भावप्रधानो निर्देश इत्याशयेनाह "अतिदूरतया" इति, हेतौ तृतीया, अयं दूरत्वदोषश्च क्वचिदेव, तेन सूर्यादिमण्डलदर्शने न व्यभिचार इति बोध्यम् ।

'अभिभवाद्' यथाऽहनि सौरीभिर्भाभिरभिभूतं ग्रहनक्षत्र-मण्डलं न पश्यति,

'समानाभिहाराद्' यथा तोयदविमुक्तानुदबिन्दून् जलाशये न पश्यति,

चकारोऽनुक्तसमुच्चयार्थः, तेनानुद्भवोपि सङ्गृहीतः, तद् यथा—क्षीराद्यवस्थायां दध्याद्यनुद्भवान्न पश्यति,

एतदुक्तं भवति—न प्रत्यक्षनिवृत्तिमात्राद् वस्त्वभावो भवति, अतिप्रसङ्गात्, तथा हि—गृहाद् विनिर्गतो गृहजनमपश्यंस्तद-भावं विनिश्चिनुयाद्, नत्वेवम्, अपि तु योग्यप्रत्यक्षनिवृत्ते-रयमभावं विनिश्चिनोति, न च प्रधानपुरुषादीनामस्ति प्रत्यक्ष-योग्यता, इति न तन्निवृत्तिमात्रात् तदभावनिश्चयो युक्तः प्रामाणिकानामिति ॥ ७ ॥

सौरीभिः=सूर्य्यसंबन्धिनीभिः भाभिः=किरणदीप्तिभिर् अभिभूतं=निर-स्कृतं चन्द्रातिरिक्तमङ्गलादिमण्डलम् अश्विन्यादिनक्षत्रमडण्लं च न पश्य-तीत्यर्थः,

सजातीयपदार्थमिश्रणं समानाभिहारः तस्मात्, तोयदेन=मेघेन वि-मुक्तान् उदबिन्दून्=जलकणान् जलाशये=तटाकादौ विभिन्नतया न पश्यति,

अनुद्भवः=अनागतावस्थया सूक्ष्मरूपेण स्वोपादानेऽवस्थानम्,

यच्च शङ्कितं गगनकुसुमादिवत्प्रधानादीनामभाव एव कथं न स्यादिति, तत्समाधानायाह—"एतदुक्तं भवति" इति,

अतिप्रसङ्गमेवाह—"तथाहि" इति,

'नत्वेवम्'=एवं=गृहाद्विनिर्गतो गृहजनाभावं निश्चिनोतीत्येवं नतु=नहि दृश्यते लोक इत्यर्थः,

तर्हि कीदृक्प्रत्यक्षनिवृत्तेरभावविनिश्चय इत्यत्राह "अपि तु योग्यप्रत्य-क्षनिवृत्तेर्" इति, सावयवत्वादिसामग्रीसमवधानेन प्रत्यक्षयोग्यं यद् वस्तु तत्र प्रत्यक्षनिवृत्तेर् अयं जनोऽभावं निश्चिनोति यथा सावयवानां शृङ्गा-दीनां शशादौ, प्रधानादीनाञ्च निरवयवत्वेन प्रत्यक्षयोग्यता नास्ति इति=

---

(१) अभावनिश्चये रोदनताडनादिप्रसङ्गादित्यपि ज्ञेयम्,

कतमत्पुनरेतेषु कारणं प्रधानादीनामनुपलब्धौ, इत्यत आह–"सौक्ष्म्याद्" इति,

सौक्ष्म्यात् तदनुपलब्धिर्नाभावात् कार्य्यतस्तदुपलब्धेः,
महदादि तच्च कार्य्यं प्रकृतिसरूपं विरूपं च ॥ ८ ॥

अथाभावादेव सप्तमरसवदेतेषामनुपलब्धिः कस्मान्न भवति, इत्यत आह–'नाभावाद्' कुतः, 'कार्य्यतस्तदुपलब्धेः', तद्-इति प्रधानं परामृशति, पुरुषोपलब्धौ तु प्रमाणं वक्ष्यति 'सङ्घातपरार्थत्वाद्' (का॰ १७.) इति,

---

अतः केवलप्रत्यक्षनिवृत्तिमात्रात् तेषामभावनिश्चयः प्रामाणिकानां=प्रमा[1]-णैर्व्यवहरमाणानां न युक्त इत्यर्थः ॥ ७ ॥

आशङ्कापूर्वकमुत्तरकारिकामवतारयति "कतमत्पुनर" इति । एतेषु=पूर्वोक्तातिदूरत्वाद्यष्टकारणानाम्मध्ये, कतमत्=किङ्कारणमित्यर्थः,

'सौक्ष्म्यात् तदनुपलब्धिर' इति मूलेन निरवयवत्वरूपसूक्ष्मत्वात् तेषां प्रधानादीनामुपलब्धिर्न भवतीत्यभिहितं, तत्र शङ्कते "अथाभावादेव" इति, यथा षड्विधाम्लादिरसातिरिक्तः सप्तमो रसोऽभावादेव नोपलभ्यते नतु सौक्ष्म्यात् तथा प्रधानादीनामप्यभावादेवानुपलम्भः कुतो न भवेदित्यर्थः,

कारिकांशमवतार्य्य समाधत्ते–"नाभावाद्" इति, नतु सप्तमरसवद्भावा-दनुपलब्धिरित्यर्थः,

तत्र हेतुं पृच्छति "कुत" इति, समाधत्ते "कार्य्यतस्तदुपलब्धेर्" इति, महत्तत्त्वादिकार्य्यलिङ्गकानुमानेन प्रधानोपलब्धेरित्यर्थः,

तदुपलब्धेर्-इति तत्-शब्देन नात्र प्रधानपुरुषयोरुभयोः परामर्शोऽपि तु प्रधानस्य, पुरुषस्याकारणत्वेन कार्य्यलिङ्गकानुमानेन तदुपलब्धेर्वक्तुमशक्यत्वादित्याशयेनाह–"तद् इति प्रधानं परामृशति" इति,

तर्हि पुरुषोपलब्धिः कुतः, तत्राह–"पुरुषोपलब्धौ तु" इति, वक्ष्यति=मूलकार इति शेषः,

---

(१) चार्वाकानां युक्तोपि प्रत्यक्षाप्रवृत्त्याऽभावनिश्चयः प्रमाणकुशलानां तु स न युक्त इत्यर्थः ।

(२) तत्र=अभावान्नानुपलब्धिरपि तु सौक्ष्म्यादित्यत्र,

दृढतरप्रमाणावधारिते हि प्रत्यक्षमप्रवर्तमानमयोग्यत्वान्न प्रवर्तत इति कल्प्यते सप्तमस्तु रसो न प्रमाणेनावधारित इति न तत्र प्रत्यक्षस्यायोग्यता शक्याऽध्यवसातुमित्यभिप्रायः ।

किं पुनस्तत्कार्यं यतः प्रधानानुमानम्, इत्यत आह– "महदादि तच्च कार्य्यम्" इति, एतच्च यथा गमकं तथोपरिष्टादुपपादयिष्यते,

तस्य च कार्य्यस्य विवेकज्ञानोपयोगिनी सारूप्यवैरूप्ये आह "प्रकृतिसरूपं विरूपं च" इति, एते तूपरिष्टाद् विभजनीये इति ॥ ८ ॥

कार्य्यात्कारणमात्रं गम्यते, सन्ति चात्र वादिनां विप्रति-

यदुक्तम्–प्रत्यक्षाप्रवृत्त्या सप्तमरसवदभाव एव किन्न स्यादिति, तद् विघटयति(१)–"दृढतर" इत्यादिना, प्रबलतरानुमानादिप्रमाणेन निर्णीते हि प्रधानादौ यत्प्रत्यक्षं न प्रवर्तते तत् प्रधानादीनां निरवयवत्वेन तत्र योग्यताभावान्न प्रवर्तते न त्वसत्त्वादिति कल्प्यते सप्तमस्तु रसो न केनापि प्रमाणेन निश्चित इति=अतः तत्र=सप्तमे रसे प्रत्यक्षस्यायोग्यता अध्यवसातुं= निश्चेतुं न शक्येत्यर्थः, असत्त्वादेव सप्तमे रसे प्रत्यक्षं न प्रवर्तते न त्वयोग्यत्वादिति विशेष इति भावः,

'उपरिष्टादुपपादयिष्यते'–१४।१५. इति कारिकाव्याख्यानावसरे मया, सारूप्यवैरूप्ये=केन धर्मेण तत्त्वानां परस्परं सादृश्यं, केन च धर्मेण परस्परवैलक्षण्यमित्येवं साधर्म्यवैधर्म्ये इत्यर्थः,

एते=सारूप्यवैरूप्ये तु उपरिष्टाद्=(१०।११) इति कारिकयोः विभजनीये=विभागयोग्ये, इति तत्रैव द्रष्टव्ये इत्यर्थः, ॥ ८ ॥

उत्तरकारिकाभूमिकामारचयति "कार्य्याद्" इति, कार्य्यदर्शनबलाद् अस्त्यस्य किञ्चित्कारणमित्येवं कारणमात्रं गम्यते=प्रतीयते न त्विदमस्य कारणमिति विशेषः प्रतीयते, तथा च न प्रधानकारणत्वनिश्चय इत्यर्थः,

भवतु कारणमात्रज्ञानं तथाप्यन्यस्य कारणस्यासत्त्वात्प्रधानकारणत्वनिश्चयो भविष्यति, इत्यत्राह–"सन्ति च" इति, अत्र=कारणविषये च वा-

---

(१) खण्डयति,

पत्तयः, तथाहि–केचिदाहुर् 'अतसः सञ्जायते' इति, 'एकस्य सतो विवर्तः कार्य्यजातं न वस्तु सद्' इत्यपरे ।

अन्ये तु 'सतोऽसज् जायते' इति, 'सतः सज् जायते' इति वृद्धाः ।

दिनां=तत्तद्दार्शनिकानां विप्रतिपत्तयः=विभिन्ना विभिन्ना मतयः सन्ति, तथा च न कारणविशेषावधारणमित्यर्थः,

ता[1] दर्शयितुमाह–"तथाहि" इति, विप्रतिपत्तीर्दर्शयामीत्यर्थः,

तत्र 'शून्यतैव जगतः परमार्थता' इति वदतां बौद्धानां मतमाह–"असतः सज् जायते" इति, अभावाद् भावो जायते इत्यर्थः,

विनष्टाद्धि किल बीजादङ्कुर उत्पद्यते, नष्टाच्च दुग्धाद् दधि, विनष्टाच्च मृत्पिण्डाद् घट इत्येवमभावग्रस्तेभ्यो बीजादिभ्योऽङ्कुराद्युत्पत्तिदर्शनात्, सर्वे कार्य्यरूपा भावा अभावकारणकाः कार्य्यत्वाद् बीजनाशोत्तरोत्पन्नाङ्कुरादिवद् इत्येवमनुमीयत इति हि सौगताकूतम् ।

तथा च बौद्धमतानुवादि न्यायदर्शने[2] पूर्वपक्षसूत्रम्–"अभावाद् भावोत्पत्तिर्नानुपमृद्य[3]प्रादुर्भावाद्" इति ।

ब्रह्मैवैकमनिर्वचनीयानाद्यविद्योपधानादनेकविधनामरूपप्रपञ्चात्मना विवर्तते रज्जुरिव सर्पमालाद्यात्मना, एकं मुखमिव चानेकमणिकृपाणदर्पणादिभेदादनेकविधप्रतिबिम्बात्मना, इति वदतां वेदान्तिनां मतमाह–"एकस्य सत" एति,

एकस्य=अद्वितीयस्य सतः=त्रैकालिकबाधविधुरस्य ब्रह्मणः विवर्तः=शुक्तेरिव रजतमतात्त्विकान्यथाप्रथात्मकं कार्य्यजातं=दृश्यमात्रं न वस्तुसत्=परमार्थतः सदित्यर्थः,

कणादाक्षपादयोर्मतमाह–"सतोऽसज् जायते" इति, सतः=भावरूपात्परमाण्वादेर् असत्=पूर्वमविद्यमानं द्व्यणुकादि जायत इत्यर्थः,

कापिलमतमाह–"सतः सज्जायत" इति, सतः भावरूपात्प्रधानादेः सद्=अनागतावस्थया कारणे विद्यमानमेव जायते=कारकव्यापारेणाभिव्यज्यत इति वृद्धाः=साङ्ख्याचार्य्या इत्यर्थः,

---

(१) ताः=विप्रतिपत्तीरित्यर्थः,

(२) अ. ४ आ. १ सू. १४ ।

(३) द्वौ नञौ प्रकृतार्थं द्रढयतः, बीजमुपमृद्यैवाङ्कुरप्रादुर्भावादित्यर्थः ।

तत्र पूर्वस्मिन् कल्पत्रये प्रधानं न सिध्यति, सुखदुःखमोहभेदवत्स्वरूपपरिणामशब्दाद्यात्मकत्वं हि जगत्कारणस्य प्रधानत्वं=सत्त्वरजस्तमःस्वभावत्वम् ।

एवं मतचतुष्टयं प्रदर्श्य साङ्ख्यातिरिक्तान्यमतानां प्रधानकारणत्वात्साधकत्वादनुपादेयतां तर्कयितुमाह–"तत्र पूर्वस्मिन् कल्पत्रये" इति, तत्र=पक्षचतुष्टयेषु, कार्य्यज्ञानेन यादृशं कारणं प्रधानं सिद्धं भवति तादृशं प्रधानमाद्यपक्षत्रये न निष्पद्यत इत्यर्थः,

कीदृक् प्रधानं कार्य्यलिङ्गकानुमानबलेन सिद्ध्यति यदन्यमते न सिद्ध्येद् इत्यत्राह–"सुखदुःखमोहभेदवत्स्वरूपपरिणामशब्दाद्यात्मकत्वम्" इति, सुखदुःखमोहरूपा ये भेदाः=विशेषास्ते विद्यन्ते यत्र तत् सुखदुःखमोहभेदवद्, एतादृशं स्वरूपं येषां ते सुखदुःखमोहभेदवत्स्वरूपा, एवंविधा ये परिणामाः=पञ्चतन्मात्रादिरूपशब्दाद्याः त एवात्मा=स्वरूपं यस्य तत् तथा, तस्य भावस्तत्त्वम्, एवंविधं हि जगत्कारणस्य प्रधानत्वं कार्य्यदर्शनात् सिद्ध्यति तच्चान्यमते नोपपद्यत इत्यर्थः,

प्र=प्रकर्षेण–वैषम्यावस्थापरिहारेण धीयन्ते=निधीयन्ते–विद्यन्ते सत्त्वादिगुणा यस्मिन् तत् प्रधानं तस्य भावः प्रधानत्वमित्याशयेन 'प्रधानत्वम्' इत्यस्य विवरणमाह "सत्वरजस्तमःस्वभावत्वम्" इति, सुखाद्यात्मकसत्त्वादिगुणस्वरूपत्वमित्यर्थः,

(शब्दाद्यात्मकं जगत्–सुखाद्यात्मककारणपूर्वकं तदन्वितत्वाद्-यद् यदन्वितं-तत् तथा-यथा मृदन्वितं घटादिकं मृत्कारणकं तथाचेदं तस्मात् तथा) इत्याद्यनुमानेनावगम्यमानं यत् सुखाद्यात्मकं त्रिगुणं प्रधानं कारणस्य कार्य्यात्मकत्वं च तदन्यमते न सिद्ध्यतीति भावः,

क्वचित् पुस्तके–"सुखदुःखमोहभेदवत्स्वरूपपरिणामशब्दाद्यात्मकम्" इति

---

(१) यादृशं=सुखाद्यात्मकं, सुखाद्यात्मककार्य्यदर्शनेन कारणमपि सुखाद्यात्मकमेव सिद्धं भवति नत्वन्यादृशमित्यर्थः, एतच्च पूर्वत्र (३) इति पृष्ठे व्यक्तम्,

(२) तथा=सुखदुःखमोहभेदवत्स्वरूपपरिणामशब्दाद्यात्मकमित्यर्थः,

(३) तथा=तादृगन्वितकारणपूर्वकम् ।

(४) तथा चेदं=सुखाद्यन्वितं चेदं जगत्, तस्मात् तथा=सुखाद्यात्मककारणपूर्वकम् ।

(५) एतदग्रे व्यक्तम्,

यदि पुनरसतः सज् जायेत असन्निरुपाख्यं कारणं कथं स्यात्, सदसतोस्तादात्म्यानुपपत्तेः ।

अथैकस्य सतो विवर्तः शब्दादिप्रपञ्चः, तथापि सतः सज् जायत इति न स्याद्,

---

भावप्रत्ययाघटितः पाठ उपलभ्यते, स चेत्थं व्याख्येयः–सुखाद्यात्मकं यज् जगत् तत् स्वकारणस्य सत्त्वरजस्तमःस्वरूपत्वम् अवगमयतीति शेषः,

तत्र बौद्धमते तावदेतादृक्प्रधानासिद्धिमाह–"यदि पुनर्" इति, असतः सज् जायत इति सौगतं मतं यद्यभ्युपेयेत तर्हि असद्=निरुपाख्यम्-अनिर्वचनीयमभावरूपं जगत्कारणमित्यापद्येत, तथाचैवंविधं कारणं भावात्मकसुखादिरूपशब्दाद्यात्मकं कथं स्याद्, न कथमपि स्यादित्यर्थः, तत्र हेतुमाह–"सदसतोर्" इति, भावाभावयोस्तादात्म्यस्यानुपपन्नत्वादित्यर्थः,

अत्राभेद एव तादात्म्यम्, अग्रिमनवमकारिकायां 'कार्य्यं कारणान्न भिन्नम्' इत्येवं कार्य्यकारणाभेदरूपतादात्म्यस्य विस्तरेण साधयिष्यमाणत्वाद्, योगभाष्यव्याख्यायां तु 'अनुभव एव हि धर्मिणो धर्मादीनां भेदाभेदौ व्यवस्थापयति' इत्यादिग्रन्थेन 'ऐकान्तिके कार्य्यकारणयोर्भेदे गवाश्ववत्कार्य्यकारणभावो न स्याद्, ऐकान्तिके चाभेदे इदमस्य कार्य्यमिति व्यवहारो न स्याद्' इति बोधयन्नयं मिश्रोऽविचारितभेदप्रतीतिसहकृताभेद एव कार्य्यकारणयोस्तादात्म्यमिति बोधयति, सर्वथापि न सदसतोस्तादात्म्यमिति बोध्यम् ।

यथा बौद्धमतेऽसता कारणेन सह न सत्कार्य्यस्य तादात्म्यमेवं वेदान्तिमतेऽपि सता कारणेन सह न भ्रममात्रशरीरस्यासतः कार्य्यस्य तादात्म्यमिति न तन्मतेपि प्रधानसिद्धिरित्याह "अथैकस्य" इति ।

तथापि=कारणस्य सद्रूपत्वेपि कार्य्यस्य गगनकुसुमकल्पत्वात् सतः

---

(१) शब्दाद्यात्मकत्वम्–इति 'त्व' प्रत्ययरहित इत्यर्थः,

(२) उपाख्या=उपाख्यानम्–इदमेतादृगिति वर्णनं, ततो निष्क्रान्तं निरुपाख्यम्–अलक्षणत्वेन निःस्वभावत्वेन चेदन्तया वक्तुमशक्यमित्यर्थः,

(३) पा. ३ सू. १३ ।

(४) धर्मिणः=मृत्पिण्डादेः सकाशाद धर्मादीनां=घटादीनाम् ।

(५) विचारे क्रियमाणे तु आम्राणां वनम् इत्यभेदेपि भेदव्यवहारदर्शनान्न व्यवहारबलेन कारणात् कार्य्यस्य भेद इत्याशयेनोक्तम्–'अविचारित' इति ।

न चास्याद्वयस्य प्रपञ्चात्मकत्वम्, अपित्वप्रपञ्चस्य प्रपञ्चात्मकतया प्रतीतिर्भ्रम एव ।

येषामपि कणभक्षाक्षचरणादीनां सत एव कारणादसतो जन्म तेषामपि सदसतोरेकत्वानुपपत्तेर्न कार्य्यात्मकं कारणम्, इति न तन्मते प्रधानसिद्धिर्,

---

सज् जायत इति न स्यात्, तथा च नैतन्मतेपि कार्य्यात्मकं कारणमिति सिद्ध्येत्, सदसतोस्तादात्म्यासम्भवादित्यर्थः,

ननु 'तदनन्यत्वम्' इति सूत्रेण भगवता व्यासेन (तस्मात्=कारणाद् अनन्यत्वम्=अन्यत्वाभावः-अभेदः कार्य्यस्य) इत्येवं प्रतिपादनात् कथं न वेदान्तिमते कार्य्यकारणयोस्तादात्म्यमित्यत्राह-"न चाऽस्याऽद्वयस्य" इति,

अस्याद्वयस्य ब्रह्मणः शब्दादिप्रपञ्चरूपेण परिणामित्वं नचाभ्युपेयते वेदान्तिभिरपि तु 'अशब्दमस्पर्शम्' इत्यादिश्रुत्या शब्दादिप्रपञ्चशून्यस्य तस्य प्रपञ्चात्मकतया भानं भ्रममात्रमिति मन्यत इत्यर्थः ।

'तदनन्यत्वम्' इति सूत्रांशेन नाभेद उच्यते किन्तु (तस्मात्कारणाद् ब्रह्मणः परमार्थतोऽनन्यत्वं=व्यतिरेकेण कार्य्यस्याभावः) इत्येवं कार्य्यस्यासत्त्वं प्रतिपाद्यते 'आरम्भणशब्दादिभ्यः' इति सूत्रशेषसूचितायां 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति श्रुतौ कारणीभूतमृत्तिकाया एव सत्यत्वावधारणेन कार्य्यस्य घटादेर्मिथ्यात्वप्रतिपादनेन विवर्तवादाश्रयणादिति भावः ।

तार्किकमतेपि न प्रधानसिद्धिरित्याह-"येषाम्" इति, कणभक्षः=वैशेषिकदर्शनकर्ता कणादमुनिः, अक्षचरणः=न्यायदर्शनकारो गोतममुनिः, आदिना प्रशस्तपाद-वात्स्यायनादयो मुनयो ग्राह्याः,

---

(१) सत इति शेषः,

(२) अ. २ । पा. २ । सू. १४ । आरम्भणशब्दादिभ्य इति सूत्रशेषः ।

(३) शाङ्करभाष्यस्थोयं पाठः,

(४) कार्य्यस्य मिथ्यात्वप्रतिपादने हेतुमाह "आरम्भण" इत्यादिना,

(५) वाचा केवलमारभ्यते विकारजातं नतु तत्त्वतोस्ति, यतो नामधेयमात्रमेतद्, यथा राहोः शिर इति विकल्पमात्रं, तथाचावस्तुतया विकारजातमनृतं, मृत्तिकेत्येव सत्यमित्यर्थः,

(६) आदिना=उद्योतकराचार्य्या ग्राह्याः,

अतः प्रधानसिद्ध्यर्थं प्रथमं तावत् सत्कार्य्यं प्रतिजानीते—"असदकरणाद्" इति,

असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात्,
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्य्यम् ॥ ९ ॥

सत्कार्य्यं—'कारणव्यापारात्प्रागपि' इति शेषः, तथाच न सिद्धसाधनं नैयायिकतनयैरुद्भावनीयम्,

यद्यपि बीजमृत्पिण्डादिप्रध्वंसानन्तरमङ्कुरघटाद्युत्पत्तिरुपलभ्यते तथापि न प्रध्वंसस्य कारणत्वम्, अपि तु भावस्यैव बीजाद्यवयवस्य,

---

एवमन्यमते प्रधानासिद्धिं प्रदर्श्य साङ्ख्यमते तत्साधयितुं तत्सिद्ध्युपयोगिनं सत्कार्य्यवादं साधयन्तीं कारिकामवतारयति-"अत" इति, यतः सत्कार्य्यवादातिरिक्तान्यवादे न प्रधानसिद्धिरत इत्यर्थः। प्रतिजानीते=अङ्गीकरोति,

ननु नैयायिकनयेपि कारणव्यापारादनन्तरं कार्य्यं सदेवेति सिद्धसाधनमेतद्, इत्यत आह—"कारणव्यापारात्प्रागपि" इति, अपिना-कारणव्यापारोत्तरमपि कार्य्यं सत, तत्रोत्तरकाले कार्य्यसत्तायां न तार्किकवैमत्यमिति कारणव्यापारात्प्रागपि कारणे कार्य्यं विद्यत इत्यस्माभिः साधनीयमतो नैयायिकतनयैः=तनयवत् तदनुगामिभिरत्र सिद्धसाधनं न प्रदर्शनीयमित्यर्थः,

स्वमतस्याऽदुष्टत्वव्यवस्थापनायान्यमतानां दुष्टत्वं प्रतिपादयितुमादौ बौद्धमतस्य दुष्टत्वमाह "यद्यपि" इति,

यदि बीजादिनाशोत्तरमङ्कुराद्युत्पत्तिस्तर्हि कथं न नाशस्य कारणत्वमित्यत्राह—"तथापि न" इति, कस्य तर्हि कारणत्वमित्यत्राह "अपितु" इति, बीजावयवा एव कुतश्चिन्निमित्तात्प्रादुर्भूतक्रियाः पूर्वव्यूहं जहति व्यूहान्तरं चापद्यन्ते तस्माद् व्यूहान्तराच्चाङ्कुर उत्पद्यत इति बीजावयवस्यैव कारणत्वं नाभावस्येत्यर्थः,

एतच्च "न विनष्टेभ्योऽनिष्पत्तेर्" इत्यादि न्यायसूत्रेषु स्फुटम्,

---

(१) व्यूहः—अवयवानां सन्निवेशविशेषः,

(२) अ. ४ आ. १ सू. १७ ।

अभावात्तु भावोत्पत्तौ तस्य सर्वत्र सुलभत्वात्सर्वत्र सर्व-कार्य्योत्पादप्रसङ्ग, इत्यादि न्यायवार्तिकतात्पर्य्यटीकायामभि-हितमस्माभिः ।

प्रपञ्चप्रत्ययश्चासति बाधके न शक्यो मिथ्येति वदितुम्,

अभावाद् भावोत्पत्तौ को दोषस्तत्राह—"अभावात्तु भावोत्पत्तौ तस्य सर्वत्र सुलभत्वात् सर्वत्र सर्वकार्योत्पादप्रसङ्ग" इति,

तथाचाहुश्शङ्कराचार्याः—(यद्यभावाद् भाव उत्पद्येत, अभावत्वाविशेषात्का-रणविशेषाभ्युपगमोऽनर्थकः स्याद्, नहि बीजादीनामुपमृदितानां योऽभाव-स्तस्य च शशविषाणादीनां च निःस्वभावत्वाविशेषादभावत्वे कश्चिद् विशेषो-ऽस्ति येन बीजादेवाङ्कुरो जायते क्षीरादेव दधीत्येवंजातीयकः कारणविशे-षाभ्युपगमोऽर्थवान् स्याद्, निर्विशेषस्य त्वभावस्य कारणत्वाभ्युपगमे शशविष-णादिभ्योऽप्यङ्कुरादयो जायेरन्, नचैवं दृश्यते) इति,

'यद् येनानन्वितं न तत् तस्य विकारो, यथा घटशरावोदञ्चनादयो हे-म्नानन्विता न हेमविकाराः, अनन्विताश्चेते विकारा अभावेन, तस्मान्नाभाव-विकाराः भावविकारास्तु ते, भावस्य तेनान्वितत्वाद्' इति भामत्यभिहिता-युक्तिरप्यत्रावसेया,

'नह्यनन्वयविनष्टयोः शालियवबीजयोः कश्चिद् विशेषोऽस्ति येनैकस्मा-च्छाल्यङ्कुरो नान्यस्माद्' इत्यादिना तात्पर्यटीकायामपि स्पष्टमेतद्, इत्याश-येनाह "इत्यादि न्यायवार्तिकतात्पर्य्यटीकायाम्" इति, इत्यादि=एवंविधं दूषणजातमित्यर्थः,

वेदान्तिमतमसङ्गतयितुमाह—"प्रपञ्चप्रत्ययश्च" इति, प्रत्यक्षादिप्रमाण-सिद्धशब्दादिप्रपञ्चानुभवश्च मिथ्येति वदितुं न शक्य इत्यर्थः,

ननु—प्रतीयमानत्वात् प्रपञ्चस्य न मिथ्यात्वमित्यभिधानमसमीचीनम्, प्रतीयमानस्यापि शुक्तिरजतादेर्मिथ्यात्वस्य सर्वसम्प्रतिपन्नत्वाद्, इत्याश-ङ्कायामाह "असति बाधके" इति, दृढतरबाधकप्रमाणासन्निधाने सतीत्यर्थः,

नेदं रजतमित्युत्तरज्ञानरूपबाधकस्य सत्त्वाद् युक्तं तत्र तत्प्रतीतेर्मिथ्यात्वमत्र तु न कोपि बाधक इति कथं मिथ्यात्वमिति भावः ।

---

(१) 'नाऽसतोऽदृष्टत्वाद्' अ. २ पा. २ । सू. २६ इति सूत्रभाष्य इति शेषः ।

(२) नह्यभावो विशिष्यते, विशेषणयोगे सोपि भावः स्यान्न निरुपाख्य इत्यर्थः.

(३) अ. ४ आ. १ सू. १८

(४) असङ्गतं कर्तुम्,

इति कणभक्षाक्षचरणमतमवशिष्यते,

ननु वाचारम्भणश्रुतिरेवात्र बाधिकेति चेद्, न, तस्याः प्रपञ्चमिथ्यात्वप्रतिपादने तात्पर्य्याऽभावात्, कुत्र तर्हि तात्पर्यमिति चेच्छृणु-रलयोरभेदविवक्षयाऽऽरभ्यते=आलभ्यते=स्पृश्यत इत्यारम्भणं बाहुलकात्कर्मणि ल्युट्,

वाचा इति तृतीयान्तपदं चात्राजहल्लक्षणया वाक्पूर्वकव्यवहारपरं, हेतौ चैषा तृतीया, हेतुत्वं चात्र प्रयोजनतया न कारणत्वेन, तथा च वाक्पूर्वेकेण 'अयं घटोऽनेन घटेनोदकमाहर' इत्यादि व्यवहारेण हेतुना-एतादृग्व्यवहारसिद्ध्यर्थं विकारः=पृथुबुध्नोदराकारत्वादिलक्षणः संस्थानविशेषः, तत्प्रयुक्तं च घट इति नामधेयम् आरम्भणम्=मृद्द्रव्येण स्पृश्यते-उदकाहरणादिव्यवहारविशेषसिद्ध्यर्थं मृद्द्रव्यमेव संस्थानान्तरनामधेयान्तरभाग् भवतीति यावद्, अतो घटाद्यपि मृत्तिका=मृद्द्रव्यम् इत्येव सत्यं=प्रमाणप्रतिपन्नं नतु घटादिकं द्रव्यान्तरमिति ।

कार्य्यस्य कारणात्मकत्वमेवानया श्रुत्या प्रतिपाद्यते न कार्य्यमिथ्यात्वमिति तत्त्वम् ।

अपि च-सामान्यतो ग्रहे रूपविशेषाग्रहे च तदन्यरूपेण विभ्रमो दृष्टः शुक्तिकादौ, न तु जातु शुक्तिरूपं जानन् रजतमिति विपर्यस्यति. न च निरंशे स्वसंवेदनप्रत्यक्षे ब्रह्मणि तत्स्वरूपाग्रहः सामान्यग्रहो वा भवतीति कथं निर्भागस्यैकस्य ब्रह्मणो विपरीतज्ञानगोचरत्वमसम्भव इति न युक्तिमदेतन्मतमिति ।

इत्थं मतद्वयनिरासमभिधायेदानीं परिशिष्टं तार्किकमतं निरसनीयमित्याह 'इति कणभक्षाक्षचरणमतमेवाऽवशिष्यते' इति, यतो मतद्वयमुक्तप्रका-

(१) आलम्भः स्पर्शहिंसयोरिति नैघण्टुकाः,

(२) वाचा=शब्देन, आरभ्यते=उत्पाद्यते इत्यर्थस्तु न युक्तः, घटादेर्मृदाद्यारभ्यत्वेन शब्दोपादानकत्वाभावाद् अत आरम्भणमत्रालम्भनमेवेत्यर्थः,

(३) 'कृत्यल्युटो बहुलम्' इति सूत्रेणेत्यर्थः,

(४) एषा=वाचा इति,

(५) अन्नेन वसतीतीव प्रयोजनार्थेऽत्र तृतीयेत्यर्थः,

(६) यदि मृत्तिकैव सत्त्यं न तु घटादिकमित्यर्थोऽभिमतो भवेत् 'तदा मृत्तिका सत्त्या' इति समानाधिकरणं प्रयुक्तं स्यात् तथा प्रयोगाभावाच्च नासावर्थ इत्याशयेन सत्यमित्यस्यार्थमाह-''प्रमाणप्रतिपन्नम्' इति,

(७) मतद्वयं=सौगतवेदान्तिनोर्मतमित्यर्थः ।

तत्रेदं प्रतिज्ञातं–"सत् कार्य्यम्" इति,

तत्र हेतुमाह–"असदकरणाद्" इति,

असच्चेत् कारणव्यापारात्पूर्वं कार्य्यं नास्य सत्त्वं कर्तुं केनापि शक्यं, नहि नीलं शिल्पिसहस्रेणापि पीतं कर्तुं शक्यते,

---

रेणासङ्गतम् इति=अतः तन्निरासे वक्तव्यत्वाभावात्केवलं कणादादिमतमेव निरसनीयत्वेन परिशिष्यत इत्यर्थः,

तर्ह्यवशेषाभावाय तदपि निरस्यतामित्याकाङ्क्षायां मूलकारिकाकृतैव त-न्मतस्य सविस्तरं निरस्यमानत्वान्न तन्मया निरस्यत इत्याह–"तत्रेदम्प्रति-ज्ञातम्" इति,

तत्र=तत्कणादादिमतनिरासार्थं, प्रतिज्ञातं=साध्यविशिष्टपक्षनिर्देशात्मकं प्रतिज्ञावाक्यमभिहितं, मूलकृतेति शेषः,

ननु न प्रतिज्ञामात्रेणार्थसिद्धिरित्यत्राह–"तत्र हेतुमाह" इति,

ननु पक्षधर्मत्वाभावात्कथमस्य हेतुत्वमिति चेत्, कार्यं सत् करणात्= क्रियमाणत्वाद् यन्न सत् तन्न क्रियमाणं यथा नीले पीतं नरविषाणं वा इति शेषवदनुमानप्रयोगे हेतुपयोगिव्यतिरेकव्याप्तिस्वरूपोपदर्शकत्वेनास्य हेतुत्वमिति गृहाण,

एतदभिप्रायेणैव व्यतिरेकव्याप्तिस्वरूपं स्पष्टयन् तस्यार्थमाह "असच्चेद्" इति।

ननु न वयं नरविषाणवदसत्स्वभावं विकारजातमिति मन्यामहे येन तद्वन्न क्रियेतेत्यनुयुज्येतापि तु सन् घटोऽसन् घट इत्यादिव्यवहारान्यथा-नुपपत्त्या सदसत्त्वे विकारजातस्य धर्मौ ते च स्वकारणाधीनलब्धजन्मतया कदाचिदेव भवत इत्यङ्गीकुर्महे, तथा च यथा घटे पाकात्पूर्वं श्यामता पाका-नन्तरं च रक्तता तथोत्पत्तेः प्राग्घटस्याऽसत्त्वं धर्मः पश्चाच्च तस्य सत्त्वं

---

(१) 'शक्यं पीतीकर्तुम्' इति पाठान्तरम्,

(२) कणादादिमतस्य,

(३) तत्रेति निमित्ते सप्तमी,

(४) असदकरणादित्यस्य,

(५) तद्वद्–नरविषाणवन्नोत्पद्येतेत्येवमाक्षिप्येत, ।

(६) मृत्पिण्डदशायां घटोऽसन्निति व्यवहारः, ।

(७) तेच=सदसत्त्वे च,

सदसत्त्वे घटस्य धर्माविति चेत्, तथाप्यसति धर्मिणि न तस्य धर्म इति सत्त्वं तदवस्थमेव तथा च नाऽसत्त्वम् ।

असंबद्धेनाऽतदात्मना चाऽसत्त्वेन कथमसन् घटः ।

धर्म इति न कोपि दोष इत्याशयेन शङ्कते–"सदसत्त्वे" इति,

यदि तयोर्धर्मत्वं तर्हि धर्मिरूपं वस्तु दण्डायमानं सदातनमिति न कस्यचित् तद् विकार इत्यापद्येत, अथासत्त्वसमये तन्नास्ति तर्हि कस्य धर्मोऽसत्त्वं, नह्यविद्यमाने धर्मिणि तद्धर्मो विद्यमान इत्युपपद्यत इत्याशयेनाशङ्कां निरस्यति–"तथापि" इति, सदसत्त्वयोर्धर्मत्वाङ्गीकारेपीत्यर्थः,

यतो धर्मिसत्त्वं विना धर्मसत्त्वमनुपपन्नम् इति=अतः सत्त्वं तदवस्थं=उत्पत्तेः प्रागपि कार्य्यस्य सत्त्वं स्थितं, तथा च न भवदभिमतं कार्य्यस्यासत्त्वं सिद्धमित्यर्थः,

किञ्च–उत्पत्तेः प्राग् घटोऽसन् इत्यभिधानमपि त्वन्मते न संघटत इत्याह "असंबद्धेन" इति,

धर्मिणा सहाऽसंबद्धेन असत्त्वेन=असत्त्वरूपधर्मेण कथमसन् घटः=असत्त्वरूपधर्माश्रयो घट इत्यभिधानं कथं, तथा–अतदात्मना–अतत्स्वरूपेण–धर्मिस्वरूपतयाऽविद्यमानेन चाऽसत्त्वेन कथमसन् घट इति न कथमपीत्यर्थः, ।

अत्रेदं बोध्यं–तार्किकमते नीलं कमलमित्यादौ गुणिरूपधर्मिणि समवायादिसंबन्धेन नीलगुणरूपधर्मस्य संबद्धत्वमादायाश्रयाश्रयिभावप्रतीतिः, साङ्ख्यादिनये तु धर्मधर्मिणोरभेदाद् धर्मिस्वरूपमेव धर्म इति तदात्मतया तत्प्रतीतिः, तत्र 'असंबद्धेनासत्त्वेने'ति कथनं तार्किकमताभिप्रायम्, 'अतदात्मना चासत्त्वेने'ति प्रकृतमताभिप्रायमिति, ।

---

(१) तयोः=सदसत्त्वयोः, ।

(२) तद्=धर्मिरूपं वस्तु, ।

(३) असंबद्धमसत्त्वरूपं धर्ममादायेत्यर्थः, ।

(४) तत्प्रतीतिः=आश्रयाश्रयिभावप्रतीतिः, ।

(५) यथा नीलं कमलमित्यस्य नीलगुणरूपधर्माश्रयः कमलमित्यर्थस्तथाऽसन् घट इत्यस्यापि असत्त्वधर्माश्रयो घट इत्यर्थो वाच्यः, स चानुपपन्नः कमलेन सह नीलस्येवाऽसता घटेन सहासत्त्वरूपधर्मस्याऽसंबद्धत्वादिति भावः ।

तस्मात्कारणव्यापारादूर्ध्वमिव ततः प्रागपि सदेव कार्य्य-मिति, ।

कारणाच्चास्य सतोभिव्यक्तिरेवावशिष्यते,

सतश्चाभिव्यक्तिरुपपन्ना, यथा पीडनेन तिलेषु तैलस्य, अवघातेन धान्येषु तण्डुलानां, दोहनेन सौरभेयीषु पयसः,

---

धर्मिसंबद्धेन धर्म्यात्मना वा विद्यमानेव धर्मेणैव तदाश्रयत्वनियमान्ना-त्रासंबद्धेनाऽतदात्मना वाऽसत्त्वेन धर्मेण तदाश्रयत्वसम्भव इति तत्त्वम्,

फलितमाह "तस्माद्" इति, ।

ननु एवं सति किमपरमवशिष्यते यत् कुलालादिव्यापारेण साध्यं, न च घटादिस्वरूपसिद्ध्यर्थः स इति वाच्यं भवन्मते तस्य प्रागेव सिद्धत्वात्, तथा च यथा प्राक्सिद्धत्वान्मृत्पिण्डादेः कारणस्य स्वरूपसिद्धये न कश्चिद् व्याप्रियते तथा प्राक् सिद्धत्वात्कार्य्यस्वरूपस्य तत्प्रसिद्धयेपि न कश्चिद् व्या-प्रियेत, व्याप्रियते च, अतः कारकव्यापारस्यार्थवत्त्वाय मन्यामहे प्रागुत्पत्तेर-भावः कार्य्यस्येत्याशङ्क्य कारकव्यापारस्याऽर्थवत्त्वमाह—"कारणाच्चास्य" इति,

चकारः पुनरर्थः, अस्य सतः=कारणव्यापारात्प्रागपि व्यवहारायोग्यसूक्ष्म-रूपेण सिद्धस्य कार्यस्य या व्यवहारयोग्यस्थूलरूपापादनरूपाभिव्यक्तिः सा पुनः कारणात्=कुलालादिव्यापाराद्भवति, इत्येवमभिव्यक्तिरेव साध्यत्वेनाव-शिष्यते नोत्पत्तिरित्यर्थः, ।

पृथुबुध्नोदरादिकार्य्याकारेण कारणं व्यवस्थापयतः कारकव्यापारस्य न वै-यर्थ्यमिति न तद्बलेनासत्कार्य्यवादसिद्धिरिति भावः,

असदेव कार्यं तस्मात् कुतो नाभिव्यज्यत इत्यत्राह "सतश्च' इति, पूर्व सत एव वस्तुनोऽभिव्यक्तिर्युक्ता नत्वसत इत्यर्थः ।

तत्र दृष्टान्तानाह "यथापीडनेन" इति, तैलस्य—तण्डुलानाम्-पयस—इति षष्ठ्यन्तत्रयस्याऽनुषक्तेन 'अभिव्यक्तिर्' इत्यनेनान्वयः, ।

---

(१) उत्पत्तेः प्रागपि कार्य्यस्य सत्त्वे सति,

(२) सः=कारकव्यापारः,

(३) व्यवहारः=उदकाहरणादिकार्यविशेषः,

(४) तद्बलेन=कारकव्यापारसद्भावबलेन,

(५) तस्मात्=कारणव्यापाराद्,

(६) तत्र=सतोभिव्यक्तौ,

(७) अनुषक्तेन=पूर्वस्मादनुवृत्तेन,

असतः करणे तु न निदर्शनं किञ्चिदस्ति, न खल्वभिव्यज्यमानं चोत्पद्यमानं वा क्वचिदसद् दृष्टम्।

इतश्च कारणव्यापारात्प्राक् सदेव कार्य्यम् 'उपादानग्रहणाद्'–उपादानानि=कारणानि तेषां ग्रहणं=कार्य्येण संबन्धः, उपादानैः कार्य्यस्य संबन्धादिति यावद्।

एतदुक्तं भवति–कार्य्येण संबद्धं कारणं कार्य्यस्य जनकं, संबन्धश्च कार्य्यस्याऽसतो न संभवति तस्मात् सदिति,।

सौरभेयीषु=सुरभेरपत्यभूतासु, गोषु इत्यर्थः।

असतोऽभिव्यक्तौ तु न कोपि दृष्टान्त इत्याह "असत" इति. करणे=अभिव्यक्तौ, निदर्शनं=दृष्टान्तः,।

एतदेव स्पष्टयति–"न खलु" इति, खलु इत्यवधारणार्थः. यद् वस्तु असत् तद् अभिव्यज्यमानं त्वन्मते चोत्पद्यमानं वा क्वचिदपि नैव दृष्टमित्यर्थः, एतेन "नाऽसदुत्पादो नृशृङ्गवद्" इति साङ्ख्यसूत्रं(१) व्याख्यातमिति बोध्यम्,

यदि नरविषाणमपि कारकव्यापारादूर्ध्वं व्यक्तमभविष्यत(२) तदाऽसत्कार्य्यमपि कारकव्यापारादूर्ध्वं व्यक्तं भविष्यति इतीदमप्युपापत्स्यत तच्चा(३)नुपपन्नमित्यसत्कार्य्यभवनमप्यनुपपन्नमिति भावः।

कार्य्यस्य सत्त्वे हेत्वन्तरमवतारयति "इतश्च" इति, इतश्च=वक्ष्यमाणहेतोरपीत्यर्थः,

फलितमाह—"उपादानैः कार्य्यस्य संबन्धाद्" इति,।

एतेन–'कार्य्यम् उपादाने सद् उपादानेन सह संबद्धत्वाद् यद् यत्र(४) न सद् न तत् तेन संबद्धं यथा मृत्तिकया पटादिकम्' इत्यनुमानमत्र दर्शितम्।

एतस्मिन्ननुमाने हेतोर(५)दुष्टत्वं स्पष्टयितुमाह "एतदुक्तं भवति" इत्यादिना, 'कार्य्येण संबद्धमेव कारणं कार्य्यजनकम्' इत्युक्त्या उत्पत्तेः प्राक् कार्यम्

---

(१) अ. १ सू. ११४।

(२) उपपन्नमभविष्यत्,

(३) तच्च=नरविषाणभवनं च,

(४) यत्र=यस्मिन्नुपादाने,

(५) हेतोः=उपादानसंबद्धत्वादिति हेतोरित्यर्थः।

स्यादेतद्-असंबद्धमेव कारणैः कस्मात् कार्य्यं न जन्यते तथा चासदेवोत्पत्स्यतेऽतआह "सर्वसम्भवाभावाद्" इति, असंबद्धस्य जन्यत्वे असंबद्धत्वाविशेषेण सर्वं कार्यजातं सर्वस्माद् भवेद्, नचैतदस्ति, तस्मान्नासंबद्धमसंबद्धेन जन्यतेऽपि तु संबद्धं संबद्धेन जन्यत इति,

यथाहुः साङ्ख्यवृद्धाः-"असत्त्वे नास्ति संबन्धः कारणैः सत्त्वसङ्गिभिर्, असंबद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिर्" इति,

---

उपादानसंबद्धं तज्जन्यत्वाद् यच्च नोपादानसंबद्धं न तत्(१) तज्जन्यं यथा मृदः पटादिकम् इत्यनुमानमत्र सूचितमिति ज्ञेयम्,

एतस्मिन्ननुमाने विपक्षे(२) बाधकाभावमाशङ्कते-"स्यादेतद्" इत्यादिना,

विपक्षबाधकानुकूलतर्कप्रदर्शनपरं 'सर्वसंभवाभावाद्' इति हेतुपदं व्याचष्टे "असंबद्धस्य जन्यत्वे" इति, स्पष्टार्थोयं ग्रन्थः,

स्वोक्तार्थे वृद्धसम्मतिमाह-"यथाहुर्" इति, असत्त्वे=कार्य्यस्योत्पत्तेः प्रागविद्यमानत्वे सति तेषां कार्य्याणां सत्त्वसङ्गिभिः=सत्वधर्माश्रयैः कारणैः सह संबन्धो न स्यात्, सदसतोस्संबन्धानुपपत्तेः, कारणैरसंबद्धस्य च कार्यस्योत्पत्तिमिच्छतो मते, व्यवस्थितिः=मृद एव घटः कनकादेव कटकमित्येवंविधो नियमो न स्यादिति वृद्धोक्तेरर्थः,

घटपटाद्यर्थिभिर्(३)नरैः प्रतिनियतानि मृत्तन्त्वादीनि कारणानि गृह्यमाणानि लोके दृश्यन्ते, नहि घटार्थिना तन्तवो गृह्यन्ते नापि पटार्थिना मृदुपादीयते, तदेतन्नियतोपादानग्रहणमसत्कार्य्यवादे नो(४)पपद्यते, समाने हि सर्वत्र सर्वस्य कार्यस्याऽसत्त्वे सर्वं सर्वस्मादुत्पद्येतेति प्रतिनियतोपादानग्रहणं नोपपद्येत, तथा च प्रतिनियतोपादानग्रहणात् सर्वस्मात् सर्वोत्पत्त्यदर्शनाच्च नासत्कार्य्यमिति भावः,

---

(१) तत् कार्य्यं कार्य्यासंबद्धोपादानेन जन्यं न भवतीत्यर्थः,

(२) 'तज्जन्यत्वाद्' इति हेतुरस्तु 'उपादानसंबद्धम्' इति साध्यं माभूदित्येवंविधे विपक्ष इत्यर्थः,

(३) 'उपादानग्रहणात्,' 'सर्वसर्वसम्भवाभावाद्' इत्यनयोरभिप्रायान्तरमाह-"घटपटाद्यर्थिभिर्" इति,'

(४) प्रतिनियतोपादानग्रहणान्यथानुपपत्त्या कार्य्यं सदित्यर्थः, अनुपपन्नत्वे हेतुमाह "समाने हि" इति,

स्यादेतद्–असंबद्धमपि सत् तदेव करोति यत्र यत्कारणं शक्तं, शक्तिश्च कारणस्य कार्य्यदर्शनादवगम्यते, तेन नाऽव्यवस्थेत्यत आह–"शक्तस्य शक्यकरणाद्" इति ।

सा शक्तिः शक्तकारणाश्रया सर्वत्र वा स्यात्, शक्य एव वा सर्वत्र चेत्, तदवस्थैवाऽव्यवस्था, शक्ये चेद् कथमसति शक्ये तत्र इति वक्तव्यं,

---

एतेन 'उपादाननियमात्'[1] 'सर्वत्र सर्वदा सर्वाऽसम्भवाद्' इति साङ्ख्यसूत्रद्वयं व्याख्यातमिति ज्ञेयम् ,

कारणसंबद्धमेव कार्य्यं कार्यसंबद्धेन कारणेन जन्यते न त्वसंबद्धमसंबद्धेनान्यथाऽव्यवस्थेत्युक्तिममृष्यमाणोऽसत्कार्यवादी[2] शङ्कते "स्यादेतद्–असंबद्धमपि" इत्यादिना,

कार्य्येणासंबद्धमपि सत्कारणं तदेव कार्य्यं करोति यस्मिन् कार्य्ये यत्कारणं शक्तं=शक्तियुक्तं न सर्वमित्यर्थः,

शक्तौ प्रमाणमाह="शक्तिश्च" इति, कार्य्यनियामकः कश्चिदतिशयविशेषः–सामर्थ्यविशेषो वा शक्तिः, सा च कार्य्यदर्शनाद्=मृद एव घटस्तन्तुभ्य एव च पट इति प्रतिनियतकार्य्योत्पत्त्यन्यथानुपपत्तिज्ञानाद्, अवगम्यते=अनुमीयत इत्यर्थः,

मूलमवतार्य्य[3] तद्योजनेनाशङ्कां परिहर्तुं विकल्पयति, "साशक्तिर्" इति,

शक्तकारणाश्रया=कार्य्यजननशक्तिमति कारणे वर्तमाना या शक्तिः सा किं सर्वत्र[4]=सर्वकार्य्यविषया–सर्वकार्य्यनिरूपिता वा स्याद्, उत शक्ये=यदुत्पादयितुं शक्यं कार्य्यं तद्विषया तन्निरूपितैव वा स्यात्, सर्वत्र चेत्, तर्हि सर्वं सर्वस्मात्संभवेदिति पूर्वोक्ताऽव्यवस्था तदवस्थैव भवेद्, शक्य एव सा शक्तिरिति चेत्, तर्हि अविद्यमाने शक्ये तत्र=तद्विषया तन्निरूपिता वा शक्तिरिति कथं वक्तव्यं स्याद् न कथमपि वक्तुमर्हम्, असतो विषयत्वाभावाद्, निरूपकत्वासंभवाच्चेत्यर्थः,

---

(१) अ. १। सू. ११५।११६।

(२) अमृष्यमाणः=असहमानः ।

(३) मूलं='शक्तस्य शक्यकरणाद्' इत्याकारं कारिकाभागमित्यर्थः,

(४) सर्वत्रेति सप्तमी विषयार्था,

शक्तिभेद एव स तादृशो यतः किञ्चिदेव कार्य्यं जनयेन्न सर्वमिति चेद्, हन्त भोः स शक्तिविशेषः कार्य्यसंबद्धो वाऽसंबद्धो वा, संबद्धत्वे नाऽसता संबन्ध इति सत्कार्य्यम्, असंबद्धत्वे सैवाऽव्यवस्था, इति सुष्ठूक्तं—"शक्तस्य शक्यकरणाद्" इति,

---

सतोरेव विषयविषयिभावसंबन्धो निरूप्यनिरूपकभावसंबन्धो वा न सदसतोरिति भावः,

शक्तिरपि कार्य्यसंबद्धैव कार्य्यं जनयेन्नासंबद्धेति सिद्धान्त्याशयमजानानस्तार्किकः पुनरपि रेकते(१) "शक्तिभेद एव" इति,

सिद्धान्ती प्राह—"हन्त भोः" इति, हन्त—इति हर्षार्थकमव्ययम्(२), अन्यत् स्पष्टम्,

उपसंहरति—"इति सुष्ठूक्तं 'शक्तस्य शक्यकरणाद्' इति, यतः शक्तं कारणं शक्तिसंबद्धमेव शक्यं करोति नासंबद्धम् इति=अतः शोभनमभिहितं कारिकाकृता 'शक्तस्य शक्यकरणाद्(३)' इतीत्यर्थः,

कारणे तदात्मना वर्तमाना कार्य्यस्याव्याकृतावस्थारूपाऽनागतावस्थैव कार्य्यनियामिका शक्तिः, तया संबद्धं कार्य्यं च शक्यमित्यनागतावस्थावत्त्वेन कारणे कार्य्यस्य सत्त्वान्न कार्य्यस्याऽसत्त्वमिति तत्त्वम्—,

तथा चाहुः शङ्कराचार्य्याः—(४)"शक्तिश्च कारणस्य कार्य्यनियमार्था कल्प्यमाना नाऽन्याऽसती वा कार्य्यं नियच्छेद्, असत्त्वाविशेषादन्यत्वाविशेषाच्च, तस्मात्कारणस्यात्मभूता शक्तिः शक्तेश्चात्मभूतं कार्य्यम्(५)" इति,

---

(१) रेकते=शङ्कते,

(२) हर्षश्च—स्वमतं स्थापयितुं तार्किकोऽशक्त इति सिद्धं समीहितमित्येतावनाऽत्र बोध्यः,

(३) कार्य्यशक्तिमत्त्वमेवोपादानकारणत्वम्, अन्यस्य दुर्वचत्वाद्, लाघवाच्च, सा शक्तिः कार्य्यस्यानागतावस्थैवेत्यतः शक्तस्य शक्यकार्य्यकरणान्नासत उत्पाद इत्यर्थः' इत्येतत्समानानुपूर्वीकसाङ्ख्यसूत्रे विज्ञानभिक्षवः,

(४) अ. २ पा. १।१८ इति ब्रह्मसूत्रभाष्ये,

(५)कार्य्यकारणाभ्यामन्या कार्य्यवदसती वा शक्तिः कार्य्यं न नियच्छेत्=कार्य्यनियामिका न संभवेद्, अन्यत्वासत्त्वयोः शक्तावन्यत्र चाविशेषाद्, यस्य कस्यचिदन्यस्य नरविषाणादेर्वा नियामकत्वप्रसङ्गाद्, अतःकारणस्यात्मभूता=कारणादभिन्ना शक्तिरुपेया शक्तेश्चात्मभूतं कार्य्यमुपेयं,कारणेऽव्यक्ततया स्थितं कार्य्यं कार्यस्यानागतावस्थैव वाऽभिव्यक्तिनियामकतया शक्तिर्न ततोऽन्या काचित् शक्तिरिति यावद्,

स्यादेतद्–असंबद्धमपि सत् तदेव करोति यत्र यत्कारणं शक्तं, शक्तिश्च कारणस्य कार्य्यदर्शनादवगम्यते, तेन नाव्यवस्थेत्यत आह–"शक्तस्य शक्यकरणाद्" इति ।

सा शक्तिः शक्तकारणाश्रया सर्वत्र वा स्यात्, शक्य एव वा सर्वत्र चेत्, तदवस्थैवाऽव्यवस्था, शक्ये चेद् कथमसति शक्ये तत्र इति वक्तव्यं,

एतेन 'उपादाननियमात्' 'सर्वत्र सर्वदा सर्वाऽसम्भवाद्' इति साङ्ख्यसूत्रद्वयं व्याख्यातमिति ज्ञेयम्,

कारणसंबद्धमेव कार्य्यं कार्य्यसंबद्धेन कारणेन जन्यते न त्वसंबद्धमसंबद्धेनान्यथाऽव्यवस्थेत्युक्तिममृष्यमाणोऽसत्कार्यवादी शङ्कते "स्यादेतद्–असंबद्धमपि" इत्यादिना,

कार्य्येणासंबद्धमपि सत्कारणं तदेव कार्य्यं करोति यस्मिन् कार्य्ये यत्कारणं शक्तं=शक्तियुक्तं न सर्वमित्यर्थः,

शक्तौ प्रमाणमाह="शक्तिश्च" इति, कार्य्यनियामकः कश्चिदतिशयविशेषः–सामर्थ्यविशेषो वा शक्तिः, सा च कार्य्यदर्शनाद्=मृद एव घटस्तन्तुभ्य एव च पट इति प्रतिनियतकार्य्योत्पत्त्यन्यथानुपपत्तिज्ञानाद्, अवगम्यते=अनुमीयत इत्यर्थः,

मूलमवतार्य्य तद्योजनेनाशङ्कां परिहर्तुं विकल्पयति, "साशक्तिर्" इति,

शक्तकारणाश्रया=कार्य्यजननशक्तिमति कारणे वर्तमाना या शक्तिः सा किं सर्वत्र=सर्वकार्य्यविषया–सर्वकार्य्यनिरूपिता वा स्याद्, उत शक्ये=यदुत्पादयितुं शक्यं कार्य्यं तद्विषया तन्निरूपितैव वा स्यात्, सर्वत्र चेत्, तर्हि सर्वं सर्वस्मात्संभवेदिति पूर्वोक्ताऽव्यवस्था तदवस्थैव भवेद्, शक्य एव सा शक्तिरिति चेत्, तर्हि अविद्यमाने शक्ये तत्र=तद्विषया तन्निरूपिता वा शक्तिरिति कथं वक्तव्यं स्याद् न कथमपि वक्तुमर्हम्, असतो विषयत्वाभावाद्, निरूपकत्वासंभवाच्चेत्यर्थः,

(१) अ. १। सू. ११५।११६।

(२) अमृष्यमाणः=असहमानः ।

(३) मूलं='शक्तस्य शक्यकरणाद्' इत्याकारं कारिकाभागमित्यर्थः,

(४) सर्वत्रेति सप्तमी विषयार्था,

शक्तिभेद एव स तादृशो यतः किञ्चिदेव कार्य्यं जनयेन्न सर्वमिति चेद्, हन्त भोः स शक्तिविशेषः कार्य्यसंबद्धो वाऽसंबद्धो वा, संबद्धत्वे नाऽसता संबन्ध इति सत्कार्य्यम्, असंबद्धत्वे सैवाऽव्यवस्था, इति सुष्ठूक्तं—"शक्तस्य शक्यकरणाद्" इति,

---

सतोरेव विषयविषयिभावसंबन्धो निरूप्यनिरूपकभावसंबन्धो वा न सदसतोरिति भावः,

शक्तिरपि कार्य्यसंबद्धैव कार्य्यं जनयेन्नासंबद्धेति सिद्धान्त्याशयमजानानस्तार्किकः पुनरपि रेकते[1] "शक्तिभेद एव" इति,

सिद्धान्ती प्राह—"हन्त भोर्" इति, हन्त—इति हर्षार्थकमव्ययम्[2], अन्यत् स्पष्टम्,

उपसंहरति—"इति सुष्ठूक्तं 'शक्तस्य शक्यकरणाद्' इति, यतः शक्तं कारणं शक्तिसंबद्धमेव शक्यं करोति नासंबद्धम् इति—अतः शोभनमभिहितं कारिकाकृता 'शक्तस्य शक्यकरणाद्[3]' इतीत्यर्थः,

कारणे तदात्मना वर्तमाना कार्य्यस्याव्याकृतावस्थारूपाऽनागतावस्थैव कार्य्यनियामिका शक्तिः, तया संबद्धं कार्य्यं च शक्यमित्यनागतावस्थावत्त्वेन कारणे कार्य्यस्य सत्त्वान्न कार्य्यस्याऽसत्त्वमिति तत्त्वम्—,

तथा चाहुः शङ्कराचार्य्याः[4]—"शक्तिश्च कारणस्य कार्य्यनियमार्था कल्प्यमाना नाऽन्याऽसती वा कार्य्यं नियच्छेद्, असत्त्वाविशेषादन्यत्वाविशेषाच्च, तस्मात्कारणस्यात्मभूता शक्तिः शक्तेश्चात्मभूतं कार्य्यम्[5]" इति,

---

(१) रेकते=शङ्कते,

(२) हर्षश्च—स्वमतं स्थापयितुं तार्किकोऽशक्त इति सिद्धं समीहितमित्येतावताऽत्र बोध्यः,

(३) कार्य्यशक्तिमत्त्वमेवोपादानकारणत्वम्, अन्यस्य दुर्वचत्वाद्, लाघवाच्च, सा शक्तिः कार्य्यस्यानागतावस्थैवेत्यतः शक्तस्य शक्यकार्य्यकरणान्नासत उत्पाद इत्यर्थः' इत्येतत्समानानुपूर्वीकसाङ्ख्यसूत्रे विज्ञानभिक्षवः,

(४) अ. २ पा. १११८ इति ब्रह्मसूत्रभाष्ये,

(५)कार्य्यकारणाभ्यामन्या कार्य्यवदसती वा शक्तिः कार्य्यं न नियच्छेत्=कार्य्यनियामिका न संभवेद्, अन्यत्वासत्त्वयोः शक्तावन्यत्र चाविशेषाद्, यस्य कस्यचिदन्यस्य नरविषाणादेर्वा नियामकत्वप्रसङ्गाद्, अतःकारणस्यात्मभूता=कारणादभिन्ना शक्तिरुपेया शक्तेश्चात्मभूतं कार्य्यमुपेयं,कारणेऽव्यक्ततया स्थितं कार्य्यं कार्यस्यानागतावस्थैव वाऽभिव्यक्तिनियामकतया शक्तिर्न ततोऽन्या काचित् शक्तिरिति यावद्,

इतश्च सत्कार्य्यमित्याह–"कारणभावाच्च"=कार्य्यस्य कारणात्मकत्वाद्, नहि कारणाद् भिन्नं कार्य्यं, कारणं च सद् इति कथं तदभिन्नं कार्य्यमसद् भवेत् ।

यदपि–'प्रागभावः कार्य्यनियामक[1] इति नाऽव्यवस्था' इति मतं, तदपि न पेशलम्[2], अभावे विशेषाभावेन तन्तौ घटादेरपि प्रागभावापत्तेर्दोषतादवस्थ्याद्[3], नच पटप्रतियोगिकः पटनिरूपितो वा प्रागभावः पटोत्पत्तिनियामक इति विशेष इति वाच्यम् । असतः पटादेः प्रतियोगित्वनिरूपकत्वादिधर्मासंभवात्, सदसतोस्संबन्धानुपपत्तेरिति[4] । किञ्च–उत्पत्तेः प्राक् कार्य्यस्यासत्त्वे घट उत्पद्यत इत्यभिधानमप्यनुपपन्नं स्याद्, उत्पत्तेः क्रियात्वेन क्रियायाश्च सकर्तृकत्वनियमेन[5] कर्तुरसत्त्वे निराश्रयायाः क्रियाया असम्भवाद्, जनिकर्तुर्जनेः प्राक् सत्त्वस्यावश्यकत्वाद्, अपि च कार्य्यस्यासत्त्वे योगिनाम[6]नागताविज्ञानं न स्यादिति, अधिकमन्यतो[7]ऽवसेयम्,

'सदेव सौम्येदमग्र आसीत्' 'तद्धेदं तर्ह्यव्याकृतमासीद्'[8] इत्याद्या आगमा अप्यत्रानुसन्धेयाः,

हेत्वन्तरमवतारयति "इतश्च" इति,

---

(१) यत्र कारणे यस्य प्रागभावस्तत्कारणं तस्य जनकमित्यर्थः,

(२) पेशलं=सुन्दरम्,

(३) यदि पुनरभावस्यापि विशेषोऽभ्युपगम्येतोत्पलादीनामिव नीलत्वादिस्ततो विशेषवत्त्वादेवाभावस्योत्पलादिवद् भावत्वं प्रसज्येतेत्यर्थः,

(४) तन्त्वनुत्पाददशायां पटप्रागभावः कुत्र वर्तत इत्यपि प्रष्टव्योसौ, नच काले वर्तत इति वाच्यम्, अभावे क्रियाऽभावेन तन्तावागमनाऽसम्भवादित्यपि ज्ञेयम्,

(५) क्रिया च नाम स्यादकर्तृका चेति विप्रतिपिद्धमिति भावः,

(६) योगिनां ज्ञानं हि प्रत्यक्षात्मकं तच्च विद्यमानालम्बनमसत्यालम्बने किंविषयं तत्स्यादिति भावः,

(७) अन्यतः=बृहदारण्यकप्रथमाध्यायद्वितीयब्राह्मणगतशाङ्करभाष्याद्, ब्रह्मसूत्रीयद्वितीयाध्यायाद्यपादस्थ १६–१७।१८।१९–२०इत्यादिसूत्रस्थभाष्याच्चेत्यर्थः,

(८) अग्रे=सृष्टेः प्राग् इदं दृश्यमानं जगत् सदेवासीन्नाऽसद् इति छान्दोग्यश्रुतेरर्थः, इदं=स्पष्टनामरूपं यज्जगत् तत् तर्हि=सृष्टेः=प्राग् अव्याकृतं=अनभिव्यक्तमासीद्, ह इत्यवधारणे, इति बृहदारण्यकश्रुतेरर्थः,

कार्य्यस्य कारणाभेदसाधनानि च प्रमाणानि–'न पटस्तन्तुभ्यो भिद्यते तद्धर्मत्वाद्–इह यद् यतो भिद्यते तत् तस्य धर्मो न भवति यथा गौरश्वस्य–धर्मश्च पटस्तन्तूनां–तस्मान्नार्थान्तरम् ।

उपादानोपादेयभावाच्च नार्थान्तरत्वं तन्तुपटयोः–ययोरर्थान्तरत्वं न तयोरुपादानोपादेयभावो यथा घटपटयोर्–उपादानोपादेयभावश्च तन्तुपटयोः–तस्मान्नार्थान्तरत्वमिति,

इतश्च नार्थान्तरत्वं तन्तुपटयोः–संयोगाऽप्राप्त्यभावाद्–अर्थान्तरत्वे हि संयोगो दृष्टो यथा कुण्डबदरयोर्–अप्राप्तिर्वा

'कार्य्यस्य कारणाभेदसाधनानि च प्रमाणानि'–मयाऽभिधीयन्त इति शेषः,

कानि तानीत्याकाङ्क्षायां परिशेषानुमानरूपप्रमाणप्रयोगानाह "न पटस्तन्तुभ्यो भिद्यत" इत्यादिना, प्रतिज्ञावाक्यमभिधाय हेतुवाक्यमाह "तद्धर्मत्वाद्" इति, तेषां तन्तूनां धर्मत्वात्–तदवस्थाविशेषात्मत्वादित्यर्थः,

व्यतिरेकव्याप्तिं दर्शयन्नुदाहरणवाक्यमाह–"इह यद् यत" इत्यादिना, तथा च व्यापकस्य तद्धर्मत्वाभावस्य पटे निवृत्त्या व्याप्तस्य भेदस्य निवृत्त्याऽभेदसिद्धिरिति,

पक्षे तद्धर्मत्वरूपहेतुसत्त्वप्रदर्शनपरमुपनयवाक्यमाह–"धर्मश्च पटस्तन्तूनाम्" इति,

निगमनवाक्यमाह "तस्मान्नार्थान्तरम्" इति, अन्योऽर्थः=पदार्थोऽर्थान्तरं तन्न, पटस्तन्तुभ्योऽन्यपदार्थो नेत्यर्थः, एवमग्रेऽपि न्यायाङ्गानि(१) योज्यानि,

प्रयोगान्तरमाह–"उपादानोपादेयभावाच्च" इति,

उपादीयते=कार्य्यजननाय गृह्यते यत् तदुपादानं=कार्य्यीयानागतावस्थाश्रयीभूतं कारणम्, उपादेयं=व्यवहारार्थिभिर्ग्रहीतुं योग्यं कार्य्यमित्यर्थः, 'संयोगाप्राप्त्यभावाद्' इति । अप्राप्तिः=विभागः, एवं च संयोगानाश्रितत्वाद् विभागानाश्रितत्वाच्चेति हेतुद्वयमत्र बोध्यम्,

'अप्राप्तिर्वा'–अत्र दृष्टा–इति विपरिणमय्य(२) योजनीयम्, नचेह संयो-

---

(१) न्यायो नाम प्रतिज्ञाद्यवयवसमुदायः,
(२) दृष्ट इति पुंलिङ्गपदं स्त्रीत्वेन विपरिणेयम्,

यथा हिमवद्विन्ध्ययोर्—नचेह संयोगाप्राप्ती, तस्मान्नार्थान्तरत्वमिति,

इतश्च पटस्तन्तुभ्यो न भिद्यते—गुरुत्वान्तरकार्य्याग्रहणाद्—इह यद् यस्माद् भिन्नं तस्मात् तस्य गुरुत्वान्तरकार्य्यं गृह्यते यथैकपलिकस्य स्वस्तिकस्य यो गुरुत्वकार्य्योऽवनतिविशेषस्तस्माद् द्विपलिकस्य स्वस्तिकस्य गुरुत्वकार्य्योऽवनतिभेदोऽधिकः—न च तथा तन्तुगुरुत्वकार्य्यात् पटगुरुत्वकार्य्यान्तरं दृश्यते—तस्मादभिन्नस्तन्तुभ्यः पट इति,

---

गाप्राप्ती'—दृश्येते इति शेषः, धर्मधर्मिणोरभेदस्येष्टत्वान्न गुणेषु व्यभिचार इत्यपि ज्ञेयम्,

'गुरुत्वान्तरकार्य्याग्रहणाद्' इति,—"गुरुत्वं जलभूम्योः पतनकर्मकारणम्' इति लक्षितः पदार्थनिष्ठधर्मविशेषो गुरुत्वं, तन्तुनिष्ठगुरुत्वापेक्षयाऽन्यद् गुरुत्वं गुरुत्वान्तरं—तस्य यत्कार्य्यम्=अधःपतनविशेषावनतिरूपं तस्य पटेऽग्रहणादित्यर्थः,

अयं भावः—तुलादण्डकोणद्वयनिबद्धरज्ज्वालम्बनं यच्छिक्यद्वयमस्ति तत्रैकत्र गुञ्जादि धृत्वाऽपरत्र शिक्ये तोलनीयं वस्त्ववस्थाप्यते, तत्र यदि गुञ्जादिनिष्ठगुरुत्वेन समं गुरुत्वं तोलनीये भवति तदा तुलादण्डो नाप्युन्नतो नाप्यवनतो वा भवति, यदा तु गुञ्जाद्याश्रितगुरुत्वापेक्षयाऽधिकं गुरुत्वं तोलनीये भवति तदा तदाश्रितगुरुत्वकार्य्याऽवनतिविशेषेणाधिकस्तुलादण्डोऽवनतो भवति, तथा च यदि पटस्तन्तुभ्यो भिन्नो भवेत् तदा तन्तुगुरुत्वकार्य्यापेक्षयाऽधिकः पटाश्रितगुरुत्वकार्य्योऽवनतिविशेषो गृह्येत तथा च न गृह्यते किन्तु तन्तुगुरुत्वेन यादृशोऽवनतिविशेषो जन्यते तादृश एव पटाश्रितगुरुत्वेनावनतिविशेषो जन्यते, तथा च समानगुरुत्ववत्त्वान्न पटस्तन्तुभ्यो भिन्न इति,

---

(१) तन्तुरूपादेरपि संयोगविभागादर्शनाद् रूपादेरपि तन्तुभ्यो भेदो न स्यादित्यत्राह—"धर्मधर्मिणोर्" इति

(२) प्रशस्तपादीयमिदं वाक्यं, तत्र जलभूम्योरित्याश्रयकथनं, पतनकर्मकारणमिति गुरुत्वस्य कार्य्यकथनम्—,

(३) तच्छब्देन परिच्छेद्यद्रव्यं ग्राह्यम्,

तान्येतान्यभेदसाधनान्यवीतानि,

एवमभेदे सिद्धे तन्तव एव तेन तेन संस्थानभेदेन परिणताः पटो न तन्तुभ्योऽर्थान्तरं पटः,

यद्यपि 'गुरुत्वान्तराग्रहणात्, 'समानगुरुत्ववत्त्वाद्' इति वा हेतुस्संभवति तथापि 'अप्रत्यक्षं पतनकर्मानुमेयम्' इत्युक्तेरतीन्द्रियत्वेन गुरुत्वस्य प्रत्यक्षेण ग्रहणासंभवात्पतनकार्य्यानुमेयं तदित्याशयेन कार्य्यपर्य्यन्तानुधावनं,

तत्र व्यतिरेकिदृष्टान्तमाह-"यथैकपलिकस्य" इति, अशीतिरक्तिकाया एकं तोलकं, तोलकचतुष्टयं चैकं पलं, तत्परिमितसुवर्णनिर्मितस्य स्वस्तिकाख्यभूषणविशेषस्येत्यर्थः,

'तन्तुगुरुत्वकार्य्याद्'=तन्तुनिष्ठगुरुत्वजन्यावनतिविशेषादन्यदवनमनं पटे न दृश्यत इत्यर्थः,

तन्तुपटयोस्तादात्म्यात् तन्तुगुरुत्वेनैव पटे पतनकर्मेत्यपि ज्ञेयम्,

एतेन यदत्र कन्दलीकृताभिहितम्-'पटे गुरुत्वान्तराभावे तस्य पतनं न स्याद्' इति. तन्निराकृतं, तन्तुगुरुत्वेनैव तत्तादात्म्यापन्नपटस्य पतनसम्भवाद् इति.

अत्र केचिद्-पटस्तन्तुभ्यो न भिद्यते गुरुत्वान्तरप्रयुक्तस्वाश्रिततुलादण्डाद्यवनतिविशेषग्रहणायोग्यत्वाद् गुरुत्वान्तरयुक्तस्वर्णादिवद्, तुल्यगुरुत्वयुक्ते पदार्थद्वये व्यभिचारवारणाय-ग्रहणायोग्यत्वाद् इत्युक्तं, तस्य च पृथक् तुलादण्डारोपणेऽवनत्यन्तरस्य ग्रहणसम्भवात्, तन्तुपटयोश्च न तथासम्भव इत्याहुः,

एते चानुमानप्रयोगाः "अर्थान्तरम्-अर्थान्तरस्यावयवो न भवति यथा न गौरश्वस्यावयवः-अवयवाश्च तन्तवोऽवयवी च पटः-तस्मान्नासौ तेभ्योऽर्थान्तरम्" इत्यादिना न्यायवार्तिके[3] विस्तरेण विचारिता इति तत्रैवोत्कण्ठा शमनीया,

'अस्य च व्यतिरेकिण उदाहरणमग्रेऽभिधास्यते' इति यत्पूर्वम्प्रतिज्ञातं तन्मयानुष्ठितमित्याह-"तान्येतानि" इति, अभेदसाधनानि=अभेदप्रमाकरणानीत्यर्थः, 'अभेदसाधकानि' इति पाठान्तरम्,

ननु तन्तुपटयोरैक्ये कथमिमे तन्तवः पटश्चायमिति संज्ञाभेदः, तत्राह "एवमभेदे सिद्धे" इति,

(१) प्रशस्तपादीयभाष्यमिदम्,

(२) गुरुत्वनिरूपणे काणादभाष्यटीकाकृता श्रीधराचार्य्येणेत्यर्थः,

(३) अ. २ आन्हि. १ सू. ३३ ।

स्वात्मनि क्रियानिरोधबुद्धिव्यपदेशार्थक्रियाव्यवस्थाभेदाश्च

तेन तेनाऽऽतानवितानरूपसंस्थानभेदेनावस्थान्तरं नीतास्तन्तव एव पटो न ततोऽर्थान्तरमित्यर्थः,

अवयवविन्यासविशेषसंस्थानभेदेन सञ्ज्ञाभेद इति भावः।

ये तु तार्किकाः 'अर्थान्तरं पटात् तन्तवः-तद्धेतुत्वात् तुर्य्यादिवदिति, तुर्य्यादि पटकारणमर्थान्तरमिति दृष्टं तथा च तन्तवः तस्मादर्थान्तरमिति, सामर्थ्यभेदाद् विषागदवद्, भिन्नप्रत्ययविषयत्वाद् रूपस्पर्शवद्' इति न्यायवार्तिकसरणिमनुसरन्तः 'पटस्तन्तुभ्यो भिद्यते तत्रोत्पन्नत्वेन तत्र नष्टत्वेन च प्रतीयमानत्वात्, बुद्धिभेदाद्, व्यपदेशभेदाच्च' इत्यादिप्रयोगैः पूर्वोक्ताभेदसाधकावीतप्रयोगान् सत्प्रतिपक्षितान् प्राहुस्तान् प्रत्याह—"स्वात्मनि क्रियानिरोध" इत्यादिना,

स्वात्मनि=अभिन्ने वस्तुनि, क्रिया=उत्पत्तिरूपा जनिक्रिया, निरोधः=प्रध्वंसरूपो नाशः, बुद्धिः=इमे तन्तवोऽयं च पट इति ज्ञानं, व्यपदेशः=तन्तुषु पट इति शाब्दो व्यवहारः, अर्थक्रिया=सामर्थ्यं, व्यवस्था=सामर्थ्यनियमः, तेषां भेदा बुद्धिव्यपदेशार्थक्रियाव्यवस्थाभेदाः, क्रियानिरोधौ च बुद्धिव्यपदेशार्थक्रियाव्यवस्थाभेदाश्च क्रियानिरोधबुद्धिव्यपदेशार्थक्रियाव्यवस्थाभेदा इति विग्रहः, भेदपदस्य च द्वन्द्वान्ते श्रूयमाणत्वात्प्रत्येकं बुद्ध्यादिपदचतुष्टयेनाऽन्वयः,

(१) यद्यपि कुत्रचित् 'क्रियाविरोधसंबन्ध' इति, कुत्रचिच्च 'क्रियानिरोधसंबन्धबुद्धिः' इत्येवं पाठभेदो दृश्यते तथाप्यग्रिमतदुपपादनपरसंदर्भानुसारेणायं पाठोऽत्र निवेशित इति बोध्यम्,

(२) अगदः=औषधम्,

(३) अ. २ आ. १ सू. ३६।

(४) यो न भिद्यते स तत्रोत्पन्नो न भवति यथा तन्तव इत्युदाहरणमत्र बोध्यम्,

(५) केनचिद् हेतुना प्रतिबद्धः सन् यो हेतुः स्वकार्य्यं कर्तुमशक्तः स सत्प्रतिपक्षित इत्युच्यते,

(६) व्यवस्थाशब्देन चात्र संनिहितत्वादर्थक्रियाव्यवस्था ग्राह्या, अर्थक्रियाव्यवस्थेति वा पठनीयम्।

(७) तथा च बुद्धिभेदः, व्यपदेशभेदः, अर्थक्रियाभेदः, व्यवस्थाभेद इत्यर्थोऽत्र फलितः,

नैकान्तिकं भेदं साधयितुमर्हन्ति, एकस्मिन्नपि तत्तद्विशेषाऽविर्भावतिरोभावाभ्यामेतेषामविरोधात्,

---

तन्तुपटयोरभेदे पटस्य तन्त्वात्मकत्वेन स्वस्मात्स्वस्योत्पत्तेरसम्भवात् स्वस्मिंश्च स्वस्य प्रध्वंसाघटनादुत्पन्नः पटः प्रध्वस्तः पट इत्युत्पत्तिनिरोधबुद्धिर्न स्यात्, एवं च दृश्यमानावुत्पत्तिध्वंसावभिन्नेऽनुपपन्नौ सन्तौ तन्तुपटयोर्भेदं साधयत इत्यत्र फलितम् ।

एवं बुद्धिभेदः पृथक् हेतुः, तथा च तन्तव इमे पटश्चायमिति ज्ञानवैलक्षण्यमपि तन्तुपटयोर्भेदसाधकम् ।

एवं व्यपदेशभेदः=कुण्डबदरयोरिव तन्तुषु पट इत्याधाराधेयरूपव्यवहारभेदोऽपि भेदसाधकः ।

एवम् अर्थक्रियाभेदः=तन्तुभिः पटः सीव्यते, पटेन च देह आव्रियते, इति कटपटवत्प्रयोजनोत्पादनभेदोऽपि भेदसाधकः ।

तथाऽर्थक्रियाव्यवस्था=विभिन्नप्रयोजनजनकत्वनियमोऽपि भेदसाधकः, कार्यकारणयोरभेदे हि मृत्पिण्डेनाप्युदकमाह्रियेत, घटेनापि च भित्तिः क्रियेत, तथा तन्तुभिरपि प्राव्रियेत पटेनापि च पट उत्पाद्येतेत्यव्यवस्थोपलभ्येत सा च नोपलभ्यतेऽतो भेद इत्यर्थः ।

एवंचाभेदेऽनुपपद्यमाना भेदे च घटमाना एते क्रियानिरोधबुद्धिव्यपदेशभेदादयो हेतवो यद्यपि कार्यकारणयोर्भेदं साधयन्ति तथापि ऐकान्तिकं=निर्णीतं पारमार्थिकं भेदं साधयितुं नार्हन्ति=न योग्या भवन्तीत्यर्थोऽत्र फलितः,

नार्हन्तीत्युक्तार्थे हेतुमाह–"एकस्मिन्नपि" इति, अभिन्नेऽपि वस्तुनि तत्तद्विशेषाऽऽविर्भावतिरोभावरूपोपाधिभेदेनौपाधिकं भेदमादायैतेषां हेतूनां चरितार्थत्वेन विरोधाभावान्न पारमार्थिकाभेदबाधन एतेषां सामर्थ्यमित्यर्थः,

---

(१) पटस्तन्तुतो भिन्नः–तत उत्पन्नत्वेन तत्र नष्टत्वेन च दृश्यमानत्वाद् यो न भिन्नो न स ततं उत्पद्यते यथा तन्तव इत्येवं साधयत इत्यर्थः,

(२) रूपरसवद् विभिन्नज्ञानविषयत्वात् तयोर्भेद इत्यर्थः,

(३) पदार्थफलितार्थमभिधाय वाक्यर्थफलितार्थमाह "एवंच" इति,

(४) क्रियानिरोधबुद्धिव्यपदेशभेदादिहेतूनामित्यर्थः,

यथा हि कूर्मस्याङ्गानि कूर्मशरीरे निविशमानानि तिरोभवन्ति निस्सरन्ति चाविर्भवन्ति न तु कूर्मतस्तदङ्गान्युत्पद्यन्ते प्रध्वंसन्ते वा, एवमेकस्या मृदः सुवर्णस्य वा घटमुकुटादयो विशेषा निस्सरन्त आविर्भवन्त उत्पद्यन्त इत्युच्यन्ते निविशमानाश्च तिरोभवन्तो विनश्यन्तीत्युच्यन्ते, न पुनरसतामुत्पादः सतां वा निरोधः,

यथाह भगवान् कृष्णद्वैपायनः—

"नासतो विद्यते भवो नाभावो विद्यते सतः" इति,

अन्यथोपपन्नानामेषां हेतूनां 'विकारो नामधेयं मृत्तिका' इतिश्रुत्यनुगृहीतैः पूर्वोक्तैर्हेतुभिस्सह समबलत्वाभावान्नैतैर्हेतुभिः पूर्वोक्तानां हेतूनां सत्प्रतिपक्षितत्वमिति भावः ।

एतदेव क्रमश उपपादयितुमादावुत्पत्तिप्रध्वंसबुद्धेरभेदेऽप्युपपन्नत्वमाह "यथाहि" इति,

निस्सरन्ति–इति शत्रन्तस्य प्रथमाबहुवचनम्, प्रध्वंसन्ते वा–इत्यत्र कूर्मशरीरे–इति शेषो ज्ञेयः,

निस्सरन्तः=मृदादिभ्यो निस्सरन्तः सन्त आविर्भावं प्राप्ता घटादय उत्पद्यन्त इत्युच्यन्ते, तथा मृदादिषु निविशमानाश्च सन्तः तिरोभवन्तः=अतीतावस्थां प्राप्ता घटादयो विनश्यन्तीत्युच्यन्त इत्यर्थः,

"न पुनरसतामुत्पाद" इति–असतां=प्रागभावप्रतियोगिनां घटादीनां कारणव्यापारादुत्पाद इति न च, सतामेव च तेषां प्रध्वंस इत्यपि न चेत्यर्थः,

उक्तार्थे भगवद्गीतावाक्यं प्रमाणयति–"नासतो विद्यते भाव" इति,

असतः=नरविषाणादेरिवाऽविद्यमानस्याऽर्थस्य भावः=सत्त्वं न विद्यते सतश्चासत्त्वं न सम्भवतीत्यर्थः ।

---

(१) अन्यथोपपन्नानाम्=औपाधिकभेदमादायापि चरितार्थानाम्,

(२) पूर्वोक्तैः=न पटस्तन्तुभ्यो भिद्यते तद्धर्मत्वादित्यादिना पूर्वमुक्तैः,

(३) यः किल निर्णयाय प्रयुक्तो हेतुस्तुल्यबलेनापरेण हेतुना प्रतिबद्धः सन्निर्णयं जनयितुमशक्तः स सत्प्रतिपक्षित इत्युच्यतेऽत्र च समबलत्वाभावान्न सत्प्रतिपक्षितत्वमिति भावः ।

(४) अ. २ श्लो. १३ ।

यथा कूर्मः स्वावयवेभ्यः संकोचविकाशिभ्यो न भिन्न एवं घटमुकुटादयोपि मृत्सुवर्णादिभ्यो न भिन्नाः,

एवं च—'इह तन्तुषु पट इति व्यपदेशोपि यथा इह वने तिलका' इत्युपपन्नः,

ननु मा भूतां घटादेरुत्पत्तिप्रध्वंसौ तथापि कथं मृद्घटयोरभेद इत्यत्राह "यथा कूर्म" इति,

'मृत्सुवर्णादिभ्यः=घटादेरतीतावस्थायां संकोचशालिभ्यो वर्तमानतावस्थायां च विकासशालिभ्यो मृत्सुवर्णादिभ्यो न भिन्ना घटादय इत्यर्थः,

आविर्भावरूपविकासशालिषु मृदादिषु सत्सु घटादय उत्पन्ना इति व्यवहारः, कार्य्यीयातीतावस्थारूपसंकोचशालिषु च मृदादिषु सत्सु घटादयः प्रध्वस्ता इति व्यवहार इति भावः ।

संस्थानभेदेनैकस्मिन्नप्युत्पत्तिनिरोधप्रत्ययस्योपपन्नत्वान्न तद्बलेन घटादीनां मृदादिभ्यो भिन्नत्वमिति तत्त्वम्,

पटीयानागतावस्थावत्सु तन्तुषु तन्तव इम इति प्रत्ययः, पटीयवर्तमानतावस्थावत्सु च तेषु पटोऽयमिति प्रत्यय इत्येकस्मिन्नपि विलक्षणबुद्धिबोध्यत्वस्योपपन्नत्वाद् 'विभिन्नप्रत्ययविषयत्वात् तन्तुपटयोर्भेद' इति न्यायवार्तिकाभिहितमपि न युक्तमित्यपि बोध्यम्,

एवमेव 'नहि पटाकारप्रत्ययस्तन्तुमात्रालम्बनो रण्डाकरण्डावस्थितेष्वपि तन्तुषु तत्प्रसङ्गाद्' इति तात्पर्य्यटीकोक्तमपि निराकृतं वेदितव्यं, रण्डाकरण्डावस्थितेषु तन्तुषु पटव्यवहारप्रयोजकावयवविन्यासविशेषाभावेन तत्र पटाकारप्रत्ययप्रसक्त्यभावाद्,

व्यपदेशभेदोपि न भेदसाधक इत्याह—"एवञ्च" इति, एवंच=एवमेव, व्यपदेशोपि—उपपन्न इत्यनेनान्वयः, तत्र दृष्टान्तः "यथेह वने तिलका इति" इति, तिलकनामकतरुसमुदायस्यैव वनत्वेन तिलकवनयोरभेदेपि यथाऽऽधाराधेयव्यवहारस्तथा प्रकृतेपीत्यर्थः,

एवमेवानेकेषु तन्तुष्वेकोऽयं पट इत्येकत्वव्यपदेशोऽप्येकप्रावरणलक्षणप्रयोजनावच्छेदाद्बोध्यो यथैकदेशकालावच्छिन्नेषु बहुष्वपि तरुष्विदमेकं वनमिति,

(१) उत्पत्तिप्रध्वंसदर्शनबलेनेत्यर्थः,

(२) रण्डा=मृतपतिकाऽबला, करण्डः=वंशादिरचितभाण्डविशेषः,

(३) अ. २ आ. १ सू. ३३ ।

न चाऽर्थक्रियाभेदोपि भेदमापादयति, एकस्यापि नानार्थक्रियादर्शनाद्, यथैक एव वह्निर्दाहकः पाचकः प्रकाशकश्चेति,

नाप्यर्थक्रियाव्यवस्था वस्तुभेदे हेतुः, तेषामेव समस्तव्यस्तानामर्थक्रियाव्यवस्थादर्शनाद्, यथा प्रत्येकं विष्टयो वर्त्मदर्शनलक्षणामर्थक्रियां कुर्वन्ति नतु शिबिकावहनं, मिलितास्तु शिबिकां वहन्ति, एवं तन्तवः प्रत्येकं प्रावरणमकुर्वाणा अपि मिलिता आविर्भूतपटभावाः प्रावरिष्यन्ति ।

विभिन्नकार्य्यकारित्वमपि न भेदसाधकमित्याह—"नचाऽर्थक्रियाभेदोपि" इति, 'सामर्थ्यभेदाद् विषागदवत् तन्तुपटयोर्भेद' इति न्यायवार्तिककृताऽभिहितोऽर्थक्रियाभेदोपि न भेदम् आपादयति=साधयति व्यभिचारादित्यर्थः,

व्यभिचारमेवाह—"एकस्यापि" इति, यत्र यत्र विभिन्नकार्य्यकारित्वं तत्र तत्र वस्तुभेद इति व्याप्तिर्न सार्वत्रिकीति भावः ।

तन्तुभिरेव सीवनं पटेन चैवाच्छादनमिति व्यवस्थापि न भेदनिर्वाहिकेत्याह—"नाप्यर्थक्रियाव्यवस्था" इति,

विष्टयः=कर्मकरा भृत्याः, वर्त्म=मार्गः, शिबिका=दोलाख्यो विमानविशेषः,

'आविर्भूतपटभावाः'=आविर्भावं प्राप्तः पटरूपो भावः=धर्मो येषु त आविर्भूतपटभावास्तन्तवः प्रावरिष्यन्ति=आच्छादयिष्यन्ति देहादिकमिति शेषः,

(अर्थक्रियायां च प्रत्येकमसमर्था अप्यनारभ्यैवार्थान्तरं किञ्चिन्मिलिताः कुर्वन्तो दृश्यन्ते यथा ग्रावाण उखाधारणमेकम्, एवमनारभ्यैवाऽर्थान्तरं तन्तवो मिलिताः प्रावरणमेकं करिष्यन्ति) इति भामत्युक्तः प्रकारोऽप्यत्रानुसन्धेयः ।

उत्पत्तेः प्राक् सदेव कार्य्यं कारकव्यापारेणाभिव्यज्यते दोहनेन दुग्धमिवेति पूर्वत्राभिहितं, तत्र येयमभिव्यक्तिः सा किं कारणव्यापारात्प्राक् सती वाऽसती वा, सती चेत् सर्वदोपलम्भप्रसङ्गः कार्य्यस्य, कारकव्यापारवैयर्थ्यं च, असती चेत् तर्हि यथाऽसत्येवाभिव्यक्तिः कारणाद् जायते तथा पटादि-

---

(१) ग्रावाणः=पाषाणाः, उखा=स्थाल्याख्यः पाकपात्रविशेषः,

(२) अ. १ पा. २ सू. १५ ।

स्यादेतद्, आविर्भावः पटस्य कारणव्यापारात्प्राक् सन्नसन् वा, असंश्चेत्, प्राप्तं तर्ह्यसदुत्पादनम्, अथ सन्, कृतं तर्हि कारणव्यापारेण, न हि सति कार्य्ये कारणव्यापारप्रयोजनं पश्यामः, आविर्भावे चाविर्भावान्तरकल्पनेऽनवस्थाप्रसङ्गः, तस्मादाविर्भूतपटभावास्तन्तवः क्रियन्त इति रिक्तं वचः ।

कार्यमप्यसदेव कारणव्यापारादुत्पद्येतेति सत्कार्य्यवादभङ्ग इत्याशयेन तार्किकः शङ्कते–"स्यादेद्" इति,

स्यादेतद्=अस्त्वेवं कार्य्यकारणयोः कथंचिदभेदस्तथाप्यन्यन्मया पृच्छ्यत इत्यर्थः,

तदेव पृच्छति–"आविर्भाव" इत्यादिना, 'कारणव्यापाराद्'–इत्युभयान्वयी, तथा च कारणव्यापाराद् यः पटस्याविर्भावो भवताऽभ्युपेयते स किं कारणव्यापारात्प्राक् सन् किं वाऽसन्नित्यत्र फलितम् ।

'कृतम्'–इत्यलमित्यर्थकर्मिति मेदिनी, कारकव्यापारेण कृतं=साध्यं नास्तीत्यर्थः. व्यर्थः कारणव्यापार इति यावद्, तत्र हेतुमाह–"न हि" इति, हि=यतः सति=विद्यमाने कार्य्ये सति कारणव्यापारप्रयोजनं न पश्यामोऽतः तद्व्यापारेणाऽलमित्यर्थः ।

आविर्भावोपि पूर्वमनभिव्यक्त इत्यनभिव्यक्ताविर्भावस्याऽऽविर्भावाय कारणव्यापार इति चेत् तर्ह्यनभिव्यक्ताविर्भावस्याऽऽविर्भावोपि पूर्वमनभिव्यक्त इति तस्याप्यन्य आविर्भावो वाच्य एवं तस्य तस्याप्यन्योन्य इत्यप्रामाणिक्याविर्भावधारा प्रसज्येतेति न कुत्रापि विश्रान्तिः स्यादित्याह–"आविर्भावे च" इति,

शङ्कामुपसंहरति–"तस्माद्" इति, कारणव्यापारेण तन्तुभ्योऽसन् पटो नोत्पाद्यतेऽपि तु तन्तव एव आविर्भूतपटभावास्तेन क्रियन्त इति यद् वचनं तद् रिक्तं=प्रमाणविधुरमित्यर्थः ।

"यत्रोभयोस्समो दोषः परिहारोऽपि वा समः, नैकः पर्य्यनुयोक्तव्यस्ता-

---

(१) तद्व्यापारेण=कारणव्यापारेण,

(२) आविर्भावत्वाविशेषाद्, यदनभिव्यक्तं तदेवाविर्भवतीति सिद्धान्ताच्चेत्यर्थः,

(३) तेन=कारणव्यापारेण,

(४) जैमिनीयप्रथमाध्यायाद्यपादीयपञ्चमसूत्रे शून्यवादप्रकरणे श्लोकवार्तिके तु 'तस्माद् यत्रोभयोर्दोषः' (२५२) इति पाठभेदो दृश्यते,

अथाऽसदुत्पद्यत इत्यत्रापि मते केयमसदुत्पत्तिः सती, असती वा, सती चेत्, कृतं तर्हि कारणैः, असती चेत्, तस्या अप्युत्पत्त्यन्तरमित्यनवस्था,

अथोत्पत्तिः पटान्नार्थान्तरम्—अपि तु पट एवासौ, तथापि यावदुक्तं भवति पट—इति तावदुक्तं भवति उत्पद्यते—इति,

---

द्वार्थविचारणे" इति न्यायेन मौनस्थानमेतादृक् प्रत्यवस्थानमित्याशयेन तार्किकं तूष्णीं कर्तुं प्रतिबन्दीं गृह्णाति सिद्धान्ती—"अथासदुत्पद्यत इत्यत्रापि मत" इति, तार्किकमतेपि इयमुत्पत्तिः किंरूपेत्यर्थः,

उत्पत्तिस्थानेऽस्माभिरभिपित्सायामभिव्यक्तौ यथेदं चोद्यं प्रसरति तथो-त्पत्तावपीदं चोद्यं दुरपनोद्यमिति भावः,

उत्पत्तिर्नामाद्यक्षणसंबन्धः, स च स्वरूपसंबन्धविशेषः नतु संयोगः, प्रध्वंसादावसंभवात्, स्वरूपसंबन्धश्चानुयोगिरूपः, अनुयोगी चात्र पटः, पटश्च कारणव्यापारात्प्रागनुत्पन्न इति तदनतिरेकिण्युत्पत्तिरप्यनुत्पन्ना, तथा-चानुत्पन्नपटानतिरिक्तोत्पत्त्युत्पत्तये कारणव्यापारः सार्थक इत्याशयेन ता-र्किकः प्राह—"अथोत्पत्तिः पटान्नार्थान्तरम्" इति,

सिद्धान्ती दूषयति—"तथापि" इति,

तथापि=एवं सति उत्पत्तिपटयोरेकार्थत्वेन पर्यायत्वाद् योऽर्थः पट— इत्यनेनाभिधीयते स एवोत्पद्यत—इत्यनेनाऽप्यभिधीयेत, ततश्च पट इत्युक्ते उत्पद्यत इति न वाच्यं=वक्तुं योग्यं भवेत्, पर्याययोः सहप्रयोगाभावेन पौनरुक्त्यापत्तेरित्यर्थः,

---

(१) प्रतीपमवस्थानं प्रत्यवस्थानं—प्रतिपक्षीभूय शङ्कनमिति यावद्, यत्र प्रत्य-वस्थाने शङ्कितुरपि गले दोष आपतेत् तत्र प्रत्यवतिष्ठमानेन मौनमेवास्थेयमित्यर्थः,

(२) यथा त्वया निर्वाह्यते तथा मयापि निर्वाह्यत इत्येवं प्रत्यवस्थानं प्रतिब-न्दिग्रहणम्.

(३) सती वाऽसतीवेत्याकारम् ।

(४) स्वसमानकालीनपदार्थप्रतियोगिकध्वंसानाधारसमयसंबन्ध इत्येतदर्थ इति कुसुमाञ्जलिप्रकाशे वर्द्धमानोपाध्यायः,

(५) उत्पत्तिमानभावः प्रध्वंसाभाव इति तार्किकमते ध्वंसस्योत्पत्तिमत्त्वेन ध्वं-साभावेन सहाद्यक्षणसंबन्धस्य संयोगादिरूपत्वासंभवेन तत्र स्वरूपसंबन्धस्यैव वक्तव्यत्वादित्यर्थः, गुणक्रिययोरुत्पत्तिस्थलेपि स्वरूपसंबन्धस्यैव सम्भवः,

ततश्च पट इत्युक्ते उत्पद्यते–इति न वाच्यं, पौनरुक्त्याद्, विनश्यति–इत्यपि न वाच्यम्, उत्पत्तिविनाशयोर्युगपदेकत्र विरोधात्।

तस्मादियं पटोत्पत्तिः स्वकारणसमवायो वा स्वसत्तासमवायो वा, उभयथापि नोत्पद्यते, अथ च तदर्थानि कारणानि

अनुवादाद्यतिरिक्तस्थले पौनरुक्त्यस्यानङ्गीकाराद्, घटो घट इतिवत् शाब्दबोधानुदयाच्च पट उत्पद्यते इति प्रयोगो भवन्मतेऽनुपपन्न इति भावः।

दूषणान्तरमाह–"विनश्यति" इति, पटो विनश्यतीत्यपि न वक्तुमर्हमित्यर्थः, तत्र हेतुमाह"उत्पत्तिविनाशयोर्" इति, पट–इत्यनेन हि उत्पद्यते–इत्यभिधीयते, विनश्यति इत्यनेन च ध्वंसते–इत्यभिधीयते, तथा च वर्तमानकालिकोत्पत्त्याश्रयो यः स वर्तमानकालिकध्वंसाश्रय इत्यर्थोऽत्रापद्येत, स च विरुद्ध इत्यर्थः,

पटो विनशिष्यति–इत्येवं कालान्तरे उत्पत्तिविनाशयोरेकस्मिन्नविरोधेऽपि समसमययोस्तयोस्सहावस्थानस्य न सम्भव इति बोधयितुं–'युगपद्' इति, एकस्मिन् काल इत्यर्थः,

पट–इत्यनेनोत्पत्तेरभिधानं विनश्यति–इत्यनेन च नाशस्याभिधानं तथा च उत्पत्तिश्च नाशश्चेत्यनन्विताभिधानमिदमापद्येतेत्यपि बोध्यम्,

कल्पान्तरानुसरणेपि न निस्तार इत्याह–"तस्माद्" इति, यतः पूर्वोक्तासम्भवः तस्मात्–स्वकारणसमवायः=पटस्य स्वकारणेषु तन्तुषु यस्समवायः सेयं पटोत्पत्तिर्–अथ वा स्वसत्तासमवायः=स्वस्मिन्=पटरूपे कार्ये यस्सत्ताजातेस्समवायः सा पटोत्पत्तिरित्येव भवता वाच्यम्–उभयथापि=प्रकारद्वयाऽभ्युपगमेपि नोत्पद्यते–उत्पत्तिर् इति शेषः,

समवायसंबन्धस्य नित्यत्वेन समवायरूपाया उत्पत्तेरपि नित्यत्वादुत्पत्तेरुत्पत्तेरनुपपन्नत्वादित्यर्थः,

---

(१) स्वकारणे कार्य्यस्य समवायो जन्म, स्वस्मिन्नसति कार्ये सत्तासमवायो वा जन्मेत्यर्थः, इत्येतत्समानभामतीपाठव्याख्याने कल्पतरुकारः,

(२) तयोः=उत्पत्तिविनाशयोः,

(३) यस्याः संबन्धे सति पटः सन्नित्यादिव्यवहारः सा सत्ताजातिरिति,

(४) असतः पटस्य कथं कारणे समवायः, कथं वाऽसति पटे सत्तासमवायः सदसतोस्संबन्धासंभवादित्येवमप्यसत्कार्य्यवादी प्रष्टव्यः,

व्यापार्य्यन्ते, एवं सत एव पटादेराविर्भावाय कारणापेक्षेत्युपपन्नम् ।

भवतूत्पत्तेरुत्पत्त्यभावस्तथापि भवता परच्छिद्रान्वेषणेन किं लब्धमित्याशङ्क्याह—"अथच" इति,

अथच=तथापि—सत्यप्येवमुत्पत्तेरुत्पत्त्यसम्भवेनोत्पत्तेः प्राक् सिद्धत्वे यथा भवन्मते तदर्थानि=उत्पत्तिप्रयोजनानि कारणानि व्यापार्य्यन्ते=व्याप्रियमाणानि क्रियन्ते कार्य्यार्थिभिर्जनैरिति शेषः, एवं=तथा मन्मतेपि सत एव=प्राक् सिद्धस्यैव पटादेराविर्भावाय कारणापेक्षेत्युपपन्नम् इति मया लब्धमित्यर्थः,

यथा भवन्मते समवायस्वरूपत्वेन प्राक्सिद्धाया एवोत्पत्तेरभिव्यक्तये कारणव्यापारस्तथाऽस्मन्मतेपि प्राक्सिद्धस्यैव कार्य्यस्याभिव्यक्तये कारणव्यापार इति न कारणव्यापाराऽऽनर्थक्यशङ्काकलङ्को मन्मत इति भावः,

ननु प्रतिबन्दिग्रहेण गृहीतस्सन् तार्किको यथाकथञ्चित् मौनं भजतु नाम तथापि आविर्भावस्य प्राक्सत्वेऽलं कारणव्यापारैः, असत्त्वे चाऽसत्कार्य्यवादप्रसङ्गः इति पूर्वोक्तापत्तेर्भवन्मते क उद्धार इति चेद्,

अत्र ब्रूमहे—(तदेतत् त्रैलोक्यं व्यक्तेरपैति, कस्माद् नित्यत्वप्रतिषेधाद्, अपेतमप्यस्ति विनाशप्रतिषेधात्, संसर्गाच्चास्य सौक्ष्म्यम्) इति योगभाष्यात् सर्वकार्य्याणामवस्थातोऽनित्यत्वेन स्वरूपेण च नित्यत्वेन सदसत्त्वाभ्युपगमेनावस्थानामुपजनाऽपायधर्मवत्त्वाङ्गीकाराद् व्यक्तावस्थाख्याऽऽविर्भावरूपाऽभिव्यक्तिरप्यसत्येवोत्पद्यत इत्यभ्युपगमे न काचिदापत्तिरिति, नचैताः

---

(१) कारणव्यापारात्प्राक् सिद्धे सति,

(२) तदेतत् त्रैलोक्यं=सर्वं कार्य्यकारणात्मकं वस्तु व्यक्तेः=वर्तमानावस्थातः अपैति=अपगच्छति कूटस्थनित्यत्वाभावेन वर्तमानतामपहायातीततां प्राप्नोति, अपेतम्=अतीतमपि कारणरूपेणास्ति, अत्यन्तोच्छेदाभावाद्, अपेतमप्यस्ति चेत् कार्य्यं कस्मात्पूर्ववन्नोपलभ्यत इत्यत्राह—'संसर्गाद्' इति, स्वकारणे लयात् सौक्ष्मं=दर्शनानर्हम् अतश्चानुपलब्धिरिति भाष्यार्थः । पा. ३ सू. १३ ।

(३) अनागतावस्थायां स्वरूपेण घटः सन् व्यक्तावस्थया चासन्, तथोत्पत्त्युत्तरं स्वरूपेण घटः सन्ननागतावस्थया चासन् तथा मुद्गरपातादिना घटस्यादर्शनेऽतीतावस्थया सन्नन्यावस्थया चासन्नित्येवमवस्थातो विनाशित्वं स्वरूपेण च नित्यत्वं सर्वकार्य्याणां बोध्यम् ।

(४) एतावता=असत्या एवाभिव्यक्तेरुत्पत्त्यङ्गीकारेणेत्यर्थः

न च पटरूपेण कारणानां संबन्धः,

वता सत्कार्य्यवादहानिः, सूक्ष्मावस्थाया एवास्मन्मतेऽसत्तारूपत्वाभ्युपगमाद्, नचैवं सत्यभिव्यक्तेरप्यभिव्यक्त्यङ्गीकारेणानवस्थापत्तिरिति शङ्क्यम्, अस्या अनवस्थायाः कपिलमुनिनाऽदोषत्ववचनात्,

तथा च साङ्ख्यसूत्रम्—"पारम्पर्य्यतोऽन्वेषणा बीजाङ्कुरवद्, इति" (अ. १ सू. १२२)

'पारम्पर्य्यतः=परम्परारूपेणैवाभिव्यक्तेरनुधावनं कर्तव्यं, बीजाङ्कुरवत् प्रामाणिकत्वेनास्या अदोषत्वादित्यर्थः, बीजाङ्कुराभ्यां चाऽत्रायमेव विशेषो यद्बीजाङ्कुरस्थले क्रमिकपरम्परयाऽनवस्था,ऽभिव्यक्तौ चैककालीनपरम्परयेति, प्रामाणिकत्वं तु तुल्यमेव, इति सूत्रार्थ इति विज्ञानभिक्षुः,

'सदेव सोम्येदमग्र आसीद्' इत्यागमप्रमाणसिद्धसत्कार्य्यवादपरिपालनपराया अस्याः परम्परायाः प्रामाणिकत्वमिति भावः,

यद्वा-(किमुत्पत्तिरुत्पद्यते न वा, उत्पद्यते चेद्, अस्या अप्युत्पत्तिरित्यनवस्था, नोत्पद्यते चेन, किमसत्त्वान्नित्यत्वाद्वा, यद्यसत्त्वाद् तर्हि न कदाचिदुत्पत्तिरिति सर्वदाऽनुपलम्भप्रसङ्गः अथ नित्यत्वान्नोत्पद्यते, तर्हि सर्वदा कार्य्योपलम्भप्रसङ्गः) इत्याशङ्कायां वैशेषिकादिभिः यथा (उत्पत्तेः स्वयमेवोत्पत्तिरूपत्वान्नोत्पत्त्यन्तरकल्पनावकाशः) इति समाधीयते तथाऽस्माभिरपि (अभिव्यक्तेः स्वयमेवाभिव्यक्तिरूपत्वान्नाभिव्यक्त्यन्तरकल्पनावकाशः) इति समाधीयत इति नात्र काचिदापत्तिः,

तथा च-साङ्ख्यसूत्रम्—"उत्पत्तिवद् वाऽदोषः" इति, अ. १ सू. १२३।
यथोत्पत्तेरुत्पत्त्यन्तरानभ्युपगमेन परमते नानवस्थादोषः तथाऽभिव्यक्तेरप्यभिव्यक्त्यन्तराऽस्वीकारेण नास्मन्मतेऽप्यनवस्थादोष इति-सूत्रार्थः,

विज्ञानभिक्षुस्तु यथा घटोत्पत्तेरुत्पत्तिः स्वरूपमेवेष्यते परैस्तथाऽस्माभि-

---

(१) कारणव्यापारेण या सूक्ष्माया अभिव्यक्तेरभिव्यक्तिः सापि पूर्वं सूक्ष्मा सत्येवाभिव्यज्यत इत्युपेयम्, अन्यथाऽसत्कार्य्यवादप्रसङ्गाद्, एवं तस्याः तस्या अभिव्यक्तेरन्याऽन्याऽभिव्यक्तिरवश्यम्भाविनी, तथा चानवस्थेत्यर्थः ।

(२) वृत्तिकारानिरुद्धानुसारेण सूत्रार्थमभिधाय साङ्ख्यप्रवचनभाष्यकारोक्तं सूत्रस्यार्थान्तरमभिधातुमाह—"विज्ञानभिक्षुस्तु" इति,

(३) यथा भवन्मते घटोत्पत्तेर्योत्पत्तिः सा घटोत्पत्तिस्वरूपैव न ततोऽन्या तथाऽस्मन्मतेपि घटाभिव्यक्तेरप्यभिव्यक्तिर्घटाभिव्यक्तिस्वरूपैव न ततोऽन्येति नानवस्थेत्यर्थः, वृत्तिकारेणोत्पत्तेरुत्पत्त्यन्तरविरह इवाभिव्यक्तेरप्यभिव्यक्तिविरह इति साम्यं दर्शितं, भाष्यकारेण तूत्पत्तेरुत्पत्त्यङ्गीकारेपि साम्यं दर्शितमिति विशेषः,

तद्रूपस्याक्रियात्वात्, क्रियासंबन्धित्वाच्च कारणानाम्, अन्यथा कारणत्वाभावात्, तस्मात्सत्कार्य्यमिति पुष्कलम् ॥९॥

रपि घटाभिव्यक्तेरप्यभिव्यक्तिः स्वरूपमेवेष्यते, ततो नानवस्थादोष, इत्येवं सूत्रार्थमभिधाय अथैवमभिव्यक्तेरभिव्यक्त्यनङ्गीकारे कारणव्यापारात्प्राक् तस्याः सत्त्वानुपपत्त्या सत्कार्य्यवादक्षतिर्, इत्याशङ्क्य अस्मिन् पक्षे सत एवाभिव्यक्तिरित्येव सत्कार्य्यसिद्धान्त इत्याशयाद्, अभिव्यक्तेश्चाभिव्यक्त्यभावेन तस्याः प्रागसत्त्वेपि नासत्कार्य्यवादत्वापत्तिर् इत्येवं समादधौ,

कार्य्याणामनागतावस्थैवाभिव्यक्तेरप्यनागतावस्था सैव चाभिव्यक्त्युपपत्तौ नियामिकेति नासतः नरविषाणादेरभिव्यक्तिरित्याशय इत्यन्यत्र विस्तरः ।

केचित्तु—व्यवहारोपयोगितत्तत्कार्य्याभिव्यक्तेस्तत्तत्कार्य्यनिष्ठसत्त्वगुणरूपतया नित्यत्वेपि तमसा प्रतिबद्धत्वान्न व्यवहारोपयोगित्वम्, अभिव्यञ्जकसामग्र्या तूत्तेजकेन मणेरिव तमसः प्रतिबन्धाद् व्यवहारक्षमत्वमिति सामग्र्या उत्तेजकत्वमात्राङ्गीकारात्सत्कार्य्यवादबाधाभावादित्याहुः ।

स्वकारणसमवायरूपाया उत्पत्तेः प्राक्सिद्धत्वेन न कारणव्यापारापेक्षा भवन्मतेपि युक्तेत्यभिहिते सति यदि कश्चिदेवं ब्रूयात्पटरूपं यत्प्रागसिद्धं तेन सहकारणसंबन्ध एव कार्य्यस्योत्पत्तिस्तथाच पटरूपस्य जननाय कारणव्यापारापेक्षेति, तदुक्तिरपि न युक्तेत्याह—"नच पटरूपेण कारणानां संबन्ध" इति,

पटरूपेण सह कारणसंबन्धो न युक्त इत्यत्र हेतुमाह—"तद्रूपस्याक्रियात्वाद्" इति, रूपस्य गुणत्वेन क्रियारूपत्वाभावादित्यर्थः,

ननु माभूत्पटरूपं क्रियारूपं तथापि कथं न तेन सह कारणसंबन्ध इत्यत्राह—"क्रियासंबन्धित्वाच्च कारणानाम्" इति, चकारो हेत्वर्थकः, कारणानि

(१) असत्या एवाभिव्यक्तेरुत्पत्तौ सत्यां नरविषाणादिकमप्यभिव्यज्येत, इत्याशङ्कामपनेतुमाह 'कार्य्याणाम्' इति,

(२) अन्यत्र=अ० २ पा० १ सू० १५ इत्यत्र श्रीभाष्ये, अ० २ पा० १ सू० २१ इत्यत्र विज्ञानामृतभाष्ये, पा० १ योगसू० १२ इत्यत्र योगवार्तिके चेत्यर्थः,

(३) साङ्ख्यचन्द्रिकाकारा नारायणतीर्थाः,

(४) कार्य्यानुकूलधर्मविघटकत्वं प्रतिबन्धकत्वं, प्रतिबन्धकप्रतिबन्धकत्वं चोत्तेजकत्वमिति बोध्यम्,

तदेवं प्रधानसाधनानुगुणं सत्कार्य्यमुपपाद्य यादृशं तत् प्रधानं साधनीयं तादृशमादर्शयितुं विवेकज्ञानोपयोगिनी सारूप्यवैरूप्ये तावदाह—"हेतुमद्" इति—

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥ १० ॥

व्यक्तं—हेतुमद्=हेतुः—कारणं तद्वद्, यस्य च यो हेतुस्तमुपरिष्टाद् वक्ष्यति ।

अनित्यं=विनाशि तिरोभावीति यावद्,

क्रियासंबद्धानि कारकत्वादन्यकारकवदित्यर्थः, विपक्षे बाधकमाह—"अन्यथा" इति, कारणानां क्रियासंबन्धित्वनियमाऽनङ्गीकारे क्रियाजनकत्वं कारकत्वमिति लक्षितं कारकत्वमेव भज्येतेत्यर्थः,

उपसंहरति—"तस्माद्" इति, यतः सत्कार्य्यवादे न कोपि दोषस्तस्मादुत्पत्तेः प्राक् कार्य्यं सदिति मतं पुष्कलं=प्रामाणिकत्वेन श्रेष्ठमित्यर्थः ॥ ९ ॥

वृत्तानुकीर्तनपुरस्सरमुत्तरार्य्यामवतारयति "तदेवम्" इति,

आर्य्यां विवृणोति—"व्यक्तम्" इति, व्यक्तं=प्रकृतिपुरुषातिरिक्तं महदादित्रयोविंशतितत्त्वमित्यर्थः, व्यक्तम्—इति लक्ष्यपदं विशेष्यं, हेतुमद् इत्यादीनि च सप्त पदानि लक्षणपरत्वेन विशेषणानीति ज्ञेयम्,

'तद्वत्'—तत्=कारणं विद्यत आविर्भावे यस्य तद्धेतुमत्, कदाचिदाविर्भावशीलमिति यावत्,

उपरिष्टाद्='प्रकृतेर्महान्' इति २२ कारिकायां वक्ष्यति—मूलकार इत्यर्थः, 'विनाशि'—'नाशः कारणलयः' इति सूत्रात्कारणे सूक्ष्मतयाऽवस्थानं नाशः तद्वत्—कदाचित् तिरोभावशीलमिति यावत्, तदेवाह "तिरोभावि" इति,

---

(१) विपक्षे=कारकत्वमस्तु क्रियासंबन्धित्वं माभूदित्येवंविधे विरुद्धपक्ष इत्यर्थः,

(२) करणकारकविशेषस्यैव कारणत्वेन क्रियाजनकत्वाभावे कारणत्वमेव न स्यादित्यर्थः,

(३) अ० १ सू० १२१ लीङ् श्लेषण इत्युक्तेर्लयः संश्लेषः नतूच्छेद इत्यर्थः,

अव्यापि=सर्वं परिणामिनं न व्याप्नोति, कारणेन हि कार्य्यमाविष्टं न कार्य्येण कारणं न च बुद्ध्यादयः प्रधानं वेविषन्तीत्यव्यापकाः ।

सक्रियं=परिस्पन्दवत्, तथा हि बुद्ध्यादय उपात्तमुपात्तं देहं त्यजन्ति देहान्तरं चोपाददत इति तेषां परिस्पन्द इति, शरीरपृथिव्यादीनां च परिस्पन्दः प्रसिद्ध एव ।

अनेकम्—प्रतिपुरुषं बुद्ध्यादीनां भेदात्, पृथिव्याद्यपि शरीरघटादिभेदेनानेकमेव,

---

अव्यापित्वे हेतुमाह—"कारणेन हि" इति, आविष्टं=व्याप्तम्, वेविषन्ति=व्याप्नुवन्ति, स्वस्वकार्य्यं व्याप्नुवदपि महदादिकं न प्रधानं व्याप्नोतीत्यव्यापकम्, असर्वगतमित्यर्थः,

'परिस्पन्दवत्'—परिस्पन्दः=प्रवेशनिस्सरणादिरूपा क्रिया, तद्वत्, तदेवाह—'उपात्तमुपात्तम्' इति, गृहीतं गृहीतमित्यर्थः, उपाददते=गृह्णन्ति, विज्ञानभिक्षुस्तु सक्रियत्वम्—अध्यवसायादिनियतकार्य्यकारित्वं, प्रधानस्य तु सर्वक्रियासाधारण्येन कारणत्वान्न कार्य्यैकदेशमात्रकारित्वं, नच क्रिया कर्मैव वक्तुं शक्यते, प्रकृतिक्षोभात् सृष्टिश्रवणेन प्रकृतेरपि कर्मवत्तयाऽत्र सक्रियत्वापत्तेर्' इत्याह,

क्षोभादिपरिणामलक्षणक्रियायाः प्रधाने सत्त्वेपि गमनागमनलक्षणपरिस्पन्दात्मकक्रियाया असत्त्वान्न प्रकृतावतिव्याप्तिरिति व्यर्थोयं भिक्षोः प्रयास इति बोध्यम् ।

'प्रतिपुरुषं'=पुरुषं पुरुषं प्रति बुद्ध्यादीनां भिन्नत्वाद् अनेकं=सजातीयभेदवद् इत्यर्थः, तत्त्वं चात्र स्वाश्रयप्रतियोगिकान्योन्याभावसमानाधिकरणतत्त्वविभाजकोपाधिमत्त्वं, संभवति चेदं महदादिषु, महदादिप्रतियोगिकान्योन्याभावेन सह महदन्तरादौ महत्त्वादेः सामानाधिकरण्यसत्त्वाद्,

---

(१) विष्लृ व्याप्ताविति धातो रूपमिदम्,

(२) तत्त्वंच=सजातीयभेदवत्त्वं च,

(३) स्वशब्देन महत्तत्त्वादिः, तस्याश्रयो महदादिः स प्रतियोगी यस्य तादृशो योऽन्योन्याभावस्तत्समानाधिकरणो यस्तत्त्वविभाजकोपाधिस्तादृशोपाधिमत्त्वमित्यर्थः, संभवति चेदं=इदं लक्षणं महदादौ समन्वेतीत्यर्थः,

'आश्रितं'=स्वकारणमाश्रितं बुद्ध्यादि, कार्य्याणामभेदेपि कथञ्चिद् भेदविवक्षयाऽऽश्रयाश्रयिभावः यथेह वने तिलका इत्युक्तः,

'लिङ्गम्'-प्रधानस्य, यथा चैते बुद्ध्यादयः प्रधानस्य लिङ्गं तथोपरिष्टाद् वक्ष्यति, प्रधानं तु न प्रधानस्य लिङ्गं पुरुषस्य लिङ्गं भवदपीति भावः,

'सावयवम्'=अवयवनम्-अवयवः-मिथःसंश्लेषः-मिश्रणं-संयोग इति यावद्, अप्राप्तिपूर्विका प्राप्तिः संयोगः, तेन सह

प्रकृतौ तु न संभवति,-प्रकृत्यन्योन्याभावस्य प्रकृतावसत्त्वात्, पुरुषे चानेकत्वमिष्टमेवेति न कोपि दोषः,

एतेन (अनेकत्वं सर्गभेदेन भिन्नत्वं-सर्गद्वयासाधारण्यमिति यावद्, न पुनः सजातीयानेकव्यक्तिकत्वं, प्रकृतावतिव्याप्तेः, प्रकृतेरपि सत्त्वाद्यनेकरूपत्वाद्) इति विज्ञानभिक्षूक्तमनादृतमिति बोध्यम्, प्रकृतेरनेकरूपत्वेप्यनेकव्यक्तिकत्वाभावेन प्रकृतिप्रतियोगिकान्योन्याभावस्य प्रकृतावसम्भवात्, किञ्च-'अजामेकाम्' इति श्रवणादप्रामाणिकं प्रकृतेरनेकव्यक्तिकत्वाभिधानमित्यस्थान एव व्यामोहो भिक्षोरिति,

"स्वकारणमाश्रितं"=महत्तत्त्वं स्वकारणं प्रधानमाश्रितम्, अहङ्कारतत्त्वं च महत्तत्त्वमाश्रितम्, इत्येवं सर्वं व्यक्तमाश्रितमित्यर्थः । 'आश्रयाश्रयिभावः' इत्यस्य उक्त इत्यनेनान्वयः,

'लिङ्गं'-लिङ्गयति=गमयतीति लिङ्गं-ज्ञापकं, कस्य ज्ञापकमित्यत्राह "प्रधानस्य" इति,

'उपरिष्टाद्'='भेदानां परिमाणाद्' १५ इत्यादिनेति शेषः,
अव्यक्तस्यापि पुरुषलिङ्गत्वस्याग्रे वक्ष्यमाणत्वात्कथं लिङ्गत्वस्य व्यक्तमात्रसाधर्म्यमित्याशङ्कापाकरणाय-'प्रधानस्य लिङ्गम्' इति व्याख्यातमित्याशयेनाह— "प्रधानं तु" इति,

पुरुषस्य लिङ्गं भवदपि प्रधानं न प्रधानस्य लिङ्गमिति न प्रधानेऽतिप्रसङ्ग इत्यर्थः, स्वस्वकारणे लयगमनाद्वा लिङ्गं व्यक्तम्,

अवयवनम्=अवपूर्वकाद् 'यु मिश्रण' इति धातोर्ल्युटि रूपमिदम्,

---

(१) १७ इति कारिकायामित्यर्थः,

वर्तत इति सावयवं, तथाहि पृथिव्यादयः परस्परं संयुज्यन्ते, एवमन्येपि, नतु प्रधानस्य बुद्ध्यादिभिः संयोगः, तादात्म्याद्, नापि सत्त्वरजस्तमसां परस्परं संयोगः, अप्राप्तेरभावाद्,

'परतन्त्रम्'–बुद्ध्यादि, बुद्ध्या स्वकार्य्येऽहङ्कारे जनयितव्ये प्रकृत्याऽऽपूरोऽपेक्ष्यते, अन्यथा क्षीणा सती नालमहङ्कारं जनयितुमिति स्थितिः,

एवमहंकारादिभिरपि स्वकार्य्यजनने, इति सर्वं स्वकार्य्येषु प्रकृत्यापूरमपेक्षते–तेन परां प्रकृतिमपेक्षमाणं कारणमपि स्वकार्य्यजनने परतन्त्रं व्यक्तम्,

'विपरीतमव्यक्तं' व्यक्ताद्, अहेतुमद्, नित्यं, व्यापि, नि-

'सावयवं'=संयोगयोगि, संयोगस्यानुयोगि प्रतियोगि चेत्यर्थः,

अप्राप्तिपूर्विका प्राप्तिः संयोगः इत्यत्र 'अप्राप्तिपूर्विका' इति पदस्य कृत्यमाह–"ननु प्रधानस्य" इति, 'तादात्म्यात्'–तादात्म्यस्थले नित्यप्राप्तिमत्त्वेन प्राप्तेरप्राप्तिपूर्वकत्वाभावेन न प्रधानं संयोगस्य प्रतियोगीत्यर्थः,

नापि गुणत्रयसंयोगस्य प्रधानमनुयोगीत्याह "नापि" इति,

बुद्ध्यादीनां स्वस्वकार्य्यं प्रति स्वातन्त्र्येण कारणत्वात्कथं तेषां पारतन्त्र्यमित्याशङ्क्य पारतन्त्र्यं विशदयति, "बुद्ध्या स्वकार्य्ये" इति,

'प्रकृत्यापूरः=प्रकृत्यनुप्रवेशरूपं प्रकृतिसाहाय्यम्, अन्यथा=प्रकृतिसाहाय्यासत्त्वे, क्षीणा=असमर्था, नालम्=न शक्ता स्यादित्यर्थः,

स्वकार्य्यजनने–इत्यत्र 'प्रकृत्यापूरोऽपेक्ष्यते इत्यनुषञ्जनीयम्,

फलितमाह–"इति सर्वम्" इति, इति=यतः सर्वं व्यक्तं स्वकार्य्येषु जननीयेषु प्रकृत्यापूरमपेक्षते तेन हेतुना कारणमपि व्यक्तं परां प्रकृतिमपेक्षमाणं सत् स्वकार्य्यजनने परतन्त्रमित्यर्थः,

व्यक्तसाधर्म्यमभिधाय तद्वैधर्म्यमव्यक्ताख्यायां प्रकृतावाह–"विपरीतमव्यक्तम्" इति, कस्माद् विपरीतम् इत्यत्राह "व्यक्ताद्" इति,

अहेतुमद्=अजं–न कुतश्चिदाविर्भवतीति यावद्, नित्यं=निरन्तरसत्त्वेनाति-

---

(१) यस्य संयोगः स प्रतियोगी, यत्र च येन सह वा संयोगः सोऽनुयोगीत्यर्थः,

ष्क्रियं, यद्यप्यव्यक्तस्यास्ति परिणामलक्षणा क्रिया तथापि परिस्पन्दो नास्ति, एकम्, अनाश्रितम्, अलिङ्गम्, अनवयवं, स्वतन्त्रमव्यक्तम् ॥ १० ॥

तदनेन प्रबन्धेन व्यक्ताऽव्यक्तयोर्वैधर्म्यमुक्तं, सम्प्रति तयोस्साधर्म्यं पुरुषाच्च वैधर्म्यमाह–"त्रिगुणम्" इत्यादिना,

त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि,
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥ ११ ॥

त्रयो गुणाः सुखदुःखमोहा अस्येति त्रिगुणं,

रोभावि, व्यापि=परिणामजातव्यापकं, निष्क्रियं=परिस्पन्दहीनम्, एकं=सजातीयभेदविधुरम्, अनाश्रितं=क्वापि कारणे न वृत्तिमद्, अलिङ्गं=कारणाज्ञापकम्, अनवयवम्[1]=असंयोगि, स्वतन्त्रम्=अन्याचिदनपेक्षं सत् स्वकार्य्यजनने समर्थम् इत्यर्थः,

यद्यपि एकत्वमपहायान्येऽहेतुमत्त्वादयः सर्वेऽपि धर्माः पुरुषे वर्त्तन्ते तथापि त्रिगुणत्वे सतीत्येवं प्रत्येकं[2] विशेषणान्न पुरुषेऽतिप्रसङ्ग इति बोध्यम् ॥ १० ॥

वृत्तमनुकीर्त्योत्तराय्यांकृत्यमाह "सम्प्रति" इति, तयोः=व्यक्ताऽव्यक्तयोर्मिथः साधर्म्यं पुरुषाच्च तयोर्वैधर्म्यमाहेत्यर्थः,

'त्रिगुणम्' इत्यत्र गुणपदार्थमाह–"सुखदुःखमोहा" इति,

यद्यप्यत्र तन्त्रे सुखादिधर्मकं[3] सत्त्वादितत्त्वत्रयमेव पुरुषोपकरणत्वात्[4] पुरुषपशुबन्धकत्रिगुणात्मकमहदादिरज्जुनिर्मातृत्वाच्च गुणपदाभिधेयं न सुखादिकं धर्मजातं तथापि धर्मधर्मिणोरभेदमादाय सुखादयो धर्मा एवात्र गुणपदेनाभिप्रेता न सत्त्वादयो धर्मिण इति ज्ञेयम् ।

अत्रेदमाकूतं[5]–यद्यत्र गुणशब्देन सत्त्वरजस्तमांसि तत्त्वानि गृह्येरन् तर्हि

---

(१) सावयवं=शब्दादियुक्तम्, अनवयवं=शब्दस्पर्शादिशून्यमिति गौडपादाः,

(२) प्रत्येकं=त्रिगुणत्वे सत्यहेतुमत्, त्रिगुणत्वे सति नित्यमित्येवमित्यर्थः,

(३) सुखधर्मकं सत्त्वं, दुःखधर्मकं रजः, मोहधर्मकं तम इत्यर्थः,

(४) राजोपकरणेऽमात्ये गुणव्यवहारस्य प्रसिद्धत्वादित्यर्थः,

(५) गुणपदेन सत्त्वादीनां ग्रहणे का क्षतिरित्याकाङ्क्षायामाह–"अत्रेदमाकूतम्" इति, आकूतम्=अभिप्रायः,

तदनेन सुखादीनामात्मगुणत्वं पराभिमतमपाकृतम् ,

'त्रिगुणम्' इत्यस्य सत्त्वादिगुणत्रयाधारभूतं व्यक्तमव्यक्तं चेत्यर्थोऽत्र संपद्येत स चाऽनिष्टः व्यक्तस्य महदादेर्गुणत्रयाधारत्वेप्यव्यक्तस्य तथात्वाभावात् तत्राव्याप्तिप्रसङ्गात्, "सत्त्वादीनामतद्धर्मत्वं तद्रूपत्वाद्" इति कापिलसूत्रेण "एते गुणाः प्रधानशब्दवाच्या भवन्ति" इति योगभाष्येण चाव्यक्तस्य गुणत्रयात्मकत्वाभिधानेन प्रधाने गुणत्रयनिरूपिताऽऽधारताया असम्भवाद्, गुणशब्देन सुखादीनां ग्रहणे तु प्रधानस्यापि सत्त्वादिधर्मभूतसुखाद्याधारत्वसम्भवान्नाव्याप्तिरिति,

नन्वेवं "तस्मिंस्तस्मिंस्तु, तन्मात्रास्तेन तन्मात्रता स्मृता, न शान्ता नापि घोरास्ते न मूढाश्चाविशेषिण" इति विष्णुपुराणवाक्येन सूक्ष्मभूताख्यशब्दतन्मात्रादीनां पञ्चतत्त्वानां शान्तादिपदाभिधेयसुखादिधर्मविरहत्वाभिधानेन कथं तेषां सुखादिमत्त्वेन त्रिगुणत्वमिति चेद्

अत्रोच्यते=तेषामपि सुखादिमदहङ्कारपरिणामित्वेन सुखाद्याधारभूतपञ्च-

(१) तथात्वाभावाद्=गुणत्रयाधारत्वाभावादित्यर्थः,

(२) कथमव्यक्तस्य गुणत्रयाधारत्वाभाव इत्यत्राह—"सत्त्वादीनाम्" इति, सत्त्वादिगुणानां प्रकृतिधर्मत्वं नास्ति तेषां गुणानां प्रकृतिस्वरूपत्वादिति सूत्रार्थः (अ० ६ सू० ३९)

(३) पा० २ सू० १८ ।

(४) एवं=गुणपदेन सुखादीनां ग्रहणे, सत्त्वादीनामग्रहणे चेत्यर्थः,

(५) तेषु तेषु भूतेषु तन्मात्रास्तिष्ठन्तीति कृत्वा धर्मधर्म्यभेदाद्द्रव्याणामपि तन्मात्रता स्मृता; ते च पदार्थाः शान्तघोरमूढाख्यैः स्थूलगतशब्दादिविशेषैः शून्या एकरूपत्वात्, तथा च शान्तादिविशेषशून्यशब्दादिमत्त्वमेव भूतानां शब्दादितन्मात्रत्वमित्याशयः' इत्येतदर्थ इति साङ्ख्यप्रवचनभाष्यकारः (अ० १ सू० ६२)

(६) यान्येव वेदान्तिभिरपञ्चीकृतपञ्चभूतानि—सूक्ष्मभूतानि इति चाभिधीयन्ते तान्येव साङ्ख्यनये तन्मात्राणीति बोध्यम्—

(७) शान्तं=सुखं, घोरं=दुःखं, मूढं=मोह, इत्येवं शान्तादिपदाभिधेयं सुखादिकमित्यर्थः,

(८) तथा च तन्मात्रेष्वव्याप्तिनिरासाय गुणपदेन सत्त्वादय एव ग्राह्या न सुखादय इति शङ्काकूतम्—

(९) तेषां=पञ्चतन्मात्राणाम् ,

(१०) कारणगुणानुरूपत्वमेव कार्य्यस्येति नियमात् तन्मात्राणामपि स्वकारणवत् सुखादिमत्त्वमित्यर्थः,

महाभूतकारणत्वेन च सुखाद्याधारत्वावश्यम्भावेन त्रिगुणत्वमप्रत्यूहमिति, नच विष्णुपुराणवाक्यविरोधः, तस्याऽस्मदाद्युपभोगयोग्यस्पष्टसुखादिधर्मकशब्दाद्याधारभूतानि यानि स्थूलभूतानि तेभ्यो विलक्षणानि=अस्मदुपभोगायोग्यास्पष्टसुखादिमच्छब्दाद्याधारभूतानि सूक्ष्मभूतानि पञ्चतन्मात्राणीत्यर्थे तात्पर्य्याद्,

एतदुक्तं भवति-यथा स्थूलभूतेष्वाकाशादिषु विद्यमानाः शब्दस्पर्शादयः केचिच्छान्ताः(२) केचिच्च घोराः केचिच्च मूढा अस्माभिरुपलभ्यन्त उपभुज्यन्ते च न तथा सूक्ष्मभूतगतशब्दादिषु शान्तत्वादिकमस्माभिरनुभूयते तेषामतीन्द्रियत्वेन तद्गतशब्दादीनां शब्दादिगतशान्तत्वादिधर्माणां चास्मद्ग्रहणायोग्यत्वादिति,

यज्जातीयेषु शब्दादिषु व्यक्ताः शान्तत्वादयो विशेषा न तिष्ठन्ति तज्जातीयानां शब्दादीनामाधारभूतानि यानि सूक्ष्मद्रव्याणि तान्येव तन्मात्राणि ननु सर्वथैव शान्तत्वादिशून्यशब्दादिमन्ति तानीति(३) यावद्, युक्तं चैतद्(४)-अन्यथाऽनात्मजातस्य त्रिगुणत्ववादि 'त्रिगुणाचेतनत्वादिर्द्वयोर्(५)' इति कापिलं सूत्रं "न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः, सत्त्वं प्रकृतिजैर्मुक्तं यदेभिस्स्यात् त्रिभिर्गुणैर्(६)" इति भगवद्वचश्च पीड्येत, नच त्रयः सत्त्वादयो गुणा यस्मिंस्तत् त्रिगुणमित्यर्थाभिप्रायेणैतदिति(७) शङ्कनीयं सत्त्वादिसत्त्वे तद्धर्माणां सुखादीनामवश्यम्भावनियमाद् एतत्स्वीकारेपि(८) सुखादिधर्मविरहत्वाभिधानस्यासङ्गतत्वात्, तथा च मदुक्तैव व्यवस्था ज्यायसीति ज्ञेयम्-

एतेन(९) यद् विज्ञानभिक्षुणा (शान्तादिविशेषशून्यशब्दादिमत्त्वमेव भू-

---

(१) तन्मात्रेषु सुखादीनामसत्त्वे तत्कार्य्येषु स्थूलभूतेषु सुखादीनामाकस्मिकत्वप्रसङ्ग इति भावः,

(२) शान्ताः=सुखात्मकाः—सुखजनकाः, घोराः=दुःखात्मकाः—दुःखप्रदाः, मूढाः=मोहात्मकाः=मोहकरा इत्यर्थः,

(३) तानि=तन्मात्राणि,

(४) एतद्-स्थूलभूतेषु व्यक्ताः सुखादयः, तन्मात्रेषु चाव्यक्ताः सुखादय इत्यभिधानं युक्तमित्यर्थः, अन्यथा=तन्मात्रेषु सुखादिधर्माणामनङ्गीकारे,

(५) अ. १ सू. १२६-'द्वयोः=व्यक्ताव्यक्तयोस्त्रिगुणत्वादिकं साधर्म्यमित्यर्थः,

(६) भगवद्गीता अ. १८ श्लो० ४०

(७) एतत्=कापिलं सूत्रं भगवद्वचश्चेत्यर्थः,

(८) एतत्स्वीकारेपि=गुणशब्देन सत्त्वादीनां ग्रहणेपीत्यर्थः,

(९) एतेन=तन्मात्राणामपि सुखादिमत्त्वप्रदर्शनेन,

अविवेकि=यथा प्रधानं न स्वतो विविच्यते एवं महदादयोपि न प्रधानाद् विविच्यन्ते तदात्मकत्वाद्,

---

तानां शब्दादितन्मात्रत्वम्) इत्येवं तन्मात्राणां सुखादिधर्मशून्यत्वमभिहितं तद् भ्रान्तस्वान्तविलसितमिति बोध्यम्-

किञ्च (तन्मात्राणि च देवादिमात्रभोग्यत्वेन केवलं सुखात्मकान्येव सुखाधिक्याद्) इत्यग्रिमग्रन्थे [1]तत्र सुखाधिक्यकथनेन दुःखमोहयोरपि सद्भावमर्थाद् बोधयता भिक्षुणा कथमेतद्विरुद्धं सुखादिशून्यत्वमभिहितमिति प्रष्टव्यः स भिक्षुः,

तत्र सुखादिधर्मकसत्त्वादित्रयात्मकत्वेन प्रधानस्य त्रिगुणत्वं, तत्कार्यत्वेन च महदादीनां त्रिगुणत्वमिति विशेषः,

यथा च सर्वेषां भावानां सुखाद्यात्मकत्वं तथा कान्तादृष्टान्तेनाग्रे[2] व्यक्तम्,

त्रयः सत्त्वादयो गुणा यस्मिंस्तत् त्रिगुणमिति व्याख्याने तु [3]वने वृक्षवत् प्रधाने सत्त्वादीनामवस्थानं ज्ञेयम्-

ये तु "इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्" इति [4]न्यायसूत्रमनुसरन्तः सुखादीनात्मधर्मानाहुस्तान् प्रत्याह-"तदनेन" इति, अनेन=सुखादीनामात्मातिरिक्तव्यक्ताव्यक्तधर्मत्वकथनेन यत् पराभिमतं=तार्किकसम्मतं सुखादीनामात्मगुणत्वं तत् पराकृतं=निरस्तमित्यर्थः।

"असङ्गो ह्ययं पुरुषः" "साक्षी चेता केवलो निर्गुणश्च" इत्यादिश्रुतिविरोधान्न सुखादीनामात्मगुणत्वमिति भावः।

साधर्म्यान्तरबोधकं पदान्तरमवतारयति "अविवेकि" इति,

विवेकः=पृथग्भवनं न यस्य विद्यते तदविवेकि-प्रधानाभिन्नमिति यावत्, तदेवाह-"यथा प्रधानम्" इति, स्वतः=प्रधानाद् प्रधानं न विवि-

---

(१) तत्र=तन्मात्रेषु, सुखाधिक्ये सति दुःखमोहयोर्न्यूनत्वमर्थादायातमिति तयोरपि सद्भाव इत्यर्थः।

(२) अग्रे=१३ इति कारिकाविवरणे-

(३) यथा वृक्षसमूहरूपवनस्य वृक्षात्मकत्वेपि वने वृक्षा इति वनस्याधारत्वव्यवहारस्तथा सत्त्वादिसमूहरूपप्रधानस्य सत्त्वादिस्वरूपत्वेपि प्रधाने सत्त्वादयस्तिष्ठन्तीति प्रधानस्याधारत्वव्यवहार इत्यर्थः।

(४) अ. १ आ. १ सू. १०।

अथवा—सम्भूयकारिताऽत्राविवेकः[1], न हि किञ्चिदेकं पर्याप्तं स्वकार्य्येऽपि तु सम्भूय, तत्र नैकस्मात्कस्यचित्केनचित्सम्भव इति ।

ये त्वाहुर्—विज्ञानमेव हर्षविषादमोहशब्दाद्याकारं[2] न पुनरितोऽन्यस्तद्धर्मेति, तान् प्रत्याह—

"विषय"इति, विषयः=ग्राह्यः—विज्ञानाद् बहिरिति यावद्, अत एव 'सामान्यं'=साधारणम्—अनेकैः पुरुषैर्गृहीतमित्यर्थः ।

च्यते=भिद्यते स्वस्मिन् स्वस्य भेदासम्भवादित्यर्थः, महदादीनां प्रधानाभिन्नत्वे हेतुमाह 'तदात्मकत्वाद्' इति, कार्य्यकारणयोरभेदाभ्युपगमेन महदादीनां प्रधानात्मकत्वादित्यर्थः,

सम्भूयकारिता=परस्परसंमिश्रणपुरस्सरकार्य्यकरणशीलता, तत्र हेतुमाह-"नहि" इति, हि=यत एकं किञ्चित तत्त्वं स्वकार्य्ये=आत्मीयकार्य्यजनने न पर्य्याप्तं=शक्तम् अपि तु सम्भूय=मिलित्वाऽतो महदादेस्संहत्य कारितेत्यर्थः,

फलितमाह-"तत्र" इति, तत्र=एवं सति केनचित्प्रकारेण न कस्यचिदेकस्मात्संभवोऽस्तीत्यर्थः,

'विषय' इति पदस्यार्थमाख्यातुं तत्कृत्यमाह "ये त्वाहुर्" इति, ये=योगाचारानुसारिणो विज्ञानवादिनो बौद्धाः, हर्षः=सुखं विषादः=दुःखं मोहः प्रसिद्ध एतद्धर्मा[3] शब्दादिराकारो यस्य तद् हर्षविषादमोहशब्दाद्याकारं, विज्ञानमेव सुखादिधर्मकशब्दादिप्रपञ्चाकारधारि न पुनर् इतः=विज्ञानाद् अन्यः=बाह्यः शब्दादिप्रपञ्चः तद्धर्मा=सुखादिधर्मवानित्यर्थः,

कुम्भस्तम्भाद्याकारमान्तरं विज्ञानमेव वस्तु सन्न ततोऽन्यद् बाह्यं वस्तुजातं किमपि सदिति वदतः सौगतस्यायमाशयः—यथा हि स्वप्नस्थानं विज्ञानं विनैव बाह्येनार्थेन ग्राह्यग्राहकाकारं भवति यथा वा जागरितस्थानं मायामरीच्युदकशुक्तिरजतादिविज्ञानं बाह्यानालम्बनं तथाऽन्यदपि जागरितस्थानं कुम्भस्तम्भादिविज्ञानं न बाह्यालम्बनमित्यवगम्यते विज्ञानत्वावि-

---

(१) 'अविवेकिता' इति पाठान्तरम्,

(२) 'शब्दाद्यात्मकम्' इति क्वाचित्कः पाठः ।

(३) एतद्धर्मा=हर्षविषादमोहधर्मवानित्यर्थः, हर्षविषादमोहशब्दादि-इति शब्दादीनां हर्षादिरूपत्वाभिधानं च धर्मधर्मिणोरभेदमादायेति बोध्यम्,

विज्ञानाकारत्वे त्वसाधारण्याद्विज्ञानानां वृत्तिरूपाणां तेऽप्य-साधारणाः स्युः, (विज्ञानं यथा परेण न गृह्यते परबुद्धेर-प्रत्यक्षत्वादित्यभिप्रायः)

शेषादिति, विज्ञानवैचित्र्यं[2] च वासनावैचित्र्यादुपपन्नम्,

अपि च यद् येन नियतसहोपलम्भनं तत्ततो न भिद्यते यथैकस्माच्चन्द्र-मसो द्वितीयश्चन्द्रमा, नियतसहोपलम्भश्चार्थो ज्ञानेनेति न ततः स भिद्यत इति,

एतदुक्तं भवति–भेदो हि सहोपलम्भानियमेन व्याप्तोऽत एव भिन्नावश्विनौ[3] नावश्यं सहोपलभ्येते कदाचिदप्यपिधानेनान्यतरस्यैकस्य नक्षत्रस्योपलब्धेः, तथा च भेदव्यापकसहोपलम्भानियमविरुद्ध उपलभ्यमानो विज्ञानार्थयो-स्सहोपलम्भनियमस्तद्व्याप्यं भेदं निवर्तयतीति, तदुक्तं "सहोपलम्भनिय-माद‌भेदो नीलतद्धियोः, भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वये" इति,

'कुम्भादिकं विज्ञानाद् भिन्नं ग्राह्यत्वात् प्रदीपात् तत्प्रकाश्यपटादिवद्' इत्याद्यनुमानेन सौगतं मतमसङ्गतमित्याशयेनोक्तं विषय इतीत्याह–"तान् प्रत्याह विषय इति" इति,

'विज्ञानाद् बहिर्' इति, ग्राह्यत्वेन ग्राहकाद् विज्ञानाद् भिन्नः कुम्भादि-रर्थ इत्यर्थः,

अर्थस्य विज्ञानात्मकत्वेऽनुपपद्यमानं 'सामान्यम्' इति विशेषणान्तरम-वतारयति "अत एव सामान्यम्" इति, अतः=यतो विज्ञानाद्भिन्नं, साधा-रणं–पुरुषभेदेऽप्यभिन्नत्वेन सर्वपुरुषसाधारणमित्यर्थः, तदेवाह–"अनेकैः पुरुषैर्गृहीतम्" इति, बहुविज्ञानालम्बनीभूतमित्यर्थः ।

एकस्यैवार्थस्य यदनेकपुरुषग्राह्यत्वेन सर्वपुरुषसाधारण्यं प्रतीयते तद्वि-ज्ञानवादे नोपपद्येतेति भावः ।

कथंनोपपद्यत इत्यत्राह–"विज्ञानाकारत्वे तु" इति, घटाद्यर्थानां विज्ञा-नस्वरूपत्वे तु ते=अर्था अपि असाधारणाः=प्रतिपुरुषं भिन्नास्स्युर्न सर्वपुरु-

---

(१) ( ) एतच्चिह्नान्तःपाति पाठो न सार्वत्रिकः ।

(२) सर्वस्य विज्ञानमात्रत्वे कथमेकस्मिन् विज्ञाने नीलमिदं पीतमिदमिति वै-चित्र्यावभास इत्यत्राह "विज्ञानवैचित्र्यं च" इति, यथा स्वप्नादिषु विनैव बाह्यार्थं वासनानिमित्तं ज्ञानवैचित्र्यं तथा जागरितेपीत्यर्थः,

(३) अश्विनौ=अश्विन्याख्ये नक्षत्रे,

(४) एतेन ज्ञेयं ज्ञानादभिन्नं ज्ञानोपलम्भक्षणनियतोपलम्भग्राह्यत्वाद ज्ञानवदि-त्यनुमानमत्र सूचितमिति ज्ञेयम् ।

तथा च नर्तकीभ्रूलताभङ्ग एकस्मिन् बहूनां प्रतिसन्धानं युक्तम्, अन्यथा तन्न स्यादिति भावः।

पसाधारणा इत्यन्वयः, तत्र हेतुमाह—"असाधारण्याद् विज्ञानाम्" इति, बुद्धिवृत्तिरूपाणां विज्ञानानां प्रतिपुरुषं भिन्नत्वादित्यर्थः,

तदेव विशदयति—"विज्ञानं यथा" इति, यथा चैत्रीयं विज्ञानं परेण मैत्रेण न गृह्यते—परबुद्धेरन्यदीयविज्ञानस्यापरं प्रति प्रत्यक्षत्वायोगात् तथा तदभिन्नोऽर्थोऽप्यन्येन नैव गृह्येतेत्यर्थः।

तथाच विज्ञानाकारत्वेऽर्थस्यानेकैर्गृहीतत्वं न स्यादित्यत्र फलितम्,

मा भूदेकस्यार्थस्यानेकैर्ग्रहणमित्याशङ्क्याऽन्यथानुपपद्यमानं प्रतिसन्धानं तत्र साधकमाह—"तथाच" इति, तथाच=अर्थस्यानेकगृहीतत्वेन सर्वपुरुषसाधारण्येऽभ्युपगम्यमाने च एकस्मिन् नर्तनशीलाबलाविलसितकटाक्षविक्षेपरूपेऽभिनयविशेषेऽनेकेषां द्रष्टॄणां यद् युगपत्प्रतिसन्धानं तद् युक्तं भवतीत्यर्थः,

विपक्षे प्रतिसन्धानानुपपत्तिरूपं बाधकमाह—"अन्यथा" इति, अन्यथा=विज्ञानवदसाधारण्ये तु तत्=प्रतिसन्धानं युक्तं न स्यादित्यर्थः।

अयम्भावः—नर्तकीभ्रूभङ्गोत्तरं तद्द्रष्टॄणां भरतमतपरिचितानां चैत्रादीनां (दृष्टस्त्वया मैत्र नर्तक्या भ्रूभङ्ग आं दृष्टश्चैत्रापूर्वोयमभिनयः ततोऽपर आह दृष्टो मयाप्यसौ कुशलेयं भरतमतेऽबला) इत्येवं परस्परप्रतिसन्धानेन ह्येकस्यैवार्थस्यानेकैर्युगपद् गृहीतत्वरूपं सर्वपुरुषसाधारण्यमुपलभ्यते, यदि ह्यर्थो विज्ञानाकारस्स्यात् तर्हि चैत्रीयस्वप्रज्ञानविलसितस्यार्थस्य मैत्रेणाज्ञा-

(१) तत्र=अर्थस्यासाधारण्यप्रसङ्गे।

(२) विज्ञानादभिन्नः।

(३) अनेकैर्ग्रहणमन्तराऽघटमानम्।

(४) दृष्टस्य पुनरनुसन्धानरूपं स्मरणकल्पं ज्ञानान्तरं प्रतिसन्धानम्।

(५) तथाच—इत्यनेन नाऽव्यवहितस्याऽसाधारण्यप्रसङ्गस्य परामर्शोऽपि तु व्यवहितस्य साधारण्यस्याऽग्रिमवाक्यरचनानुरोधादित्याशयेन व्याचष्टे—"अर्थस्यानेकगृहीतत्वेन" इत्यादिना, 'तथाच' इत्यनेनासाधारण्यपरामर्शे तु (नर्तकीभ्रूलताभङ्ग एकस्मिन् बहूनां प्रतिसन्धानं युक्तं न स्याद्) इति पाठो युज्येत तथापाठाभावाच्चात्र व्यवहितपरामर्श इति ध्येयम्।

(६) विपक्षे=विज्ञानाकारत्वेनार्थस्यासाधारणत्वे।

(७) भरताचार्य्यप्रणीतनाट्यतन्त्राभिज्ञानामित्यर्थः।

नवदन्यदीयविज्ञानाकारस्यार्थस्यान्येन ग्रहीतुमशक्यत्वाद् यस्य विज्ञानस्याकारः सोर्थस्तेनैव स गृह्येत न सर्वैरिति प्रतिसन्धानबलेन प्रतीयमानं यद् युगपदेकस्यार्थस्यानेकगृहीतत्वं तत्तन्मते न युज्येतेति,

एतेन[1] (यः किलैकस्य विज्ञानेन कल्पितोऽर्थः स एवान्यैरपि ग्रहीष्यते इति केषाञ्चित्कल्पनाप्युच्छिन्ना ज्ञेया, तथा कल्पनायामेकस्मिन्नीलज्ञानवति सर्वेषां नीलज्ञानवत्त्वप्रसङ्गाच्च,

किञ्च यस्य नानात्वे यस्यैकत्वमवगतं तत्ततोऽत्यन्तं भिन्नं प्रतीतं 'तथा[3] नानागोव्यक्तिभ्य एकं गोत्वम् अवगतं च ज्ञाननानात्वेपि वस्त्वैक्यमिति तदपि ततो भिन्नं भवितुमर्हतीति,

तथा चाह स भगवान् पतञ्जलिः—"वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पन्थाः[4]" इति,

अयमर्थः—यत्र किलैकस्मिन्नेव योषिद्रूपे वस्तुनि रक्तद्विष्टविमूढानां जनानां विभिन्नानि सुखादिज्ञानानि जायमानान्युपलभ्यन्ते तत्र प्रमातॄणां परस्परप्रतिसन्धानाद्[6] वस्त्वैक्येपि ज्ञाननानात्वं दृश्यते, यदि हि वस्तु विज्ञानात्मकं भवेत् तर्हि विज्ञानस्यासाधारण्यादनेकविज्ञानालम्बनमेकं साधारणं वस्तु न सम्भवेद् अतः वस्तुनः साधारण्योपपत्तये विज्ञानातिरिक्तं तदभ्युपेयमिति,

साङ्ख्यपक्षे[7] यथैकस्यैव वस्तुनस्त्रैगुण्यपरिणामत्वेन त्रैरूप्यं तथाऽग्रे व्यक्तम्।

(१) एतेन=अन्यस्यग्रस्यान्येनाज्ञानादित्युक्तेन हेतुना, एकस्मिन्नीलज्ञानवति सर्वेषां नीलज्ञानवत्त्वप्रसङ्गरूपवक्ष्यमाणेन च हेतुना,

(२) तद्=एकत्ववद्, ततः=नानात्ववतः,

(३) 'यथा चैत्रस्य ज्ञानमेकमनेकेभ्यो देवदत्तविष्णुमित्रमैत्रप्रत्ययेभ्यो भिद्यते' इति वाचस्पतिमिश्रोक्तं वोदाहरणमत्र ज्ञेयम्,

(४) योग० पा० ४ सू० १५। योषित्पिण्डरूपवस्त्वैक्येपि चित्तभेदाद्=ज्ञानभेदात् तयोः=वस्तुज्ञानयोर्विभिन्नो मार्गः, एकत्वानेकत्वविरुद्धधर्मवतोर्वस्तुविज्ञानयोर्भेद इति यावद् इति सूत्रार्थः ।

(५) रक्तस्य तत्कान्तस्य तस्मिन् सुखज्ञानं=सुखवती स्त्र्याकारा वृत्तिः, द्विष्टस्य च सपत्नीजनादेस्तस्मिन् दुःखज्ञानं, विमूढस्य च कामुकस्य तस्मिन् विषादज्ञानमित्येवमेकस्मिन् ज्ञाननानात्वं दृश्यत इत्यर्थः,

(६) या त्वया दृष्टा सैव मयापीति प्रतिसन्धानमत्र ज्ञेयम्,

(७) विज्ञानातिरिक्तार्थवादिनामपि नये कथमेकस्मिन् ज्ञाननानात्वमित्यत्राह "साङ्ख्यपक्ष" इति, । अग्रे=(१३) इति कारिकायाम्,

अचेतनं—सर्व एव प्रधानबुद्ध्यादयोऽचेतना नतु वैनाशिकवच्चैतन्यं बुद्धेरित्यर्थः ।

यच्चोक्तं—'स्वप्नज्ञानवज् जागरितज्ञानमपि निरालम्बनम्' इति, तदपि न विचारसहं, स्वप्नजागरितप्रत्यययोर्बाधाबाधाभ्यां वैधर्म्यात्स्वप्नप्रत्ययदृष्टान्तेन जाग्रत्प्रत्ययस्य निरालम्बनत्वापादनस्याशक्यत्वात्,

तथाचाह कृष्णद्वैपायनो भगवान् "वैधर्म्याच्च न स्वप्नादिवद्" इति, एतदुक्तं भवति—विज्ञानवादिनापि हि जागरितप्रत्ययस्याबाधितत्वमवश्याभ्येयम् अन्यथा कथं स्वप्नप्रत्ययो निरालम्बन इति ज्ञायेत, जाग्रत्प्रत्ययेन बाधितत्वाद् हि स्वप्नप्रत्ययो निरालम्बन इत्यवगम्यते, यदि च जागरितप्रत्ययोपि बाधित एव भवेत तदा स्वप्नप्रत्ययस्यासौ बाधको न भवेद्, नहि बाध्यमेव बाधकं भवितुमर्हति एवञ्च स्वप्नप्रत्ययोपि न मिथ्येति साध्यविकलोऽसौ दृष्टान्त इति न किञ्चिदेतद् ।

यश्च ज्ञानार्थयोः सहोपलम्भनियमस्तेषां भ्रान्तिकारकः सोपि न विचारं सहते, तथाहि—यदि ज्ञानार्थयोः साहित्येनोपलम्भः सहोपलम्भस्तर्हि हेतुरेव विरुद्धः साहित्यस्याभेदविरुद्धभेदव्याप्तत्वेनाभेदे तदनुपपत्तेरर्थकोपलम्भनियमः तथापि न सह—शब्दस्यैकत्ववाचकत्वाभावाद् अस्तु वैकत्ववाचकत्वं, तथापि किमेकत्वेनोपलम्भ आहोस्विदेक उपलम्भो ज्ञानार्थयोरिति, न तावदाद्यः विषयस्य बाह्यतया ज्ञानस्य चान्तरतयैकत्वेनोपलम्भासम्भवाद्, न द्वितीय एकोपलम्भनियमस्योपायोपेयभावहेतुकत्वेनाभेदा-

(१) वैनाशिकः=बौद्धः ।

(२) अ० २ पा० २ सू० २९ ।

(३) एवञ्च=जागरितप्रत्ययस्यापि बाधितत्वेन स्वप्नप्रत्ययाबाधकत्वे सति,

(४) बाध्यत्वमेव मिथ्यात्वे प्रयोजकं न प्रत्ययत्वमिति भावः ।

(५) तेषां=बौद्धानाम् ।

(६) नच ज्ञानाकारत्वेनान्तर एव विषयो भ्रान्त्या बहिर्वदवभासते, 'यदन्तर्ज्ञेयतत्त्वं तद् बहिर्वदवभासत' इत्युक्तेरिति शङ्क्यम्, बाह्यार्थाभावे बहिर्वदित्युपमानोक्तेरयुक्तत्वाद, नहि चैत्रो वन्ध्यापुत्रवदवभासत इति प्रेक्षावान् कश्चिदाचक्षीतेत्यपि ज्ञेयम् ।

(७) यथा सर्वं चाक्षुषमालोकानुविद्धं नियमेन मनुजैरुपलभ्यते न तावतो घटादिकमालोकात्मकं भवत्यपि त्वालोको पायत्वान्नियम एवमिहापि ज्ञानार्थयोरुपायोपेयभावहेतुकः सहोपलम्भनियमो नाऽभेदहेतुक इति बोध्यमित्यर्थः ।

प्रसवधर्मि–प्रसवरूपो धर्मो यः सोऽस्यास्तीति प्रसवधर्मि, प्रसवधर्मेति वक्तव्ये मत्वर्थीयः प्रसवधर्मस्य नित्ययोगमा-

---

साधकत्वादित्यन्यत्र विस्तरः,

'प्रसवधर्मि' इति, प्रसवः=अन्याविर्भावहेतुत्वरूपः परिणामः, स एव धर्मः प्रसवधर्मः, सोऽस्यास्तीति प्रसवधर्मि, कर्मधारयान्मत्वर्थ इनिप्रत्यय इत्यर्थः, तदेवाह "प्रसवरूपो धर्म" इति,

ननु प्रसवो धर्मो यस्येत्येवं बहुव्रीहौ "धर्मादनिच् केवलाद्" इति समासान्तेनिचि प्रसवधर्मेति कथनेनैव प्रसवधर्मवत्तालाभाद् वृत्तिद्वयाश्रे-यणमसङ्गतं, तथाचाहुः शाब्दिकाः (न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकर) इति, इत्याशङ्कायामाह "प्रसवधर्मेतिवक्तव्य" इति, ।

प्रसवधर्मस्य प्रकृत्यादिधर्मिणा सह नित्यसंबन्धं कथयितुं मत्वर्थीय इनि-प्रत्यय इत्यर्थः,

'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने, संबन्धेऽस्तिविवक्षायां भवन्ति मतुबादय" इति वार्तिकादत्र नित्ययोग इनिरिति भावः ।

य एवार्थो बहुव्रीहिणा ज्ञायते स एवार्थो यदि कर्मधारयान्मत्वर्थीयेन बोध्येत तत्रैव कर्मधारयान्मत्वर्थीयो न युक्तो यत्र तु विशेषार्थबुबोधयि-षया कर्मधारयान्मत्वर्थीयः प्रयुज्यते तत्र स युक्त एव, 'बहुव्रीहिश्चेत् तदर्थ-प्रतिपत्तिकर' इत्यत्र (चेद्) इति पदोपादानस्वारस्यादिति तत्त्वम् ।

प्रसवधर्मस्य प्रधानादिषु नित्ययोगं स्पष्टयति "सरूपविरूपपरिणामाभ्यां कदाचिन्न वियुज्यत" इति,

(१) अन्यत्र=अ० २ पा० २ सू० २९ इत्यादि ब्रह्मसूत्रभाष्यभामत्यादिषु, 'किन्तु ग्राह्यग्राहकयोः परमार्थमनोरेवाभेदो विवक्षित' इत्यादिनात्मतत्त्वविवेके, निरालम्बनवादे श्लोकवार्तिके चेत्यर्थः ।

(२) अ० ५ । पा० ४। सू. १२४ प्रसवशब्दस्य नित्यसमस्तत्वेनैकपदत्वात्के-वलपदत्वं बोध्यम् ।

(३) पूर्वं कर्मधारयसमासरूपा वृत्तिः पुनश्चेनिप्रत्ययकरणेन तद्धितरूपा वृत्ति-रिति वृत्तिद्वयाश्रयणमित्यर्थः ।

(४) यदि बहुव्रीहिस्तदर्थजनको भवेत् तदा न कर्मधारयान्मत्वर्थीयोऽन्यदा तु स्यादिति चेच्छब्देन बोधनादिति भावः ।

ख्यातुं, सरूपविरूपपरिणामाभ्यां न कदाचिदपि वियुज्यत इत्यर्थः ।

व्यक्तवृत्तमव्यक्तेऽतिदिशति "तथा प्रधानम्" इति, यथा व्यक्तं तथाऽव्यक्तमित्यर्थः ।

ताभ्यां वैधर्म्यं पुरुषस्याह—"तद्विपरीतः पुमान्" इति,

स्यादेतद्—अहेतुमत्त्वनित्यत्वादि प्रधानसाधर्म्यमस्ति पुरुषस्य, एवमनेकत्वं व्यक्तसाधर्म्यं[1], तत्कथमुच्यते "तद्विपरीतः पुमान्" इति अत आह—"तथाच" इति । चकारोऽप्यर्थः,

यद्यप्यहेतुमत्त्वादिकं साधर्म्यं तथाप्यत्रैगुण्यादि वैपरीत्यमस्यास्त्येवेत्यर्थः[2] ॥ ११ ॥

तत्र त्रिगुणत्वेन महदादयः प्रकृतेः सरूपपरिणामाः हेतुमत्त्वादिना च ते विरूपपरिणामा इति बोध्यम्—

व्यक्तवृत्तं=व्यक्तस्वभावं महदादिसाधर्म्यमिति यावद् ताभ्यां=व्यक्ताऽव्यक्ताभ्याम्,

तद्विपरीतः=व्यक्ताऽव्यक्तविलक्षणः अत्रिगुणः विवेकी[3], अविषयः असाधारणः[4] चेतनः अप्रसवधर्मी पुरुष इत्यर्थः ।

'चकारोऽप्यर्थ' इति, एवं च 'तथापि पुमान्' इत्यनेनाऽनेकत्वाऽहेतुमत्त्वादिना व्यक्ताऽव्यक्तसरूपोऽपि पुमान् अपिनाऽत्रैगुण्यादिना तद्विपरीतोपीत्यर्थबोधनात् 'तद्विपरीत' इत्युक्तिर्नासङ्गतेत्यत्र फलितं, तदेवाह "यद्यपि" इत्यादिना,

नात्र व्यक्ताऽव्यक्तगतयावद्धर्मेण वैपरीत्यं विवक्षितमपि तु 'त्रिगुणमविवेकि' इत्यभिहितत्रैगुण्यादिधर्मेणेति भावः ॥ ११ ॥

---

(१) व्यक्तसाधर्म्यमित्यत्र 'अस्ति पुरुषस्य' इत्यनुषञ्जनीयम् ।

(२) अस्य=पुरुषस्य, 'अस्त्येव' इति पाठो न सर्वत्रोपलभ्यते ।

(३) विवेकी=असंहतः ।

(४) असाधारणः=प्रतिसङ्घातं भिन्नः ।

त्रिगुणमित्युक्तं, तत्र के ते त्रयो गुणाः किञ्च तल्लक्षणम् इत्यत आह="प्रीत्यप्रीतिविषादात्मका" इति ।

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः । अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ॥ १२ ॥

गुणा इति परार्थाः, 'सत्त्वं लघु प्रकाशकम्' इत्यत्र च सत्त्वादयः क्रमेण निर्देक्ष्यन्ते—तदनागतावेक्षणेन तन्त्रयुक्त्या वा प्रीत्यादीनां यथासंख्यं वेदितव्यम् ।

अत्र गुणशब्देन 'द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्' इति कणादसूत्रोक्ता[1] धर्मविशेषा न गृह्यन्तेऽपि तु परार्थत्वसामान्यात्सत्त्वादयस्तत्त्वविशेषाधर्मिण[2] इत्याशयेनाह—"गुणा इति परार्थाः" इति,

यथा राज्ञः सर्वार्थनिर्वाहका अमात्यप्रभृतयो गुणा इति व्यवह्रियन्ते परार्थत्वात् तथा पुरुषरूपराज्ञो "भोगापवर्गरूपार्थसाधका ये सत्त्वादयस्तेपि परार्थत्वसामान्याद् गुणा इति व्यपदिश्यन्त इति भावः ।

के ते गुणा ये परार्था इत्यत्राह—"सत्त्वं लघु" इत्यादिना, उत्तरत्र निर्देक्ष्यमाणानां कथमिह भानमन्वयो वा इत्यत्राह—"तदनागतावेक्षणेन"=इति,

तद्=अग्रिमार्य्यायां निर्देक्ष्यमाणं गुणत्रयम् अनागतावेक्षणेन=भाविनोऽपि बुद्ध्या समाकृष्यानुसन्धानं भवतीति न्यायेन इह समाकृष्य प्रीत्यादीनां= प्रीत्यात्मक इत्यादीनां लक्षणानां यथासङ्ख्यं लक्ष्यं वेदितव्यमित्यर्थः,

अत्रैव[3] प्रकारान्तरमाह—"तन्त्रयुक्त्या वा" इति, तन्त्रं प्रकृतशास्त्रं तस्य युक्तिः=सत्त्वादय एवात्र गुणास्ते च यथाक्रमं प्रीत्यादिधर्मकर्मे इत्याकारसङ्केतात्मिका युक्तिः तया वा सत्त्वादयोऽत्रानुसन्धेया यथासङ्ख्यं च प्रीत्यादिभिः संबन्धनीया इत्यर्थः,

"तन्त्रयुक्त्या च इति चकारघटितपाठे तु—अनागतावेक्षणेन भाविनः सत्त्वा-

---

(१) अ. १ सू. १६ (कर्मापि द्रव्याश्रितं निर्गुणं चास्तीत्यत उक्तं 'संयोगविभागेषु' इति, यथा संयोगविभागयोरनपेक्षं कारणं कर्म तथा न गुणः कर्मभिन्न इति यावद्)।

(२) सुखादिधर्मका इत्यर्थः ।

(३) भाविनां सत्त्वादीनामिहानुसन्धाने तेषां यथासङ्ख्यमन्वये चेत्यत्र ।

दयोऽत्रानुसन्धेयाः, तेषां प्रीत्यादिभिर्यथासङ्ख्यं संबन्धः कार्य्य इत्यर्थोऽत्र बोध्यः, प्रकृतशास्त्रसङ्केतेन च,

एतेन (प्रीत्यप्रीतिविषादात्मका-इत्यत्र प्रीत्यादीनामितरेतरयोगद्वन्द्व-बलेन साहित्यसद्भावात् सर्वे एव गुणाः प्रीत्यप्रीतिविषादात्मकाः प्राप्नुवन्ति नतु सत्त्वमेव प्रीत्यात्मकं रजश्चाप्रीत्यात्मकं तमश्च विषादात्मकमित्येवं विभ-ज्यान्वयः, साहित्यस्थले विभज्यान्वयाख्यानस्यादृष्टत्वाद्, अत एव 'अजा-विधनौ देवदत्तयज्ञदत्तावित्यत्र न ज्ञायते कस्याजा धनं कस्य चाविय' इत्येवं विभज्यान्वयाख्यानमभिहितं महाभाष्ये) इति शङ्कापि निराकृता वेदितव्या, 'यथासङ्ख्यमनुदेशः समानाम्' इति पाणिनीयसङ्केतबलेन 'आद्यन्तौ ट-कितौ' इत्यत्र साहित्येपि विभज्यान्वयाख्यानमिव साङ्ख्यसङ्केतबलेनात्रापि विभज्यान्वये दोषाभावाद्,

तन्त्रं=कर्ममीमांसाशास्त्रं तस्य युक्तिः=स्थानाख्यप्रमाणरूपा, तया वा यथासङ्ख्यमन्वय इत्यर्थो वात्र ज्ञेयः,

केचित्तु सकृदुच्चरितानां सत्त्वादीनां कथमुत्तरत्रात्र चान्वय इत्याशङ्काया-मुक्तं "तन्त्रयुक्त्या च" इति, इत्येवं योजयन्ति, एकस्यानेकार्थबोधकत्वेना-नेकत्रान्वयस्तन्त्रयुक्तिरित्यर्थः ।

'प्रीत्यप्रीतिविषादात्मका' इत्यत्रात्मपदं द्वन्द्वान्ते श्रूयमाणत्वात्प्रत्येकं प्रीत्यादिभिरन्वितमित्यभिप्रेत्य यथासङ्ख्यान्वयं स्पष्टयति-"प्रीतिः सुखम्" इत्यादिना, अत्र 'आत्मशब्दः स्वभाववाची' 'आत्मा देहे धृतौ जीवे स्व-भावे परमात्मनि' इति विश्वकोशात् तथा च प्रीतिः स्वभावः=धर्मो यस्यासौ प्रीत्यात्मक इत्यत्र फलितम् एवमग्रेपि ज्ञेयम्,

(१) एतस्मिन् पक्षे भाविनां गुणानामिह परामर्शे अनागतावेक्षणेन इति साधकं तेषां यथासङ्ख्यं संबन्धे च 'तन्त्रयुक्त्या' इति साधकम् इति विभज्य कृत्यद्वये साधकद्वयमभिहितमिति बोध्यम् ।

(२) एतेन =प्रकृतशास्त्रसङ्केतेन यथासङ्ख्यमन्वयकरणेन ।

(३) अन्वयः इत्यत्र प्राप्नोतीति शेषः ।

(४) 'आद्यन्तौ टकितौ' इति सूत्रे भगवता पतञ्जलिनेति शेषः ।

(५) स्थानं-क्रम इति पर्यायः, येन क्रमेण संबन्धिनां भानं तेनैव क्रमेण ते-षामन्वय इति यावद्, एतच्च "क्रमश्च देशसामान्याद्" ३ । ३ । १२ । ३ । इति सूत्रे पूर्वतन्त्रे व्यक्तम् ।

(६) अग्रेपि=अप्रीत्यात्मक इत्यादौ ।

एतदुक्तं भवति–प्रीतिः=सुखं, प्रीत्यात्मकः सत्त्वगुणः, अप्रीतिः=दुःखम्–अप्रीत्यात्मको रजोगुणः, विषादः=मोहः-विषादात्मकस्तमोगुण इति,

ये तु मन्यन्ते–'न प्रीतिर्दुःखाभावादतिरिच्यते, एवं दुःखमपि न प्रीत्यभावादन्यद्' इति, तान् प्रति आत्मग्रहणम्,

नेतरेतराभावाः सुखादयोऽपि तु भावाः, आत्मशब्दस्य भाववचनत्वात् प्रीतेरात्मा भावो येषां ते प्रीत्यात्मानः, एवमन्यदपि व्याख्येयम्,

भावरूपता चैषामनुभवसिद्धा, परस्पराभावात्मकत्वे तु परस्पराश्रयापत्तेरेकस्याप्यसिद्धेरुभयासिद्धिरिति भावः ।

'प्रीत्यप्रीतिविषादाद्यैर्गुणानामन्योन्यं वैधर्म्यम्' इति साङ्ख्यसूत्रे 'विषादाद्यैर्' इति 'आद्य'शब्दोपादानाच्चात्र प्रीत्यादीनामुपलक्षणत्वं बोध्यं, तेन प्रीतिशब्देन अनुकम्पाऽऽर्जवमार्दवलज्जासन्तोषविवेकक्षमादीनाम्, अप्रीतिशब्देन च–मानमदमत्सरलोभादीनां, विषादशब्देन च वञ्चनकार्पण्यकौटिल्याज्ञानादीनां ग्रहणमत्रोह्यम्,

तथाचाहुः पञ्चशिखाचार्य्याः "सत्त्वं नाम प्रसादलाघवानभिष्वङ्गप्रीतितितिक्षासन्तोषादिरूपानन्तभेदं समासतः सुखात्मकम्, एवं रजोपि शोकादिनानाभेदं समासतो दुःखात्मकम्, एवं तमोपि निद्रादिनानाभेदं समासतो मोहात्मकम्" इति,

'विषादात्मका' इत्यात्मपदोपादानकृत्यं दर्शयितुं तन्निरसनीयं मतान्तरमनुवदति "ये तु मन्यन्त" इति,

'तान्प्रत्यात्मग्रहणम्' इति,–तन्मतनिरासाय आत्मशब्दोपादानमित्यर्थः ।

यथा च तन्मतनिरासस्तथाह–"नेतरेतराभावा" इति, अपि तु भावाः–सद्रूपा इत्यर्थः, तत्र हेतुर्,–"आत्मशब्दस्य भाववचनत्वाद्" इति,

अनुभवसिद्धत्वानङ्गीकारे दोषमाह–"परस्पराभावात्मकत्वे तु" इति, दुःखे ज्ञाते तदभावात्मकप्रीतिज्ञानं प्रीतौ ज्ञातायां च तदभावात्मकदुःखज्ञानमित्येवमन्योन्याश्रयापत्तेरित्यर्थः,

---

(१) अ० १ सू० १२७ ।

(२) आत्मशब्दोपादानेन निराकरणीयमित्यर्थः ।

स्वरूपमेषामुक्त्वा प्रयोजनमाह—"प्रकाशप्रवृत्तिनियमार्था" इति, अत्रापि यथासङ्ख्यमेव ।

रजःप्रवर्तकत्वात्सर्वत्र लघु सत्त्वं प्रवर्तयेद् यदि तमसा गुरुणा न नियम्येत, तमोनियतं तु क्वचिदेव प्रवर्तयतीति भवति तमोनियमार्थम्,

प्रयोजनमुक्त्वा क्रियामाह—"अन्योन्याभिभवाश्रयजनन-मिथुनवृत्तयश्च" इति,

---

एवं च 'आत्मशब्दोऽत्र स्वरूपपर्याय' इत्यत्र फलितम्,

तेन्नैवं सूत्रे प्रीत्यादीनां गुणधर्मत्ववचनं विरुध्येत इति चेद्,—अत्राहुः साङ्ख्यप्रवचनभाष्यकाराः 'सुखाद्यात्मकता तु गुणानां मनसः सङ्कल्पात्मकतावद् धर्मधर्म्यभेदादेवोपपद्यते' इति,

आत्मशब्दस्य स्वभाववाचित्वे तु न कोपि दोष इति ध्येयं,

'प्रकाशप्रवृत्तिनियमार्था' इत्यत्र अर्थशब्दः प्रयोजनवाची, प्रयोजनं चात्र तद्योग्यता, पूर्ववच्च प्रत्येकमन्वयः प्रकाशार्थं सत्त्वं, प्रवृत्त्यर्थं रजः, नियमार्थं तमः इति च यथासङ्ख्यं संबन्धः, तदेवाह 'अत्रापि यथासङ्ख्यमेव' इति, तत्र प्रकाशः=बुद्धिवृत्त्यादिरूप आलोकः, प्रवृत्तिः=यत्नः—चालनं वा, नियमः=प्रकाशक्रियाभ्यां शून्यत्वं तयोः प्रतिबन्ध इति यावद्, प्रकाशप्रवृत्तिभ्यामेव सकलार्थसिद्धेरलं नियमेनेन तमःकृत्येनेत्याशङ्कायां तमःकृत्यमाह—"रजःप्रवर्तकत्वाद्" इति, रज इति कर्तृपदं यदि गुरुणा तमसा न नियम्येत=स्वकार्यात्प्रवृत्तेर्न प्रच्याव्येत तर्हि प्रवर्तकस्वभावत्वाद् रजोगुणः सर्वदैव सर्वत्र लघुरूपं सत्त्वगुणं प्रवर्तयेत तमोनियतं–तमसाप्रतिबद्धन्तु क्वचिदेव प्रवर्तयति रजोगुणमित्यतो भवति नियमार्थं तम इत्यर्थः,

'सा च प्रत्येकमभिसंबध्यते' इति, उपलक्षणं चेदम् 'अन्योन्यपदस्यापि प्रत्येकं संबन्धो बोध्यः,

---

(१) एवम्=आत्मशब्दस्य स्वरूपवाचकत्वे ।

(२) 'प्रीत्यप्रीतिविषादाद्यैर्गुणानामन्योन्यवैधर्म्यम्' इति सूत्रे वैधर्म्यकथनमुखेन प्रीत्यादीनां गुणधर्मत्वसूचनादिति भावः ।

(३) प्रयोजनयोग्यता, तेन प्रलयदशायां प्रकाशादिकार्याभावेपि न तद्योग्यताविरह इति ज्ञेयम् ।

वृत्तिः=क्रिया, सा च प्रत्येकमभिसंबध्यते, अन्योन्याभिभववृत्तयः=एषामन्यतमेनार्थवशादुद्भूतेनान्यदभिभूयते,

तथाहि—सत्त्वं रजस्तमसी अभिभूय शान्तामात्मनो वृत्तिं प्रतिलभते, एवं रजः सत्त्वतमसी अभिभूय घोराम्, एवं तमः सत्त्वरजसी अभिभूय मूढामिति,

अन्योन्याश्रयवृत्तयः=यद्यप्याधाराधेयभावेन नाश्रयार्थो घटते तथापि यदपेक्षया यस्य क्रिया स तस्याश्रयः,

तथाहि—सत्त्वं प्रवृत्तिनियमावाश्रित्य रजस्तमसोः प्रकाशेनोपकरोति, रजः प्रकाशनियमावाश्रित्य प्रवृत्त्येतरयोः, तमः प्रकाशप्रवृत्ती आश्रित्य नियमेनेतरयोरिति,

---

एषां मध्येऽन्यतमेन गुणेन—अर्थवशादुद्भूतेन=धर्माधर्मनिमित्तकसुखादिरूपप्रयोजनबलात्स्वकार्यजननोन्मुखेन अन्यद्=गुणान्तरं निरस्क्रियते इत्यर्थः.

सत्त्वम् आत्मनः=स्वसंबन्धिनीं सुखादिरूपां शान्तां वृत्तिं प्रतिलभते=प्राप्नोति, सुखादिरूपेण परिणमत इति यावद्, घोराम् इत्यत्रापि "आत्मनो वृत्तिं प्रतिलभते" इत्यस्यानुवृत्तिर्बोध्या, एवमुत्तरत्रापि,

अन्यस्याऽन्यत्कथमाश्रयः कुण्डबदरयोरिवाधाराधेयभावासम्भवादित्याशङ्क्य समाधत्ते—"यद्यपि" इत्यादिना, आधारत्वेन—आश्रयार्थः=मुख्य आश्रयशब्दार्थोऽत्र न घटते=संभवति तथापि सहकारित्वरूपो गौण आश्रयार्थोऽत्राभ्युपेय इत्यर्थः,

एतदेव स्पष्टयति—"तथाहि सत्त्वम्" इत्यादिना, सत्त्वगुणो हि रजस्तमःकार्यभूतौ प्रवृत्तिनियमौ आश्रित्य=सहकारित्वेनादाय स्वकार्येण प्रकाशेन रजस्तमसी उपकरोति,=तयोस्साहाय्यमाचरति, एवं रजः स्वधर्मेण प्रवृत्त्या इतरयोः=सत्त्वतमसोर्—उपकरोतीत्यनुषङ्गः, एवं तमः स्वकार्येण नियमनेन इतरयोः=सत्त्वरजसोरुपकरोतीत्यर्थः, मातुः स्मरतीतिवद् रजस्तमसोरिति कर्मणि षष्ठी, एवम् (इतरयोर्) इत्यपि, सत्त्वं हि स्वयमप्रवर्तकतया रजोधर्मं प्रवृत्तिमाश्रित्य प्रकाशं करोति, रजश्च स्वयमप्रकाशरू-

---

(१) 'कर्मादीनामपि संबन्धमात्रविवक्षायां षष्ठ्येव' इति शाब्दिकसङ्केतादिति भावः ।

अन्योन्यजननवृत्तयः=अन्यतमोऽन्यतममपेक्ष्य जनयति, जननञ्च परिणामः, स च गुणानां सदृशरूपः, अत एव न हेतुमत्त्वं, तत्त्वान्तरस्य हेतोरभावाद्, नाप्यनित्यत्वं, तत्त्वान्तरे लयाभावाद् ।

एतया सत्त्वधर्मं प्रकाशमाश्रित्य प्रवृत्तिं करोतीत्यादि यथायथमूह्यम्, एत-च्चाग्रे[1] व्यक्तम् ।

"अन्यतमोऽन्यतममपेक्ष्य जनयति" इत्यत्र जननं नापूर्वोत्पादनमसत्का-र्यवादप्रसङ्गादपि तु तत्तद्रूपेण परिणमनमित्याशयेनाह—"जननं च परि-णाम" इति,

कोऽसौ परिणामो यत्राऽन्योन्यमपेक्ष्य गुणा हेतवो भवन्तीत्याकाङ्क्षाया-माह—"स च गुणानां सदृशरूप" इति, गुणानां साम्यावस्थारूपः प्रधा-नाख्यः स परिणाम इत्यर्थः । एतच्च 'प्रतिसर्गावस्थायां सत्त्वं रजस्तमश्च सदृश-परिणामानि भवन्ति' इत्यादिनाऽग्रे व्यक्तम् ।

'अन्योन्याश्रयवृत्तय'[2] इत्यनेन विसदृशे परिणामेऽन्यतमो गुणोऽन्यतम-माश्रयत इत्यभिहितमत्र तु सदृशे परिणामेऽन्यतमो गुणोऽन्यतमं गुणमपेक्षत इत्युक्तमिति न पौनरुक्त्यम्—,

ननु प्रधानस्य गुणानां सदृशरूपपरिणामत्वे तस्य[3] हेतुमत्त्वं स्यात् तथाच 'हेतुमदनित्यम्' इत्यादिना यद् हेतुमत्त्वं व्यक्तसाधर्म्यमभिहितं तदव्य-क्तेऽतिप्रसक्तमित्याशङ्कासमाधत्तुमाह—"अतएव" इति, यत एव गुणानां सदृशरूपः परिणामः प्रधानमतएव न तस्य हेतुमत्त्वमित्यर्थः, तत्र हेतुमाह "तत्त्वान्तरस्य" इति, यत्र हि तत्त्वान्तरं=विजातीयतत्त्वं तत्त्वान्तरेण जन्यते तत्र हि विसदृशपरिणामरूपं तत्त्वान्तरं हेतुमदित्युच्यतेऽत्र तु गुणा एव प्रधानमिति न तत्त्वान्तरमव्यक्तमिति न हेतुमत्प्रधानमित्यर्थः,

(१) अग्रे=सत्त्वतमसी स्वयमक्रियतया स्वस्वकार्य्ये प्रत्यवसीदन्ती रजसोप-ष्टभ्येते' इत्यादिनाऽग्रिमकारिकाकौमुद्यामित्यर्थः । १६ इति कारिकाव्याख्यानारम्भ इत्यर्थः ।

(२) अन्यतमो गुणोऽन्यतमगुणमाश्रित्य प्रवर्तत इति पूर्वाभिहिताद् "अन्य-तमो गुणोऽन्यतममपेक्ष्य परिणमते" इत्यभिधानस्य को भेद इत्याकाङ्क्षायामाह—"अन्योन्याश्रयवृत्तय इत्यनेन" इति, विसदृशे=असाधारणे प्रकाशादिरूपे कार्ये, इत्यर्थः ।

(३) प्रधानस्य ।

'अन्योन्यमिथुनवृत्तयः'=अन्योन्यसहचराः–अविनाभाववर्तिन इति यावत्, 'चः' समुच्चये,

भवति चात्रागमः–

"अन्योन्यमिथुनाः सर्वे सर्वे सर्वत्र गामिनः ।
रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः ।
तमसश्चापि मिथुने ते सत्त्वरजसी उभे ।

ननु सर्गकाले गुणक्षोभे जायमाने साम्यावस्थाया विलयेन प्रधानस्यानित्यत्वं स्यादित्याशङ्कायामाह–"नाप्यनित्यत्वम्" इति, साम्यावस्थातो नातिरिक्तं तत्त्वमवस्थावद् गुणत्रयमिति न तत्र लये तत्त्वान्तरलयव्यवहार इति भावः,

'अन्यतमोऽन्यतमं जनयति' इति क्वाचित्कः पाठस्तु[1] न स्वान्तं सन्तोषयति गुणानां नित्यत्वेनान्योन्यं जन्यजनकभावाभावाद्,

सर्वस्य त्रिगुणात्मकत्वेन परस्परं मिलित्वा सर्वे सर्वजनका इति परमार्थः,

एते गुणाः परस्परोपरक्तप्रविभागा[2] इतरेतरोपाश्रयेणोपार्जितमूर्तयः इत्यादिना योगभाष्ये व्यक्तमेतद्,

'अन्योन्यमिथुनवृत्तयः'=स्त्रीपुरुषवत्परस्परं मिथुनीभूताः, तदेवाह–"अन्योन्यसहचरा" इति, सहचरपदार्थमाह–"अविनाभाववर्तिन" इति,

'मिथुनवृत्तयश्च' इति चकारः–अन्योन्याभिभवादीनां धर्माणां गुणेषु समुच्चयं सूचयन् तेषां[4] पाक्षिकत्वमाक्षिपतीत्याह–"चः समुच्चय" इति,

एतत्सर्वम् "अन्योऽन्याभिभवाच्चैते विरुध्यन्ति परस्परम्, तथाऽन्योन्याश्रयाः सर्वे न तिष्ठन्ति निराश्रयाः" १३–इत्यारभ्य "यथा स्त्री पुरुषश्चैव मिथुनं च परस्परम् । तथा गुणाः समायान्ति युग्मभावं परस्परम् । रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः । उभे ते सत्त्वरजसी तमसो मिथुने विदुर्"

---

(१) 'अन्यतममपेक्ष्य' इत्यध्याहृतापेक्ष्येतिपदाघटितपाठस्त्वित्यर्थः ।

(२) परस्परम् उपरक्तः=संसृष्टः प्रविभागः=स्वीयः स्वीयो भागो येषां ते इत्यर्थः, इतरेतरसाहाय्येनोत्पादिता महदाद्या मूर्तयो यैस्त इत्यर्थः ।

(३) पा० २ सू० १८।

(४) तेषाम्=अन्योऽन्याभिभवादीनां पाक्षिकत्वं=कदाचिदन्योन्याभिभावकत्वं, कदाचिच्चान्योन्याश्रयत्वं, कदाचिच्चान्योन्यमिथुनत्वमित्येवंविधं पाक्षिकत्वं निराकरोतीत्यर्थः ।

उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते ।
नैषामादिः सम्प्रयोगो वियोगो वोपलभ्यते इति" ॥१२॥

'प्रकाशप्रवृत्तिनियमार्था' इत्युक्तं, तत्र के त इत्थंभूताः कुतश्चेत्यत आह—"सत्त्वं लघु" इत्यादि,

---

(४९।५०) इत्यन्तेन ग्रन्थेन देवीभागवते प्रपञ्चितमिति तत्रैव गुणवृत्तविस्तरो निरीक्ष्य इत्याशयेनाह—"भवति चात्रागम" इति,

अन्योन्यमिथुनाः=परस्परसहचराः, अत एव सर्वे गुणाः सर्वत्रान्योन्यं संमिलिताः, तदेव स्पष्टयति—"रजसो मिथुनं सत्त्वम्" इति, मिथुनं=सहचारीत्यर्थः,

गुणानामनादित्वमाह "नैषामादिर्" इति, एषां गुणानाम् आदिः=षड्भावविकारेषु प्रथम उत्पत्तिरूपो विकारो नोपलभ्यते=न ज्ञायते नास्तीति यावद्, 'गुणास्तु न प्रत्यस्तमयन्ते नोपजायन्ते' इत्येवमुत्पत्तेर्निषिद्धत्वादित्यर्थः,

एवं क इमे परस्परं संयुक्ता जाता इत्येवं संयोगोपि नोपलभ्यते, गुणानामनादित्वेन तत्संयोगस्याप्यनादित्वादित्यर्थः, एवं सर्वदैवाऽन्योन्यं संयुक्तत्वाद्वियोगोऽप्येषां नास्तीत्यर्थः,

यत्तु 'एते गुणाः संयोगविभागधर्माण' इति योगभाष्यं तत्तु 'पुरुषैः सह संयोगविभागवन्त' इत्यर्थकं नत्वन्योन्यं संयोगविभागवन्त इत्यर्थकमिति सर्वमवदातम् ॥ १२ ॥

'के त' इति, किंनामानस्ते गुणाः, कुतश्च प्रयोजनात् त इत्थंभूताः= प्रकाशादिप्रयोजनजननायान्योऽन्याभिभवादिशीलाः प्रवर्तन्त इत्यर्थः,

---

(१) तृतीयस्कन्धेऽष्टमाध्याय इति शेषः ।

(२) जायते–अस्ति–वर्द्धते–विपरिणमते–अपक्षीयते–विनश्यति–इति यास्काचार्य्योक्तिष्वित्यर्थः ।

(३) पा० २ सू० १९ इत्यत्रत्यं योगभाष्यमिदम् ।

(४) २।१८।

(५) अविवेकिना पुरुषेण सह गुणाः संयुज्यन्ते विवेकी च तैर्वियुज्यत इत्यर्थः।

(६) एषामादिः संयोगो नेत्यन्वयेन यद्यपि गुणाः परस्परं संयुक्तास्तथापि कदा संयुक्ता इत्येवं न ज्ञायतेऽनादित्वात्संयोगस्येत्यर्थो वात्र बोध्यः ।

(७) यद्वा किंस्वरूपास्त इत्यर्थः ।

सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।
गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥ १३ ॥

सत्त्वमेव लघु प्रकाशकमिष्टं साङ्ख्याचार्य्यैः,
तत्र कार्य्योद्गमने हेतुर्धर्मो लाघवं, गौरवप्रतिद्वन्द्वि यतो-

---

कैरिष्टमित्याकाङ्क्षां पूरयति–"साङ्ख्याचार्य्यैर्" इति–महर्षिकपिलादिभिरित्यर्थः ।

तथाच सूत्रं–"लघ्वादिधर्मैः साधर्म्यं वैधर्म्यं च गुणानाम्" इति,

किंलक्षणं तत् लघुत्वं यत्सत्त्वे वर्तत इत्याकाङ्क्षायां वस्त्वन्तरे तावत्तदुदाहर्तुं तन्निर्वक्ति, "तत्र कार्य्योद्गमन" इति, तत्र=लघुत्वप्रकाशयोर्मध्ये कार्य्यस्य=वस्तुन उद्गमने=ऊर्द्ध्वगमने यत्कारणं तल्लाघवमित्यर्थः ।

ननु गुरुत्वाभावेनैवोर्द्ध्वगमने सिद्धेऽलं लघुत्वरूपगुणान्तराश्रयेण, अत एवौलूक्यैर्लघुत्वं गुणेषु न गणितमित्याशङ्कायामाह–"गौरवप्रतिद्वन्द्वि"

---

(१) आदिना पञ्चशिखाचार्य्यः, तद्वचनं च 'सत्त्वं नाम प्रसादलाघव' इत्यादिकं पूर्वमुदाहृतमिति ।

(२) अ० १ सू० १२८। लघ्वादीति भावप्रधानो निर्देशः, लघुत्वादिधर्मेण सर्वासां सत्त्वव्यक्तीनां साधर्म्यं, वैधर्म्यं च रजस्तमोभ्याम्, एवं चलत्वादिधर्मेण रजोव्यक्तीनां गुरुत्वादिधर्मेण च तमोव्यक्तीनां साधर्म्यम्, अत्र च पृथिवीव्यक्तीनां पृथिवीत्वेनेव सत्त्वादिव्यक्तीनामेकजातीयतयैकत्वं, गुणान्तरसंसर्गवैचित्र्येण च उत्कृष्टं सत्त्वं मध्यमं सत्त्वं निकृष्टं सत्त्वमित्यादिरूपेण च सत्त्वादिव्यक्तीनां नानात्वं च बोध्यं, सत्त्वादीनां प्रत्येकमनेकव्यक्तिकत्वं सिद्धवत्कृत्वैवात्र लघुत्वादीनां साधर्म्याभिधानम् एकव्यक्तिकत्वे समानानां धर्मरूपस्य साधर्म्यस्याभिधानमनुपपन्नं हि स्यादिति ।

(३) वैधर्म्यस्य प्रागेव (प्रीत्यप्रीतिविषादाद्यैरिति सूत्रे) उक्तत्वादत्र वैधर्म्यं चेति पाठः प्रामादिक एवेति विज्ञानभिक्षुः ।

(४) वस्त्वन्तरे=सत्त्वगुणातिरिक्ते वन्ह्यादौ ।

(५) तद्=वस्त्वन्तरवृत्ति लघुत्वं निर्वक्ति=लक्षयति ।

(६) सत्त्वं लघु प्रकाशकमित्यनेन बोधितयोर्लाघवप्रकाशरूपधर्मयोरित्यर्थः ।

(७) औलूक्यैः=कणादमुनिभिरित्यर्थः ।

ऽग्नेरूर्ध्वज्वलनं भवति, तदेव लाघवं कस्यचित् तिर्य्यग्गमने हेतुर्भवति, यथा वायोर्, एवं करणानां वृत्तिपटुत्वे हेतुर्लाघवं, गुरुत्वे हि मन्दानि स्युर्, इति सत्त्वस्य प्रकाशकत्वमुक्तं,

---

इति, 'गुरुत्वं' जलभूम्योः पतनकर्मकारणमप्रत्यक्षं पतनकर्मानुमेयम् इति। लक्षितं यद् गुरुत्वं तद्विरोधीत्यर्थः,

यथाऽऽद्याधोगमनहेतुत्वेन गुरुत्वमभ्युपेयते तथोर्द्ध्वगमनहेतुत्वेन लघुत्वमप्यभ्युपेयतां न्यायसाम्याद्, अक्लृप्ताभावकारणत्वकल्पनापेक्षया क्लृप्तभावकारणत्वकल्पनाया एवौचित्यादिति भावः।

पतनाऽनुमेयगुरुत्ववल्लघुत्वमप्यूर्द्ध्वगमनानुमेयमतीन्द्रियमेवेत्याशयेन लघुत्वाश्रयं दर्शयन्नुदाहरणमाह "यतोऽग्नेर्" इति यस्माद्धर्मादग्नेरूर्ध्वज्वलनं भवत्येवंभूतो यो गौरवप्रतिद्वन्द्वी कार्य्योद्गमने हेतुर्धर्मस्तल्लाघवमिति समुदायार्थः,

ननु यदि गुरुत्वाभावादन्यदूर्ध्वगमनहेतुत्वेन लघुत्वं गुणान्तरमभ्युपेयते तर्हि लघुत्वादन्यत् तिर्य्यग्गमनहेतुत्वेनापि किञ्चिद् गुणान्तरमभ्युपेतव्यं भवेद्, अन्यथा पवनगततिर्य्यग्गमनस्याकस्मिकत्वापत्तेरित्यत्राह "तदेव लाघवम्" इति, न चैवं लक्षणाननुगमः, गौरवप्रतिद्वन्द्वीत्यनेन गुरुत्वजन्याधोगमनविभिन्नगमनहेतुत्वं लघुत्वमित्यर्थस्य विवक्षितत्वेन दोषाभावाद्,

एवं वस्त्वन्तरे लघुत्वं प्रदर्श्य सत्त्ववृत्तिलघुत्वस्वरूपमाह "एवम्" इति, यथाऽग्न्याद्युद्गमने हेतुर्धर्मविशेषो लाघवम् एवं=तथा करणानाम्=

---

(१) प्रशस्तपादभाष्यमिदं, तत्र 'जलभूम्योर्' इति गुरुत्वाश्रयकथनं, 'पतनकर्मकारणम्' इति गुरुत्वकार्यकथनम्, 'अप्रत्यक्षम्' इति गुरुत्वस्वभावकथनम्, 'पतनकर्मानुमेयम्' इति गुरुत्वे प्रमाणोपन्यास इति बोध्यम्।

(२) द्वितीयपतने वेगस्यापि कारणत्वादुक्तमाद्येति।

(३) आकस्मिकत्वापत्तेः=निर्हेतुकत्वापत्तेरित्यर्थः।

(४) उद्गमनकारणं लाघवमित्युक्ते पवनतिर्य्यग्गमनकारणे लाघवे लक्षणासङ्गतिः, तिर्य्यग्गमनकारणं लाघवमित्युक्ते चाग्न्युद्गमनकारणे लाघवे लक्षणागमनमित्येवं लक्षणाननुगम इत्यर्थः।

सत्त्वतमसी स्वयमक्रियतया स्वस्वकार्य्यप्रवृत्तिं प्रत्यवसीदन्ती रजसोपष्टभ्येते–अवसादात्प्रच्याव्य स्वकार्य्ये उत्साहप्रयत्नं कार्य्येते, तदिदमुक्तम् "उपष्टम्भकं रज" इति,

---

आहरणधारणप्रकाशनसाधनानां वक्ष्यमाणानां त्रयोदशप्रकाराणामिन्द्रियाणां या वृत्तयः–स्वस्वविषयग्रहणाय सन्निकर्षरूपव्यापारविशेषाः तासां वृत्तीनां यत् पटुत्वं–झटिति स्वविषयग्रहणौन्मुख्यरूपनैपुण्यं तत्र हेतुभूतो यो धर्मस्तल्लाघवं, तच्च सत्त्वधर्म इति सत्त्वं लध्वित्यर्थः ।

सात्त्विकेषु करणेषु विषयग्रहणरूपपटुत्वदर्शनेन तत्र सत्त्वधर्मो लघुत्वमस्तीत्यनुमेयमिति भावः ।

सत्त्वगुणस्य साक्षाद् व्यवहारगोचरताऽदर्शनात् सात्त्विकानि करणान्येव लघुत्वाश्रयत्वेनात्रोदाहृतानि ननु साक्षात्सत्त्वमुदाहृतमित्यपि बोध्यम्–

एतेन करणानि लघूनि पाटववत्त्वादित्यनुमानमत्र सूचितम्–

एतस्मिन्ननुमाने 'यानि न लघूनि न पाटववन्ति तानि यथा तिमिरोपहतानि नयनादीनि तमसावृतानि वा घटादीनि' इति व्यतिरेकव्याप्तिं दर्शयति– "गुरुत्वे हि" इति, हि–यतः लघुत्वविरोधिनि गुरुत्वे सति तानि करणानि मन्दानि–स्वविषयप्रकाशनासमर्थानि स्युरित्यतो विषयप्रकाशनरूपपटुत्वदर्शनेन तत्र लघुत्वमस्तीति प्रतीयतामित्यर्थः ।

एतादृशलघुत्वादेव सत्त्वं प्रकाशकमित्युच्यत इत्याह "इति सत्त्वस्य" इति, इति=अतः लघुत्वादिति यावद् ।

रजसः स्वभावमाचक्षाण 'उपष्टम्भकम्' इति व्याचष्टे–"सत्त्वतमसी" इति, स्वयमक्रियतया=स्वरूपेणाप्रवृत्तिशीलतया स्वस्वकार्य्यप्रवृत्तिं प्रति=प्रकाशादिरूपस्वस्वकार्य्ये स्वकीयप्रवृत्तिजननाय अवसीदन्ती=शिथिलीभूते अशक्ते सत्त्वतमसी रजसा=रजोगुणेन उपष्टभ्येते=स्वकार्य्यजनने प्रवर्त्येते तदिदं=तस्मादिदमुक्तम् उपष्टम्भकं रज इतीत्यन्वयः–

---

(१) 'करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम्' ३२ इत्यार्यायां वक्ष्यमाणानामित्यर्थः ।

(२) सात्त्विकाभिमानकार्य्येषु ।

(३) लाघवं सत्त्वधर्म इति प्रकृते लघुत्वाश्रयत्वेन सत्त्वमेवोदाहरणीयं ननु तद्भिन्नानि करणानि, अन्यधर्मस्यान्यत्रोदाहरणदानस्यायुक्तत्वादित्याकाङ्क्षायामाह "सत्त्वगुणस्य" इति ।

(४) सत्त्वतमसी इति कर्मकारके ।

कस्माद्, इत्यत उक्तं—"चलम्" इति, तदनेन रजसः प्रवृत्त्यर्थत्वं दर्शितम्.

रजस्तु चलतया परितस्त्रैगुण्यं चालयद्गुरुणाऽऽवृण्वता च तमसा तत्र तत्र प्रवृत्तिप्रतिबन्धकेन क्वचिदेव प्रवर्त्यत इति ततस्ततो व्यावर्त्य तमो नियामकमुक्तं 'गुरु'

वरणकमेव तम इति,

एवकारः प्रत्येकं भिन्नक्रमः संबध्यते—सत्त्वमेव रज, एव, तमएव, इति,

उपष्टम्भाति=उपोद्बलयति-उत्तेजयति-वृद्धं यष्टिरिवोत्थापयति-प्रोत्साहयति स्वकार्ये प्रवर्तयतीत्युपष्टम्भकमित्याशयेन 'उपष्टभ्येते' इत्यस्यार्थमाह—"अवसादात्प्रच्याव्य" इति, शैथिल्यादधः प्रपात्य-शैथिल्यं निरस्येति यावद्,

कस्मात्पुनः कारणाद् रज एवंविधमिति पृच्छति, "कस्माद्" इति, यतो रजश्चलं=सक्रियत्वेन प्रवृत्तिशीलमत उपष्टम्भकमित्यर्थः,—

'गुरुवरणकमेव तम' इति व्याचक्षाणस्तमःस्वभावमाह—"रजस्तु" इति, चलतया=प्रवृत्तिशीलत्वेन परितः=सर्वतः त्रैगुण्यं=त्रिगुणात्मकमिन्द्रियादिकं चालयत्=स्वकार्ये प्रवर्तयद् रजः तमसा=तमोगुणेन क्वचिदेव कार्ये प्रवर्त्यते प्रवृत्तिक्षमं क्रियते यतः इति=अतः ततस्ततः=तस्मात्तस्मात्कार्याद् व्यावर्त्य=रजःप्रवृत्तिं रोधयित्वा वर्तमानं तमो नियामकमित्युच्यते तदिदमुक्तं 'गुरु' वरणकमेव तम इति, इत्यन्वयः।

तमसो नियमनकर्तृत्वे हेतुगर्भितं विशेषणं 'गुरुणा' इति, लघुत्वविरोधिस्थितिहेतुभूतो धर्मो गुरुत्वं, तद्वता, गुरुत्वादेव च आवृण्वता, अस्यैव विवरणं—'तत्र तत्र प्रवृत्तिप्रतिबन्धकेन' इति,

अत्र च 'गुरु वरणकमेव' इति 'एवकारः सत्त्वमेव लघुत्वात्प्रकाशकं, रज एव च चलत्वादुपष्टम्भकं, तम एव च गुरुत्वाद् वरणकम् इत्येवं भिन्नक्रमः प्रत्येकान्वयी च बोध्य इत्याशयेनाह "एवकार" इति,

ननु यद्येवं विभिन्नधर्माणो गुणास्तर्हि कथमन्योन्याश्रयवृत्तय इत्यादिना मिलितानामेकक्रियाकर्तृत्वाभिधानं परस्परविरुद्धानां शत्रूणामिवैकार्थकरणासम्भवादित्याशयेन शङ्कते—"नन्वेते" इति,

---

(१) रज इति कर्मकारकम्।

(२) यत्र यस्य पाठस्तत्रान्वयमकृत्वाऽन्यत्रान्वयो भिन्नक्रमः।

नन्वेते परस्परविरोधशीला गुणाः सुन्दोपसुन्दवत्परस्परं ध्वंसन्ते इत्येव युक्तं प्रागेव तेषामेकक्रियाकर्तृताया इत्यत आह "प्रदीपवच्चार्थतोवृत्तिर्" इति,

दृष्टमेतद्, यथा वर्तितैलेऽनलविरोधिनी अथ च मिलिते

परस्परं ध्वंसन्ते=अन्योन्यमभिहता नश्यन्तीत्यर्थः, तत्र दृष्टान्तः—"सुन्दोपसुन्दवद्" इति, सुन्दोपसुन्दनामानौ द्वावसुरौ सोदरावास्तां तौ चाराधितादीश्वरात् स्वस्वेतरसकाशाद् वधाभावरूपं वरमलभेताम् । अथचैकां काञ्चिद्(१)बलां कामयमानाभ्यामन्योन्यं प्रवर्तिते रणेऽन्योन्याभिहतौ तौ नष्टावभूतामिति पौराणिकी कथाऽत्रानुसन्धेया,

प्रा(२)गेव=पुरत एवेत्यर्थः, विरुद्धानामन्योन्यमेलनमेव तावदसम्भवि मिलित्वैकार्थानुष्ठानन्तु दूरतो निरस्तमिति भावः ।

कारिकांशमवतार्य समाधत्ते—"प्रदीपवच्चार्थतो वृत्तिर्" इति, वृत्तिः=अन्योन्यानुवर्तनम्,

दृष्टमेतद्—एतद्=विरुद्धानामपि क्वचिन्मिलित्वैकार्थकारिता दृष्टेत्यर्थः, क्व दृष्टमित्यत्राह—"यथा" इति,

वर्तिः=कार्पासादिनिर्मिता दशा तैलं च सार्षपादि त एते वह्निदाह्यत्वाद् अनलो विरोधी ययोरित्यनलविरोधिनी यद्यपि अथच=तथापि अनलेन सह मिलिते एकां प्रकाशरूपां क्रियां कुरुत इत्यर्थः,

एतच्च "प्र(३)दीपश्च यथा कार्यं प्रकरोत्यर्थदर्शनम् ॥
वर्तिस्तैलं यथार्चिश्च विरुद्धाश्च परस्परम् ॥ २९ ॥
विरुद्धं हि तथा तैलमग्निना सह सङ्गतम् ॥
तैलं वर्तिविरोध्येव पावकोपि परस्परम् ॥ ३० ॥
एकत्रस्थाः पदार्थानां प्रकुर्वन्ति प्रदर्शनम्"
इत्यादिना ब्रह्मगीते व्यक्तम् ।

(१) तयोर्दुर्दान्तयोर्हननायोपायान्तरमपश्यतेश्वरेण निर्मिता सा मायामय्यबलेत्यपि ज्ञेयम् ।

(२) 'प्रागेव' इति निपातसमुदायोऽतिशयार्थक इति वर्द्धमानोपाध्यायः, एतन्मते च तेषामेकक्रियाकर्तृताऽतिशयेनासम्भविनीत्यर्थो ज्ञेयः ।

(३) देवीभागवते तृतीयस्कन्धे नवमाध्याये नारदं प्रति ब्रह्मवाक्यानीमानीति बोध्यम्—

सहानलेन रूपप्रकाशलक्षणं कार्यं कुरुतः यथा वा—

वातपित्तश्लेष्माणः परस्परविरोधिनः शरीरधारणलक्षण-कार्य्यकारिण एवं सत्त्वरजस्तमांसि मिथो विरुद्धान्यप्यनु-वर्त्स्यन्ति च स्वकार्य्यं करिष्यन्ति च,

---

अस्तु वर्तिः अनलदीप्यत्वात्तद्विरोधिनी भवतु च तैलबिन्दुनिपातनेनाग्नेरपि मन्दीभावात्तैलमपि वह्निविरोधि तथापि वर्त्तितैलयोः परस्परं विरोधाभावान्न निखिलांशे समानमेतदुदाहरणमिति ये प्राहुस्तान् प्रति सर्वांशे परस्परविरोधित्वेन समानमुदाहरणान्तरमाह "यथा वा" इति,

वातादीनां धातूनां परस्परविरोधित्वमायुर्वेदे प्रसिद्धं तथापि ते मिलित्वा शरीरस्य धारणं=पोषणं स्थापनं च कुर्वन्ति यथा एवं=तथा सत्त्वादीन्यपि अनुवर्त्स्यन्ति=अन्योन्यानुगुण्येन वर्तिष्यन्ते स्वस्वकार्य्यं करिष्यन्ति चेत्यर्थः,

त्रित्वसङ्ख्यानादरणे तु यथा विरुद्धावपि धर्माधर्मौ मिलित्वा नरकलेवरमारभेते तथा सत्त्वादयोपीत्यप्युदाहरणं बोध्यम्—

वस्तुतस्तु-'रूपातिशया वृत्त्यतिशयाश्च परस्परेण विरुध्यन्ते सामान्यानि त्वतिशयैः सह प्रवर्तन्ते' इति योगभाष्योक्तन्यायात् तुल्यबलानामेव विरोधो नातुल्यबलानामित्यभ्युपगमान्नात्र विरोधप्रसक्तिरिति,

अयम्भावः-दिव्यशरीरे सुखाद्यात्मके वा प्रत्यये जननीये सत्त्वं गुणः प्रधानं रजस्तमसी चाङ्गे, एवं नरकलेवरे दुःखाद्यात्मके वा प्रत्यये जनयितव्ये प्रधानं रजोऽङ्गे च सत्त्वतमसी, एवं तिर्य्यङ्निकाये मोहाद्यात्मके वा प्रत्यये जनयितव्ये प्रधानं तमोऽङ्गे च सत्त्वरजसी,-इत्येवं गुणप्रधानभावेन मिलित्वैकार्थकरणान्नात्र काचिदापत्तिरिति,

---

(१) यथा सत्त्वादीनि त्रीण्येवं तैलादीनि वातादीनि चापि त्रीण्येवेत्युदाहरणे त्रित्वसङ्ख्यासाम्यमादृतं तदनादरणे तु धर्माधर्मावप्युदाहरणीयाविति भावः।

(२) 'पुण्येन पुण्यं लोकं नयति, पापेन पापम्, उभाभ्यामेव मनुष्यलोकम्' इति प्रश्नोपनिषदि श्रुतत्वादिति भावः।

(३) धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्य्यानैश्वर्य्याख्यान्यष्टौ बुद्धे रूपाणि, वृत्तयश्च सुखदुःखमोहरूपाः परिणामविशेषाः तेषामतिशयाः=उत्कर्षा एव विरुध्यन्ते यदा धर्म उत्कृष्टत्वेनोदारो भवति तदाऽधर्मो नोत्कृष्यते, यदा च सुखोत्कर्षो भवति तदा च न दुःखमुत्कृष्टं भवतीत्येवं परस्परं प्रतिबध्यन्ते सामान्यानि अपकृष्टानि दुर्बलानि तु उत्कृष्टैः सह वर्तन्त इति भाष्यार्थः, यो० पा०२ सू०१८।

अर्थतः=पुरुषार्थत इति यावद्, यथा वक्ष्यति 'पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणम्' इति, (का० ५१)

अत्र च सुखदुःखमोहाः परस्परविरोधिनः स्वस्वानुरूपाणि

यत्पूर्वमुक्तम् 'इत्थंभूताः कुत' इति तत्राह–"अर्थत" इति, पौरुषेयभोगापवर्गसम्पादनरूपप्रयोजनबलेन गुणाः सम्भूय प्रवर्तन्त इत्यर्थः, एतच्चाग्रे व्यक्तमित्याह–"यथा वक्ष्यति" इति,

ननु, "त्रिगुणमविवेकि" इत्यादिना सर्वस्य त्रिगुणात्मकत्वाभिधानात्सर्व एव भावाः सुखदुःखमोहात्मका इत्यायातम्,

एतच्च न घटते, न हि यद् यदा यस्य सुखात्मकं तत्तदा तस्य दुःखात्मकं मोहात्मकं चेत्यध्यक्षमीक्ष्यते, यदि सर्वे एव भावाः सुखदुःखमोहस्वभावा भवेयुस्तर्हि सर्वेषामविशेषेणैव सर्वेषु भावेषु सर्वात्मकं विज्ञानं स्यान्नतूपलभ्यमानं प्रतिवस्तुव्यवस्थितं, तथा चाहुर्विवेचकाः–"यदि पुनरेत एव सुखादिस्वभावा भवेयुस्ततः स्वरूपत्वाद् हेमन्तेपि चन्दनः सुखः स्याद्, न हि चन्दनः कदाचिदचन्दनः, तथा निदाघेपि कुङ्कुमपङ्कः सुखो भवेद् नह्यसौ कदाचिदकुङ्कुमपङ्क इति, एवं कण्टकः क्रमेलकस्य सुख इति मनुष्यादीनामपि प्राणभृतां सुखः स्याद् नह्यसौ कांश्चित्प्रत्येव कण्टक इति, तस्माद्सुखादिस्वभावा अपि चन्दनकुङ्कुमादयो जातिकालावस्थाद्यपेक्षया सुखदुःखादिहेतवो नतु स्वयं सुखादिस्वभावा इति रमणीयम्" इति, एवं प्राप्ते प्रतिविधत्ते "अत्र च सुखदुःखमोहा" इति, अत्र=गुणस्वभावनिरूपणप्रस्तावे च इदं ध्येयमिति शेषः,

---

(१) एतच्च सुखदुःखमोहात्मकत्वेन भावानां त्रैरूप्यं चेत्यर्थः ।

(२) यत्–चन्दनादिकं, यदा= निदाघकालादौ ।

(३) घटे मृदन्वयवद् यदि सुखादिकं सर्वभावान्वितं भवेत् तर्हि घटे मृद्वत् सर्वैरेवाविशेषेणोपलभ्येत नचोपलभ्यत इति योग्यानुपलब्धिबाधितं चेदं सर्वस्य त्रैरूप्यमित्याशयेन शङ्कां स्पष्टयति "यदि" इति ।

(४) सर्वात्मकं सुखदुःखमोहात्मकम् ।

(५) अनुकूल एव स्रक्चन्दनवनितादौ सुखात्मकं प्रतिकूल एव च दन्दशूकवृश्चिककण्टकादौ दुःखात्मकं विज्ञानमित्येवं नियतमित्यर्थः ।

(६) अ० २ पा० २ सू० १ इति ब्रह्मसूत्रभाष्ये भामतीकाराः

(७) क्रमेलकः= उष्ट्रः,

(८) प्रतिविधत्ते=समाधत्ते,

सुखदुःखमोहात्मकान्येव निमित्तानि कल्पयन्ति, तेषां च परस्परमभिभाव्याभिभावकभावान्नानात्वं,

तद् यथा—एकैव स्त्री रूपयौवनकुलसम्पन्ना स्वामिनं सुखाकरोति, तत्कस्य हेतोः स्वामिनं प्रति तस्याः सुखरूपसमुद्भ-

---

परस्परविरोधिनो ये सुखदुःखमोहास्ते सर्वत्राविशेषेण वर्तमाना अपि-नाकस्मादुद्भवन्ति येन सर्वान् प्रत्यविशेषेण ते आगच्छेयुरपि तु स्वस्वोद्भवे निमित्तानि कल्पयन्ति=अपेक्षन्त इत्यन्वयः, निमित्तान्यपि च न यानि कानि-चिदपि तु-स्वस्वानुरूपाणि=स्वस्वप्रादुर्भावानुगुणानि सुखदुःखमोहात्म-कानीति,

तत्र सुखं स्वोद्भवे धर्मापेक्षं सुखात्मकं सत्त्वरूपं निमित्तमपेक्षते, दुःखं च स्वोद्भवेऽधर्मापेक्षं दुःखात्मकं रजोनिमित्तमपेक्षते, मोहश्च स्वप्रा-दुर्भावेऽधर्मापेक्षं मोहात्मकं तमो निमित्तमपेक्षत इत्यर्थः ।

जातिकालादयोऽपि निमित्तसहकारिणो ज्ञेयाः,

ननु धर्मादयो निमित्तविशेषा अपि सर्वत्राविशिष्टा इति, कथं व्यवस्था, तत्राह—"तेषां च" इति, तेषां च धर्मादिनिमित्तानां नाविशिष्टत्वमपि तु नानात्वं तत्र हेतुमाह—"परस्परमभिभाव्याभिभावकभावाद्" इति,

यदुत्कृष्टं सदितरनिरोधकं भवति तन्निमित्तमभिभावकं, यच्च निकृष्टत्वेन स्वकार्यजननाशक्तं भवति तन्निमित्तमभिभाव्यमित्युच्यते, एतदुक्तं भवति—सर्वस्य प्रतिक्षणपरिणामित्वाद् यदा यस्य चित्ते धर्मो विपच्यमान उत्कृष्टो भवति तदा तस्य चित्ते तच्चित्तसन्निहितवस्तुनि च सत्त्वमुत्कटं भूत्वा रजस्त-मश्च तिरस्कृत्य तं प्रति सुखात्मकं प्रत्ययं जनयति, यदा चाधर्म उत्कृष्यते तदा रजस्तमो वोत्कटं भूत्वा दुःखात्मकं मोहात्मकं वा प्रत्ययं जनयति, इत्येवं निमित्तानां कादाचित्कत्वान्न सर्वेषां सर्वत्र सर्वदाऽविशिष्टज्ञानत्वप्र-सक्तिरिति,

---

(१) जातिरूपनिमित्तसहकारिणोऽभावाच्च न मनुष्यादीनां कण्टकः सुखः निदाघकालरूपसहकारिणोऽभावाच्च न हेमन्ते चन्दनं सुखात्मकमित्याद्यूह्यम् ।

(२) फलोन्मुखः सन्नित्यर्थः ।

यद्वा (१) चित्ते वर्तमाना ये सुखदुःखमोहास्ते नाकस्मादुपजायन्तेऽपि तु सुखाद्यात्मकानि निमित्तान्यपेक्ष्योपजायन्ते, तथाच सुखाद्यात्मका विषया एव धर्मादिसापेक्षास्तन्निमित्तभूता इति कल्प्यन्ते–नहि विषयगतविशेषं विना विषयसन्निधिमात्रेण सुखाद्यात्मिका चित्तवृत्तिरुदेतुमर्हति, अव्यवस्थापत्तेः अतश्चित्तगतसुखादिनियामकत्वेन कल्प्यमानो विषयगतविशेषः सुखाद्यात्मक एव कल्प्यते, कार्य्यानुरूपस्यैव कारणस्यौचित्याद्' इत्यर्थोऽत्र ज्ञेयः ।

तथाचाहुर्व्यासदेवाः "(२) साङ्ख्यपक्षे पुनर्वस्तु त्रिगुणं, चलं च (३) गुणवृत्तमिति धर्मादिनिमित्तापेक्षं चित्तैरभिसंबध्यते, निमित्तानुरूपस्य च प्रत्ययस्योत्पद्यमानस्य तेन तेनात्मना हेतुर्भवति" इति,

(४) नच यो यस्य स्वभावः स न्वस्वभावोद्भवेन निमित्तं नापेक्षत इति साम्प्रतं, तथा सति कुसूलनिहितधान्यबीजेनैव कृती कृषीवलोऽलं तस्य क्षेत्रसंस्कारकेदारनिर्माणधान्यवपनसलिलसेचनाद्युद्योगेनेति (५) जोषमेवास्व,

सम्प्रति–"(६) धर्मापेक्षं चित्तस्य वस्तुसाम्येपि सुखज्ञानं भवति, अधर्मापेक्षं तत एव दुःखज्ञानम्, अविद्यापेक्षं तत एव मूढज्ञानम्" इति योगभाष्यमनुसृत्य भावानां सुखाद्यात्मकत्वमुदाहरणद्वारा विशदयितुमाह–"*तद् यथा*" इति, *यथैकमपि वस्तु सुखादिभेदभिन्नविज्ञानहेतुत्वेन सुखदुःखमोहात्मकं* प्रतीयते तथा तत्प्रदर्श्यत इत्यर्थः ।

---

(१) 'अत्र च सुखदुःखमोहा' इत्यादेर्ग्रन्थस्य सम्भवदर्थान्तरमाह–"यद्वा" इति. पूर्वस्मिन् व्याख्याने विषयगताः सुखाद्याः स्वस्वप्रादुर्भावे चित्तगतधर्माद्यपेक्षं विषयगतोत्कटसत्त्वादिकं निमित्तमपेक्षन्त इति वर्णितम्, इदानीं च चित्तगता ये सुखाद्यास्ते स्वोद्भवे विषयस्य सुखाद्यात्मकत्वरूपं निमित्तमपेक्षन्त इति वर्ण्यत इति विशेषः ।

(२) यो० पा० ४ सू० १५०.

(३) गुणवृत्तं=गुणस्वभावः, प्रतिक्षणपरिणामशीलं वस्तुमात्रमिति यावद्, अतः कदाचिदेव धनादिनिमित्तवशाच्चित्तेन वस्तु संबध्यते इति न सर्वदा सर्वात्मक ज्ञानं, तथा धर्मादिनिमित्तानुरूपं सुखाद्यात्मकप्रत्ययं प्रति सुखाद्यात्मकत्वेनैव वस्तु हेतुर्भवति, इति सिद्धं वस्तुनः सुखादिरूपत्वमिति भावः ।

(४) स्वभावस्य सर्वदानपायित्वान्न निमित्तापेक्षेति शङ्कामपनयति–"नच"इति

(५) जोषम्=मौनम्—

(६) यो० पा० ४ सू० १५ ।

वात्, सैव स्त्री सपत्नीर्दुःखाकरोति, तत्

कस्य हेतोः, ताः प्रति तस्या दुःखरूपसमुद्भवाद्, एवं पुरुषान्तरं तामविन्दमानं सैव मोहयति, तत् कस्य हेतोः, तम्प्रति तस्या मोहरूपसमुद्भवाद्, अनया च स्त्रिया सर्वे भावा व्याख्याताः ।

'सुखाकरोति'=आनुकूल्येनानन्दयति, "सुखप्रियादानुलोम्ये"[1] इत्यनेन करोतियोगे डाचि सुखाकरोति, इति,

पृच्छति—"तत् कस्य हेतोः"=यत्कामिन्याः कान्तं प्रति सुखजनकत्वं तत्कस्मात्कारणादित्यर्थः, उत्तरमाह—"स्वामिनं प्रति तस्याः सुखरूपसमुद्भवाद्"[2] कान्तचित्तोद्भूतधर्मरूपनिमित्तवशात्कान्तं प्रति कान्तायाः सुखात्मकसत्त्वगुणात्मकत्वेन प्रादुर्भावादित्यर्थः, एवमग्रेऽपि,

'दुःखाकरोति'=प्रातिकूल्येन पीडयति, "दुःखात्प्रातिलोम्ये"[3] इति डाच्,

तामविन्दमानम्=चैत्रपत्नीमलभमानं पुरुषान्तरं=चैत्रादन्यं स्त्रैणं[4] मैत्रं मोहयति=पुण्यवतो बत चैत्रस्य कलत्ररत्नमिदं ननु मम मैत्रस्य मन्दभाग्यस्येत्येवं विषादयतीत्यर्थः,

उक्तन्यायमन्यत्राप्यतिदिशति—"अनया च स्त्रिया" इति, एतत्कान्तोदाहरणेनान्येषामपि भावानां सुखाद्यात्मकत्वं व्याख्यातं वेदितव्यं, तद् यथा मेघा वृष्ट्या कृषीवलानां सुखं जनयन्ति, पान्थानाञ्च दुःखं, विरहिणां च मोहम्, एवं न्यायपरायणो राजा शिष्टानां सुखमुत्पादयति, दुष्टानां च दुःखं मोहं चेति, एतच्च देवीभागवते[5] "यथा काचिद् वरा नारी सर्वभूषणभूषिता । हावभावयुता कामं भर्तृप्रीतिकरी भवेद्"—इत्यादिना व्यक्तमिति तत एव निरीक्ष्यम् ।

---

(१) ५।४।६३। आनुलोम्यम्—अनुकूलता ।

(२) दुःखरूपसमुद्भवाद्—इत्यादौ ।

(३) ५।४।६४। प्रातिलोम्यं=प्रातिकूल्यम् ।

(४) स्त्र्यासक्तं कामुकम्—

(५) स्क० ३ अ० ९ ।

तत्र यत्सुखहेतुस्तत्सुखात्मकं सत्त्वं, यद् दुःखहेतुस्तद् दुःखात्मकं रजः, यन्मोहहेतुस्तन्मोहात्मकं तम इति,

सुखप्रकाशलाघवानान्त्वेकस्मिन् युगपदुद्भूतावविरोधः सहदर्शनात् तस्मात्सुखदुःखमोहैरिव विरोधिभिरविरोधिभिरेकैकगुणवृत्तिभिः सुखप्रकाशलाघवैर्न[1] निमित्तभेदा उन्नीयन्ते, एवं दुःखोपष्टम्भकत्वप्रवर्तकत्वैर्, एवं मोहगुरुत्वावरणैर्, इति सिद्धं त्रैगुण्यमिति ॥ १३ ॥

स्यादेतद्, अनुभूयमानेषु पृथिव्यादिष्वनुभवसिद्धा भवन्त्व-

नन्वेकः कामिनीरूपोऽर्थः कथं विभिन्नविज्ञानहेतुर्नह्यविलक्षणात्कारणात्कार्य्यभेदो युक्त इत्याशङ्क्य पूर्वोक्तं निमित्तनानात्वं स्मारयति,–"तत्र" इत्यादिना,

तत्र एतस्मिन्नुदाहरणे यत्कान्तचित्तवृत्तिसुखात्मकप्रत्ययं प्रति निमित्तं तद् धर्मापेक्षं कान्ताकायगतं सुखात्मकं सत्त्वं ज्ञेयमित्यर्थः, एवमग्रेपि,

एवं तावद् विरुद्धानां युगपदेकत्रोद्भवे निमित्तनानात्वापेक्षाऽभिहिता, सम्प्रत्यविरुद्धानामेकैकगुणधर्माणां युगपदुद्भवे निमित्तनानात्वानपेक्षामाह–"सुखप्रकाशलाघवानाम्" इत्यादिना, उन्नीयन्ते=कल्प्यन्ते अपेक्ष्यन्ते, यत एकत्र सहवर्तनदर्शनात्सुखप्रकाशलाघवानां युगपदेकत्रोद्भवे न विरोधस्तस्माद् विरोधिभिः सुखदुःखमोहैरिवाविरोधिभिः सुखप्रकाशलाघवैर्न निमित्तभेदा अपेक्ष्यन्तेऽपि तु सात्विकैः सुखादिभिर्धर्मापेक्षं केवलं सत्त्वमपेक्ष्यते, राजसैश्च दुःखादिभिः केवलमधर्मापेक्षं रजोऽपेक्ष्यते, तामसैश्च केवलमविद्यापेक्षं तमोऽपेक्ष्यत, इति समुदायार्थः । उपसंहरति–"इति सिद्धं त्रैगुण्यम्" इति, ॥ १३ ॥

एवं सर्वेषां भावानां त्रैगुण्यं प्रसाध्य तेन[2] हेतुनोद्देश्यान्तरं साधयितुमार्यामवतारयति, "स्यादेतद्" इत्यादिना, अविवेकित्वादयः'='त्रिगुणमविवेकि' इत्यनेनाभिहिताः संहत्यकारित्वादयो धर्मविशेषाः,

---

(१) अत्र 'न निमित्तभेदा उन्नीयन्ते' इत्यस्यानुषङ्गः, एवं 'मोहगुरुत्वावरणैर्' इत्यत्राप्यनुषङ्गो ज्ञेयः ।

(२) तेन=त्रैगुण्येन, उद्देश्यान्तरं=प्रधानादीनामविवेकित्वादिधर्मवत्त्वम् ।

विवेकित्वादयः ये पुनः सत्त्वादयो नानुभवपथमधिरोहन्ति तेषां कुतस्त्यमविवेकित्वं विषयत्वं सामान्यत्वमचेतनत्वं प्रसवधर्मित्वं च इत्यत आह—"अविवेक्यादेस्सिद्धिर्" इति,

अविवेक्यादेस्सिद्धिस्त्रैगुण्यात्तद्विपर्ययाभावात्,
कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपि सिद्धम्॥ १४॥

अविवेकित्वमविवेकि, यथा—"द्व्येकयोर्द्विवचनैकवचने" इत्यत्र द्वित्वैकत्वयोरिति, अन्यथा द्व्येकेष्विति स्यादिति,

कुतः पुनरविवेकित्वादेस्सिद्धिर्, इत्यत आह-"त्रैगुण्याद्"= यद्यत्सुखदुःखमोहात्मकं तत्तदविवेकित्वादियोगि यथेदमनुभूयमानं व्यक्तम् इति स्फुटत्वादन्वयो नोक्तः, व्यतिरेक-

---

सत्त्वादय—इत्यत्र सत्त्वशब्देन सत्त्वादिगुणत्रयसाम्यावस्थारूपं प्रधानं ग्राह्यम्, आदिशब्देन च महदादयो ग्राह्याः, नानुभवपथमधिरोहन्ति=नाध्यक्षमीक्ष्यन्त इत्यर्थः, 'कुतस्त्यम्'=कस्मात्प्रमाणादवगतमित्यर्थः,

आर्यायाम् 'अविवेकि' इतिपदं भावप्रधाननिर्देशेनाविवेकित्वार्थकं, तत्र दृष्टान्तत्वेन पाणिनीयसूत्रमाह—"यथा द्व्येकयोर्" इति,

सूत्रेपि द्वित्वविशिष्टैकत्वविशिष्टपरतैव किन्न स्यात् तत्राह—"अन्यथा" इति अन्यथा=द्वित्वैकत्वपरत्वानङ्गीकारे, द्विशब्देन द्वित्वविशिष्टद्वयोर्ग्रहणे एकशब्देनैकत्वविशिष्टैकस्य ग्रहणे तयोर्द्वन्द्वे द्व्येकशब्दस्य बहुसङ्ख्याकत्वेन द्व्येकेष्विति बहुवचनान्तमेव निर्दिश्येत, तथा निर्देशाभावाच्च द्वित्वैकत्वपरताऽत्र प्रतीयत इत्यर्थः,

प्रधानमहदभिमानादीनि अविवेकित्वादिधर्मवन्ति त्रिगुणत्वाद् इति प्रयोगेऽन्वयव्याप्तिमाह—

"यद्यत्सुखदुःखमोहात्मकम्" इति।

---

(१) यत्र धर्मिवाचकः शब्दो धर्मपरत्वेनाभिप्रेयते तत्र भावप्रधाननिर्देश इत्यभिलप्यते,

माह "तद्विपर्य्ययाभावाद्"=अविवेक्यादिविपर्य्यये पुरुषे त्रैगुण्याभावाद्,

अथवा–व्यक्ताव्यक्ते पक्षीकृत्यान्वयाभावेनावीत एव हेतुः त्रगुण्याद् इति वक्तव्यः,

स्यादेतद्–अव्यक्तसिद्धौ सत्यां तस्याविवेकित्वादयो धर्माः सिद्ध्यन्ति अव्यक्तमेव त्वद्यापि न सिध्यति, तत्कथमविवेकित्वादिसिद्धिर् अत आह–"कारणगुणात्मकत्वाद्" इति,

अयमभिसन्धिः—कार्य्यं हि कारणगुणात्मकं दृष्टं यथा तन्त्वादिगुणात्मकं पटादिकं, तथा महदादिलक्षणेनापि कार्येण सुखदुःखमोहरूपेण स्वकारणगतसुखदुःखमोहात्मना भवितव्यं

अविवेकित्वादियोगि=अविवेकित्वादिधर्मवद्, उदाहरणमाह–"यथेदम्" इति, व्यक्तं=देहगेहघटपटादिकं स्थूलं वस्तु, इति=इत्येवम् अन्वयसहचारस्य स्फुटत्वाद्=स्थूलविषयत्वेन स्वयमेवोहितुं शक्यत्वेन स्पष्टत्वाद् अन्वयसहचारः कारिकाकृता न मुखतोऽभिहितो यद्यपि तथापि स्वयमूह्य इत्यर्थः

तस्य=अविवेकित्वादेः विपर्ययः=अभावो यत्रासौ तद्विपर्ययः=आत्मा, तत्र त्रैगुण्याभावाद् यन्नाविवेकि तन्न त्रिगुणं[1] यथाऽऽत्मतत्त्वमिति व्यतिरेकसहचार उक्त इत्याह "व्यतिरेकमाह" इति, अविवेक्यादिविपर्य्यये=अविवेकित्वादिधर्माभाववतीत्यर्थः,

यदा स्थूलेषु भावेषु अविवेकित्वत्रिगुणत्वे सिद्धवत्कृत्वाऽतीन्द्रियं प्रधानादिकमेव पक्षीक्रियते तदा त्रैगुण्याद् इति हेतुरन्वय्यपि संभवति यदा तु सकलमेव व्यक्ताव्यक्तरूपं तत्त्वं पक्षीक्रियते तदा पक्षातिरिक्तान्वयसहचारोदाहरणस्थलाभावेन व्यतिरेक्येव हेतुस्त्रैगुण्यादितीत्याशयेनाह–"अथवा" इति अवीतः=व्यतिरेकसहचारवान्,

अभिसन्धिर्=अभिप्रायः,

कारणगतसुखदुःखमोहात्मना–स्वकारणगतसुखदुःखमोहरूपधर्मपूर्वकेण कार्य्यगतसुखादिना भवितव्यमित्यर्थः। एतच्च पूर्वं निरूपितं, निरूपयिष्यते च॥ १४॥

---

(१) त्रिगुणम्–इत्यस्य विवरणमिदम्।

तथा च तत्कारणं सुखदुःखमोहात्मकं प्रधानमव्यक्तं सिद्धं भवति ॥ १४ ॥

स्यादेतद्, व्यक्ताद् व्यक्तमुत्पद्यत इति कणभक्षाक्षचरणतनयाः, परमाणवो हि व्यक्तास्तैर्द्व्यणुकादिक्रमेण पृथिव्यादि लक्षणं कार्यं व्यक्तमारभ्यते, पृथिव्यादिषु च कारणगुणक्रमेण रूपाद्युत्पत्तिः, तस्माद् व्यक्ताद् व्यक्तस्य तद्गुणानां चोत्पत्तेः कृतमदृष्टचरेणाव्यक्तेन, इत्यत आह—"भेदानां परिमाणाद्" इत्यादि—

भेदानां परिमाणात्, समन्वयात्, शक्तितः, प्रवृत्तेश्च,
कारणकार्यविभागादविभागाद् वैश्वरूपस्य,
कारणमस्त्यव्यक्तं, प्रवर्तते त्रिगुणतः, समुदयाच्च,
परिणामतः सलिलवत्,प्रतिप्रतिगुणाश्रयविशेषाद्॥१५॥१६

प्रधानेन अलं=न किमपि कृत्यमित्यर्थः ॥ १४ ॥

कणभक्षाक्षचरणतनयाः—कणादगौतममतानुयायिनोऽभ्युपगच्छन्तीत्यर्थः ।

कीदृशाद् व्यक्ताद् कीदृग् व्यक्तमुत्पद्यते, तत्राह—"परमाणवो हि" इति, सूक्ष्मात् खलु स्थूलस्योत्पत्तिर्दृश्यते, यथा तन्तुभ्यः पटस्य तन्तूनां चांशुभ्य एवमपकर्षक्रमेणापकर्षक्रमेणापकर्षकाष्ठामापन्नं कारणद्रव्यमतिसूक्ष्ममनवयवमवतिष्ठते तच्च परमाणुरूपं तत्र प्रथमं तावददृष्टवत् क्षेत्रज्ञसंयोगात्परमाणौ कर्म जायते ततोऽसौ परमाण्वन्तरेण संयुज्य द्व्यणुकमारभते, द्व्यणुकानि च त्रीणि सम्भूय त्र्यणुकमुत्पादयन्ति ततश्चतुरणुकादिक्रमेण स्थूलाः पृथिव्यादयः, यथा सूक्ष्मद्रव्याणि स्थूलद्रव्याण्यारभन्त एवं कारणसमवायिनश्च गुणाः कार्य्ये समानजातीयं गुणान्तरमारभन्त इति हि तेषां प्रक्रिया, एवं च परिदृश्यमानरूपादिगुणवत्कार्य्यबलेन रूपादिमद् व्यक्तं परमाणुद्रव्यमेव कारणमुपेयं ननु रूपादिहीनमव्यक्तमित्यत्र फलितं, तदेवाह—"कृतमदृष्टचरेण" इति, 'कृतम्' इति अलमर्थकत्वेन प्रतिषेधार्थकमव्ययम् अदृष्टचरेण=[1]अप्रामाणिकेन रूपादिहीनेन ।

(१) पूर्वं न दृष्टमित्यदृष्टचरं, 'भूतपूर्वे चरट्' इति स्मरणात्, तदेवाह—"अप्रामाणिकेन" इति ।

भेदानां विशेषाणां महदादीनां भूम्यन्तानां कार्य्याणां कारणं 'मूलकारणम्' अस्त्यव्यक्तं, कुतः, 'कारणकार्य्यविभागादविभागाद्वैश्वरूप्यस्य' कारणे सत्कार्यमिति स्थितं, तथाच यथा कूर्मशरीरे सन्त्येवाङ्गानि निःसरन्ति विभज्यन्ते 'इदं कूर्मशरीरमेतान्यस्याङ्गानि इति, एवं निविशमानानि तस्मिन्नव्यक्तीभवन्ति, एवं कारणान्मृत्पिण्डाद् हेमपिण्डाद् वा कार्याणि घटमुकुटादीनि सन्त्येवाविर्भवन्ति विभज्यन्ते, सन्त्येव च पृथिव्यादीनि कारणात् तन्मात्रादाविर्भवन्ति विभज्यन्ते सन्त्येव च तन्मात्राण्यहङ्कारात्कारणात्, सन्नेवाहङ्कारः कारणान्महतः, सन्नेव च महान् परमाव्यक्तात् । सोयं कारणात्प-

भिद्यन्ते=परस्परं व्यावृत्ताः प्रतीयन्ते इति भेदाः कार्य्याणि महदादीनि, तेषां 'कारणमस्त्यव्यक्तम्' इत्युत्तरार्याद्यपादेनान्वय इत्याशयेन व्याचष्टे "भेदानाम्" इति,

एतस्यां(१) प्रतिज्ञायां 'परिमाणाद्' इत्यादयः पञ्च हेतवः तत्र पाठक्रममुपेक्ष्याकाङ्क्षाक्रममनुरुध्य हेतुद्वयप्रयोगमाह—"कारणकार्यविभागाद्, अविभागाद्वैश्वरूप्यस्य" इति,

उत्पत्तिकाले सत एव कार्यस्य कारणसकाशादाविर्भावाद् इति प्रथमहे(२)त्वर्थः, विश्वरूपमेव वैश्वरूप्यं चतुर्वर्णादित्वात्स्वार्थिकः(३) ष्यञ्, विश्वरूपस्य=कृत्स्नस्य कार्यस्य संहारकाले कारणेऽविभागात्=तिरोभावाद् इति द्वितीयहेत्वर्थः, एवं च यदाविर्भवति तत्सूक्ष्मावस्थापूर्वकमेव भवति यच्च तिरोभवति तत्सूक्ष्मावस्थान्तमेव भवति यथा कूर्माङ्गानि इति व्याप्तिबलेन "महदादिकं कार्यं स्वीयसूक्ष्मावस्थापूर्वकं भवितुमर्हति आविर्भावतिरोभाववत्त्वात्कूर्माङ्गवद् इत्यनुमानमत्र फलितं, तथा—चादावन्ते च यत्सूक्ष्मावस्था(४)श्रयतया सिद्ध्यति तदेव नः प्रधानमिति सिद्धा कारणमस्त्यव्यक्तमिति प्रतिज्ञा,

(१) एतस्यां=कारणमस्त्यव्यक्तमित्याकारायां ।

(२) कारणकार्याविभागादिति हेत्वर्थः ।

(३) 'चतुर्वर्णादीनां स्वार्थ उपसङ्ख्यानम्' इति वार्तिकेनेति शेषः ।

(४) सर्गे सूक्ष्मावस्थापूर्वकं संहारे च सूक्ष्मावस्थावसानमिति ध्येयम् ।

रमाव्यक्तात्साक्षात्पारम्पर्य्येणान्वितस्य विश्वस्य कार्य्यस्य विभागः।

प्रतिसर्गे तु मृत्पिण्डं सुवर्णपिण्डं वा घटमुकुटादयो विशन्तोऽव्यक्तीभवन्ति, तत्कारणरूपमेवानभिव्यक्तं कार्य्यमपेक्ष्याव्यक्तं भवति, एवं पृथिव्यादयस्तन्मात्राणि विशन्तः स्वापेक्षया तन्मात्राण्यव्यक्तयन्ति, एवं तन्मात्राण्यहङ्कारं विशन्त्यहङ्कारमव्यक्तयन्ति, एवमहङ्कारो महान्तमाविशन् महान्तमव्यक्तयति, महान् प्रकृतिं स्वकारणमाविशन् प्रकृतिमव्यक्तयति, प्रकृतेस्तु न क्वचिन्निवेश इति सा सर्वकार्य्याणामव्यक्तमेव, सोयमविभागः प्रकृतौ वैश्वरूप्यस्य नानारूपस्य कार्यस्य, 'स्वार्थिकः ष्यञ्' तस्मात् कारणे कार्यस्य सत एव विभागाविभागाभ्या-

एतदेव विशदयन् प्रथमं हेतुं विवृणोति-"कारणे सत्कार्यम्' इति, स्थितम्=अधस्तात् सिद्धान्तितम्,

निस्सरन्ति इति शत्रन्तं प्रथमाबहुवचनं, निविशमानानि इत्युत्तरपाठानुरोधाद्, विभज्यन्ते आविर्भूय विभक्तत्वेन प्रतीयन्ते, तामेव प्रतीतिमाह-"इदं कर्मशरीरम् एतानि चास्याङ्गानि" इति,

दृष्टान्तं व्याख्याय दार्ष्टान्तिकान्याह-"एवं कारणान्मृत्पिण्डाद्" इत्यादिना,

अहङ्कारात्कारणाद्-इत्यत्र 'आविर्भवन्ति विभज्यन्त' इत्यनुषङ्गः, एवमग्रेपि,

आद्यं हेतुं व्याख्याय द्वितीयं व्याख्यातुमाह-"प्रतिसर्गे" इति, प्रतिसर्गे=संहारकाले तु मृत्पिण्डादिकं विशन्तो घटादयोऽव्यक्तीभवन्ति= मृदाद्यात्मनावस्थायानभिव्यक्ता भवन्तीत्यर्थः,

(१) स्वोपात्तं प्रथमं नतु कारिकागतं परिमाणाद् इति।

(२) इति कारिकाविवरणे।

(३) सत्त्वाहङ्कारः कारणान्महत आविर्भवन् विभज्यते इत्येवमग्रेपि योजनीयमित्यर्थः।

(४) पूर्वं व्यक्ताः सन्त एव पश्चादव्यक्तं भवन्तीति बोधनाय 'अव्यक्ती' इति च्विप्रत्यय इत्यपि बोध्यम्।

मव्यक्तं कारणमस्ति, इतश्चाव्यक्तमस्ति, इत्याह—"शक्तितः प्रवृत्तेश्च" कारणशक्तितः कार्यं प्रवर्तत इति सिद्धम्, अशक्तात्कारणात्कार्यस्यानुत्पत्तेः शक्तिश्च कारणगता न कार्यस्याव्यक्तत्वादन्या, न हि सत्कार्यपक्षे कार्यस्याव्यक्तताया अन्यस्यां शक्तौ प्रमाणमस्ति,

---

ननु शब्दादिविहीनं किलैकमेवाव्यक्तं यत्प्रधानं नाम तत्कथमन्येषामव्यक्तत्वमत्रोच्यत इत्याशङ्क्यान्येषामापेक्षिकमव्यक्तत्वमाह—"तत्कारणरूपमेव" इति, यतः संहारे स्वस्वकारणे तिरोभूतं सत्कार्यमनभिव्यक्तं भवत्यतस्तादृगनभिव्यक्तं कार्यमपेक्ष्यैव तत्तत्कारणमव्यक्तमित्युच्यते न तु प्रधानवन्मुख्यमव्यक्तत्वमादायेत्यर्थः,

यद्यपि प्रधानातिरिक्तमवान्तरकारणजातं व्यक्तमेव तथापि तत्तत्कार्यीयसूक्ष्मावस्थाख्यानभिव्यक्ततारूपधर्मयोगान्निखिलमपि कारणरूपमव्यक्तमित्युपचर्यत इति भावः,

कार्यकारणयोरभेदात्कार्यस्यानभिव्यक्तत्वमेव कारणस्याव्यक्तत्वमिति तत्त्वम्,

'स्वापेक्षया तन्मात्राण्यव्यक्तयन्ति'=स्वीयानभिव्यक्ततावस्थापेक्षया तन्मात्राण्यव्यक्तानि कुर्वन्तीत्यर्थः,

स्वीयानभिव्यक्ततावस्थायोजने तन्मात्राणामव्यक्तत्वं संपादयन्तीति, एवमग्रेऽपि,

'सर्वकार्याणामव्यक्तमेव'=सर्वेषां कार्याणामतीतानागतावस्थाया युक्तत्वेनाव्यक्तमेव न तु महदादिवत्कदाचिदव्यक्तं कदाचिच्च व्यक्तं मुख्यमव्यक्तमिति यावद् इत्यर्थः,

सर्वेषां कार्याणामव्यक्तपूर्वकत्वमव्यक्तान्तत्वं च हेतुद्वयेन साधितं निगमयति—"तस्माद्" इति, तद्धेदं तर्ह्यव्याकृतमासीद्'—'अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत, अव्यक्तनिधनान्येव तत्र का परिदेवना' इत्यादय आगमा अप्यत्रतर्कानुकूलत्वेनानुसन्धेयाः,

---

(१) घटादयोऽव्यक्तीभवन्ति इत्यनेन मृदाद्यात्मना घटादीनामव्यक्तत्व तन्मात्राण्यव्यक्तयन्ति, अहङ्कारमव्यक्तयन्ति, महान्तमव्यक्तयन्ति—इति वक्ष्यमाणं तन्मात्रादीनामव्यक्तत्वं चेत्यर्थः ।

(२) अहङ्कारमव्यक्तयन्ति इत्येवमादावित्यर्थः,

अयमेव हि सिकताभ्यस्तिलानां तैलोपादानानां भेदो यदेतेष्वेव तैलमनागतावस्थं न सिकतास्विति,

स्यादेतत् शक्तितः प्रवृत्तिः कारणकार्यविभागाविभागौ च महत एव परमाव्यक्तत्वं साधयिष्यतः कृतं ततः परेणाव्यक्तेन, इत्यत आह–"परिमाणाद्" इति,

---

'बुद्ध्यादिकं शक्तिरूपसूक्ष्मावस्थापूर्वकं भवितुमर्हति कार्यत्वाद् घटवद्' इत्यनुमानेन महदादेः शक्तिपूर्वकत्वं सिद्धं सत् निराश्रयशक्त्ययोगात् तस्याः शक्तेराश्रयभूतमव्यक्तमादाय पर्यवस्यतीत्याशयेन प्रवृत्तं हेत्वन्तरं व्याचष्टे–"कारणशक्तित" इति,

कारणगतशक्तितः कार्यं प्रवर्तते=जायत इति सिद्धं, तत्र हेतुः 'अशक्तात्कारणात्कार्य्यानुत्पत्तेः' इति,

अस्तु, शक्तियुक्तादेव कारणात्कार्य्यस्योत्पत्तिस्तावता कथं कार्य्याणामव्यक्तकारणकत्वमित्यत्राह–"शक्तिश्च" इति, कार्यस्यानागतावस्थाख्याव्यक्तताया अन्या काचिच्छक्तिर्नाम नास्तीत्यर्थः। तत्र हेतुमाह–"नहि" इति, हि=यतः, आवेदितमेतदधस्ताद् यथानागतावस्थातोऽतिरिक्ता न काचिच्छक्तिः प्रामाणिकीति, तिलेष्वेव तैलोत्पादनशक्तिर्न वालुकास्वित्येवं कार्योत्पत्तिनियामकत्वेन कल्प्यमाना शक्तिरपि तत्तत्कार्यीयानागतावस्थैवेत्याशयेनाह "अयमेव हि" इति, एतेषु=तिलेषु,

ननूक्तहेतुत्रयेण कार्याणामव्यक्तपूर्वकत्वमव्यक्तान्तत्वं च यद्यपि सिद्धं तथापि नैतावता प्रधानकारणकत्वावधारणम्, महान्तमेवाव्यक्तमादाय तत्पूर्वकत्वसिद्ध्याऽर्थान्तरतापातसंभवादित्याशयेन शङ्कते–"स्यादेतद्" इति,

बुद्धेरपि परिच्छिन्नत्वेन कार्यत्वान्न महतः परमाव्यक्तत्वमपि तु तत्कारणत्वेनानुमितस्य प्रधानस्यैव तत्त्वमित्याशयेन समाधत्ते–"परिमाणाद्" इति, परिमाणं=परिमितिः, भावे ल्युट्, परिच्छेद इति यावत्, तदेवाह–"परिमितत्वाद्" इति,

---

(१) शक्तितः प्रवृत्तेः इति हेतुमित्यर्थः।

(२) 'शक्तस्य शक्यकरणाद्' इति कारिकांशविवरणे।

(३) शक्तितः प्रवृत्तेः। कारणकार्य्यविभागाद्, इति हेतुद्वयेनाव्यक्तपूर्वकत्वं साधितम्, अविभागाद्वैश्वरूप्यस्येति हेतुना चाव्यक्तान्तत्वं साधितमित्यर्थः।

(४) अभिमतासिद्धिरर्थान्तरता।

(५) तत्त्वम्=परमाव्यक्तत्वम्।

परिमितत्वाद्–अव्यापित्वादिति यावद्, विवादाध्यासिनो महदादिभेदा अव्यक्तकारणवन्तः परिमितत्वाद् घटादिवद्,

---

ननु परिमितत्वमत्र किं देशपरिच्छिन्नत्वरूपं विवक्षितमुत कालपरिच्छिन्नत्वरूपमाहोस्वित्सङ्ख्येयतारूपं वस्तुपरिच्छिन्नत्वात्मकमिति, न तावदाद्यः कल्पः, नभसः सर्वदेशगतत्वेन तत्रैतादृशपरिमितत्वासत्त्वाद् हेतोर्भागासिद्धत्वापाताद्, नापि द्वितीयः पक्षः विवक्षितुं युक्तः पञ्चविंशतितत्त्वातिरिक्तकालानभ्युपगमेन स्वरूपासिद्धेर्दुर्वारत्वाद्, नापि तृतीयः संभवति, सत्त्वादीनां व्यक्तित्रयात्मकत्वेन परस्परं भिन्नत्वेन परिमितत्वापत्त्या व्यभिचारस्य दुर्निवारत्वादित्याशङ्कामपनेतुं 'परिमितत्वाद्' इत्यस्यार्थमाह–"अव्यापित्वाद्" इति, निखिलं परिणामिनं न व्याप्नोतीत्यव्यापि तस्य भावस्तत्त्वं, तस्मादित्यर्थः, एवं च नभसस्तन्मात्राद्यव्यापित्वेन न हेतोर्भागासिद्धत्वं, नहि कार्यं कारणं व्याप्नोत्यपि तु कारणं कार्यमित्यभ्युपगमेन नभसः स्वकारणशब्दतन्मात्राहङ्कारमहदव्यक्ताव्यापकत्वेन निखिलपरिणाम्यनुवृत्तत्वरूपव्यापित्वाभावाद्,

नचैवमपि व्यभिचारो दुर्वारः नहि यथा सत्त्वादिभिर्निखिलं कार्यमाविष्टं तथा परस्परं तानि व्याप्नुवन्ति, मिथः कार्यकारणभावाभावादिति शङ्कनीयम्, 'एते गुणा इतरेतराश्रयेणोपार्जितसुखदुःखमोहप्रत्यया इति सर्वे सर्वरूपा भवन्ति' इति योगभाष्येण 'अन्योन्यमिथुनाः सर्वे' इत्यादिना च पूर्वगुणानां परस्परव्याप्त्यभ्युपगमेन तेषां व्यापित्वाङ्गीकाराद्,

---

(१) महदादिकमव्यक्तकारणकं परिमितत्वादिति प्रयोगे महदादिरूपपक्षैकदेश-आकाशे परिमितत्वरूपहेतोरवर्तनाद् भागासिद्धत्वमित्यर्थः ।

(२) एतच्चोपरिष्टाद् (३३) इत्यार्याविवरणे व्यक्तम् ।

(३) हेतोः स्वरूपानिष्पत्त्या पक्षे हेतोरेवाभाव इति भावः ।

(४) गुणानामेवाव्यक्तत्वेन तत्राव्यक्तकारणकत्वरूपसाध्यासत्त्वात् साध्याभाववति गुणत्रये परिमितत्वहेतोर्वृत्तित्वेन न परिमितत्वाव्यक्तकारणकत्वयोर्व्याप्यव्यापकभाव इति दुर्वारो व्यभिचार, इति भावः ।

(५) तत्त्वम्=अव्यापित्वम् ।

(६) नभसोऽव्यापित्वं विशदयति–"नहि" इत्यादिना ।

(७) तानि=सत्त्वरजस्तमांसि ।

(८) पा० २ सू० १५ ।

(९) पूर्व=१२–इत्यार्याविवरणे ।

घटादयो हि परिमिता मृदाद्यव्यक्तकारणका दृष्टाः, उक्तमेतद् यथा कार्यस्याव्यक्तावस्था कारणमेवेति यन्महतः कारणं तत्परमाव्यक्तं, ततः परतराऽव्यक्तकल्पनायाम्प्रमाणाभावाद्,

---

नच प्रलये गुणानां परस्परव्याप्त्यभावादव्यापकतेति शङ्क्यं, सत्कार्यवादाङ्गीकारेण तत्रापि परस्परं व्याप्तेरभ्युपगमाद् नहि प्रलयेप्यव्याप्तिरूपो गुणानां सङ्कोचोभ्युपेयते किन्तर्हि व्यापकानामेव सतां तेषामभिभवः, यथा व्याप्त्या विद्यमानयोरेव धर्महिमयोर्हेमन्तग्रीष्मयोरभिभवो, ग्रीष्महेमन्तयोस्तु तयोरुद्भवस्तथा प्रलयेऽभिभवः सृष्टौ तूद्भव इति नाव्यापिता गुणानां यद्वा नित्यैकपरिणाम्यनुवृत्तियोग्यतावत्त्वैवात्र व्यापिता ज्ञेया,

एतेन 'सत्त्वरजस्तमांस्यपि न परस्परं व्याप्नुवन्ति, नच तत्त्वान्तरपूर्वकत्वमेतेषामिति व्यभिचारः इति भामत्यभिहितदोषस्य नात्र प्रसर इति ज्ञेयम्,

"परिमाणाद्" इति सूत्रं व्याचक्षाणो विज्ञानभिक्षुस्तु (परिच्छिन्नत्वाद्=दैशिकाभावप्रतियोगितावच्छेदकजातिमत्त्वादित्यर्थः, तेन गुणव्यक्तीनां कियतीनां परिच्छिन्नत्वेपि तत्र न व्यभिचारः) इत्येवं व्यभिचारपरिहारं चकार,

दृष्टान्ते साध्यसमन्वयमाह--"घटादयो हि" इति, मृदादेः कथमव्यक्तत्वमित्याशङ्क्य पूर्वोक्तं स्मारयति--"उक्तमेतद्" इति कार्यस्यानागतावस्थाख्यानभिव्यक्ततामपेक्ष्य तत्तत्कारणरूपमव्यक्तमित्युच्यत इति पूर्वमुक्त-

---

(१) 'प्रतिसर्गावस्थायां सत्त्वं सत्त्वरूपतया रजो रजोरूपतया वर्तेत' इत्यनुपदमेव वक्ष्यमाणत्वेन प्रलये परस्परव्याप्तेरभावादिति भावः ।

(२) तत्रापि=प्रलयेपि ।

(३) प्रलये व्याप्त्यभ्युगमे सर्गारम्भे गुणानां गुणप्रधानभावेनावस्थानरूपा वैषम्यावस्था, प्रलये तु परस्परानाश्रितरूपेणावस्थानरूपा साम्यावस्थेति विशेषः कथं सिद्ध्येदित्याशयेन पृच्छति "किन्तर्हि" इति, अभिभवानभिभवकृतो विशेषः इत्याशयेन समाधत्ते "व्यापकानामेव" इति ।

(४) एवं च योग्यताया नित्यत्वात् प्रलयेऽनुवृत्त्यभावेपि नाव्यापिता गुणानामिति ।

(५) एतेन=गुणानां व्यापित्वेन ।

(६) अ० १ सू० १३० 'कार्यत्वं महदादेर्घटादिवद्' इति पूर्वसूत्रोक्तेऽनुमानप्रयोगे हेतूपदर्शनपरमिदं सूत्रमिति ज्ञेयम् ।

इतश्च—विवादाध्यासिता भेदा अव्यक्तकारणवन्तः समन्वयाद्, भिन्नानां समानरूपता समन्वयः, सुखदुःखमोहसमन्विता हि बुद्ध्यादयोऽध्यवसायादिलक्षणाः प्रतीयन्ते, यानि च यद्रूपसमनुगतानि तानि तत्स्वभावाऽव्यक्तकारणकानि यथा

मिति न दृष्टान्ते साध्यवैकल्यमित्यर्थः, नापि पक्षधर्मताऽभावः, महदादीनामव्यापित्वस्य पूर्वमुक्तत्वादित्यपि बोध्यम्,

अनेनानुमानेन यथाहङ्कारादिकारणत्वेन महदादिरूपमव्यक्तं सिद्ध्यति तथा महत्तत्त्वकारणत्वेनापि किंचिदव्यक्तं सिद्धं तथाच यत् तत्कारणत्वेन सिद्धं तत्परमाव्यक्तं प्रधानमित्याशयेन फलितमाह—"यन्महतः कारणम्" इति,

एवंच महतोऽव्यापित्वान्न तस्य परमाव्यक्तत्वमिति न तत्राव्यक्तत्वविभ्रान्तिरित्यत्र फलितम् ।

ननु प्रधानमपि यत्किञ्चिदव्यक्तकारणकं भवितुमर्हति अव्यक्तत्वान्महदादिवदित्यनुमानेनान्यत्परतरमव्यक्तं कुतो न कल्प्यत इत्याशङ्क्यास्यानुमानस्याव्यापित्वरूपोपाधिग्रस्तत्वेनाप्रमाणत्वादित्यभिप्रेत्य समाधत्ते "ततः परतराव्यक्तकल्पनायां प्रमाणाभावाद्" इति,

नन्वनुमानस्य विशेषप्रत्यायनेऽशक्तत्वादनेनानुमानेन सिद्ध्यत्सद् यत्किञ्चिदव्यक्तरूपं कारणं ब्रह्मैव सिद्ध्येदिति कथं प्रधानकारणतावधारणा, इत्याशङ्कामपनेतुं हेत्वन्तरमवतारयति—"इतश्च" इति, वक्ष्यमाणहेतोरपीत्यर्थः, भेदाः=महदादिविकाराः, अव्यक्तकारणवन्तः=सुखाद्यात्मकसामान्याव्यक्तवत्प्रकृतिका इत्यर्थः,

यदुक्तम् 'इतश्च' इति तदाह—"समन्वयाद्" इति, समन्वयपदार्थमाह "भिन्नानाम्" इति, अध्यवसायादिलक्षणतत्तदसाधारणधर्मवत्त्वेनान्योन्यं

---

(१) पूर्वम्=‘हेतुमदनित्यमव्यापि’ १० इतिकारिकयोक्तत्वादित्यर्थः ।

(२) महत्कारणत्वेन ।

(३) एवं च कृतं ‘महतः परेणाव्यक्तेन’ इति, यत् पूर्वं शङ्कितं तन्निर्दलितमिति बोध्यम् ।

(४) यत्राव्यक्तकारणकत्वं महदादौ तत्राव्यापित्वं, यत्र चाव्यक्तत्वं, प्रधाने न तत्राव्यापित्वमित्येवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादव्यापित्वस्योपाधित्वं बोध्यम् ।

(५) ‘अनुमानं सामान्यविषयमेव’ इत्यादिना योगभाष्ये (१।४९) व्यक्तमिदम् ।

मृद्धेमपिण्डसमनुगता घटमुकुटादयो मृद्धेमपिण्डाव्यक्तकारणकाः, इति कारणमस्त्यव्यक्तं भेदानामिति सिद्धम् ।

भिन्नानां बुद्ध्यादीनां या सुखाद्यात्मसाधारणधर्मवत्त्वेनैकरूपता स समन्वय इत्यर्थः. एतदेव दर्शयन् हेतोः पक्षधर्मतामाह—"सुखदुःखमोहसमन्विता हि" इति,

इह यद् येनान्वितं तत्तदुपादानकमिति सामान्यव्याप्तिरेवाश्रयणीया न तु यत्सुखाद्यन्वितं तत्सुखाद्यन्वितवस्तूपादानकमिति विशेषव्याप्तिः, घटादिरूपे दृष्टान्ते विशेषव्याप्त्यसम्भवादित्यभिप्रेत्य सामान्यमुखां व्याप्तिमाह—"यानि च" इति. यानि च घटादीनि यत् स्पर्शादिमन्मृत्सामान्यरूपसमन्वितानि तानि तत्स्पर्शादिस्वभावमृदात्मसामान्याव्यक्तोपादानकानीत्यर्थमभिप्रेत्योदाहरणमाह—"यथा मृद्धेमपिण्डसमनुगता घटमुकुटादय" इति,

नच 'यद् येन सामान्येनान्वितं तत् तत्सामान्योपादानकमिति व्याप्तिर्न सार्वत्रिकी, जातिरूपसामान्यान्वितत्वेपि भावानां जात्युपादानकत्वादर्शनादस्याव्याप्तेर्व्यभिचारग्रस्तत्वाद् इति शङ्कनीयं. यद् येन द्रव्यसामान्येनानुगतं तत् तदव्यक्तरूपद्रव्यसामान्योपादानकमिति व्याप्तेर्विवक्षितत्वाद्, नच, 'एवमपि दृष्टान्ते एतादृशव्याप्तिसत्त्वेपि सुखादीनां गुणत्वेनाद्रव्यत्वान्महदादौ पक्षे व्याप्त्यभावः तथाच कथं सुखाद्यन्वितत्वेन हेतुना सुखाद्यात्मकसामान्योपादानकत्वानुमानम्' इति वाच्यं गुणगुणिनोरभेदेन सुखाद्यात्मकसत्त्वादिद्रव्यसामान्यान्वितत्वेन हेतुना सुखाद्यात्मकसत्त्वादिद्रव्यसामान्योपादा-

---

(१) तथाच 'समन्वयाद्' इत्यस्य सुखाद्यात्मसामान्यान्वितत्वादित्यर्थः ।

(२) 'अद्रवन्मूर्तिमत्स्वाङ्गं प्राणिस्थम्' इत्युक्तत्वेनात्र सुखस्याप्राणिस्थत्वेन स्वाङ्गत्वाभावात् 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ङीष्' इति ङीषोऽप्राप्त्या सुमुखा शालेत्यादाविव टाबेवेत्याशयेनोक्तं "सामान्यमुखाम्" इति, एतेन—सामान्यमुखी व्याप्तिः फलमुखी चानवस्था इत्यादयः प्रयोगाः प्रामादिका एवेति बोध्यम् ।

(३) कल्पतरुकाराद्युक्तमाशङ्क्य निराकरोति—"नच" इत्यादिना, ।

(४) दृष्टान्ते=घटादौ ।

(५) अत्र सर्वत्र धर्मधर्मिणोरभेदमादाय सुखाद्यात्मत्वाभिधानं ज्ञेयम् ।

अव्यक्तं साधयित्वाऽस्य प्रवृत्तिप्रकारमाह-"प्रवर्तते त्रि-

नकत्वानुमानस्याभीप्सितत्वेन दोषाभावाद्, लघुत्वादिप्रीत्यादिधर्मवत्त्वेन सत्त्वादीनां द्रव्यत्वाभ्युपगमेन तत्र गुणव्यवहारस्यौपचारिकत्वादिति,

एवं सामान्यव्याख्याश्रयणेन निष्पन्नेपि समीहिते यदि कस्यचिद् विशेषव्याख्याश्रयणे समादरस्तर्हि 'यत्सुखाद्यन्वितं तत्सुखाद्यात्मकाव्यक्तप्रकृतिपूर्वकम्' इतिविशेषव्याख्याश्रयणेनैव स तोषणीयः, नच दृष्टान्त एतादृशव्याख्यसम्भव इति शङ्क्यं, घटो हि येनाप्यते तं प्रतिसुखात्मकः, यस्य चापह्रियते तं प्रति स दुःखरूपः येन च न ज्ञायते किमिदं वस्त्विति तं प्रति च संमोहरूप, इत्येवं घटस्य सुखाद्यन्वितत्वसंभवात्, सत्कार्यवादाङ्गीकारेण व्यक्तघटस्य सुखाद्यन्विताव्यक्तघटपूर्वकत्वसत्त्वाच्च व्याप्तेरसम्भवाभावादितिदिक्. यत्तु अन्वयाद्यनुपपत्तेश्च, नहि बाह्याध्यात्मिकानां भेदानां सुखदुःखमोहात्मकतयाऽन्वय उपपद्यते, सुखादीनां चान्तरत्वप्रतीतेर् इत्यादिना ग्रन्थेनात्रानुमाने समन्वयादिति हेतोरसिद्धत्वमापादितं शाङ्करभाष्ये तत्तु पूर्वमेवं विस्तरेण सर्वेषां भावानां सुखाद्यात्मकत्वोपपादनेन समाहितमिति न पुनः समाधानीयम्,

अपि च सुखाद्यात्मकप्रत्ययं प्रति विषयाणां सुखाद्यात्मकत्वेनैव हेतुत्वस्यौचित्यात्, स्रक् सुखं, चन्दनं सुखमित्याद्यनुभवाच्च न विषयाणां सुखादिस्वभावानुपपत्तिरिति,

---

(१) सत्त्वादीनां गुणत्वेन कथं द्रव्यत्वमित्यत्राह-"लघुत्वादि" इति ।

(२) कथं तर्हि सत्त्वादयो गुणा इति व्यवहारस्तत्राह-'तत्र' इति, तत्र- सत्त्वादौ, राजोपकरणेऽमात्य इव पुरुषोपकरणे सत्त्वादौ गुणत्वव्यवहार औपचारिक इत्यर्थः ।

(३) तत्रैतावान् विशेषः दृष्टान्ते सुखाद्यात्मकाव्यक्तावस्थापन्ना मृत्तिका, पक्षेच तादृशाव्यक्तावस्थापन्न प्रधानं सिद्ध्यतीति ।

(४) घटपटकटकादीनामपि सुखाद्यन्वितत्वमुन्नेयमिति भावः ।

(५) भावानां सुखाद्यन्वयानुपपत्तेर्न समन्वयादिति हेतुना प्रधानं सिद्ध्यतीत्यर्थः, अन्वयानुपपत्तिमेवोपपादयति-"नहि" इत्यादिना ।

(६) अ० २ सू० १ ।

(७) पूर्वम्='१३' इत्यार्याविवरणे ।

(८) पूर्वत्रानुक्तं समाधानान्तरमाह-"अपि च" इति ।

किञ्च-सुखादीनामान्तरत्वप्रतीतेर्-इत्यनेन किं सुखादीनामात्मधर्मत्वेनान्तरत्वमभिप्रेतं किं वा बुद्धिधर्मत्वेन, न तावदाद्यः कल्पः, (१)मतद्वयेप्यात्मनो निर्गुणत्वेन तद्धर्मत्वाभावाद्, द्वितीयस्त्विष्ट एव, सर्वस्य सुखादिमत्त्वेन बुद्धेरपि (२)तत्त्वात्, तत्र सुखादिप्रतीतेरदोषात्,

किञ्च, "न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः । सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात् त्रिभिर्गुणैर्(३)" इति गीतया वस्तुजाते गुणत्रयान्वयाभिधानेन गुणधर्माणां सुखादीनामप्यन्वयस्यार्थादभिहितत्वात् (४)कथमभिहितम्-'अन्वयाद्यनुपपत्तेश्च' इति, त एव प्रष्टव्या न मे बहुवाच्या (५)मान्यास्त इति सर्वमवदातं, तदेतत्सर्वमभिप्रेत्य निगमयति "इति कारणमस्त्यव्यक्तम्" इति, इति=इत्येवम् उक्तहेतोर्वा,

अनेन चानुमानेन यत् सुखाद्यात्मकाव्यक्तं कारणं सिध्यति तत् (६)तादृग्गुणत्रयवत्प्रधानमेव न ब्रह्म, तस्य निर्गुणत्वेन त्रिगुणत्वाभावादिति न ब्रह्मणोऽर्थान्तरतेत्यपि ज्ञेयम् ।

स्यादेतद्, अप्रवृत्तिशीलस्य पुरुषवत् कारणत्वायोगात्प्रधानस्य प्रवृत्तिमत्त्वं वाच्यं, तथा च तत् केन प्रकारेण प्रवर्तते, (७)किं स्थितिसंस्कारेण प्रवर्तते किं वा गतिसंस्कारेण, आद्ये सर्वदैव स्थितिमत्त्वेन विकाराजननात् प्रधीयते

(१) वेदान्तिमते साङ्ख्यमते चेत्यर्थः ।

(२) तत्त्वात्=सुखाद्यात्मकत्वात्, तत्र=बुद्धौ ।

(३) अ० १८ श्लो० ४० ।

(४) गुणत्रयसत्त्वे तद्धर्माणामप्यवश्यम्भावादिति भावः ।

(५) विज्ञानभिक्षुस्तु यस्यान्वयव्यतिरेकौ सुखादिना सह दृश्येते तस्यैव सुखाद्युपादानत्वं कल्प्यते, तस्य निमित्तत्वं परिकल्प्यान्यस्योपादानत्वकल्पने कारणद्वयकल्पनागौरवाद् इति युक्त्या विषयाणां सुखादिधर्मकत्वं प्राह ।

(६) तादृक्=सुखाद्यात्मकम् ।

(७) 'प्रधानं स्थित्यैव वर्तमानं विकाराकरणादप्रधानं स्यात्, तथा गत्यैव वर्तमानं विकारनित्यत्वादप्रधानं स्याद्' इति पञ्चशिखाचार्य्योक्तविकल्पमनुसृत्य पृच्छति-"किं स्थितिसंस्कारेण" इति, अन्योन्यमसंमिलितानां गुणानां यः कार्यजननाननुगुणः साम्यपरिणामपरम्परावाही परिणामः स स्थितिसंस्कारः, विलक्षणतत्तत्कार्य्यजननोन्मुखो यः गुणानां वैषम्यपरिणतिपरम्परावाही परिणामः स गतिसंस्कार इति ध्येयम् ।

गुणत" इति, प्रतिसर्गावस्थायां सत्त्वं रजस्तमश्च सदृशपरिणामानि भवन्ति, परिणामस्वभावा हि गुणा नाऽपरिणम्य क्षणमप्यवतिष्ठन्ते, तस्मात्सत्त्वं सत्त्वरूपतया, रजो रजोरूपतया, तमस्तमोरूपतया प्रतिसर्गावस्थायामपि प्रवर्तते, तदिदमुक्तं "त्रिगुणत" इति,

---

=जन्यते विकारजातमनेनेति प्रधानपदव्युत्पत्तिनिमित्तकप्रधानव्यवहारालाभेनाप्रधानमेव तद् भवेन्न प्रधानं, द्वितीये सर्वदैव कार्यजनने व्यापृतत्वान्न कदाचित्कार्यं संहरेदिति विकाराणां सदातनत्वमापद्येत, प्रधीयते=निधीयते–लीयते विकारजातं यस्मिन्निति व्युत्पत्तिनिमित्तकप्रधानव्यवहारेश्च लुप्येत, इत्याकाङ्क्षायां प्रधानप्रवृत्तेरनैकान्तिकत्वं व्यवस्थापयितुं प्रवृत्तं कारिकांशमवतारयति–"अस्य प्रवृत्तिप्रकारमाह–प्रवर्तते त्रिगुणत" इति,

अत्रेदं बोध्यं–"साम्यवैषम्याभ्यां कार्यद्वयम्" इति साङ्ख्यसूत्राद् "उभयथा चास्य प्रवृत्तिः प्रधानव्यवहारं लभते नान्यथा" इति पञ्चशिखाचार्यवाक्याच्च, प्रधानस्य प्रवृत्तिद्वयमभ्युपेयते, एका तावत् सत्त्वरजस्तमसामन्योन्यगुणप्रधानभावानपेक्षा साम्येन स्वरूपमात्रेणावस्थानरूपा सदृशपरिणामपरम्परावाहिनी, या किल प्रलयकालिकी, अपरा च सत्त्वरजस्तमसां परस्पराङ्गाङ्गित्वप्रयुक्ता साम्यावस्थानात्प्रच्युतिरूपा विसदृशपरिणतिपरम्परा-

---

(१) सर्वविकारजनकत्वरूपं यन्मूलकारणस्य प्रधानत्वं तन्न संभवेदित्यर्थः।

(२) विकाराणां सदातनत्वेनाविनाशित्वे च नाविनाशिनः सतो भावस्यात्मवदुत्पत्तिरपीति केषां मूलं प्रधानं येन प्रधानमेव मूलप्रकृतिरित्युच्यत इत्यपि ज्ञेयम्।

(३) अनैकान्तिकत्वम्= स्थितिसंस्कारेणैव प्रधानं प्रवर्तते न गत्या, गतिसंस्कारेणैव वा प्रवर्तते न स्थित्या, इत्यनयोः पक्षयोरन्यतरपक्षावधारणरूपनियमाभावमित्यर्थः, कदाचित् स्थित्या वर्तते कदाचिच्च गत्या प्रवर्तत इत्येवमनियमं बोधयितुमिति यावत्।

(४) अ० ६ सू० ४२। सर्गप्रलयरूपं यत्कार्यद्वयं तद् गुणानां साम्यवैषम्याभ्यां भवति, साम्यावस्थातः प्रलयः, वैषम्यावस्थातश्च सर्ग इत्यर्थः।

(५) उभयथा=स्थित्या गत्या च, अस्य=प्रधानस्य प्रवृत्तिराश्रीयते, अनया रीत्यैव प्रधानं प्रधानव्यवहारं लभते, अन्यथा=एकतरपक्षाभ्युपगमे तु न प्रधानव्यवहारं लभेतेत्यर्थः।

प्रवृत्त्यन्तरमाह—"समुदयाच्च" इति, समेत्योदयः समुदयः—समवायः,समुदयश्च गुणानां न गुणप्रधानभावमन्तरेण संभवति, न च गुणप्रधानभावो वैषम्यं विना, न च वैषम्यमुपमर्द्योपमर्दकभावाद् ऋते, इति महदादिभावेन प्रवृत्तिर्द्वितीया ।

वाहिनी. इयं खलु सर्गकालिकी, तत्र 'त्रिगुणत' इत्यनेनाद्या प्रवृत्तिरुक्ता, 'समुदयाच्च' इत्यनेन द्वितीया प्रवृत्तिरभिहिता, तत्राद्यां प्रवृत्तिं व्याख्यातुं त्रिगुणत इति व्याचष्टे—"प्रतिसर्गावस्थायाम्" इति, प्रलयावस्थाया-मित्यर्थः,

अत्र च न सर्गारम्भ इव विलक्षणतत्तन्महदहङ्कारादिरूपेण परिणामशीलानि गुणानि सन्त्यपि तु सदृशपरिणामानीत्युक्तं स्पष्टयति—"सत्त्वं सत्त्वरूपतया" इत्यादिना, लघुत्वादिरूपस्वानुरूपपरिणामेनैव तत्र सत्त्वं वर्तते न केनचिदन्येन गुणेन सह संयुज्य विलक्षणतत्तत्कार्यरूपेण परिणमत इत्यर्थः, एवमग्रेऽपि. किम्प्रयोजनोऽयं परिणाम इत्यत्राह—"परिणामस्वभावा हि" इति, हि=यतः परिणामस्वभावा अतः अपरिणमय्य=परिणाममप्राप्य परिणतिशीलतामपहाय क्षणमपि गुणा नावतिष्ठन्ते इत्यर्थः,

न हि स्वभावः प्रयोजनमपेक्षत इति भावः,

सहकारिणोऽदृष्टादेरभावाद् विकाराजननेन प्रलयसंरक्षणमेव वा प्रयोजनं बोध्यम्,

तदेतदाद्या प्रवृत्तिः कुतः, तत्राह—"त्रिगुणत" इति, परस्परामिलितगुणत्रयादित्यर्थः,

समुदयपदार्थमाह—"समेत्योदय" इति, अन्योन्यं मिलित्वाऽऽविर्भाव इत्यर्थः, समुदयपर्यायमाह—"समवाय" इति, समवायश्चात्र परस्परसंमिश्रणं न तु तार्किकाभिमतः संबन्धविशेषः, "न समवायोऽस्ति प्रमाणाभावाद्" इति साङ्ख्यसूत्रादिति बोध्यम्,

---

(१) अत्र=प्रलये चेत्यर्थः ।

(२) णिजर्थासंभवेन परिणम्य इति वा पाठ्यम्, स्वार्थिकणिजन्तत्वेन वायं पाठो नेयः ।

(३) अ० ५ सू० ९९ यथा च समवायोऽप्रामाणिकस्तथा २।२।१३ इत्यत्र भाष्ये व्यक्तः ।

स्यादेतत्, कथमेकरूपाणां गुणानामनेकरूपा प्रवृत्तिर्, इत्यत आह "परिणामतः सलिलवद्" इति । यथा हि वा-

---

अयं च गुणानां समवायः परस्परविरुद्धानां समबलानां च न संभवतीति गुणप्रधानभावेन समवायो वाच्यः, गुणप्रधानभावश्च वैषम्यं=न्यूनाधिक्यं विना न संभवतीति वैषम्यमप्यवश्याभ्युपेयं, वैषम्यमपि उपमर्द्योपमर्दकभावाद्= अभिभाव्याभिभावकभावाद् ऋते=विनाऽसंभवीति सोऽप्यवश्याश्रयणीयः, तथा चादृष्टवशात्पूर्वं[1] गुणेषु क्षोभो जायते, ततश्च कश्चिद् गुण उद्भूतः सन्नभिभावको भवति, कश्चिच्चानुद्भूतः सन्नभिभाव्यो भवति, ततश्च साम्यावस्थानात्प्रच्युतिरूपं वैषम्यमुपजायते, ततश्च परस्परं गुणप्रधानभावेन मिलित्वा महदादिरूपेण परिणामो भवति, इत्येवंविधा या प्रवृत्तिः सा द्वितीयेति समुदायार्थः,

शङ्कते—"कथमेकरूपाणाम्" इति, यद्यपि गुणप्रधानभावमापन्नानां गुणानां सत्त्वप्रधानमेकं रूपं, रजःप्रधानं चापरं, तमःप्रधानं चेतरद्, इत्येवमनेकरूपत्वमस्ति तथाप्येकमेव किञ्चिद् गुणद्वयोपसर्जनकैकगुणप्रधानं[2] रूपमित्यवबुद्ध्येयं[3]माशङ्का ज्ञेया,

यद्वा मानवे एकैकस्मात्[4] तत्तद्गुणप्रधानरूपादनेकरूपः परिणाम उक्तः, तथा चैकस्मात सत्त्वप्रधानादिरूपात्कथमनेकविधः परिणाम इत्याशयेन चेयमाशङ्का नेया,

---

(१) "गुणक्षोभे जायमाने महान प्रादुर्बभूव ह" इत्युक्तेः पूर्वं गुणक्षोभो भवतीत्यर्थः ।

(२) रजस्तमउपसर्जनं सत्त्व, सत्त्वतमउपसर्जनं रजो वा, सत्त्वरजउपसर्जनं तमो वा, इत्येवमेकमेव किञ्चिद् रूपं मत्वेत्यर्थः ।

(३) इयम्=कथमेकरूपाणामित्यादिका ।

(४) मानवे=मनुप्रोक्ते धर्मशासने १२ अध्याये ४२ इत्यारभ्य ५० इत्यन्तेषु श्लोकेष्वित्यर्थः । तत्र हि–ब्रह्मा मरीच्यादयश्च प्रजापतय उत्तमाः सात्त्विकाः, पितरः साध्याश्च देवायाश्च मध्यमाः सात्त्विकाः, नक्षत्राणि दैत्या विप्राद्याश्चाधमाः सात्त्विकाः, इत्येवमेकस्मात्सत्त्वगुणप्रधानरूपादनेकविधः परिणाम उक्तः, एवं गन्धर्वगुह्यकयक्षादय उत्तमा राजसाः, क्षत्रियादयश्च मध्यमा राजसाः, नटमल्लादयश्चाधमा राजसाः, एवं राक्षसपिशाचादयश्चोत्तमास्तामसाः, हस्तितुरङ्गसिंहादयश्च मध्यमास्तामसाः, कीटसर्पमत्स्यस्थावरादयश्चाधमास्तामसाः, इत्याद्यपि ज्ञेयम् ।

रिदविमुक्तमुदकमेकरसमपि तत्तद्भूविकारानासाद्य नारिकेलतालतालीबिल्वचिरबिल्वतिन्दुकाऽऽमलकप्राचीनामलककपित्थादिफलरसतया परिणमद् मधुराम्ललवणतिक्तकषायकटुतया विकल्प्यत एवमेकैकगुणसमुद्भवात् प्रधानगुणानाश्रित्याप्रधानगुणाः परिणामभेदान् प्रवर्तयन्ति, तदिदमुक्तं-"प्रतिप्रतिगुणाश्रयविशेषाद्" एकैकगुणाश्रयेण यो विशेषस्तस्मादित्यर्थः ॥ १५ ॥ १६ ॥

ये तु तौष्टिका अव्यक्तं वा महान्तं वाऽहङ्कारं वेन्द्रियाणि

'तत्तद्भूविकारानासाद्य'=पार्थिवपरिणामान् तत्तन्नारिकेलादिफलानि प्राप्य तदेवाह "नारिकेल" इत्यादिना, विकल्प्यते=विभिन्नत्वेनानुभूयते प्राणिभिरित्यर्थः,

यद्यपि सत्त्वप्रधानं गुणरूपमेकमेव तथाप्यप्रधानतत्तद्गुणतारतम्येन प्रधानरूपस्यानेकरूपस्यानेकरूपतापत्त्या परिणामभेदोपपत्तिरित्यभिप्रेत्याह-"एवमेकैकगुणसमुद्भवाद्" इति,

'प्रतिप्रतिगुण' इति वीप्सार्थमाह-"एकैकगुणाश्रयेण" इति,

पूर्वं तत्तद्गुणप्रधानत्वेन रूपत्रयं, पुनश्चैकैकस्य तमोलेशोपरक्तरजउपसर्जनसत्त्वप्रधानरजोलेशसंवलिततमउपसर्जनसत्त्वप्रधानत्वादिरूपेणानेकरूपत्वम्, इत्येवमेकैकगुणाश्रयेण यो विशेषः=अनेकरूपत्वं तस्मात् परिणामतः= अनेकरूपेण परिणामाद्, अनेकरूपा प्रवृत्तिः संभवतीत्यर्थः ॥ १५ ॥ १६ ॥

किमर्था चेयं प्रवृत्तिरस्य, न च पुरुषार्था, पुरुषे प्रमाणाभावादिति प्राप्ते पुरुषे प्रमाणप्रदर्शनपरामार्यामवतारयति-"ये तु तौष्टिका" इति,

तुष्टिः=प्रकृत्यादिषु लयमात्रेणैव कृतकृत्यतारूपा तृप्तिः, सैव प्रयोजनं

---

(१) 'प्रधानगुणाः परिणामभेदान् प्रवर्तयन्ति' इत्येवं क्वचित्पठ्यते ।

(२) ५।१।१०४ इत्यतः तदस्येत्यधिकारे ५।१।१०८ इत्यतष्ठञ्यनुवर्तमाने च 'प्रयोजनम्' इति सूत्रेण ठञि तौष्टिक इति साधुरित्याशयेन विगृह्णाति-"सैव प्रयोजनम्" इति ।

वा भूतानि वाऽऽत्मानमभिमन्यमानास्तानेवोपासते, तान् प्रत्याह—"सङ्घातपरार्थत्वाद्" इत्यादि ।

सङ्घातपरार्थत्वाद्, त्रिगुणादिविपर्ययादधिष्ठानात्, ।
पुरुषोऽस्ति भोक्तृभावात्, कैवल्यार्थं प्रवृत्तेश्च ॥ १७ ॥

पुरुषोऽस्ति अव्यक्तादेर्व्यतिरिक्तः, कुतः, सङ्घातपरार्थत्वाद्, अव्यक्तमहदहङ्कारादयः परार्थाः,

---

येषां ते तौष्टिकाः, 'बाह्या विषयोपरमात्पञ्च' इति वक्ष्यमाणबाह्यतुष्टिमन्त इत्यर्थः, ये किल प्रकृतिमहदहङ्कारतन्मात्रभूतेन्द्रियाणामन्यतममात्मत्वेनाभिमन्यमानास्तदुपासनया तदुपासनवासितमानसाः सन्तः पिण्डपातानन्तरं तेष्वेवाव्यक्तादिषु लयमेष्यन्ति, यांश्चाधिकृत्य 'दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तका' इत्यादिकं वायवीये पठ्यते, ते योगिविशेषास्तौष्टिका इत्युच्यन्ते, तदेवाह—"अव्यक्तं वा" इत्यादि,

यथा 'भेदानां परिमाणाद्' इत्यार्यया पञ्चभिर्हेतुभिर्व्यक्तातिरिक्तमव्यक्तं साधितं तथानयाऽऽर्यया पञ्चभिर्हेतुभिरव्यक्ताद्यतिरिक्तः पुरुषः साध्यत इत्यभिप्रेत्य साधनीयं विषयमुपन्यस्यति—"पुरुषोऽस्ति" इति,

तत्राहमहमिति प्रतीतिसिद्धे धर्मिण्यात्मनि विप्रतिपत्तेरसम्भवात्, तस्याव्यक्तादिव्यतिरिक्तत्वाव्यतिरिक्तत्व एव विप्रतिपत्तिरित्याशयेन पुरुषं विशिनष्टि—"अव्यक्तादेर्व्यतिरिक्त" इति,

तत्राद्यं हेतुमवतार्य्य तद्विवक्षितमनुमानप्रयोगमाह—"अव्यक्तमहदहङ्कारादय" इति, परार्थाः=अव्यक्ताद्यतिरिक्तचेतनार्था इत्यर्थः,

---

(१) ५० इत्यार्यायां वक्ष्यमाणा याः पञ्च बाह्यास्तुष्टयस्तद्वन्त इत्यर्थः, तत्र नवानां तुष्टीनामुक्तत्वेप्याद्यानामाध्यात्मिकीनां चतसृणां नात्र ग्रहणं तासामात्मानात्मविवेकपूर्वकत्वादेषां चेन्द्रियादिचिन्तकानामात्मानात्मविवेकविधुरत्वादित्यभिप्रेत्योक्तं 'बाह्य' इति ।

(२) आदिना ४४ इत्यार्याविवरणे वक्ष्यमाण—"भौतिकास्तु शतं पूर्णम्" इत्यादिकं ग्राह्यम् । वायवीये=वायुपुराणे ।

(३) संघातपरार्थत्वादित्यनेन विवक्षितमित्यर्थः ।

सङ्घातत्वाच्छयनासनाऽभ्यङ्गादिवत्, सुखदुःखमोहात्मकतया अव्यक्तादयः सर्वे सङ्घाताः,

स्यादेतत्, शयनासनादयः सङ्घाताः संहतशरीरार्थाः दृष्टा न त्वात्मानमव्यक्ताद्यतिरिक्तं प्रति परार्थाः तस्मात् सङ्घातान्तरमेव परं गमयेयुर्न त्वसंहतमात्मानम्, इत्यत आह "त्रिगुणादिविपर्ययाद्" इति,

तत्र हेतुमाह—"सङ्घातत्वाद्" इति, संहन्यन्ते=मिश्रीभवन्त्यनेके विशेषा यत्रासौ सङ्घातः, तस्य भावस्तत्त्वं, तस्माद्, अनेकात्मकत्वादिति यावत्,

तूलिकोपधानप्रच्छादनवसनादिना शयनादीनामनेकात्मकत्वेपि प्रकृत्यादेरनेकात्मकत्वाभावात्कथं संघातत्वमित्याकाङ्क्षायामव्यक्तादेः संघातत्वं दर्शयन् हेतोः पक्षधर्मतामाह—"सुखदुःखमोहात्मकतया" इति,

सङ्घाताः=संहननवन्तः, संहननं चात्रानेकैर्विशेषैः संवलनं-संमिश्रणम्,

"संहतपरार्थत्वात्पुरुषस्य" इति सूत्रे विज्ञानभिक्षुस्तु "संहननमारम्भकसंयोगः, स चावयवावयव्यभेदात्प्रकृतितत्कार्यसाधारणः" इत्याह—

पातञ्जलसूत्रे योगभाष्ये च 'संहत्यकारित्वाद्' इत्ययं हेतुरुपन्यस्तः, तस्य चेतरसाहित्येनार्थक्रियाकारित्वादित्यर्थो ज्ञेयः, तत्र गुणानामन्योन्यं मिथुनीभूय कार्यकरणात्संहत्यकारित्वं, महदादेश्च क्लेशकर्मवासनाभिर्विषयेन्द्रियादिभिश्च संहत्य प्रकृत्यापूरं चापेक्ष्य कार्यकरणात्संहत्यकारित्वमिति ध्येयम्, न चाऽव्यक्तादिकं संहत्यापि करिष्यति स्वार्थं च भविष्यतीति विपक्षे बाधकतर्काभावादप्रयोजकोयं हेतुरिति साम्प्रतं, स्वात्मनि वृत्तिविरोधेन स्वस्य स्वार्थत्वासंभवाद्, एतच्च 'न सुखचित्तं सुखार्थम्' इत्यादिना योगभाष्ये व्यक्तम्,

(१) अनेन सङ्घातपदमधिकरणघञन्तमिति दर्शितम्।

(२) १ सू. ६६॥ गुणानामन्योन्यं संयुज्यारम्भकत्वेनाव्यक्त आरम्भकसंयोगसत्त्वेपि महदादौ तदभावात्कथं संहननवत्त्वम्, अत उक्तम् 'अवयवावयव्यभेदात्'—प्रकृतितत्कार्ययोस्तादात्म्यात्।

(३) 'तदसङ्ख्येयवासनाभिश्चित्तमपि परार्थं संहत्यकारित्वाद्' ४।२४ इति सूत्रे।

(४) "परार्था बुद्धिः संहत्यकारित्वाद्" इति योगभाष्ये च २। २०।

(५) एतच्च १० इत्यार्यायां 'परतन्त्रम्' इत्यस्य विवरणे व्यक्तम्।

(६) स्वस्मिन् स्वव्यापारासम्भवादित्यर्थः, तथा च विपक्षबाधकतर्कसत्त्वान्नाप्रयोजकोयं हेतुरिति ज्ञेयम्।

(७) सुखाद्याकारेण परिणतं चित्तं स्वसुखाद्यर्थं नेत्यर्थः।

(८) ४—२४।

अयमभिप्रायः—सङ्घातान्तरार्थत्वेहि तस्यापि सङ्घातत्वात् तेनापि सङ्घातान्तरार्थेन भवितव्यम्, एवं तेनतेनेत्यनवस्था स्याद्, न च व्यवस्थायां सत्यामनवस्था युक्ता, कल्पनागौरवप्रसङ्गाद्, न च प्रमाणवत्त्वेन कल्पनागौरवमपि मृष्यत इति युक्तं, संहतत्वस्य पारार्थ्यमात्रेणान्वयाद्, दृष्टान्तदृष्टसर्वधर्मानुरोधेन त्वनुमानमिच्छतः सर्वानुमानोच्छेदप्रसङ्गः इत्युपपादितं न्यायवार्ति-

---

दृष्टान्तबलेनार्थान्तरतामाशङ्कते—"शयनासनादय" इति, दृष्टान्तत्वेनोपात्ताः शयनादय इत्यर्थः, गमयेयुर्=अनुमापयेयुरित्यर्थः,

अर्थान्तरतावारणाय द्वितीयं हेतुमवतारयन्ति—"त्रिगुणादिविपर्ययाद्" इति, त्रिगुणादि इति आदिना अविवेकित्वादिकं पूर्वोक्तं ग्राह्यं, त्रिगुणादेर्विपर्ययः=अभावो यत्रासौ त्रिगुणादिविपर्ययः, तस्माद्—अत्रिगुणादिमत्त्वादिति यावत्,

तथा च—आत्माऽसंहतः अत्रिगुणादिमत्त्वाद्, यन्नासंहतं तन्नात्रिगुणादिमद् यथा महदादिकम् इत्यत्र फलितम्, एतदेव विशदयितुमाह—"अयमभिप्राय" इति,

गत्यन्तराभावादनवस्थाप्यास्थेया, इत्यत्राह "न च व्यवस्थायां सत्याम्" इति, सङ्घातत्वहेतोः पारार्थ्यमात्रसाधन उपक्षीणत्वेन सङ्घातान्तरार्थत्वसाधने विशेषतो व्यापाराभावेनासंहतपरार्थत्वसिद्धिरूपायां व्यवस्थायां संभवन्त्यामनवस्थाकल्पना न युक्तेत्यर्थः, अयुक्तत्वे हेतुः "कल्पनागौरवप्रसङ्गाद्" =पारार्थ्यमात्रसाधनापेक्षया संहतपारार्थ्यसाधनस्य गौरवग्रस्तत्वादित्यर्थः,

दृष्टान्ते सङ्घातत्वस्य सङ्घातान्तरार्थत्वेन व्याप्तत्वदर्शनात् प्रामाणिकं संहतपारार्थ्यकल्पनमित्याशङ्क्य निरस्यति "न च प्रमाणवत्त्वेन" इति,

न च तथा सति[1] दृष्टान्तदृष्टसङ्घातान्तरार्थत्वरूपधर्मालाभेन दृष्टान्ते साध्यवैकल्यसत्त्वाच्चेदमनुमानमुदीयादिति साम्प्रतं, तथा[2] सति निखिलानुमानानुत्थानप्रसङ्गादित्याह "दृष्टान्तदृष्ट" इति,

एतच्च "परार्थाश्चक्षुरादयः सङ्घातत्वाच्छयनासनादिववदिति, अथ मन्यसे

---

(१) तथा सति=सङ्घातान्तरार्थत्वं विहाय परार्थत्वमात्रस्य साध्यत्वेऽङ्गीकृते सतीत्यर्थः ।

(२) तथा सति=दृष्टान्तदृष्टसर्वधर्मानुरोधे सति ।

सत्यं सङ्घाताः परार्थो भवन्ति ते तु सङ्घातान्तरार्थाः यथा शयनादय" इत्यारभ्य "यदि विवक्षितार्थव्यतिरेकेणानुमानस्याविवक्षितमपि विषयो नन्वेतस्यां कल्पनायां सर्वमनुमानं व्याहन्येत, कथमिति, यदिष्टमनुमानत्वेन तदपि नानुमानं प्राप्नोति, यथा शब्दानित्यत्वे कृतकत्वं, किं कारणं, यथेदं कृतकत्वमनित्यत्वेनाविनाभूतमनित्यत्वं साधयत्येवं दुःखशून्यानात्मकत्वमपि साधयति, दुःखशून्यानात्मकत्ववद् श्रोत्रग्राह्यत्वमपि साधयिष्यति, ततश्च न श्रोत्रग्राह्यः शब्दः कृतकत्वाद् घटवदिति, अर्थानुमानेन बाध्यतेऽयं प्रतिज्ञार्थ इत्यतो न हेतुः, नन्वयमपि सङ्घातान्तरार्थश्चक्षुरादय इत्यागमेनानुमानेन च बाध्यते, यच्चापि भवान् सङ्घातान्तरं प्रतिपद्यते तत्राप्यनिवृत्तं सङ्घातत्वमिति तेनापि सङ्घातान्तरार्थं भवितव्यमिति, एवं चानवस्था, न चैनां शक्तः कश्चित प्रतिपादयितुम्, इति यत एषा निवर्तते तदसंहतम्" इत्यन्तेन ग्रन्थेन न्यायवार्तिके। "तस्माद् यथाऽनित्यः शब्द उत्पत्तिमत्त्वाद् घटवदिति प्रयुक्ते कश्चित् साध्यदृष्टान्तयोर्धर्मवैचित्र्यात्प्रत्यवतिष्ठेत—यदि घटसाधर्म्यादुत्पत्तिमत्त्वादनित्यः शब्दो हन्त तस्मादेव रूपादिमता तेन भाव्यं, न चेदयं घटसाधर्म्येण रूपादिमानेवमनित्योऽपि मा भूद्, एवं च प्रत्यवतिष्ठमान उत्कर्षसमजातिवादी पराजीयते, एवमेवंवाद्युत्कर्षसमजातिवादितया

(१) विवक्षितपदम् अभिप्रेतपरम्।

(२) ननु=तर्हि।

(३) यदनुमितिकरणत्वेन साध्यसाधकं साधनमिष्टं तदप्यनुमानम्।

(४) अथ=यदि अनुमानेन=शब्दस्य श्रोत्राग्राह्यत्वे बधिरेणापि तद्ग्रहणप्रसङ्ग इति तर्केण श्रोत्राग्राह्यत्वरूपः प्रतिज्ञार्थो बाध्यते ननु=तर्हि सङ्घातान्तरार्था इत्ययमप्यर्थोऽनुमानेन=अनवस्थालक्षणानिष्टापादनरूपेण तर्केण बाध्यत इत्यर्थः, तदेवाह—"यच्चापि" इति।

(५) न्यायदर्शनीयतृतीयाध्यायीयाद्याह्निकभूमिकायामिति शेषः।

(६) तुरीयाध्यायीयाद्याह्निकीयैकविंशतिसूत्रीयभाष्यवार्तिकव्याख्यास्थलीयोयं ग्रन्थः, पारमेश्वरं ज्ञानं नित्यमिति प्रकृत्य "न च शरीरादिसहभावेन ज्ञानस्य तत्रतत्रोपलब्धेः शरीरादीनां ज्ञानं व्याप्यमिति युक्तं, स्वाभाविकसंबन्धशालिता हि व्याप्यता, सा चोपाधिविरहे भवति, अस्ति च शरीरादिसहभावे ज्ञानस्योपाधिः कार्यत्वं कार्यं ज्ञानं स्वकारणं शरीरादि नातिवर्तते नित्यन्तु तदतिवर्तमानमपि साहित्योपलम्भं न विरुणद्धि" इति ग्रन्थात्समनन्तरोयं ग्रन्थ इत्यपि बोध्यम्।

(७) एतादृशप्रत्यवस्थानमेवोत्कर्षसमजातिरूपं निग्रहस्थानमिति न्यायदर्शने व्यक्तम्।

कृतात्पर्यटीकायामस्माभिः, तस्मादनवस्थाभियाऽस्यासङ्घात-त्वमिच्छताऽत्रिगुणत्वमविवेकित्वमविषयत्वमसामान्यत्वं चे-तनत्वमप्रसवधर्मित्वं चाभ्युपेयं, त्रिगुणत्वादयो हि धर्माः संहतत्वेन व्याप्ताः तत्संहतत्वमस्मिन् परे व्यावर्तमानं त्रैगु-ण्यादि व्यावर्तयति, ब्राह्मणत्वमिव व्यावर्तमानं कठत्वादिकं, तस्मादाचार्येण 'त्रिगुणादिविपर्ययाद्' इति वदताऽसंहतः परो विवक्षितः, स चात्मेति सिद्धम्,

---

पराजेतव्यः साधर्म्यमात्रेणाप्रयोजकेन प्रत्यवस्थानात्, तस्य च सर्वानुमानेषु सुलभतया सर्वानुमानोच्छेदापादकत्वाद्" इत्यादिना तात्पर्यटीकायां च व्यक्तमिति तत्रैव कणेहत्यालोच्यमित्यभिप्रेत्याह "इत्युपपादितं न्यायवार्तिक-तात्पर्यटीकायाम्" इति,

एवं स्थिते त्रिगुणादिविपर्ययादिति हेतुं योजयितुं निर्गलितार्थमाह "त-स्माद्" इति,

यतः परस्यासंहतत्वानभ्युपगमेऽनवस्थालक्षणोऽनिष्टापादनरूपः प्रसङ्गो दुर्वारस्तस्मादित्यर्थः,

असंहतत्वं कामयमानेनाकामितमत्रिगुणत्वादिकं किमित्युपेयं, तत्राह— "त्रिगुणत्वादयो हि धर्मा" इति, येये त्रिगुणत्वादिमन्तस्तेते संहता यथा महदादय इत्येवं त्रिगुणत्वादयः संहतत्वेन व्याप्ता दृष्टा इत्यर्थः, ततः किं, तत्राह—"तत्संहतत्वम्" इति, तद्=व्यापकम् असंहतत्वम् अस्मिन्= परार्था इति साध्यैकदेशभूतपरशब्दार्थे आत्मनि व्यावर्तमानं=निवर्तमानं सत् स्वव्याप्यभूतं त्रिगुणत्वादिकं निवर्तयति, व्यापकासत्त्वे व्याप्यासत्त्वस्य नियतत्वादित्यर्थः, तत्र दृष्टान्तः—"ब्राह्मणत्वमिव" इति, यजुर्वेदीयकठशा-खाध्ययनकर्तृब्राह्मणनिष्ठो धर्मविशेषः कठत्वम्, इव=यथा क्षत्रियादौ ब्राह्म-णत्वं निवर्तमानं सत् तद्व्याप्यं कठत्वं निवर्तयति तद्वदित्यर्थः,

एवं च—परोऽसंहतोऽत्रिगुणत्वादिमत्त्वादिति पूर्वोक्तमनुमानमत्र फलित-मित्याशयेनोपसंहरति "तस्माद्" इति, आचार्येण=साङ्ख्यकारिकाकृतेश्वर-कृष्णेनेत्यर्थः,

इतश्च परः पुरुषोऽस्ति "अधिष्ठानात्"=त्रिगुणात्मकानामधिष्ठीयमानत्वाद्,

यद्यत्सुखदुःखमोहात्मकं तत्सर्वं परेणाधिष्ठीयमानं दृष्टं, यथा रथादि यन्त्रादिभिः, सुखदुःखमोहात्मकं चेदं बुद्ध्यादि, तस्मादेतदपि परेणाधिष्ठातव्यं, स च परस्त्रैगुण्यादन्य आत्मेति,

'अधिष्ठानाद्' इति तृतीयहेतोरर्थमाह– "त्रिगुणात्मकानाम्" इति, सुखाद्यात्मकानां महदादीनामन्येन केनचिद्प्रेर्यमाणत्वादित्यर्थः,

तथा च 'महदादिकं केनचित्परेण चेतनेनाधिष्ठीयमानं भवितुमर्हति सुखाद्यात्मकत्वात्, संहतत्वाद् वा' इति प्रयोगोऽत्र दर्शितः, अत्र व्याप्तिमाह– "यद्यद्" इति, उदाहरणमाह "यथा रथादि" इति, यन्ता=सूतः–अश्वचालकः सारथिरिति यावद्, उपनयमाह–"सुखदुःखमोहात्मकं चेदम्" इति, निगमनमाह–"तस्माद्" इति,

न च महदादिष्वन्यतम एव कश्चिदधिष्ठाता भवत्विति साम्प्रतं, स्वस्य स्वाधिष्ठानायोगादित्यभिप्रेत्याह–"त्रैगुण्यादन्य आत्मा" इति,

न चात्मनो निर्गुणत्वेन निष्क्रियत्वात्कथमधिष्ठातृत्वं, प्रवर्तनव्यापारवत एव सारथ्यादेरधिष्ठातृत्वदर्शनादिति शङ्क्यं, निर्व्यापारस्याप्ययस्कान्तमणेरिव सन्निधिमात्रेणाधिष्ठातृत्वोपपत्तेर्व्यापारवत एव प्रयोजकत्वमिति नियमानाश्रयणात्, तथा च सूत्रं "तत्सन्निधानादधिष्ठातृत्वं मणिवद्" इति,

अचलतोऽपि नृपतिवद्वा सत्तामात्रेण प्रयोजकत्वं, तथा चाहुः कुमारिलस्वामिनः–"न च सर्वत्र तुल्यत्वं स्यात्प्रयोजककर्मणां, चलनेन ह्यसिं योद्धा प्रयुङ्क्ते च्छेदनं प्रति, ८५। सेनापतिस्तु वाचैव भृत्यानां विनियोजकः, राजा सन्निधिमात्रेण विनियुङ्क्ते कदाचन, ८६। तस्मादचलतोऽपि स्याच्चलने कर्तृतात्मनः" इति,

एतेन 'प्रवृत्ते रचनायाश्चानुपपत्तेर्नाचेतनं चेतनाधिष्ठानविहीनं प्रधानं

---

(१) अ० १ सू० ९६।

(२) पञ्चमसूत्र आत्मवाद इति शेषः।

(३) एतेन=आत्मनोऽधिष्ठातृत्वसंभवोपपादनेन।

इतश्चास्ति पुरुषः-'भोक्तृभावाद्'-भोक्तृभावेन भोग्ये सुखदुःखे उपलक्षयति, भोग्ये हि सुखदुःखे अनुकूलप्रतिकूलवेदनीये प्रत्यात्ममनुभूयेते, तेनानयोरनुकूलनीयेन प्रतिकूलनीयेन च केनचिदप्यन्येन भवितव्यं, न चानुकूलनीयाः प्रतिकूलनीया वा बुद्ध्यादयः, तेषां सुखदुःखात्मकत्वेन स्वात्मनि वृत्तिविरोधात्, तस्माद् योऽसुखाद्यात्मा सोऽनुकूलनीयः प्रतिकूलनीयो वा, स चात्मेति,

---

कारणम्' इत्यादय आक्षेपाः प्रतिक्षिप्ता इति वेदनीयम्, 'पुरुषाधिष्ठितं प्रधानं प्रवर्तते' इति षष्टितन्त्र उक्तत्वेनाक्षेपस्यैवानुत्थानमित्यपि ध्येयम्, अधिकमेतद् भूमिकातोऽवसेयम्,

'भोक्तृभावाद्'=भोक्तृत्वाद्, अनेन हेतुना विवक्षितमर्थमाह "भोक्तृभावेन भोग्ये" इति, उपलक्षणत्वे सति यदायातं तदाह-"भोग्ये हि" इति,

भवतु प्रत्यात्मं तयोरनुभवः किमेतावता, तत्राह "तेनानयोर्" इति,

तथा च 'सुखाद्यात्मकं बुद्ध्यादिकं स्वातिरिक्तेन केनचिद् भोक्त्राऽनुभवनीयं भोग्यत्वादोदनादिवद्' इत्यनुमानमत्र सूचितम्,

न च बुद्ध्यादीनामेव भोक्तृत्वसंभवात् स्वातिरिक्तेनेति रिक्तमिति वाच्यम्, एकस्य कर्मकर्तृभावविरोधेन स्वस्य स्वेन भोग्यत्वासंभवादित्याशयेनाह "न चानुकूलनीया" इत्यादि, 'स्वात्मनि वृत्तिविरोधाद्' न ह्यसिधाराऽत्मानं छिनत्ति वह्निर्वाऽत्मानं दहतीति भावः,

असङ्गस्यात्मनो भोक्तृत्वमसम्भवीति मन्यमानानामन्येषां व्याख्यानमाह-"अन्ये त्वाहुर्" इति,

'तस्मादस्ति द्रष्टा' इति । नन्वयमर्थः कथं लब्धः, तत्राह "भोक्तृभावाद्= द्रष्टृभावाद्," इति,

---

(१) अ० २ सू० ११२ इत्यत्र शङ्कराचार्यादीनामेवंविधा उक्तयः ।

(२) वार्षगण्याचार्यप्रणीत इति शेषः, गौडपादभाष्य इदमुपन्यस्तं षष्टितन्त्रवाक्यमिति ज्ञेयम् ।

(३) अनर्थकम् ।

अन्ये त्वाहुः—भोग्याः=दृश्या बुद्ध्यादयः, न च द्रष्टारमन्तरेण दृश्यता युक्ता तेषां, तस्मादस्ति द्रष्टा दृश्यबुद्ध्याद्यतिरिक्तः, स चात्मेति,

भोक्तृभावाद्=द्रष्टृभावाद्, दृश्यत्वेन द्रष्टुरनुमानादित्यर्थः,

दृश्यत्वं च बुद्ध्यादीनां सुखाद्यात्मकतया पृथिव्यादिवदनुमितम्,

इतश्चास्ति पुरुष इत्याह—"कैवल्यार्थं प्रवृत्तेश्च"–शास्त्राणां महर्षीणां च दिव्यलोचनानां, कैवल्यं चात्यन्तिकदुःखत्रयप्रशमलक्षणं न बुद्ध्यादीनां संभवति, ते हि दुःखाद्यात्मकाः कथं हि स्वभावाद् वियोजयितुं शक्यन्ते, तदतिरिक्तस्य

'अनुमानाद्'=बुद्ध्यादयो द्रष्टृपूर्वका दृश्यत्वाद् घटादिवदित्यनुमानादित्यर्थः,

पक्षधर्मतामाह—"दृश्यत्वं च" इति,

असङ्गस्य परमार्थतो दर्शनकर्तृत्वासंभवाद् बुद्ध्युपाधिकमेव द्रष्टृत्वमात्मन इति मन्तव्यम्, एतच्च "द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्य" इति सूत्रे योगभाष्ये व्यक्तम्, एवं च द्रष्टृत्ववद्भोक्तृत्वस्यापि सम्भवादाद्यव्याख्यानमपि समीचीनमेवेति ध्येयम्।

केषाम्प्रवृत्तेरित्याकाङ्क्षां पूरयति–"शास्त्राणाम" इति,

अस्माकं किल लोचनानि बाह्यमेव सन्निहितमालोचयन्तीति लौकिकलोचना वयं, महर्षीणां तु लोचनानि संयमप्रभावाद् व्यवहितं सूक्ष्ममप्यालोचयन्तीति ते दिव्यलोचना इत्युच्यन्त इति,

कथं न बुद्ध्यादय एव केवलिन इत्याशङ्क्य कैवल्यलक्षणाख्यानमुखेन तेषां कैवल्यवैकल्यमाह—"कैवल्यं च" इति, असम्भवे हेतुः–"ते हि" इति, हि=यतः,

---

(१) पा० २ सू० २०।

(२) तृतीये पादे ३६ इति योगसूत्रे व्यक्तमेतत्।

(३) कैवल्यभाजः।

त्वतदात्मनस्ततो वियोगः शक्यसम्पादः, तस्मात्कैवल्यार्थं प्रवृत्तेरागमानां महाधियां चास्ति बुद्ध्यादिव्यतिरिक्त आत्मेति सिद्धम् ॥ १७ ॥

तदेवं पुरुषास्तित्वं प्रतिपाद्य स किं सर्वशरीरेष्वेकः किमनेकः प्रतिक्षेत्रमिति संशये तस्य प्रतिक्षेत्रमनेकत्वमुपपादयति—"जन्ममरणकरणानाम्" इत्यादिना,

जन्ममरणकरणानां प्रतिनियमाद्, अयुगपत्प्रवृत्तेश्च ।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥ १८ ॥

पुरुषबहुत्वं सिद्धं कस्माद्, जन्ममरणकरणानां प्रतिनियमाद्,

निकायविशिष्टाभिरपूर्वाभिर्देहेन्द्रियमनोऽहङ्कारबुद्धिवेदना-

आत्मनि संभवमाह—"तदतिरिक्तस्य" इति, अत्र हेतुगर्भितं विशेषणमाह—"अतदात्मन" इति, अदुःखाद्यात्मन इत्यर्थः, ततः दुःखादेः शक्तिविषयः सम्पादनं यस्याऽसौ शक्यसम्पादः, सम्पादयितुं शक्य इति यावद् ॥ १७ ॥ आत्मनो जनिविकारप्रयुक्तपरिणामित्वाभावायोद्द्योतकराचार्योक्तं जन्मपदार्थमाह—"निकायविशिष्टाभिर" इति, 'निकायः=देवमनुष्यतिर्यगादीनामनौत्तराधर्येणावस्थितः सङ्घातः, तद्विशिष्टाभिरित्यर्थ' इति तात्पर्यटीकायाम्मिश्राः, एवं च 'सङ्घे चानौत्तराधर्ये' इति सूत्रेण निकायपदनिष्पत्तिरिति दर्शितम्,

यद्यपि महाभाष्यादिव्याख्यानात्प्राणिनां समूह एवात्र सूत्रे सङ्घपदेन गृह्यते न समूहमात्रम्, अत एव ब्राह्मणनिकाय इतिवन्न प्रमाणनिकाय इति प्रयुज्यतेऽपितु प्रमाणनिचय इति तथापि प्राणिसंबन्धित्वेन कथंचिदत्रापि प्राणिसमूहं संभाव्य निकायपदप्रयोगोपपत्तिर्ज्ञेया, वेदना=सुखाद्यनुभवः, स्फूर्त्याख्या चेतना वा,

---

(१) प्रतिशरीरम् ।

(२) अत्र=आत्मनो बुद्ध्यादिभिन्नत्वे ।

(३) ३।३।४२ उत्तरे चाधरे चोत्तराधरास्तेषां भाव औत्तराधर्यं, तद्भिन्ने प्राणिसमूहे वाच्ये चिनोतेर्घञ् चस्य च क इत्यर्थः । शूकरशावका हि स्तनपानार्थ-

भिः पुरुषस्याभिसंबन्धो जन्म, न तु पुरुषस्य परिणामः, तस्यापरिणामित्वात्, तेषामेव च देहादीनामुपात्तानां परित्यागो मरणं, न त्वात्मनो विनाशः, तस्य कूटस्थनित्यत्वात्, करणानि=बुद्ध्यादीनि त्रयोदश, तेषां जन्ममरणकरणानां प्रति-

---

ननु देवदत्तो जात इति व्यवहारदर्शनान्मुख्यमेव घटादेरिवात्मनो जन्म न जायमानदेहादिसंबन्धरूपं भाक्तम् इत्यत्राह—"न तु पुरुषस्य परिणाम" इति, घटादेरिव मुख्य उत्पत्तिरूपः परिणामः पुरुषस्य न चेत्यर्थः, अपरिणामित्वान्नात्मनो मुख्यं जन्मेति यावद्,

मरणं तु यद्यपि 'मृङ् प्राणत्यागे' इति स्मरणात्प्राणोपलक्षितदेहादीनां त्यागरूपं मुख्यमेवात्मनि संभवति तथापि घटादेरिव विनाशरूपं मरणमत्र मा कश्चिद् ग्रहीदित्याशयेनाह—"न तु-विनाश" इति,

'न जायते म्रियते वा विपश्चिद्' 'अजो नित्यः शाश्वतोयं पुराण' इत्यादिश्रुत्यात्मनो जन्मादिपरिणामशून्यत्वेन कूटस्थनित्यत्वाम्नानान्नात्मनो मुख्यौ जन्मनिधनौ इत्यर्थः,

मा नाम भूज् जातो मृत इति व्यवहारान्नराणां व्यामोह इत्यनुकम्पावती बृहदारण्यकश्रुतिरपि—'स वा अयं पुरुषः जायमानः शरीरमभिसंपद्यमानः, स उत्क्रामन् म्रियमाण' इत्येवं स्वयमेव शरीरादिना संयुज्यमानत्वमेवात्मनो जायमानत्वं, शरीरादुत्क्रमणमेव चात्मनो म्रियमाणत्वमिति निराह,

एवं च देवदत्तो जात इत्यादिव्यवहारो भाक्त इत्यत्र फलितम्, पुनश्च 'चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वाद्' इत्यादिब्रह्मसूत्रे भाष्ये व्यक्तम्,

---

मुत्तराधरभावेन शेरत इति तादृशसमूहे शूकरनिचय इत्येव भवति न घटितेति बोधनाय "अनौत्तराधर्य" इति ।

(१) काठके १।२।१५।

(२) आत्मनि जायमानम्रियमाणत्वभ्रान्तिर्व्यामोहः ।

(३) ४।३।८।

(४) निराह=निर्वक्ति, 'जायमान'—इत्यस्य शरीरमभिसंपद्यमान इति स्वयमेव निर्वचनं करोति, 'म्रियमाण'—इत्यस्यच 'उत्क्रामन्' इति निर्वचनं करोतीत्यर्थः ।

(५) स्थावरजङ्गमशरीरविषयो जन्ममरणव्यपदेशो मुख्यः, आत्मनि तु भाक्तः=

नियमः=व्यवस्था, सा खल्वियं सर्वशरीरेष्वेकस्मिन् पुरुषे नोपपद्यते, तदा खल्वेकस्मिन् पुरुषे जायमाने सर्वे जायेरन्, म्रियमाणे च म्रियेरन्, अन्धादौ चैकस्मिन् सर्वे एवान्धादयः, विचित्ते चैकस्मिन् सर्वे एव विचित्ताः स्युरित्यव्य-

---

'व्यवस्था'=वैय्यधिकरण्येनावस्थानम्, इयं=व्यवस्था, एकस्मिन् पुरुषे अभ्युपगते सतीति शेषः,

कथन्नोपपद्यत इति पृष्टोनुपपत्तिं स्पष्टयति–"तदा खलु" इति, तदा आत्मैक्ये, पुरुषबहुत्वासत्त्वे वा सति, तथा च जन्मादिव्यवस्थाऽनुपपद्यमाना सत्यात्मभेदमापादयतीत्यत्र सूचितम्,

इदं[1] चार्थापत्तिदर्शनमात्मैक्यवादिनं वेदान्तिनं प्रति, स्वमते तु 'जन्मादिव्यवस्था वस्तुभेदनिबन्धना व्यवस्थात्वात् संमतवद्[2]' इत्यनुमानं मनसि निधाय तत्र[3] 'तदा खल्वेकस्मिन् पुरुष' इत्यादिना विपक्षबाधकतर्क[4] उच्यत इति ध्येयम्,

आत्मैक्ये जननिधनव्यवस्थानुपपत्तिमभिधाय करणव्यवस्थानुपपत्तिमाह–"अन्धादौ च" इति, अन्धत्वं=दर्शनशक्तिविहीनत्वम्, आदिना बाधिर्यादिकं ग्राह्यं, यद्यप्येतदिन्द्रियधर्मस्तथापि करणाश्रयसङ्घाताभिमानिनि पुरुष उपचर्यत इति ज्ञेयम्,

विचित्ते=विगतम्–उपरतम् वृत्तिरहितं चित्तं यस्य तस्मिन् सुपुप्ते,

---

औपाधिकजन्मादिविषयत्वेन गौणः, उपाधिजन्मनाशे सत्येवात्मनि जन्मनाशव्यवहारस्य भावित्वादित्यर्थः ।

(१) सिद्धान्तेऽर्थापत्तेरनङ्गीकारात्कथमर्थापत्त्या व्यवस्था, तत्राह="इदं च" इति ।

(२) प्रसिद्धघटादिषु जन्मनाशव्यवस्थाया घटभेदनिबन्धनत्वदर्शनादित्यर्थः ।

(३) तत्र=अनुमाने ।

(४) व्यवस्थात्वमस्तु वस्तुभेदनिबन्धनत्वं च मा भूदित्याकारकस्य विपक्षस्य बाधकस्तर्कः ।

(५) एतद्=अन्धत्वादिकम् ।

वस्था स्यात्, प्रतिक्षेत्रं तु पुरुषभेदे भवति व्यवस्था,

न चैकस्यापि पुरुषस्य देहोपाधानभेदाद् व्यवस्था इति युक्तं, पाणिस्तनाद्युपाधिभेदेनापि जन्ममरणादिव्यवस्था-

---

योगयुक्ते वेत्यर्थः, एवं बन्धमोक्षे व्यवस्थाया अनुपपत्तिरपि बोध्या। स्वमते व्यवस्थामाह-"प्रतिक्षेत्रम्" इति, यावन्तः सङ्घातास्तावन्त एव तदधिष्ठातार इति मन्मते तु नाव्यवस्थेति भावः,

ननु यथाऽऽकाशस्यैकत्वेपि घटाद्युपाधिभेदेनौपाधिकं भेदमादाय व्यवस्थाऽऽस्थीयते तथाऽत्रापि देहोपाधिकं भेदमास्थाय व्यवस्थाऽऽस्थीयतां किं गौरवग्रस्तेन पारमार्थिकेन भेदेन, तथा चाहुः-'यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते। न सर्वे संप्रयुज्यन्ते तथा जीवाः सुखादिभिर्' इति, इत्याशङ्कां निरस्यति-"न चैकस्यापि" इति, उपाधानम्=उपाधिः,

तथा सति देहवद् हस्तस्तनादीनां देहावयवानामप्युपाधित्वेन भेदकत्वं स्यात्, तथा च देहावयवोद्भवविरोधाभ्यामपि पुरुषस्य जन्ममरणादिव्यवहारः स्यादित्यभिप्रेत्यायुक्तत्वे हेतुमाह-"पाणिस्तनादि" इति,

---

(१) तथा चैकस्मिन् सुषुप्ते योगयुक्ते वा सर्वे एव सुषुप्ता योगिनो वा भवेयुरित्यर्थोऽत्र ज्ञेयः।

(२) 'य एतद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवोपयन्ति' इति श्रुताया इति शेषः।

(३) एकस्मिन् घटाकाशे नीयमाने धूमादिना संवलिते वा न सर्वे नीयमाना धूमादिसंवलिता वा भवन्ति, इति व्यवस्था इत्यर्थः।

(४) औपाधिकभेदमादायार्थापत्तेरन्यथाप्युपपत्तिः। अनुमानं च सिद्धसाधनमिति शङ्काकृतम्।

(५) अद्वैतप्रकरणे गौडपादाचार्य्याः।

(६) देहस्योपाधित्वेन जन्मादिव्यवस्थापकत्वे सतीत्यर्थः, देहस्यैवोपाधित्वेनावयवानामित्यत्र नियामकाभावादित्याशयः,।

प्रसङ्गाद्, न हि पाणौ वृक्णे, जाते वा स्तनादौ महत्यवयवे युवतिर्मृता, जाता वा भवतीति, इतश्च प्रतिक्षेत्रं पुरुषभेद

प्रसङ्गस्येष्टत्वमाशङ्क्य व्यवहारविरोधेन परिहरति-"न हि पाणौ" इति,

वृक्णे=छिन्ने, युवतिः=युवत्वाश्रितसङ्घातवती स्त्री, 'भवति' इत्यनेन चात्र स्वगोचरो व्यवहारः, स्वविषयकं वा ज्ञानमुपलक्षणीयम्, एवं च हस्ते पतिते युवतिर्मृतेति, स्तनादौ च जाते युवतिर्जातेति च न केनापि व्यवह्रियते, नापि ज्ञायत इत्यर्थोऽत्र फलितः,

यद्यपि स्तनादौ जाते बाल्यं विहाय युवत्वं प्राप्तः सङ्घातस्तथापि तदवच्छेदेन तदधिष्ठात्र्या न जातत्वव्यवहारः, सैवेयमबलेति प्रत्यभिज्ञानाद्, भवन्मते तु कायोपाधिजन्मना तदवच्छेदेनात्मनि जातत्वव्यवहारवत्, कायावयवजन्मनाप्यात्मनि जातत्वव्यवहारः स्याद्, उपाधित्वाविशेषात्, स च बाधित इति नौपाधिकभेदकल्पनया निस्तार इति भावः,

एतेन परिमाणभेदाद् द्रव्यभेदमनुमिमाना ये तार्किका अवयवापचयेऽसमवायिकारणसंयोगनाशादवयविनो विनाशोऽवयवोपचये च पूर्वावयविन्यवयवान्तरनिवेशासम्भवादपूर्वावयव्युत्पत्तिरित्येवं सावयवानामनुक्षणमुत्पादनिरोधावभ्युपयन्तस्तेपि गलहस्तिता जाता इति वेदितव्यं, तथा सति स्तनाद्यवयवे जातेऽपूर्वाया एव युवत्या भवन्मते जातत्वेन सैवेयमिति प्रत्यभिज्ञानानुपपत्तेः, सादृश्यदोषदूषितत्वेन भ्रान्तिरियमित्यङ्गीकारे तु भदन्त एव दत्तविष्टरः सुस्थिरो भवेदित्यलं तेन विरोधेनेत्यास्तां तावद्,

---

(१) ननु स्तने जाते भवत्येव युवतिर्जातेति-कथमुच्यते न हि जाता भवतीति, इत्याशङ्कायामाह—"भवतीत्यनेन" इति, स्वगोचरः=भवनविषयकः ।

(२) एतेन=स्तने जाते युवत्या जातत्वव्यवहाराभावदर्शनेन ।

(३) तथा सति=परिणामभेदेन द्रव्यभेदाभ्युपगमे सति ।

(४) भदन्तः=बौद्धः दत्तविष्टरः=समर्पितासनः, अनेन भदन्तो न तार्किकप्रतिपक्ष्यपि तु तार्किकसयूथ्य इति सूचितं, तदेवाह—"अलं तेन विरोधेन" इति, भदन्तेन सह भवतां विरोधो न युक्तस्तन्मतस्याङ्गीकृतत्वादित्यर्थः, एतदुक्तं भवति—यत् सत् तत् क्षणिकमिति भदन्तेनोक्ते, प्रत्यभिज्ञाबलात्स्थायित्वमिति तार्किकेणोत्तरिते, पुनश्च सैवेयं दीपकलिकेतिवत् सादृश्यदोषदूषितत्वेन प्रत्यभिज्ञाया भ्रान्तित्वमित्येवं भदन्तेनाभिहिते किन्तु उत्तरं, त्वयापि प्रत्यभिज्ञाया भ्रान्तित्वाङ्गीकारादिति ।

ननु न देहावयवानामुपाधित्वमाश्रीयतेऽतिप्रसङ्गापादकत्वादपि तु देहस्यैव, यदाहुर्-'आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप' इति, इति चेद्, एवमपि न निस्तारः, एकस्मिन् घटे भग्ने तद्घटमुक्तस्याप्याकाशप्रदेशस्य घटान्तरेण पुनर्योगाद् घटाकाशत्वापत्तिरिवैकोपाधिना विमुक्तस्याप्यात्मनः पुनरुपाध्यन्तरेण संबन्धाद् बद्धत्वव्यवहारापत्त्या बद्धमुक्तव्यवस्थानुपपत्तेस्तादवस्थ्यात्, साङ्ख्यसूत्रकारास्तु-"जन्मादिव्यवस्थातः पुरुषबहुत्वम्" इति स्वमतमभिधाय, पुनरुपाधिभेदमादाय व्यवस्थायामाशङ्कितायाम् "उपाधिभेदेप्येकस्य नानायोग आकाशस्येव घटादिभिर्" "उपाधिर्भिद्यते न तु तद्वान्" इत्येवं समादधिरे,

स्यादेतद्, 'एको देवः सर्वभूतेषु गूढ' इत्याद्यैकात्म्यप्रतिपादनश्रुतीनामेवं सति का गतिरिति चेद्, अत्राहुर्मिश्राः-एकत्वश्रुतीनां च प्रमाणान्तरविरोधात् कथंचिद् देशकालविभागाभावेन भक्त्याप्युपपत्तेरिति,

(१) अव्यवस्थायाम्प्रसक्तायां तद्वारणायोपाधिरूपं किंचिन्निमित्तमनुसरणीयं न तूपाधिरस्तीत्याश्रित्याव्यवस्थापादनीयेति भावः ।

(२) अ. १ सू. १४९ ।

(३) अ. १ सू. १५०। 'उपाधिभेदेप्येकस्यापि पुरुषस्य नानायोगोऽस्त्येव यथैकस्यैवाकाशस्य घटकुड्यादिनानायोगः, अवच्छेदकभेदेनैकस्यात्मन एव विविधजन्ममरणाद्यापत्तिः कायव्यूहादाविवेति न संभवति व्यवस्था-एकः पुरुषो जायते नापर इत्यादिरित्यर्थः, न ह्यवच्छेदकभेदेन कपिसंयोगतदभाववत्येकस्मिन्नेव वृक्षे व्यवस्था घटते=एको वृक्षः कपिसंयोग्यन्यश्च नेति' इति सूत्रार्थ इति विज्ञानभिक्षुः ।

(४) अ. १ सू. १५१ । ननु चैतन्यैक्येपि तत्तदुपाधिविशिष्टस्यातिरिक्ततामभ्युपगम्य व्यवस्थोपपादनीया, तत्राह-उपाधिर्भिद्यते=उपाधिरेव नाना, न तु तद्वान्=उपाधिविशिष्टोपि नानाऽभ्युपेयो विशिष्टस्यातिरिक्तत्वे नानात्मताया एव शास्त्रान्तरेऽभ्युपगमापत्तेरित्यर्थः, न हि छत्रादिमाँश्चैत्रः केवलचैत्राद् भिन्नो भवतीति भावः, किञ्च बन्धभागिनो विशिष्टत्वे विशेषणवियोगेन विशिष्टनाशान्न मोक्षोपपत्तिरित्यपि बोध्यम् ।

(५) २।२२। इत्यत्र योगभाष्यव्याख्यायामिति शेषः ।

(६) 'अजो ह्येको जुषमाणोऽनुशेते, जहात्येनां भुक्तभोगामजोऽन्य' इति बद्धमुक्तजीवभेदप्रतिपादकश्रुतिविरोधाद्, जन्ममरणादिव्यवस्थादर्शनरूपप्रत्यक्षप्रमाणविरोधाच्चेत्यर्थः, आत्मनां व्यापकत्वेन सर्वे एव आत्मानः सर्वत्र सन्निहिता इति विभिन्नदेशत्वाभावेन विभागाप्रतीतेः, भक्त्या=गौणत्वेनैकत्वव्यवहार इत्यर्थः ।

इत्याह—"अयुगपत्प्रवृत्तेश्च"—प्रवृत्तिश्च प्रयत्नलक्षणा यद्यप्यन्तःकरणवर्तिनी तथापि पुरुष उपचर्यते, तथा च तस्मिन्नेकत्र शरीरे प्रयतमाने स एव सर्वशरीरेष्वेक इति सर्वत्र

अवैधर्म्यलक्षणाभेदप्रतिपादनपरत्वं तासां श्रुतीनामिति विज्ञानभिक्षुः,(१) सूत्रकारस्तु "नाद्वैतश्रुतिविरोधो जातिपरत्वाद्"(२) इत्येवं वर्णयामास, अन्नत्यं तत्त्वमेतद्भूमिकातोऽवसेयम् ।

शरीराणि प्रतिशरीरं विभिन्नपुरुषाधिष्ठेयानि अयुगपत्प्रवृत्तिमत्त्वाद् रथादिवद्, इत्याशयेन प्रवृत्तं हेत्वन्तरमवतार्य व्याचष्टे–"प्रवृत्तिश्च" इति, तत्र चलनात्मकः प्रवृत्तिरूपो व्यापारः शरीरधर्मः, चालनात्मकः प्रवर्तनारूपः प्रयत्नश्च चेतनधर्मः, तथा च प्रवृत्तेरयौगपद्यदर्शनेन प्रवर्तनारूपप्रयत्नस्यानैक्यम् प्रयत्नायौगपद्येन च तदाश्रयचेतनभेद इत्यर्थोऽत्राभिप्रेतः, तत्र प्रयत्नरूपपरिणामस्य बुद्धिधर्मत्वेनापरिणाम्यात्मधर्मत्वाभावात्कथमन्यधर्मायौगपद्येनात्मभेदानुमानमित्याशङ्कामनूद्यापनुदति–"यद्यपि" इत्यादिना,

'पुरुष उपचर्यते=उपचारेण व्यवह्रियते, कुतश्चिन्निमित्तादतस्मिंस्तद्व्यवहार उपचारः, उपचारनिमित्तश्च स्वस्वामिभावसंबन्धः "यथा विजयः पराजयो वा योद्धृषु वर्तमानः स्वामिनि 'राज्ञि' व्यपदिश्यते" इत्यादिना योगभाष्येऽभिहितः,(३) अग्रे च व्यक्तः,

जले कम्पमाने तत्प्रतिबिम्बितचन्द्रकम्पनमिव प्रयतमानायां बुद्धौ तत्प्रतिबिम्बितचेतनोपि प्रयतत इवेति यावद्,

आत्मैक्येऽयुगपत्प्रवृत्त्यभावं दर्शयन् विपक्षे(४) बाधकमाह–"तथा च" इति, तथा च=आत्मैकत्वे च तस्मिन्=आत्मनि एकत्र शरीरे=एकशरीरावच्छेदेन, प्रयतमाने=प्रयत्नं कुर्वाणे सति सर्वत्र=सर्वशरीरावच्छेदेन प्रयतेत=

---

(१) ब्रह्ममीमांसाभाष्ये विज्ञानामृते प्रथमाध्यायीयद्वितीयसूत्रे, २।२२। इत्यादिसूत्रे योगवार्तिके, अ. १ सू. १५१ इत्यादिसूत्रे साङ्ख्यप्रवचनभाष्ये चेति बोध्यम्।

(२) अ. १ सू. १५४। जातिपरत्वात्=चित्सामान्यमादायैकरूपत्वे तात्पर्यादित्यर्थः ।

(३) २।१८। अग्रे=६२ इति कारिकाविवरणे ।

(४) विपक्षे=अयुगपत्प्रवृत्तिमत्त्वमस्तु पुरुषबहुत्वं च मा भूदित्येवंविधे विपक्ष इत्यर्थः ।

प्रयतेत, ततश्च सर्वाण्येव शरीराणि युगपच्चालयेद्, नानात्वे तु नायं दोष इति,

इतश्च पुरुषभेद इत्याह–'त्रैगुण्यविपर्ययाच्चैव–एवकारो भिन्नक्रमः सिद्धम् इत्यस्यानन्तरं द्रष्टव्यः, सिद्धमेव नासिद्धं, त्रयो गुणास्त्रैगुण्यं, तस्य विपर्ययः=अन्यथात्वं–केचित् खलु सत्त्वनिकायाः सत्त्वबहुला यथोर्द्ध्वस्रोतसः, केचिद् रजोबहुलाः यथा मनुष्याः, केचित्तमोबहुला यथा तिर्यग्योनयः, सोयमीदृशस्त्रैगुण्यविपर्ययः=अन्यथाभावः तेषु सत्त्वनिकायेषु न भवेद् यद्येकः पुरुषः स्याद्, भेदे त्वयमदोष इति ॥ १८ ॥

एवं पुरुषबहुत्वं प्रसाध्य विवेकज्ञानोपयोगितया तस्य धर्मानाह–"तस्माच्च विपर्यासाद्" इति

तस्माच्च विपर्यासात्, सिद्धं साक्षित्वमस्य पुरुषस्य ।
कैवल्यं माध्यस्थ्यं, द्रष्टृत्वमकर्तृभावश्च ॥ १९ ॥

'तस्माच्च' इति च–शब्दः पुरुषस्य बहुत्वेन सह धर्मान्तराणि समुच्चिनोति,

---

प्रयत्नं कुर्वीत, तत्र हेतुः–'स एव सर्वशरीरेष्वेक' इति, इति=इति हेतोः, चालयेत्=प्रवर्तयेत्,

सिद्धमेव पुरुषबहुत्वमिति शेषः, यद्वा एतैर्हेतुभिः पुरुषबहुत्वमेव सिद्धं भवति नात्मैक्यमित्यर्थो ज्ञेयः,

अन्यथात्वं–सात्त्विकादिप्रभेदेनोत्तममध्यमाधमभावरूपं प्राणिवैचित्र्यमित्यर्थः, तदेवाह–"केचित्खलु" इति, सत्त्वनिकायाः=प्राणिसमूहाः, ऊर्द्ध्वस्रोतसः=देवादयः,

यद्येकः पुरुषः स्यात् तर्हि तेषुतेषु सत्त्वनिकायेष्वन्यथाभावो=वैलक्षण्यं न भवेदित्यन्वयः, आत्मैक्य उच्चावचप्राणभृत्प्रपञ्चो न भवेदपि त्वेकविध एव स्यादिति भावः, भेदे=पुरुषबहुत्वे तु अयम्=उत्तममध्यमाधमभावः अदोषः=दोषविधुरः–सङ्गत इति यावद् ॥ १८ ॥

धर्मान्तराणि=एतदार्योपनिबद्धानि साक्षित्वादीनि,

'अस्माद्' इत्यनभिधाय 'तस्माद्' इत्यभिहितवतः कारिकाकृतस्तात्पर्य-

विपर्य्यासादस्माद्-इत्युक्ते त्रैगुण्यविपर्य्ययाद्-इत्यनन्तरोक्तं संबध्येत, अतस्तन्निरासाय तस्माद्-इत्युक्तम्, अनन्तरोक्तं हि सन्निधानादिदमो विषयो, विप्रकृष्टं च तद् इति विप्रकृष्टं 'त्रिगुणमविवेकि' इत्यादि संबध्यते, तस्मात्=त्रिगुणादेः यो विपर्यासः स पुरुषस्यात्रिगुणत्वं विवेकित्वमविषयत्वमसाधारणत्वं चेतनत्वमप्रसवधर्मित्वं च,

---

माह-"विपर्यासादस्माद्" इति, तन्निरासाय=समनन्तराभिहितस्यासंबन्धाय, बुद्धिस्थव्यवहिताभिमतपरामर्शाय च तस्मादित्युक्तमित्यर्थः,

कथमेतदवगम्यते, तत्राह-"अनन्तरोक्तं हि" इति, "इदमस्तु सन्निकृष्टे, समीपतरवर्तिन्येतदो रूपम्, अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयाद्" इत्यभियुक्तोक्तेः, सन्निधानात्=सन्निकृष्टत्वरूपार्थबलाद् अनन्तरोक्तं वस्तु इदमो विषयः= इदंशब्दोपस्थाप्यं, विप्रकृष्टं=व्यवहितं च तदः=तच्छब्दस्य प्रतिपाद्यमिति सङ्केत इति-अतः दूरस्थं त्रिगुणमित्याद्यत्र परामृश्यत इत्यर्थः,

अत्रेदं बोध्यम्-अनयार्यया ह्याचार्येण पूर्वाभिहितव्यक्ताव्यक्तधर्मजातत्रिगुणत्वादिविपरीतात्रिगुणत्वादिधर्मत्त्वेन हेतुना पुरुषस्य कैवल्यसाक्षित्वादिरूपधर्मवत्त्वमिति सिसाधयिषितं, तद् यदि 'अस्माद्' इति पदमत्रोपादीयेत तेन च समनन्तरोक्तं 'त्रैगुण्यविपर्ययाद्' इति परामृश्येत तर्हि त्रिगुणत्वविपरीतेनात्रिगुणत्वहेतुना केवलं सुखादिशून्यतारूपकैवल्यधर्मवत्त्वमेव पुरुषस्य सिद्ध्येत न साक्षित्वादिधर्मवत्त्वं, तत्प्रयोजकचेतनत्वादेरत्रालाभाद्, अत उपात्तनिखिलधर्माणां सहेतुकत्वलाभाय 'तस्माद्' इत्युपादाय तेन च व्यवहितं 'त्रिगुणमविवेकि' इत्यादि परामृश्य तस्मात्=त्रिगुणादेर्विपरीतादत्रिगुणत्वादेर्हेतोः पुरुषस्य साक्षित्वादिकं सिद्धमित्यर्थोऽत्र संपाद-

---

(१) एतद्='अस्माद्' इत्युपादानेऽनन्तरोक्तमेव संबध्येतेत्येतदित्यर्थः ।

(२) दूरस्थम्=११-इत्यार्यास्थमित्यर्थः ।

(३) एतदपि यदा परामृष्टत्रैगुण्यविपर्ययादिति पदेन सहात्रत्यविपर्यासादिति पदं 'त्रैगुण्यविपर्ययरूपाद्विपर्यासाद्' इत्येवमन्वीयार्थः क्रियेत तदा लभ्येत, यदि तु त्रैगुण्यविपर्ययात्सकाशाद यो विपर्यासस्तस्मादित्येवमन्वीयेत तदा तु विपरीतमेवापद्येतेत्यपि ज्ञेयम् ।

(४) साक्षित्वादिसाधकचेतनत्वादेर्हेतोरलाभादित्यर्थः ।

(५) अनेन हेतुना साक्षित्वमनेन च हेतुनाऽकर्तृत्वमित्यादिलाभायेत्यर्थः ।

तत्र चेतनत्वेनाविषयत्वेन च साक्षित्वद्रष्टृत्वे दर्शिते, चेतनो हि द्रष्टा भवति नाचेतनः, साक्षी च दर्शितविषयो भवति, यस्मै प्रदर्श्यते विषयः स साक्षी, यथा हि लोकेऽर्थिप्रत्यर्थिनौ विवादविषयं साक्षिणे दर्शयत एवं प्रकृतिरपि स्वचरितं विषयं पुरुषाय दर्शयतीति पुरुषः साक्षी, न चाचेतनो विषयो वा शक्यो विषयं दर्शयितुमिति चैतन्यादविषयत्वाच्च भवति साक्षी, अत एव द्रष्टापि भवति,

---

नीयः, एतदेवाह-"तस्मात्-त्रिगुणादेर्यो विपर्यास" इति, कीदृक् स इत्यत्राह-"स पुरुषस्यात्रिगुणत्वम्" इत्यादि,

'अप्रसवधर्मित्वं च'-तस्माद् विपर्यासात्पुरुषस्य साक्षित्वादिकं सिद्धमित्यर्थः,

यस्माद्विपर्यासाद् यत् सिद्धं तद्विभज्य दर्शयति-"तत्र" इति, दर्शितो विषयो यस्मादसौ दर्शितविषयः, तदेवाह-"यस्मै प्रदर्श्यत" इति,

एतदेव दृष्टान्तेन स्पष्टयति-"यथा हि लोके" इति, अर्थ्यत इत्यर्थः= साध्यः सोऽस्यास्तीत्यर्थी=वादी, तत्प्रतिपक्षः प्रत्यर्थी=प्रतिवादीत्यर्थः,

एवं प्रकृतिरपि=बुद्धिरूपेण परिणता प्रकृतिरपि स्वचरितं=स्वोपगृहीतं विषयजातं स्वस्मिन् प्रतिबिम्बिताय स्वस्वामिने पुरुषाय समर्पयतीत्यर्थः,

तदुक्तं विष्णुपुराणे-"गृहीतानिन्द्रियैरर्थानात्मने यः प्रयच्छति, अन्तःकरणरूपाय तस्मै विश्वात्मने नम" इति, घटादाविवाचेतने महदादौ साक्षित्वादेरसम्भवमाह-"न चाचेतन" इति,

"भवति साक्षी" इति, अत्रेदं बोध्यं-'साक्षाद् द्रष्टरि संज्ञायाम्'[3] इति पाणिनिस्मरणात् "साक्षात्संबन्धात्साक्षित्वम्"[4]-इति साङ्ख्यसूत्राच्च बुद्धेरेव साक्षी पुरुषस्तया सहाव्यवहितसंबन्धाद् न त्वन्येषां, तैस्सह साक्षात्संबन्धाभावादिति,

कथन्तर्ह्यन्येषां भानम्, अत्राह-"अत एव" इति, साक्षित्वादेवान्येषां द्रष्टापि भवतीत्यर्थः,

---

(१) त्रिगुणत्वादेः सकाशादित्यर्थः ।

(२) सः=विपर्यासः ।

(३) ५।२।९१। साक्षाद् इत्यव्ययाद् द्रष्टर्यर्थे इनिप्रत्यय इत्यर्थः ।

(४) अ. १ सू. १६१ ।

अत्रैगुण्याच्चास्य कैवल्यम्, आत्यन्तिको दुःखत्रयाभावः कैवल्यं, तच्च तस्य स्वाभाविकादेवात्रैगुण्यात्=सुखदुःखमोहरहितत्वात् सिद्धम्, अत एवात्रैगुण्यान्माध्यस्थ्यं,—सुखी हि सुखेन तृप्यन् दुःखी हि दुःखं द्विषन् मध्यस्थो न भवति तदुभयरहितस्तु 'मध्यस्थ' इति, 'उदासीन' इति चाऽऽख्यायते,

---

इन्द्रियप्रणालिकया बुद्धौ तत्तदाकारेण परिणतायां पुरुषेण दृश्यायां सत्यां तदारूढाः पदार्था अपि दृश्या भवन्तीति तेषां द्रष्टा पुरुषः, यदाहुः—"द्रष्टा दृशिमात्रः शुद्धोपि प्रत्ययानुपश्यः" "द्रष्टा बुद्धेः प्रतिसंवेदी पुरुष" इति चेति भावः, तच्च=कैवल्यं च, तस्य=पुरुषस्य, स्वाभाविकादेव=तात्त्विकादेव, एतच्चोपरिष्टात्स्पष्टम्,

माध्यस्थ्यं=ताटस्थ्येन वर्तमानत्वं—सुखादिशून्यत्वेन रागद्वेषराहित्यमिति यावद्, एतदेव विपर्ययप्रदर्शनेन द्रढयति—"सुखी हि" इति, तृप्यन्=तृप्तिं लभमानः, सुखे रागं कुर्वाण इति यावत्, तदुभयरहितः=रागद्वेषरहित इत्यर्थः,

'उदासीन इति'—यद्यपि विवदमानयोरुभयोरपि पक्षपाती हितैषी वा मध्यस्थः, विवदमानयोरुभयोरप्युपेक्षक उदासीन इत्येवं तयोर्भेदः, अत एव 'सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु' इत्यादौ तयोर्भेदेनोपादानं, तथापि—"श्रुत्वा युद्धोद्यमं रामः कुरूणां सह पाण्डवैः, तीर्थाभिषेकव्याजेन मध्यस्थः प्रययौ किल" इत्यादावुदासीनेपि मध्यस्थपदप्रयोगदर्शनेन रागद्वेषराहित्यमात्रं साम्यमादाय तयोरभेदो निर्वाह्यः,

---

(१) योगसूत्रकारा इति शेषः ।

(२) २।२०। शुद्धोऽपि=अपरिणाम्यपि दृशिमात्रः=चिन्मात्रः पुरुषः प्रत्ययानुपश्यः=बुद्धिवृत्तिमनुपश्यन् सन् द्रष्टा भवतीत्यर्थः ।

(३) संवेदिन्या बुद्धेः प्रतिरूपः, अर्थाकारायां बुद्धौ सत्यां तत्प्रतिबिम्बितत्वेन तदनुकारीति योगभाष्यार्थः ।

(४) बुद्धेः साक्षात्प्रकाशकः पुरुषोऽन्येषान्तु बुद्धिवृत्तिव्यवधानेन प्रकाशक इति तत्त्वम् ।

(५) उपरिष्टाद्='तस्मान्न बध्यते' ६२ इत्यत्रेत्यर्थः ।

(६) साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते' इति गीताया उत्तरार्द्धम्, अ० ६। श्लो० ९।

(७) भा. स्कं. १० अ. ७८ ।

विवेकित्वाद् अप्रसवधर्मित्वाच्चाकर्तेति सिद्धम् ॥ १९ ॥

स्यादेतत्, प्रमाणेन कर्तव्यमर्थमवगम्य चेतनोऽहं चिकीर्षन् करोमि इति कृतिचैतन्ययोः सामानाधिकरण्यमनुभवसिद्धं, तदेतस्मिन्मते नावकल्पते–चेतनस्याकर्तृत्वात् कर्तुश्चाचैतन्याद्, इत्यत आह–"तस्मात्तत्संयोगाद्" इत्यादि—

तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्।
गुणकर्तृत्वेपि तथा कर्तेव भवत्युदासीनः ॥ २० ॥

यतश्चैतन्यकर्तृत्वे भिन्नाधिकरणे युक्तितः सिद्धे तस्माद् भ्रान्तिरियमित्यर्थः,

---

विवेकित्वाद्=महदादिवत्सम्भूयकारित्वाभावाद् अप्रसवधर्मित्वाद्=अपरिणामित्वेनाजनकत्वाद् अकर्तेति सिद्धमित्यर्थः ॥ १९ ॥

'जानाम्यहं करोमीदमहम्' इति प्रत्यये द्रष्टृत्वकर्तृत्वयोरेकाधिकरणत्वेनोपलम्भाद् 'अकर्तृभावश्च' इत्यभिधानमसमीचीनमिति शङ्कते–"स्यादेतद्" इत्यादिना,

अवगम्य=ज्ञात्वा, अनेन ज्ञानं दर्शितं, 'चिकीर्षन्' इतीच्छा दर्शिता, 'करोमि' इति च कृतिरुक्ता, 'चेतनोहम्' इत्यनेन च तेषामाश्रयोऽभिहितः, तथा च ज्ञानेच्छाकृतीनामेकाधिकरणत्वमनुभवसिद्धमित्यत्रायातम्,

अस्त्वेवं ततः किं, तत्राह–"तद्" इति, तद्=एकाधिकरणत्वम्, अस्मिन् मते=बुद्ध्यादिकं कर्तृ चेतनश्च पुरुषोऽकर्तेति मते, न अवकल्पते=युज्यते, तत्र हेतुः–चेतनस्य=पुरुषस्याकर्तृत्वात्, कर्तुः=बुद्ध्यादेश्चाचेतनत्वादिति, 'तस्माद्' इत्यनेनापेक्षितं पूरयति–"यत" इति, चैतन्यं=प्रकाशकत्वं तच्चात्मधर्मः, कर्तृत्वं=कृतिमत्त्वं तच्च बुद्धिधर्मः, इत्येवं भिन्नाधिकरणे युक्तितः=त्रिगुणत्वात्परिणामित्वाद् बुद्धेः कर्तृत्वं, निर्गुणत्वादपरिणामित्वात्पुरुषस्याकर्तृत्वं द्रष्टृत्वादिकं च, इत्यादिपूर्वाभिहितयुक्तितः सिद्धे=साधिते तस्माद् भ्रान्तिः ="दृग्दर्शनशक्त्योरेकात्मतेवास्मिता" इति लक्षितास्मिताख्याविवेककृता इयं=सामानाधिकरण्यप्रतीतिरित्यर्थः,

---

(१) 'द्रष्टृत्वमकर्तृभावश्च' इत्यनेन यदात्मनो द्रष्टृत्वे सत्यकर्तृत्वमुक्तं तदसङ्गतमित्यर्थः। (२) एवं कृतिचैतन्यत्वयोरेकाधिकरणत्वम्। (३) दृक्शक्तिः=पुरुषः, दर्शनशक्तिः=बुद्धिः तयोर्द्रष्टृदृश्ययोरविद्यापादिता यैकरूपतेव सास्मितेति योगसूत्रार्थः, पा० २ सू० ६।

भ्रान्तिबीजं तत्संयोगः=तत्सन्निधानम्,

लिङ्गं=महदादिसूक्ष्मपर्यन्तं वक्ष्यति, अतिरोहितार्थमन्यद् ॥ २० ॥

'तत्संयोगाद्' इत्युक्तं, न च भिन्नयोः संयोगोऽपेक्षां विना, न चेयमुपकार्योपकारकभावं विना, इत्यपेक्षाहेतुमुपकारमाह–

किंनिमित्ता पुनरियं भ्रान्तिर्, अत्राह–"भ्रान्तिबीजं तत्संयोग" इति, चेतनस्यासङ्गत्वात्कथं संयोग, इत्यत्राह–"तत्सन्निधानम्" इति,

तथा च साङ्ख्यसूत्रम्–"उपरागात्कर्तृत्वं चित्सान्निध्याद्" इति,

एवं च लिङ्गं=बुद्ध्यादिकमचेतनमपि तत्संयोगात्=चेतनसन्निधानात् चेतनावत्=चेतनमिव भवति, अतो जानामीति प्रत्यय उपपन्नः, तथा गुणकर्तृत्वेपि=बुद्ध्यादिरूपेण परिणतानां गुणानां कृतिमत्त्वेपि तथा=बुद्ध्युपरागात्–तत्प्रतिबिम्बितत्वाद् उदासीनोपि पुरुषः कर्तेव भवति, तेन करोमीत्युपपन्नः, इत्यार्यार्थोऽत्र फलितः,

यद्यपि जानामीति प्रत्ययस्यात्माधिकरणत्वं करोमीति प्रत्ययस्य च बुद्ध्यधिकरणत्वं युक्तं तथापि धर्मिणोर्विवेकाग्रहात् तद्धर्मयोरपि साङ्कर्यात्कृतिचैतन्ययोस्सामानाधिकरण्यं भातीति तत्त्वम्,

अतिरोहितार्थं=स्पष्टार्थम् ॥ २० ॥

भिन्नयोः=चेतनाचेतनयोरात्मप्रधानयोः, अपेक्षां=परस्पराकाङ्क्षाम्, अन्योन्यानुरागो वाऽपेक्षा, इयम्=अपेक्षा, यत एवम् इति=अतः अपेक्षाहेतुमुपकारमाहेति–यद्यपि "तस्य हेतुरविद्या" इति योगसूत्रेणानादिविपर्ययज्ञान-

---

(१) ४–इत्यार्ययेति शेषः, 'भ्रान्तिबीजम्' इति पाठात्पूर्वमयं पाठो यद्यप्युपलभ्यते तथापि योग्यत्वाद्विपरिवर्तितः, मा भूदत्र प्रत्यवायो, न ह्येषा श्रुतिरिति । (२) अ० १ सू० १६४–अत्र यथायोग्यमन्वयः, पुरुषस्य यत्कर्तृत्वं तद् बुद्ध्युपरागाद्, बुद्धेश्च या चित्ता सा पुरुषसान्निध्यादित्यर्थः । (३) धर्मिणोः=बुद्धिपुरुषयोः । (४) धर्मयोः=कृतिचैतन्ययोः । (५) यथाऽग्न्ययसोः परस्परं संयोगविशेषात्परस्परधर्मारोपस्तथा बुद्धिपुरुषयोरपीति भावः । (६)२।२४। तस्य=बुद्धिपुरुषसंयोगस्य ।

"पुरुषस्य दर्शनार्थम्" इत्यादि–

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य,
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ २१ ॥

'प्रधानस्य' इति कर्मणि षष्ठी, प्रधानस्य सर्वकारणस्य यद् दर्शनं पुरुषेण तदर्थं, तदनेन भोग्यता प्रधानस्य दर्शिता, ततश्च भोग्यं प्रधानं भोक्तारमन्तरेण न संभवतीति,

---

वामनैव संयोगनिदानमभिहितं तथाप्यवान्तरं संयोगप्रयोजकं परस्परोपकारमाहेत्यर्थः,

उभयोः=पुरुषस्य प्रधानस्य च यः संयोगः स दर्शनार्थं कैवल्यार्थं च= प्रधानेन स्वदर्शनार्थं=सुखाद्यात्मकस्वस्वरूपानुभवरूपभोगार्थं पुरुषोऽपेक्ष्यते, पुरुषेण च स्वकैवल्यार्थं=कैवल्यकारणविवेकज्ञानरूपप्रकृतिपरिणामार्थं प्रधानमपेक्ष्यते, तत्र दृष्टान्तः–'पङ्ग्वन्धवद्' यथा गतिशक्तिविहीनेन पङ्गुनाऽभीष्टदेशप्राप्तये गतिशक्तिमानन्धोऽपेक्ष्यते दर्शनशक्तिहीनेन चान्धेन मार्गप्रदर्शनार्थं दर्शनशक्तिमान् पङ्गुरपेक्ष्यते तथेति कारिकार्थः,

अमुमेवार्थं विभज्यान्वयाख्यानेन दर्शयति–"प्रधानस्येति कर्मणि षष्ठी" इति, 'उभयप्राप्तौ कर्मणि' इति सूत्रेणेत्यर्थः,

किङ्क्रियापेक्षयेदं कर्म, इत्याकाङ्क्षायां व्यवहितामपि दर्शनक्रियां योग्यतया संबध्नाति–"प्रधानस्य–यद् दर्शनम्" इति,

कर्तृकर्मणोः सत्त्व एव कर्मणि षष्ठीप्रवृत्तेः कर्तृपदमध्याहरमाणः केन दर्शनमित्याकाङ्क्षितं पूरयति–"पुरुषेण" इति, तदर्थं=स्वानुभवार्थं प्रधानेन पुरुषोऽपेक्ष्यत इत्यर्थः, तदेवाह–"तदनेन" इति, तेनानेन पुरुषकर्तृकदर्शनकर्मविषयत्वकथनेनेत्यर्थः,

---

(१) अत्र पङ्गूपमो निष्क्रियः पुरुषः, अन्धोपमं चाचेतनं प्रधानमिति बोध्यम्, यथाऽन्धस्कन्धारूढेण पङ्गुनाऽन्धो मार्गे प्रवर्त्यते तथा प्रकृत्यारूढेन पुरुषेण प्रधानं सर्गे प्रवर्त्यते यथा चाऽन्धेन पङ्गुः स्वाभीष्टस्थानं प्राप्यते तथा प्रधानेन पुरुषः कैवल्यं प्राप्यत इत्यर्थोऽप्यत्र बोध्यः ।

युक्ताऽस्य भोक्त्रपेक्षा,

पुरुषस्यापेक्षां दर्शयति–'पुरुषस्य कैवल्यार्थं'–तथा हि–प्रधानेन सम्भिन्नः पुरुषस्तद्गतं दुःखत्रयं स्वात्मन्यभिमन्यमानः कैवल्यं प्रार्थयते, तच्च सत्त्वपुरुषान्यताख्यातिनिबन्धनं, न च सत्त्वपुरुषान्यताख्यातिः प्रधानमन्तरेणेति कैवल्यार्थं पुरुषः प्रधानमपेक्षते,

अनादित्वाच्च संयोगपरम्परया भोगाय संयुक्तोपि कैवल्याय पुनः संयुज्यत इति युक्तं,

ननु भवत्वनयोः संयोगो, महदादिसर्गस्तु कुत, इत्यत आह–"तत्कृतः सर्गः"–संयोगो हि न महदादिसर्गमन्तरेण भोगाय कैवल्याय च पर्याप्त इति संयोग एव भोगापवर्गार्थं सर्गं करोतीत्यर्थः ॥ २१ ॥

अस्य=प्रधानस्य भोक्त्रपेक्षायुक्तेति,–सुखाद्यनुभवो हि भोगः, न च सुखाद्यात्मकं प्रधानं स्वमनुभवितुमलं स्वात्मनि क्रियाविरोधादचेतनत्वाच्चातः स्वानुभवार्थं युक्तास्य चेतनापेक्षा 'चिदवसानो भोग' इति सूत्रादित्यर्थः,

'पुरुषस्यापेक्षाम्'–पुरुषेण किमर्थं प्रधानमपेक्ष्यत इत्याकाङ्क्षायां पुरुषस्य प्रधानापेक्षां दर्शयतीत्यर्थः,

प्रधानेन संभिन्नः=प्रधानादात्मनो विविक्ततामबुध्यमानः,

तच्च=कैवल्यं च, सत्त्वपुरुषान्यताख्यातिनिबन्धनं=प्रकृत्यवधिकपुरुषान्यताप्रकारकज्ञाननिदानमित्यर्थः,

'प्रधानमन्तरेण'–बुद्धिरूपेण परिणतप्रधानस्यैव परिणामो विवेकज्ञानमिति प्रधानं विना न संभवतीत्यर्थः,

ननु भोगाय चेत् संयुक्तः पुरुषः किमिति कैवल्याय पुनः संयुज्यते, तत्राह–'अनादित्वाद्' इति, अविच्छिन्नत्वादित्यर्थः,

अनयोः=प्रधानपुरुषयोः, तत्कृतः=द्रष्टृदृश्यसंयोगकृतः सर्गः=भोगापवर्गद्वारभूतो महदादिसंसारः, तदुक्तं "द्रष्टृदृश्ययोः संयोगो हेयहेतुर्" इति ॥२१॥

---

(१) अ० १ सू० १०४ । चिति=पुरुषे अवसानं=पर्यवसानं–निष्ठा यस्य स चिदवसानो भोगो भवतीत्यर्थः । (२)सत्त्वं=प्रधानम् । (३) जडायाः परिणामिन्याः प्रकृतेः सकाशाद् भिन्नोहं चेतनोऽपरिणामीत्याकारकज्ञानमेव निदानं=मुख्यं कारणं यस्यैवंविधमित्यर्थः। (४) यो० पा० २ सू० १७। हेयहेतुः=संसारकारणमित्यर्थः ।

सर्गक्रममाह—"प्रकृतेर्महान्" इत्यादिना—

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः ।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि ॥ २२ ॥

प्रकृतिर्=अव्यक्तं, महदहङ्कारौ वक्ष्यमाणलक्षणौ, एकादशेन्द्रियाणि वक्ष्यमाणानि, तन्मात्राणि च पञ्च, सोयं षोडश-

---

'प्रकृतेर्महान्' इत्यत्र जायत इति शेषः,

'षोडशक' इति पदं व्याख्यातुं तदवान्तरसङ्ख्यामाह—"एकादशेन्द्रियाणि" इति, तन्मात्राणि=शब्दतन्मात्रादिपदप्रतिपाद्यानि शब्दादिगुणकान्याकाशादीनि सूक्ष्मद्रव्याणि पञ्चेत्यर्थः, एतच्चाधस्तादावेदितमुपपादयिष्यते च,

षोडश परिमाणमस्येत्यर्थे कनि 'षोडशक' इति साधुरित्यभिप्रेत्याह—"सोयं षोडशसङ्ख्यापरिमित" इति, सोयं षोडशकः तस्माद्=अहङ्काराज्जायत इत्यर्थः,

यत्तु गुणपर्वसूत्रे योगभाष्ये तन्मात्राणां महत्तत्त्वकार्यत्वमुक्तं तत्तु महत्तत्त्वावेशेनैवाहङ्कारस्य कार्य्योत्पादक्षमत्वाद् महत्तत्त्वमेवाहङ्कारद्वारा तन्मात्रकारणमित्यभिप्रायेण न तु साक्षादेव महत्तत्त्वं तन्मात्रकारणमिति मत्वा, "सूक्ष्मविषयत्वं चालिङ्गपर्य्यवसानम्" इति सूत्रे स्वयमेव तन्मात्राणामहङ्कारकार्य्यत्वाभिधानाद्, "अक्षरान्महद् महतो वै अहङ्कारस्तस्मादेवाहङ्कारात्पञ्चतन्मात्राणि" "प्रकृतेर्महान् महतोऽहङ्कारोऽहङ्कारात्पञ्च तन्मात्राणि" इति श्रुतिसूत्रयोः स्पष्टमहङ्कारकारणकत्वस्य तन्मात्राणामाम्नानाच्चेति,

एवं चागमपराहतत्वाद् तन्मात्राणि बुद्धिकारणकानि अविशेषत्वादहङ्कारवद् इत्यनुमानं 'न' मानमिति ध्येयम्,

---

(१) २३,२४—इत्यनयोरार्ययोरित्यर्थः । (२) २६,२७—इत्यनयोरार्य्ययोर्वक्ष्यमाणानि । (३) १५—इति कारिकाव्याख्याने, ३८—इति कारिकायामुपपादयिष्यते चेत्यर्थः । (४) 'सङ्ख्याया अतिशदन्तायाः कन्' इति प्रस्तावे 'तदस्य परिमाणम्' (५।१।५७) इत्यनेन कन्प्रत्यय इत्यर्थः । (५) पा० २ सू० १९ । (६) पा० १ सू० ४५ । (७) योगभाष्यकारैरित्यर्थः । (८) गो० ता० उ० ५३। (९) अ० १ सू० ६१ । (१०) मेरुः पाषाणमयः पर्वतत्वाद् विन्ध्यवद् इत्यनुमानस्य यथा मेरुः काञ्चनमयः इत्यागमबाधितत्वादमानत्वं तद्वदित्यर्थः, इदञ्चानुमानं गुणपर्वसूत्रभाष्यव्याख्यायां मिश्रैरूहितमिति ज्ञेयम् ।

सङ्ख्यापरिमितो गणः षोडशकः, तस्मादपि षोडशकाद् अपकृष्टेभ्यः पञ्चभ्यस्तन्मात्रेभ्यः पञ्च भूतानि आकाशादीनि,

तत्र शब्दतन्मात्रादाकाशं शब्दगुणं, शब्दतन्मात्रसहितात्स्पर्शतन्मात्राद् वायुः शब्दस्पर्शगुणः, शब्दस्पर्शतन्मात्रसहिताद् रूपतन्मात्रात् तेजः शब्दस्पर्शरूपगुणं, शब्दस्पर्शरूपतन्मात्रसहिताद् रसतन्मात्रादापः शब्दस्पर्शरूपरसगुणाः, शब्दस्पर्शरूपरसतन्मात्रसहिताद् गन्धतन्मात्राच्छब्दस्पर्शरूपरसगन्धगुणा पृथिवी जायत इत्यर्थः ॥ २२ ॥

अव्यक्तं सामान्यतो लक्षितं "तद्विपरीतम्" इत्यनेन, विशेष-

'षोडशकाद्' इत्यस्य 'पञ्चभ्य' इत्यनेन सामानाधिकरण्येनान्वयासम्भवादपेक्षितं पदं पूरयति—"अपकृष्टेभ्य" इति, षोडशकान्निष्कृष्टेभ्यः—षोडशकमध्यात्पृथक् कृतेभ्य इत्यर्थः, कस्मात् तन्मात्रात्किं भूतं जातमित्यत्राह—"तत्र शब्दतन्मात्रादाकाशम्" इति,

अत्र "एकद्वित्रिचतुष्पञ्चलक्षणाः[3] शब्दादय" इति योगभाष्यात्—सूक्ष्माकाशाख्यशब्दतन्मात्रं शब्दमात्रधर्मकं, सूक्ष्मवाय्वाख्यस्पर्शतन्मात्रं च शब्दस्पर्शधर्मकं, सूक्ष्मतेजोऽभिधेयरूपतन्मात्रं च शब्दस्पर्शरूपधर्मकं, सूक्ष्मजलाख्यरसतन्मात्रं च शब्दस्पर्शरूपरसधर्मकं, सूक्ष्मपृथिव्याख्यगन्धतन्मात्रं च शब्दस्पर्शरूपरसगन्धधर्मकमित्यवसेयम्, एवं च शब्दतन्मात्राद्=शब्दगुणकात्सूक्ष्मादाकाशात् शब्दगुणकं स्थूलमाकाशं जायते, शब्दतन्मात्रसहितात्स्पर्शतन्मात्राद्=शब्दस्पर्शगुणकात्सूक्ष्माद् वायोः शब्दस्पर्शगुणकः स्थूलो वायुर्जायते इत्यादिरर्थोऽत्राभिप्रेतो बोध्यः ॥ २२ ॥

"अध्यवसायो बुद्धिर्" इति, ननु गन्धः पृथिवीति वा लक्षणमिदं[4] न ह्य-

---

(१) का० १०। (२) षोडशकादिति ल्यब्लोपे पञ्चमीत्याश्रित्य षोडशकं प्राप्य स्थितेभ्यः पञ्चभ्य इत्यर्थ इति साङ्ख्यचन्द्रिकाकारः। (३) लक्ष्यतेऽनेनेति लक्षणं धर्मः, तन्मात्राणां द्रव्यत्वलाभाय लक्षणपदं, तथा चोत्तरोत्तरतन्मात्रेषु पूर्वपूर्वतन्मात्राणां हेतुत्वाच्छब्दतन्मात्रं शब्दमात्रधर्मकं तत्कार्य्यतया स्पर्शतन्मात्रं शब्दस्पर्शोभयधर्मकम्, एवं क्रमेणैकैकधर्मवृद्धिरित्यर्थ इति योगवार्तिककारः—पा० २ सू० १९। (४) इदम्=अध्यवसायो बुद्धिरिति लक्षणवाक्यम्।

तश्च "सत्त्वं लघु प्रकाशकम्" इत्यादिना, व्यक्तमपि सामान्यतो लक्षितं "हेतुमद्" इत्यादिना, सम्प्रति विवेकज्ञानोपयोगितया व्यक्तविशेषं बुद्धिं लक्षयति—"अध्यवसाय"—इति—

अध्यवसायो बुद्धिर्, धर्मो ज्ञानं विराग ऐश्वर्य्यं,
सात्त्विकमेतद् रूपं, तामसमस्माद् विपर्य्यस्तम् ॥ २३ ॥

"अध्यवसायो बुद्धिः"—क्रियाक्रियावतोरभेदविवक्षया, सर्वो व्यवहर्ता आलोच्य मत्वाऽहमत्राधिकृत इत्यभिमत्य कर्तव्यमेतन्मयेत्यध्यवस्यति, ततश्च प्रवर्तत, इति लोकप्रसिद्धं, तत्र योयं कर्तव्यमिति विनिश्चयश्चितिसन्निधानादापन्नचैतन्याया बुद्धेः सोध्यवसायो बुद्धेरसाधारणो व्यापारः, तदभेदा बुद्धिः, स च बुद्धेर्लक्षणं—समानासमानजातीयव्यवच्छेदकत्वात्,

तदेवं बुद्धिं लक्षयित्वा विवेकज्ञानोपयोगिनस्तस्या धर्मान्

ध्यवसाय एव बुद्धिरपि त्वध्यवसायवती, तत्राह—"क्रियाक्रियावतोर्" इति, व्यापारव्यापारिणोर्—धर्मधर्मिणोरिति यावद्, इन्द्रियान्तरव्यापारेभ्यो विविच्य बुद्धेर्व्यापारं निरूपयितुं प्रवृत्तौ तावद् व्यापाराणां क्रममाह—"सर्वो व्यवहर्ता" इति,

हानोपादानादिव्यवहारकर्ताऽखिलो नरः पूर्वम् आलोच्य=ज्ञानेन्द्रियव्यापारैर्वस्तु गोचरीकृत्य पुनश्च मत्वा=इदमेवं नैवं वेति मनसा गुणदोषौ विचार्य्य पुनः शक्तोहं खल्वेतन्निष्पादन इत्येवम् अभिमत्य=अहङ्कारव्यापारगोचरीकृत्य कर्तव्यमिदमिति अध्यवस्यति=निश्चिनोति, ततश्च=एवमालोचनमननाभिमानावधारणादनन्तरं च प्रवर्तत इत्यर्थः,

कथं जडाया बुद्धेर्निश्चय, इत्यत्राह—"चितिसन्निधानाद्" इति,

तदभेदा=तस्मादध्यवसायरूपाद् व्यापारादभेदो यस्यास्सा तदभेदा धर्मधर्मिणोस्तादात्म्यात्, स च=निश्चयाख्यव्यापारश्च समानजातीयेभ्यो मनआदीन्द्रियान्तरेभ्योऽसमानजातीयेभ्यश्च पञ्चतन्मात्रादिभ्यो बुद्धेर्व्यावर्तकत्वात् लक्षणं बुद्धेरित्यर्थः,

---

(१) का० १३ । (२) का० १० । (३) यद्वाऽनियतविषयत्वेन सर्वविषयत्वेन वा समानजातीयौ मनोऽहङ्कारौ, नियतैकैकविषयत्वेनासमानजातीयाश्चक्षुरादय इत्यर्थोऽत्र ज्ञेयः ।

सात्त्विकतामसानाह—"धर्मो ज्ञानं विराग ऐश्वर्यं सात्त्विकमेतद् रूपं, तामसमस्माद्विपर्य्यस्तम्" इति,

धर्मोऽभ्युदयनिःश्रेयसहेतुः, तत्र यागदानाद्यनुष्ठानजनितो धर्मोऽभ्युदयहेतुर्, अष्टाङ्गयोगानुष्ठानजनितश्च निःश्रेयसहेतुः गुणपुरुषान्यताख्यातिर्ज्ञानं, विरागः=वैराग्यं—रागाभावः,

तस्य यतमानसञ्ज्ञा, व्यतिरेकसञ्ज्ञा, एकेन्द्रियसञ्ज्ञा, वशीकारसञ्ज्ञा, इति चतस्रः सञ्ज्ञाः,

रागादयः कषायाश्चित्तवर्तिनस्तैरिन्द्रियाणि यथास्वं विषयेषु प्रवर्त्यन्ते तन्माऽत्र प्रवर्तिषत विषयेष्विन्द्रियाणीति तत्परिपाचनायारम्भः प्रयत्नो यतमानसञ्ज्ञा,

---

"यतोऽभ्युदयनिःश्रेयसिद्धिः स धर्मः"[1] इति काणादसूत्रमनुसृत्य धर्मस्य लक्षणमाह—"धर्म" इति, तत्र स्वाराज्यसाम्राज्याद्यैश्वर्य्यविशेषोऽभ्युदयः, निश्चितं श्रेयः=कल्याणं च निःश्रेयसं=कैवल्यम्,

जनितश्च=यमनियमादिजनितोऽशुक्लाकृष्णाख्यो[2] धर्मविशेषश्चेत्यर्थः,

वैराग्यस्य तान्त्रिकीस्सञ्ज्ञा आह—"तस्य" इति, वैराग्यस्येत्यर्थः,

तत्राद्यां सञ्ज्ञां लक्षयति—"रागादयः कषाया" इति, कषायाः=मलाः, माञ्जिष्ठादिकषायवच्चित्तरञ्जकत्वाद् रागादयः कषाया इत्युपचर्य्यन्ते, चित्तगता ये रागादयो मलास्तैः यथास्वं=स्वेषुस्वेषु[3] विषयेष्विन्द्रियाणि प्रवर्त्यन्ते "प्रवर्त्तनालक्षणा दोषा"[4] इत्युक्ते, तद्—यथा स्यात् तथा अत्र विषयेष्विन्द्रियाणि मा प्रवर्तिषत=प्रवृत्तानि मा कारिषत तैः[5] रागादय इन्द्रियाणि मा प्रवर्त्तयन्त्विति यावद्, इति=इत्यालोच्य तत्परिपाचनाय=रागादिमलक्षालनाय यः मैत्र्यादि[6]भावनानुष्ठानरूपो यत्नः सा यतमानसञ्ज्ञेत्यर्थः,

---

(१) अ० १ आ० १ सू० २। (२) पा० ४ सू० ७ इति योगसूत्रं निरीक्ष्यम्। (३) यथास्वम् इति विप्सायामव्ययीभाव इत्याशयेनाह—"स्वेषुस्वेषु" इति स्वकीयस्वकीयविषयेष्वित्यर्थः। (४) अ० १ आ० १ सू० १८। प्रवर्तना=प्रवृत्तिहेतुत्वमेव लक्षणं येषां ते दोषाः=रागादय इति न्यायसूत्रार्थः। (५) तैर्=रागादिकषायैरित्यर्थः। (६) पा० १ सू० ३३ इति योगसूत्रं द्रष्टव्यम्।

परिपाचने चानुष्ठीयमाने केचित्कषायाः पक्काः, पक्ष्यन्ते च केचित्, तत्रैवं पूर्वापरीभावे सति पक्ष्यमाणेभ्यः कषायेभ्यः पक्कानां व्यतिरेकेणावधारणं व्यतिरेकसञ्ज्ञा,

इन्द्रियप्रवर्तनासमर्थतया पक्कानामौत्सुक्यमात्रेण मनसि व्यवस्थानमेकेन्द्रियसञ्ज्ञा, औत्सुक्यमात्रस्यापि निवृत्तिर् उपस्थितेष्वपि दृष्टानुश्रविकविषयेषु या सञ्ज्ञात्रयात्पराचीना सा वशीकारसञ्ज्ञा, यामत्रभवान् पतञ्जलिर्वर्णयाञ्चकार–"दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसञ्ज्ञा वैराग्यम्" इति, सोयं बुद्धिधर्मो विराग इति ।

केचित्तु[1]–'अत्र जगति किं सारं किमसारं चेति गुरुशास्त्राभ्यां ज्ञास्यामीत्युद्योगो यतमानसञ्ज्ञा वैराग्यम्' इत्याहुः,

द्वितीयां सञ्ज्ञामाह–"परिपाचने" इति–रागादिमलप्रक्षालनाय मैत्र्यादिभावनायामनुष्ठीयमानायां सत्यां केचिन्मलाः पक्काः=उपशान्ता भवन्ति, केचिच्च पक्ष्यन्ते=निवर्तिष्यन्ते, तत्रैवं सति एते उपशमिता, एते च उपशमयितव्या इति चिकित्सकवद् यद्विवेचनं, विवेचनोत्तरं चावशिष्टानामुपशमाय यत्नानुष्ठानं तद् व्यतिरेकवैराग्यमित्यर्थः,

तृतीयामाह–"इन्द्रिय" इति, पक्कानां=तनूकृतानां रागादीनां बाह्यविषयेष्विन्द्रियाणां प्रवर्तनेऽसमर्थतया यद्=उत्कण्ठामात्रेण तृष्णारूपेण मनस्यवस्थानं तदेकेन्द्रियवैराग्यमित्यर्थः,

तुरीयां सञ्ज्ञामाह–"औत्सुक्यमात्रस्यापि" इति,–दृष्टाः=स्रक्चन्दनस्त्रियोऽन्नपानादयो विषयाः, आनुश्रविकाः=वेदादधिगताः स्वर्गादयो विषयाः, तेषूपस्थितेष्वपि या औत्सुक्यमात्रस्यापि=तृष्णाया अपि निवृत्तिस्तेपूपेक्षा बुद्धिः सा सञ्ज्ञात्रयात् पराचीना=पश्चाद्भाविनी वशीकारसञ्ज्ञेत्यर्थः,

तुरीयायां सञ्ज्ञायां योगसूत्रं प्रमाणयति–"यामत्रभवान् पतञ्जलिर्" इति, 'अत्रभवान्' इति पूजार्थः प्रयोगः, तथैव सङ्केताद्[2], लौकिकालौकिकविषयजाते विगततृष्णस्य योगिचित्तस्य याऽनाभोगात्मिका स्थितिः सा वशीकारसञ्ज्ञावैराग्यम् इति योगसूत्रार्थः[3],

---

(१) केचिद्=अ० ६ श्लो० ३५ इत्यत्र गीताटीकायाम्मधुसूदनसरस्वतीस्वामिनः । (२) हेमचन्द्रकोशे तथाभिधानादित्यर्थः । (३) पा० १ सू० १६ ।

ऐश्वर्य्यमपि बुद्धिधर्मः, यतोऽणिमादिप्रादुर्भावः । तत्राऽणिमा=अणुभावः, यतः शिलामपि प्रविशति, लघिमा=लघुभावः, यतः सूर्य्यमरीचीनालम्ब्य सूर्य्यलोकं याति, महिमा=महतोभावः, यतो महान् संभवति, प्राप्तिर्=अङ्गुल्यग्रेण स्पृशति चन्द्रमसम्, प्राकाम्यम्=इच्छानभिघातः, यतो भूमावुन्मज्जति, निमज्जति च, यथोदके, वशित्वं=भूतभौतिकं वशीभवत्यवश्यम्, ईशित्वम्=भूतभौतिकानां प्रभवव्यूहव्ययानामीष्टे, यत्र कामावसायित्वं=सत्यसङ्कल्पता, यथाऽस्य सङ्कल्पो भवति भूतेषु तथैव भूतानि भवन्ति, अन्येषाम्मनुष्याणां निश्चया नि-

---

यतः=यस्माद्, धर्माद्, अणिमादि–इत्यादिपदग्राह्याण्यैश्वर्य्याणि संकलयन् सन्नणिमादिपदार्थमाह–"तत्राणिमा" इति, अणुभावः=गुरुतरकलेवरोप्यणुर्भवतीत्यर्थः, 'महान्'–तनुपरिमाणोपि नगनागनगरादिप्रमाणो भवतीत्यर्थः, प्राप्तिः=सर्वेषां भावानां सन्निधानम्, अत एव भूमिष्ठोपि चन्द्रमसं स्पृशति,

इच्छानभिघातः=नास्य योगिनः स्वरूपं काठिन्यादिभिर्भूम्यादिधर्मैरभिहन्यतेऽत एव जलमिव भूमिमुद्भिद्योत्तिष्ठति जल इव च भूमौ निमज्जति =प्रविशतीति,

अवश्यम्=इतरेषामवश्यमपि भूतभौतिकमस्य वशीभवतीत्यर्थः, 'भूतभौतिकेषु वशी भवत्यवश्यश्चान्येषाम्' इति पाठो वाऽत्र बोध्यः, योगभाष्ये तथा दर्शनाद्,

प्रभवव्यूहव्ययानाम्=प्रभवः=उत्पादः, व्यूहः=यथावदवस्थापनं, व्ययः= नाशः तेषामीष्टे=तन्मात्रादिद्वारा तेषां भूतानामुत्पादादौ समर्थो भवतीत्यर्थः,

यत्र कामावसायित्वशब्दस्तान्त्रिक्या परिभाषया सत्यसङ्कल्पत्वार्थकः, यद् यदर्थतया सङ्कल्पयति तत् तस्मै प्रयोजनाय कल्पते विषमप्यमृतकार्य्ये सङ्कल्प्य भोजयन् जीवयतीत्यर्थः,

कथमेतद्, इत्यत्राह–"अन्येषाम्" इति, अयोगिनां निश्चयाः=ज्ञानानि

---

(१) भूतानि=पृथिव्यादीनि भौतिकानि=गोघटादीनि तेषु वशी=स्वतन्त्रो भवति, तेषां त्ववश्यः, तेन यानि यथावस्थापयति तानि तथावतिष्ठन्त इत्यर्थः । (२) पा० ३ सू० ४५ । (३) एतद्=पदार्थस्वभाववैपरीत्यम् ।

श्चेतव्यमनुविधीयन्ते, योगिनस्तु निश्चेतव्याः पदार्था निश्चयम्, इति चत्वारः सात्त्विका बुद्धिधर्माः,

तामसास्तु तद्विपरीता बुद्धिधर्माः=अधर्माज्ञानावैराग्यानैश्वर्याभिधानाश्चत्वार इत्यर्थः ॥ २३ ॥

अहङ्कारस्य लक्षणमाह—"अभिमानोऽहङ्कार" इति—

अभिमानोऽहङ्कारः, तस्माद् द्विविधः प्रवर्त्तते सर्गः,

एकादशकश्च गणः, तन्मात्रपञ्चकश्चैव ॥ २४ ॥

अभिमानोऽहङ्कारः=यत् खल्वालोचितं मतं च तत्राहमधिकृतः—शक्तः खल्वहमत्र—मदर्था एवामी विषयाः—मत्तो नान्योऽत्राधिकृतः कश्चिदस्ति—अतोऽहमस्मि इति योऽभिमानः सोऽसाधारणव्यापारोऽहङ्कारः, तमुपजीव्य हि बुद्धिरध्यवस्यति—'कर्तव्यमेतन्मया' इति,

तस्य कार्य्यभेदमाह—"तस्माद् द्विविधः प्रवर्तते—सर्गः", प्रकारद्वयमाह—"एकादशकश्च गणः"=इन्द्रियाख्यः, "तन्मात्रपञ्च-

निश्चेतव्यं=ज्ञेयं पदार्थम् अनुविधीयन्ते=अनुसृतानि भवन्ति—यादृशं ज्ञेयं तादृगेव ज्ञानं, तादृगेव तेन कार्यमिति यावद्, योगिनस्तु निश्चेतव्याः=ज्ञेयाः पदार्थाः निश्चयमनुविधीयन्ते=ज्ञानानुसारिणो भवन्ति, यथा ज्ञातुं कर्तुं वेच्छन्ति तथैव ज्ञेयं भवतीत्यर्थः,

तद्विपरीताः=धर्मादिविपरीता, तानेवाह—"अधर्माज्ञानावै" इत्यादिना, तत्राधर्मो ब्रह्मवधादिजन्यो नरकादिदुःखहेतुः, अज्ञानं चानित्याशुचिदुःखानात्मसु, नित्याशुचित्वदुःखात्मत्वनित्यशुचिसुखात्मत्वरूपं विपर्य्ययज्ञानम्, अवैराग्यं च विषयभोगतृष्णाः, अनैश्वर्यं च प्रतिहतेच्छत्वमित्यर्थः ॥२३॥

यद्=वस्तु, कृत्यं वा, आलोचितं=बाह्येन्द्रियैरीक्षितं, मतं च मनसा तत्र=तस्मिन् कृत्येहमधिकृतः, अस्यैव विवरणं "शक्त" इत्यादिकम्,

अतोऽहमस्मि=अत्राहमधिकृतोस्मीत्यर्थः,

"असाधारणव्यापारः" इति, व्यापारव्यापारिणोरभेदविवक्षया, तमुपजीव्य अहङ्कारमाश्रित्य,

(१) पा० २ सू० ५-इत्यत्रत्यं योगभाष्यं निरीक्ष्यम्।

(२) 'असाधारणव्यापारत्वाद्' इत्यपि क्वाचित्कः पाठः।

कश्चैव", द्विविध एव सर्गोऽहङ्कारान्न त्वन्य इत्येवकारेणाव-धारयति ॥ २४ ॥

स्यादेतद्—अहङ्कारादेकरूपात्कारणात्कथं जडप्रकाशकौ गणौ विलक्षणौ भवतः, इत्यत आह "सात्त्विक" इत्यादि—

सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्काराद्,
भूतादेस्तन्मात्रः, स तामसस्तैजसादुभयम् ॥ २५ ॥

प्रकाशलाघवाभ्यामेकादशक इन्द्रियगणः सात्त्विको वैकृतात्=सात्त्विकादहङ्कारात्प्रवर्तते, भूतादेस्तु=अहङ्कारात्तामसात्तु तन्मात्रो गणः प्रवर्तते, कस्माद्, यतः स तामसः,

एतदुक्तं भवति—यद्यप्येकोऽहङ्कारस्तथापि गुणभेदोद्भवाभिभवाभ्यां भिन्नं कार्य्यं करोतीति,

ननु यदि सत्त्वतमोभ्यामेव सर्वं कार्य्यं जन्यते तदा कृतमकिञ्चित्करेण रजसा, इत्यत आह—"तैजसादुभयं" तैजसाद्=राजसाद् उभयं=गणद्वयं भवति,

यद्यपि रजसो न कार्य्यान्तरमस्ति तथापि सत्त्वतमसी स्वयमक्रिये समर्थे अपि न स्वस्वकार्य्यं कुरुतः, रजस्तु चलतया

अहमिति प्रत्ययः क्रियतेऽनेनेत्यहङ्कारः, "अहङ्करोतीत्यहङ्कारः कुम्भकारवद्" इति विज्ञानभिक्षुः, स्पष्टार्थमन्यद् ॥ २४ ॥

जडो गणः=पञ्चतन्मात्रकः, प्रकाशकश्च गणः—एकादशक इन्द्रियाख्यः,

"सत्त्वं लघु प्रकाशकम्" इत्युक्तेः प्रकाशलघुत्वाश्रयत्वादिन्द्रियगणः सात्त्विक इत्याह—"प्रकाशलाघवाभ्याम्" इति,

प्रकृततन्त्रपरिभाषया वैकृत इति च सात्त्विकाहङ्कारस्य, सञ्ज्ञा तैजस इति च राजसाहङ्कारस्य, भूतादिर् इति च तामसाहङ्कारस्य, इत्यभिप्रेत्याह—"वैकृतात्सात्त्विकाद्" इति,

तन्मात्राणि सन्त्यस्मिन् गण इति 'तन्मात्रो गणः', अर्शआद्यच्, 'स्वयमक्रिये' यतोऽतः समर्थे अपीत्यर्थः, एतच्च पुरस्ताद् व्यक्तम्, "कुरुत इति"

---

(१) सः=तन्मात्रपञ्चकः । (२) करणे घञिति, भावः, अमरटीकायां भरतस्तु अहमित्यव्ययं, तस्य करणम् अहमिति क्रियत्रेति वाहङ्कारः, करोतेः किरतेर्वा घञ् । (३) १३—इति कारिकायाम्

ते[1] यदा चालयति तदा स्वस्वकार्य्यं कुरुत इति, तदुभयस्मिन्नपि कार्य्ये सत्त्वतमसोः क्रियोत्पादनद्वारेणास्ति रजसः कारणत्वमिति न व्यर्थं रज इति ॥ २५ ॥

इति=यतः तत्=तस्माद्, उभयस्मिन्=इन्द्रियतन्मात्ररूप इत्यर्थः,

विज्ञानभिक्षुस्तु पुराणेषु[3], 'सात्त्विकाहङ्कारात् इन्द्रियाधिष्ठातारो देवा मनश्च जातं राजसाद् दशेन्द्रियाणि जातानि, तामसाच्च तन्मात्राणि' इति प्रक्रियादर्शनेनात्रापि "सात्त्विक एकादशक इत्यनेन मनो ग्राह्यं, तैजसादुभयम् इत्युभयपदेन च द्विविधमिन्द्रियं ग्राह्यम्" इत्याह, परं नैतत्सुन्दरम्, एकादशकशब्दस्य एकादशसङ्ख्यापरिमिते गणे शक्तत्वेन मनोमात्रप्रत्यायनेऽशक्तत्वाद्, न च पूरणप्रत्ययान्तात्स्वार्थे केऽभिमतलाभ इत्यभिमन्तव्यं, तथा सति एकादशकमित्यस्यैवौचित्येन पुंलिङ्गनिर्देशायोगाद्, न च सात्त्विकमेकादशकम्' इति सूत्रानुसारेणात्रापि एकादशकम् इत्येव पाठः कल्प्यत इति कल्पनीयं, तत्रापि 'कर्मेन्द्रियबुद्धीन्द्रियैरान्तरमेकादशकम्' इत्युत्तरसूत्रेणैकादशकमित्यनेनैकादशेन्द्रियाणामेव ग्रहणबोधनेन तथा कल्पनेपि मनोरथापार्थकत्वस्य तदवस्थत्वात्, सात्त्विकात्कथमप्रकाशशीलानि कर्मेन्द्रियाणीति चेत् त्वन्मतेऽप्यप्रकाशशीलाद्राजसात्कथं ज्ञानेन्द्रियाणीत्यपि विभाव्यतामित्युपशम एव ते भिक्षोः श्रेयान्,

सर्वस्य त्रिगुणत्वाद् उत्कटसत्त्वप्रधानादहङ्कारान्मनो जायते, मध्यमसत्त्वप्रधानाच्च ज्ञानेन्द्रियाणि, निकृष्टसत्त्वयुक्ताच्चाहङ्कारात्कर्मेन्द्रियाणीति तु मादृशाः ॥ २५ ॥

---

(१) ते–सत्त्वतमसी, कर्म । (२) अ० २ सू० १८ इत्यत्र साङ्ख्यप्रवचनभाष्य इत्यर्थः । (३) "वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा, अहन्तत्त्वाद् विकुर्वाणान्मनो वैकारिकादभूत्, वैकारिकाश्च ये देवा अर्थाभिव्यञ्जनं यतः, तैजसादिन्द्रियाण्येव ज्ञानकर्ममयानि च, तामसो भूतसूक्ष्मादिर्यतः खं लिङ्गमात्मनः" इत्यादिपुराणवाक्येष्वित्यर्थः । (४) एतच्च पूर्वम् २२–इत्यार्यायां षोडशकपदव्याख्याने व्यक्तम् । (५) एकादशानां पूरणमित्यर्थे 'तस्य पूरणे' इति डटि स्वार्थिके कप्रत्यय एकादशक इति साधुरित्यर्थः । (६) मनश्शब्दस्य नपुंसकत्वादित्यर्थः । (७) अ० २ सू० १८–अत्र सूत्रे एकादशानां पूरणमेकादशकं मन इति यावदित्यर्थाभिमानेनेयं शङ्का । (८) अ० २ सू० १९ किन्तदेकादशकमित्याकाङ्क्षायामिदं सूत्रम् ।

सात्त्विकमेकादशमाख्यातुं बाह्येन्द्रियदशकं तावदाह–"बुद्धीन्द्रियाणि" इत्यादिना–

बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि,
वाक्पाणिपादपायूपस्थाः कर्मेन्द्रियाण्याहुः ॥ २६ ॥

सात्त्विकाहङ्कारोपादानकत्वमिन्द्रियत्वम्, तच्च द्विविधं–बुद्धीन्द्रियं कर्मेन्द्रियं च, उभयमप्येतद् इन्द्रस्य=आत्मनश्चिह्नत्वादिन्द्रियमुच्यते, तानि च स्वसञ्ज्ञाभिश्चक्षुरादिभिरुक्तानि,

---

'एकादशम्'=एकादशानां पूरणं–मन इति यावत्, बुद्धिर्=रूपादिज्ञानं तत्साधनानीन्द्रियाणि बुद्धीन्द्रियाणि, बुद्धीन्द्रियं–बुद्धिर्=रूपादिविषयमालोचनं तत्करणमिन्द्रियं–ज्ञानेन्द्रियमिति यावद्, एवं च सात्त्विकाहङ्कारकार्य्यत्वे सति रूपादिविषयालोचनकरणत्वं ज्ञानेन्द्रियत्वमित्यत्र फलितम्, एवं कर्म=वदनादिव्यापारः तत्करणमिन्द्रियं कर्मेन्द्रियमिति,

'स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमिनी३ँ तस्मादिदन्द्रो नाम इदन्द्रो ह वै नाम तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण' इति श्रुतेर् इन्द्र आत्मा तस्य लिङ्गं ज्ञापकम् इत्यर्थे 'इन्द्रियमिन्द्रलिङ्गम्' इत्यादिसूत्रेण 'इन्द्रियम्' इति साधु इत्यभिप्रेत्येन्द्रियपदव्युत्पत्तिमाह–"उभयमप्येतद् इन्द्रस्य" इत्यादिना,

---

(१) शाकपार्थिवादिवन्मध्यमपदलोपोऽत्र बोध्यः । (२) रूपाद्यालोचनकरणत्वमालोकेऽतिप्रसक्तं तद्वारणाय, 'सात्त्विकाहङ्कारकार्य्यत्वे सति' इति । (३) सः=पूर्वोक्त आत्मा एतमेव=मूर्द्धद्वारा प्रविष्टं पुरिशयानमात्मानं ब्रह्म ततमं =तततमं–विस्तृतरूपमपश्यद्–आत्मानमेव ब्रह्मरूपेण साक्षात्कृतवानिति यावद्,

ततः तुष्टः सन्नाह–"इदमदर्शम् अपरोक्षतयाऽहमदर्शं=दृष्टवानस्मि इति ई ३ इति श्रुतिस्तुष्ट्यर्था, तस्माद्=अपरोक्षदर्शनाद् इदन्द्रो नाम–इदम्पदपूर्वकाद्दृशेर्ड्रन्प्रत्यय इदं दृष्टवानित्यर्थे इदन्द्र इति, ह वै=प्रसिद्धं नामैतदिदन्द्र इति, ननु "इन्द्रो मायाभिः पुरुरूप ईयते" इत्यादाविन्द्र इति नाम प्रसिद्धं न त्विदन्द्र इति तत्राह–"तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते" परोक्षेण पूजार्थं–यतः "परोक्षप्रिया देवा" इत्यैतरेयश्रुत्यर्थः । (४) करणव्यापारः कर्तृपरतन्त्रः व्यापारत्वात्कुठारव्यापारवदित्येवं करणेन कर्तुरनुमानादीन्द्रियाणामात्मलिङ्गत्वम् । (५) "इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति च" (५।२।९३) इति सूत्रेण षष्ठ्यन्तादिन्द्रशब्दाल्लिङ्गमित्यर्थे घचि तस्य 'आयनेयीनी' तीयादेश इन्द्रियमिति ।

तत्र रूपग्रहणलिङ्गं चक्षुः, शब्दग्रहणलिङ्गं श्रोत्रं, गन्धग्रहणलिङ्गं घ्राणं, रसग्रहणलिङ्गं रसनं, स्पर्शग्रहणलिङ्गं त्वग्, वागादीनां कार्य्यं वक्ष्यति ॥ २६ ॥

एकादशमिन्द्रियमाह—"उभयात्मकम्" इति—

उभयात्मकमत्र मनः, संकल्पकमिन्द्रियं च साधर्म्याद्,
गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च ॥ २७ ॥

एकादशस्विन्द्रियेषु मध्ये मन उभयात्मकं=बुद्धीन्द्रियं कर्मेन्द्रियं च, चक्षुरादीनां वागादीनां च मनोधिष्ठितानामेव स्वस्वविषयेषु प्रवृत्तेः,

---

स्वनिमित्ताश्चक्षुरादिसञ्ज्ञा आह—"तत्र रूप" इति,

रूपग्रहणलिङ्गं=रूपोपलब्धिकरणम्, एवमग्रेपि, तथा च रूपं चष्टे=पश्यत्यनेनेति चक्षुः, शब्दं शृणोत्यनेनेति श्रोत्रमित्यादिव्युत्पत्तिरत्र दर्शिता,

यद्वा—रूपग्रहणं करणजन्यं क्रियात्वाच्छिदिक्रियावद् इत्येवं रूपग्रहणमेव लिङ्गम्=अनुमापकं यस्य तद् रूपग्रहणलिङ्गं रूपज्ञानानुमेयमित्याद्यर्थोऽत्र ज्ञेयः,

'त्वक्'=स्पर्शनमिन्द्रियं, तच्च त्वक्स्थानत्वादुपचारेण त्वगित्यभिहितम् ॥ २६ ॥

'अत्र' इति निर्धारणे सप्तमीति मत्वा तस्यार्थमाह—"एकादशस्विन्द्रियेषु मध्य" इति—एकादशानामिन्द्रियाणां मध्ये इत्युचितं—मध्यशब्दयोगे षष्ठ्या एव प्राप्तेरिति शाब्दिकाः,

उभयात्मकत्वे हेतुमाह—"चक्षुरादीनाम्" इति, "अन्यत्रमना अभूवं नादर्शम्" इत्यादिश्रुतेर्मनोव्यापारमन्तरेणेन्द्रियाणां स्वस्वव्यापारेऽक्षमत्वाद् उभयविधव्यापारवत्त्वेन मन उभयेन्द्रियरूपमित्यर्थः,

---

(१) वक्ष्यति=२८—इति कारिकयेत्यर्थः।(२)रूपमित्यादि न विग्रहान्तर्गतम्। (३) आदिना गन्धं जिघ्रत्यनेनेति घ्राणं, रसयत्यनेनेति रसनमित्यादि ज्ञेयम्। (४) एतेन चक्षुरादीन्द्रियसद्भावे मानमुक्तम्।

तदसाधारणेन रूपेण लक्षयति-"संकल्पकं मन" इति, सङ्कल्पेन रूपेण मनो लक्ष्यते, आलोचितमिन्द्रियेण वस्तु 'इदम्' इति सम्मुग्धम् 'इदमेवं नैवम्' इति सम्यक् कल्पयति=विशेषण-विशेष्यभावेन विवेचयतीति यावद्,

यदाहुः "सम्मुग्धं वस्तुमात्रं हि प्रागगृह्णन्त्यविकल्पितं, तत्सामान्यविशेषाभ्यां कल्पयन्ति मनीषिणः"

न चेन्द्रियजज्ञाने सहकारितामात्रेण मनस इन्द्रियत्वे आलोकस्यापीन्द्रियत्वप्रसङ्ग इति शङ्कनीयं-सात्त्विकाहङ्कारकार्य्यत्वे सति ज्ञानकर्मोभयकरणत्वेन मनस उभयेन्द्रियत्वमित्यर्थस्यात्र विवक्षितत्वाद्,

'असाधारणेन=करणान्तरव्यावृत्तेन रूपेणेत्यर्थः,

'सङ्कल्पेन रूपेण'=सङ्कल्परूपेणासाधारणेन व्यापारेण मनो लक्ष्यते=इतरस्माद् व्यावृत्तरूपेण प्रतीयत इत्यर्थः,

तदेव स्पष्टयति-"आलोचितम्" इति, पूर्वं चक्षुरादिव्यापारेण गोचरीकृतं वस्तु इदम्=इदं किञ्चिद् वस्तु इत्येवं सम्मुग्धम्-अनुवृत्तव्यावृत्तरूपेणाविविक्तमेव भाति, पुनश्च इदमेवम्-एतादृग्रूपेण युक्तमिदम्-नैवम्-एतादृग्रूपेण च नेदं युक्तमित्येवं सम्यक् कल्पयति=विशेषणविशेष्यभावेन=अनुवृत्तव्यावृत्तरूपेण विवेचयति-विविच्य प्रत्येति मनोऽतः संकल्पकमित्युच्यत इत्यर्थः,

प्रथमं निर्विकल्पकं ज्ञानमालोचनात्मकं जायते पश्चाच्च सविकल्पकं, मनसेत्यत्र पूर्वाचार्य्याणां संवादमाह-"यदाहुर्" इति, प्राक्=मनोव्यापारात्पुरा चक्षुःसन्निपातानन्तरम् अविकल्पितं=सामान्यविशेषरूपेणानाकलितम् अत एव सम्मुग्धम्=अविविक्तम् अत एव च वस्तुमात्रं गृह्णन्ति प्रतिपत्तारः, पुनश्च मनीषिणः-मनोव्यापारवन्तः सन्तः सामान्यविशेषाभ्याम्=अनुवृत्तव्यावृत्तरूपाभ्यां तद् वस्तु कल्पयन्ति=विविच्यावगच्छन्तीत्यर्थः,

---

(१) अनुवृत्तरूपं घटत्वादिकं सामान्यं, व्यावृत्तरूपं च घटादिविशेषात्मकम्। (२) घटत्वादिरूपेण । (३) पटत्वादिरूपेण । (४) सम्यक् कल्पनामेवाह-"विशेषणविशेष्यभावेन" इति ।

तथा हि–"अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकं, बालमूकादिविज्ञानसदृशं शुद्धवस्तुजं, ततः परं पुनर्वस्तु धर्मैर्जात्यादिभिर्यया, बुद्ध्याऽवसीयते सा हि प्रत्यक्षत्वेन सम्मता" इति,

---

एतदेव विशदयितुं कौमारिलश्लोकवार्तिके पठति–"अस्ति ह्यालोचनम्" इति, प्रथमं=सविकल्पकप्रत्ययात्पुरा यद् वस्तुमात्रगोचरं बालमूकादिज्ञानसमानं निर्विकल्पकं ज्ञानमस्ति तत्प्रतीतिसिद्धमालोचनाख्यं ज्ञानमभ्युपेयं, तदभावे सविकल्पकज्ञानानुत्पत्तेरित्यर्थः,

'सामान्यविशेषेषु स्वरूपालोचनमात्रं प्रत्यक्षम्' इति प्रशस्तपादभाष्येऽपि तदेवाभिहितमिति ज्ञेयम्,

'शुद्धवस्तुजम्' इत्यनेन न सामान्यगोचरमालोचनमित्युक्तं, सामान्यविशेषकल्पनाहीनं तज्ज्ञानमित्यावेदितं 'न विशेषो न सामान्यं तदानीमनुभूयते, तयोराधारभूता तु व्यक्तिरेवावसीयत' इत्युत्तरवार्तिके तथा प्रतिपादनाद्,

नन्वालोचनज्ञानं यदीदृक् केन तर्हि विविच्य ग्रहणमित्यत्राह–"ततः परम्" इति, निर्विकल्पकज्ञानादुत्तरं यया बुद्ध्या नीलत्वघटत्वादिभिर्धर्मैर्विविच्य गृह्यते वस्तु सापि बुद्धिः प्रत्यक्षैवेत्यर्थः,

---

(१) 'मुग्धवस्तुजम्' इति पाठ उपलभ्यमानोऽपि न्यायरत्नाकरानुरोधेन परित्यक्तः। (२) जैमिनीये प्रत्यक्षलक्षणपरे तुरीयसूत्रे ११२, १२०इत्येतत्सङ्ख्ये इमे वार्तिक इति ज्ञेयम्। (३) तदभावे=निर्विकल्पकज्ञानाभावे, तथा चाहुर्न्यायकन्दलीकाराः–"यदि हि वस्तुस्वरूपस्य निर्विकल्पकेन ग्रहणं नेष्यते तदा तद्वाचकशब्दस्य स्मृत्यभावात्सविकल्पकमपि न स्याद्" इत्यादि। (४) सामान्यविशेषात्मकेषु पदार्थेषु, गुणग्रन्थे प्रत्यक्षप्रकरणस्थमिदं भाष्यम्। (५) 'विशेषः=व्यवच्छेदः–व्यावृत्तिः, सामान्यं=समानत्वम्–अनुवृत्तिरिति यावद्, अनुवृत्तिव्यावृत्ती न निर्विकल्पके प्रकाशेते, तयोस्त्वाधारभूतमनुवृत्तं व्यावृत्तं च यज्जातिव्यक्त्याद्यनेकाकारं वस्तु तत्तदाकारयुक्तं सम्मुग्धं सर्वमवसीयते तत् शुद्धवस्त्वित्युच्यते, व्यक्तिरिति–वस्त्वित्यर्थः' इति न्यायरत्नाकरकारः। (६) ईदृग्=अविविक्तगोचरम्।

[1]यत्प्रथमं केवलेनेन्द्रियेण निर्विकल्पकं ज्ञानं जनितं तदेव प्रत्यक्षमिति न किन्तु यच्चानन्तरमिन्द्रियसहायेन मनसा सविकल्पकं ज्ञानं जनितं तदपि प्रत्यक्षमिति भावः,

[2]ननु बाह्येन्द्रियतन्त्रं हि मनो बाह्यं गोचरयति अन्यथाऽन्धबधिराद्यभावप्रसङ्गादिति हि [3]समयः, एवं च यदि नेन्द्रियेणालोचितो विशेषः तर्हि मनसापि स कथमनुव्यवसीयेत, तथा चानुव्यवसायस्य विशिष्टविषयत्वाय सामान्यविशेषविषयमिन्द्रियमित्यभ्युपेयं, तथा चाहुर्योगभा[4]ष्यकाराः–'न च त[6]त्सामान्यमात्रग्रहणाकारम्, कथमनालोचितः स विषयविशेष इन्द्रियेण मनसाऽनुव्यवसीयेत' इति,

नात्र 'आलोचनं ज्ञानं सामान्यमेव गोचरयति मनस्तु विशिष्टमनुव्यवस्यति' इत्यभिप्रेतमपि तु 'इन्द्रियजमालोचनमविविक्तौ सामान्यविशेषौ गोचरयति मनस्तु विविक्तौ तौ गृह्णाति, इति,–"निर्विकल्पकबोधेपि द्व्यात्म[7]कस्यापि वस्तुनः, ग्रहणं लक्षणाख्येयं ज्ञात्रा शुद्धन्तु गृह्यते" इत्यादिवार्तिकेन तथैवाभिधानात्, तत्कथङ्कारमनुव्यवसायानुपपत्तिः, कथं च योगभाष्यविरोध इति,

---

(१) 'सापि प्रत्यक्षत्वेन' इत्यपेरर्थमाह–"यत्प्रथमम्" इति । (२) आलोचनज्ञानं सामान्यविषयं न विशिष्टविषयमिति बुद्ध्वा शङ्कते–"ननु" इति । (३) चक्षुरादिनैरपेक्ष्येणैव मनसो बहिर्वृत्तिस्वीकारे सति अन्धादयोपि रूपादीनालोचयेयुरिति भावः । (४) शास्त्रकृत्सङ्केतः । (५) पा० ३ सू० ४७ । (६) तद्=इन्द्रियम्, सामान्यमात्रस्य ग्रहणमेव आकारः=स्वभावो यस्यैवंविधं नेत्यर्थः। (७) 'द्व्यात्मकस्य=सामान्यविशेषात्मकस्येत्यर्थः, सामान्यावभासोऽपि प्रतीतिसिद्ध एव न हि निर्विकल्पकेनाऽगृहीतस्य सविकल्पकेनापि ग्रहणं संभवति, न वाऽगृहीते सामान्ये व्यक्त्यन्तरे प्रत्यभिज्ञानं संभवति, तस्मात्सामान्यं विशेषश्च निर्विकल्पकेपि प्रकाशत एव, ननु "न विशेषो न सामान्यं तदानीमनुभूयते" इत्युक्तं, कथन्तयोर्ग्रहणमुच्यते, अत आह–"लक्षणाख्येयम्" इति, न हीदानीमप्यनुवृत्तिव्यावृत्त्योर्ग्रहणमुच्यते–या त्वियं गृह्यमाणस्य द्व्यात्मकताख्या सा लक्षणाख्या=गृह्यमाणस्य वस्तुनो लक्षणमाख्यायते–सामान्यविशेषात्मकं तद्वस्त्विति, ज्ञात्रा पुनः शुद्धमेव=अनुवृत्तिव्यावृत्तिरहितं गृह्यते, न त्वसाधारणत्वेन परेभ्यो व्यक्त्यन्तरेभ्यो व्यावृत्तेरकल्पनात्, तथा व्यक्त्यन्तरानुवृत्तेरकल्पनान्न सामान्यमपि गृह्यतेऽतो न विरोधः, इत्येतदर्थं' इति पार्थसारथिमिश्राः, अनेन चालोचनस्याविविक्तविषयत्वमुक्तम्, उत्तरज्ञानस्य च विविक्तविषयत्वं 'ततः परं पुनर्वस्तु' इत्यनेनाभिहितं, तदेवाह "इत्यादिना" श्लो० ११८।

सोयं सङ्कल्पलक्षणो व्यापारो मनसः समानासमानजातीयाभ्यां व्यवच्छिन्दन् मनो लक्षयति,

स्यादेतद्–असाधारणव्यापारयोगिनौ यथा महदहङ्कारौ

एतच्च "तच्च[1] न सामान्यमात्रं गृह्णाति भेदस्यापि प्रतिभासनाद्, नापि स्वलक्षणमात्रं[2], सामान्याकारस्यापि संवेदनाद् व्यक्त्यन्तरदर्शने प्रतिसन्धानाच्च किन्तु सामान्यं विशेषं चोभयमपि गृह्णाति, परमिदं सामान्यमयं विशेष इति विविच्य न प्रत्येति–वस्त्वन्तरानुसन्धानविरहाद्" इत्यादिना[3] कन्दल्यां व्यक्तमिति तत्रैवाधिकमालोचनीयम्,

एवं च यद् विज्ञानभिक्षुणा "कश्चित्तु निर्विकल्पकं ज्ञानमेवालोचनमिन्द्रियजन्यं च भवति सविकल्पकं तु मनोमात्रजन्यमित्याह–तन्न, योगभाष्ये व्यासदेवैर्विशिष्टज्ञानस्याप्यैन्द्रियकत्वस्य व्यवस्थापितत्वाद्" इत्येवमिदं वाचस्पत्यं दूषितं तदेतद्ग्रन्थतात्पर्यानवबोधमूलकमिति ध्येयम्,

एवं सङ्कल्पं व्याख्याय लक्षणसमन्वयमाह–"सोयम्" इति, अयं यः मनसः सङ्कल्पलक्षणो व्यापारः स समानजातीयाद् बुद्ध्यादेर् असमानजातीयाच्च चक्षुरादेस्सकाशात् मनो व्यवच्छिन्दन्=व्यावर्तयन् सन् मनो लक्षयति=व्यावृत्तरूपेण प्रत्याययतीति भवति सङ्कल्पो मनसः लक्षणमित्यर्थः,

---

(१) तच्च=निर्विकल्पकज्ञानं च । (२) व्यक्तिमात्रं विशेषः । (३) आदिना 'पिण्डान्तरानुवृत्तिग्रहणाद्धि सामान्यं विविच्यते, व्यावृत्तिग्रहणाद् विशेषोयमिति विवेकः, निर्विकल्पकदशायां च पिण्डान्तरानुसन्धानाभावात्सामान्यविशेषयोरनुवृत्तिव्यावृत्तिधर्मौ न गृह्येते तयोरग्रहणान्न विविच्य ग्रहणम्' इत्याद्युत्तरग्रन्थो ग्राह्यः, गुणग्रन्थे प्रत्यक्षप्रकरणस्थोऽयं ग्रन्थः । (४) अ० २ सू० ३२–इत्यत्र साङ्ख्यप्रवचनभाष्य इति । (५) सर्वविषयत्वेन सजातीयं बुद्धितत्त्वमभिमानतत्त्वं, प्रतिनियतविषयत्वेनासमानजातीयं चक्षुरादिकम् ।

नेन्द्रियम् एवम्मनोप्यसाधारणव्यापारयोगि नेन्द्रियं भवितुमर्हति इत्यत आह—"इन्द्रियं च" इति, कुतः, "साधर्म्याद्"—इन्द्रियान्तरैः, सात्त्विकाहङ्कारोपादानत्वं च साधर्म्यं, न त्विन्द्रलिङ्गत्वम्, महदहङ्कारयोरप्यात्मलिङ्गत्वेनेन्द्रियत्वप्रसङ्गात्, तस्माद् व्युत्पत्तिमात्रमिन्द्रलिङ्गत्वं न तु प्रवृत्तिनिमित्तम्,

---

"नेन्द्रियं भवितुमर्हति"—यद्यपि नासाधारणव्यापारयोगित्वमिन्द्रियत्वव्याघातकं तथात्वे चक्षुरादीनामप्यनिन्द्रियत्वप्रसङ्गात् तथापि यद्यसाधारणव्यापारवतो मनस इन्द्रियत्वं तर्हि तथाविधयोर्महदहङ्कारयोरपि कथं नेन्द्रियत्वमित्याशयेनेयं शङ्का ज्ञेया,

यद्वा यथा प्रतिनियतविषयाणामेव नयनादीनामिन्द्रियत्वं न सर्वविषयत्वेनानियतविषययोर्महदहङ्कारयोरिन्द्रियत्वं तथा मनसोपि सर्वविषयत्वेन नेन्द्रियत्वं भवितुमर्हतीत्येवमियं शङ्का नेया, केन साधर्म्याद्, इत्याकाङ्क्षां पूरयति—"इन्द्रियान्तरैर्" इति,

किन्तत् साधर्म्यम्, इत्यत्राह—"सात्त्विक" इत्यादि, एतदेव साधर्म्यमत्र ग्राह्यं न पुनः पूर्वोक्तमिन्द्रलिङ्गत्वरूपमित्यर्थः, तत्र हेतुमाह—"महदहङ्कारयोर्" इति,

कथन्तर्हि पूर्वमात्मनश्चिह्नत्वादुभयमिन्द्रियमित्युक्तं, तत्राह—"तस्मात्" इति, यत इन्द्रलिङ्गत्वस्यातिप्रसक्तत्वं तस्माद् व्युत्पत्तिमात्रं=प्रकृतिप्रत्ययार्थान्वाख्यानमात्रमिदमिन्द्रलिङ्गत्वं यथा गच्छतीति गौरिति, "न तु प्रवृत्तिनिमित्तम्"=इन्द्रियपदस्य चक्षुरादौ प्रवृत्तेर्निमित्तं तदतिप्रसक्तत्वादित्यर्थः,

यथानतिप्रसक्तमेव सास्नादिमत्त्वं पशुविशेषे गोपदस्य प्रवृत्तेर्निमित्तमाश्रीयते न तु व्युत्पत्तिमात्रलभ्यं गमनकर्तृत्वमतिप्रसक्तत्वात् तथाऽनतिप्रसक्तं सात्त्विकाहङ्कारोपादानत्वमेवात्रेन्द्रियपदस्य चक्षुरादौ प्रवृत्तेर्निमित्तमाश्रीयते न त्वतिप्रसक्तं व्युत्पत्तिमात्रलभ्यमिन्द्रलिङ्गत्वं, तथा च न महदहङ्कारयोरिन्द्रियत्वप्रसङ्ग इति भावः,

---

(१) असाधारणव्यापारयोगित्वस्येन्द्रियत्वव्याघातकत्वे । (२) तथाविधयोर्=असाधारणव्यापारयोगिनोरित्यर्थः । (३) पुरुषस्यापि गमनकर्तृत्वेन तत्रापि गोपदप्रवृत्त्यापत्तेरित्यर्थः । (४) पाचकादिपदवन्न यौगिकमिन्द्रियपदमपि तु पङ्कजादिवद योगरूढं, तेन सात्त्विकाहङ्कारोपादानत्वे सतीन्द्रलिङ्गत्वमिन्द्रियत्वमित्यत्र फलितमिति ध्येयम् ।

अथ कथं सात्त्विकादहङ्कारादेकस्मादेकादशेन्द्रियाणि, इत्यत आह—"गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च" इति, शब्दाद्युपभोगप्रवर्तकादृष्टसहकारिभेदात्कार्य्यभेदः, अदृष्टभेदोपि गुणपरिणाम एव,

'बाह्यभेदाश्च' इति दृष्टान्तार्थं, यथा बाह्यभेदास्तथैतदपीत्यर्थः ॥ २७ ॥

कारणवैलक्षण्यमन्तरेण कार्य्यवैलक्षण्यायोगादविलक्षणादहङ्कारात्कथं विलक्षणानीन्द्रियाणीत्याशङ्कते—"अथ कथम्" इति,

धर्माधर्मरूपो यो गुणपरिणामः तस्य विशेषाद्=वैचित्र्याद् अहङ्कारस्य तत्कार्य्याणां चेन्द्रियाणां नानात्वम्=अनेकत्वम् इत्यर्थमभिप्रेत्य व्याचष्टे—"शब्दाद्युपभोग" इति, शब्दाद्युपभोगप्रवर्तकं यददृष्टरूपं सहकारि कारणं तद्भेदादित्यर्थः,

ननु गुणपरिणामविशेषान्नानात्वमुक्तं, कथमुच्यते सहकारिधर्माधर्मभेदाद् भेद इति तत्राह-"अदृष्टभेदोऽपि गुणपरिणाम एव" इति, अदृष्टभेदः=अदृष्टविशेषः, अत्र गुणपरिणामशब्देनादृष्टमेव गृह्यत इत्यर्थः,

पुरुषोपभोगार्था गुणानां प्रवृत्तिरिति हि स्थितिः, उपभोगश्च पुरुषस्य शब्दादिविषयानुभवरूपो न स्वाभाविकः किन्त्वदृष्टसहकारेणेन्द्रियाद्युपस्थापितशब्दादिद्वारा, न चैकेनेन्द्रियेण निखिलं शब्दादिकमुपस्थापयितुं शक्यमित्यगत्येन्द्रियनानात्वमुररीकार्य्यं, तदुररीकारे चाहङ्कारनानात्वमर्थाद्याप्तमित्याशयेनोक्तं—"शब्दाद्युपभोगप्रवर्तकादृष्ट" इत्यादि,

धर्माधर्मसहकृतगुणविमर्दवैचित्र्यादहङ्कारवैचित्र्यात्परिणामवैचित्र्यमिति तत्त्वम्, एतेन "यदि पुनरिन्द्रियाण्येककारणकानि स्युः कारणस्वभावानुविधानादेकात्म्याद् विषयव्यवस्था न स्यात्सर्वं वा सर्वार्थमेकं वा सर्वार्थमिति स्याद्" इत्युद्द्योतकराचार्य्योक्तो नानेन्द्रियाणामेकाहङ्कारकारणकत्व आक्षेपः प्रतिक्षिप्त इति वेदितव्यम्,

"दृष्टान्तार्थम्"—एतेन चकार उपमार्थ इति सूचितं, तदेवाह—"यथा बाह्यभेदा" इति, इन्द्रियापेक्षया बाह्या ये शब्दतन्मात्रादिरूपा ग्राह्यास्ते यथा तामसादहङ्कारादनेकविधा जायन्ते तथा सात्त्विकादहङ्कारादनेकविधानीन्द्रियाणीत्यर्थः ॥ २७ ॥

---

(१) अर्थात्=कारणवैलक्षण्यं विना कार्य्यवैलक्षण्यासंभवादित्यर्थः । (२) एतच्च ४६—इत्यार्यायामुत्तरत्र व्यक्तम् । (३) एतेन=अहङ्कारस्यानेकात्मकत्वाभ्युपगमेन । (४) अ० १ आ० १ सू० १२—इत्यत्र न्यायवार्तिक उक्त इत्यर्थः ।

तदेवमेकादशेन्द्रियाणि स्वरूपत उक्त्वा दशानामप्यसाधारणीर्वृत्तीराह—"रूपादिषु" इति—

रूपादिषु[1] पञ्चानामालोचनमात्रमिष्यते वृत्तिः,
वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम् ॥ २८ ॥

बुद्धीन्द्रियाणां सम्मुग्धवस्तुमात्रदर्शनमालोचनमुक्तं, 'वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानां'=कर्मेन्द्रियाणाम्, कण्ठताल्वादिस्थानमिन्द्रियं वाक्, तस्या वृत्तिर् वचनं, स्पष्टमन्यद् ॥ २८ ॥

रूपादिविषयेषु सन्निहितेषु सत्सु यद् रूपादिविषयाकारपरिणामरूपमालोचनमात्रं तत् पञ्चानां=ज्ञानेन्द्रियाणां वृत्तिर्=व्यापारः—धर्म इति यावद्, इत्यर्थमभिप्रेत्याह—"बुद्धीन्द्रियाणाम्" इत्यादि, उक्तम्="अस्ति ह्यालोचनं ज्ञानम्" इत्यादिना पूर्वं निरूपितम्,

"कर्मेन्द्रियाणाम्" अत्र 'वृत्तय' इति विपरिणमय्य योज्यम्,

इतरेन्द्रियाणामधिष्ठानस्य नयनगोलकादेर्हस्तादेर्वा स्पष्टत्वात् तत्कथनमुपेक्ष्य वागिन्द्रियाधिष्ठानं तावदाह—"कण्ठताल्वादि" इति, 'अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा, जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च' इत्युक्तानि कण्ठताल्वादीनि स्थानानि यस्येन्द्रियस्य तत्कण्ठताल्वादिस्थानमिन्द्रियं वाक्, तस्याः=वाचः, वृत्तिर्=व्यापारः वचनं=भाषणमित्यर्थः, एवम् आदानं=ग्रहणं हस्तयोर्वृत्तिः, विहरणं=गमनं पादयोर्, उत्सर्गः=मलापनयः पायोर्, आनन्दः=मूत्रत्यागो रमणं चोपस्थस्य वृत्तिरिति ज्ञेयम् ॥ २८ ॥

---

(१) चक्षुरादिक्रमेण पूर्वमिन्द्रियाणामभिधानात् 'शब्दादिषु' इति पाठो न सन्निवेशितः । (२) मात्र—शब्देन सामान्यविशेषविवेचनवैधुर्य्यं तस्य बोध्यते । (३) वृत्तिर् इत्यस्यानुवृत्तिः, एवमग्रेऽपि ।

अन्तःकरणत्रयस्य वृत्तिमाह—"स्वालक्षण्यम्" इति—

स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या,
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ॥ २९ ॥

"स्वालक्षण्यं वृत्तिस्त्रयस्य"=स्वम्=असाधारणं लक्षणं येषां तानि स्वलक्षणानि—महदहङ्कारमनांसि, तेषां भावः स्वालक्षण्यं, तच्च स्वानि स्वानि लक्षणान्येव, तद् यथा—महतोऽध्यवसायः, अहङ्कारस्याभिमानः, सङ्कल्पो मनसः वृत्तिर्=व्यापारः,

वृत्तिद्वैविध्यं साधारणासाधारणत्वाभ्यामाह—"सैषा भवत्यसामान्या"=असाधारणी, "सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च"=सामान्या चासौ करणवृत्तिश्चेति[1], त्रयाणामपि करणानां पञ्च वायवो जीवनं वृत्तिः, तद्भावे भावात् तदभावे चाभावात्,

---

"असाधारणं"=पूर्वोक्तमध्यवसायादिरूपम्,

"तच्च"=स्वालक्षण्यं च महदादीनां स्वकीयानि स्वकीयानि लक्षणान्येवेत्यर्थः, तदेवाह—"महतोऽध्यवसाय" इति, "वृत्तिर्" इत्यस्य सर्वत्र संबन्धः,

केषामसौ सामान्या वृत्तिः प्राणादिरूपा, तत्राह—"त्रयाणामपि करणानाम्" इति, वायवः=वायुतुल्यसंचारवत्त्वेन वायुवदाभासमानाः प्राणादयः पञ्च त्रयाणामपि करणानां सामान्या वृत्तिः, सा चैषा जीवनमित्युच्यत इत्यन्वयः,

यथा पञ्जरचालनरूपो व्यापारः संहतानां कपोतानां साधारणो[3] व्यापारस्तथा कलेवरधारणरूपो यो जीवनाख्यः प्राणनादिव्यापारः स मिलितानामन्तःकरणानां साधारणो व्यापार इति समस्तार्थः,

जीवनवृत्तेरन्तःकरणधर्मत्वेऽन्वयव्यतिरेकावाह—"तद्भावे भावाद्" इति, अन्तःकरणसद्भावे जीवच्छरीरे प्राणनादिव्यापारसद्भावदर्शनाद् अन्तःकरणासत्त्वे च पाषाणे प्राणनादिव्यापारादर्शनादित्यर्थः,

---

(१) इति सामान्यकरणवृत्तिरित्यर्थः। (२) अध्यवसायो महतो वृत्तिर्, अभिमानश्चाहङ्कारस्य वृत्तिरित्येवं संबन्धः। (३) यथानेके पक्षिणः सम्भूय व्यापारिणो भूत्वैकं पञ्जरं चालयन्ति तथा सम्भूय व्यापारवन्त्यनेकान्यन्तःकरणान्येकं शरीरं धारयन्तीति भावः।

तत्र प्राणो नासाग्रहृन्नाभिपादाङ्गुष्ठवृत्तिः, अपानः कृकाटिकापृष्ठपादपायूपस्थपार्श्ववृत्तिः, समानो हृन्नाभिसर्वसन्धिवृत्तिर्, उदानो हृत्कण्ठतालुमूर्द्धभ्रूमध्यवृत्तिः, व्यानस्त्वग्वृत्तिर् इति पञ्च वायवः ॥ २९ ॥

अत्रेदमवधेयम्—अत्र साङ्ख्यसूत्रे च "त्रयाणां स्वालक्षण्यम्" इत्येवमन्तःकरणवृत्तीः प्रकृत्यैव "सामान्यकरणवृत्तिः प्राणाद्या" इत्यभिधानाद् अन्तःकरणस्यैव वृत्तिः प्राणनादिर्न तु बाह्येन्द्रियाणामपीति,

एवं चैतदनुरोधात् 'समस्तेन्द्रियवृत्तिः प्राणादिलक्षणा जीवनम्' इति योगभाष्येपि समस्तेन्द्रियशब्देनान्तःकरणत्रयमेव ग्राह्यं न तु बाह्येन्द्रियमपि, सुषुप्तौ चक्षुराद्युपसंहारेपि प्राणादिव्यापारदर्शनान्न बाह्येन्द्रियवृत्तित्वं प्राणादेरित्यपि ज्ञेयं, योगभाष्य इन्द्रियशब्दश्च करणपरत्वेन नेयः—(एवं सिद्धे सति) गत्यन्तराऽसम्भवाद्,

एवं च योगभाष्यव्याख्यायां समस्तेन्द्रियशब्देन बाह्याभ्यन्तरोभयेन्द्रियग्रहणं वदन् वाचस्पतिमिश्रो विज्ञानभिक्षुश्च न श्रद्धेय इति ध्येयम्, एवमेव प्रकृतसिद्धान्तांग्याङ्गत्यप्रतिपादनपरः, न सामान्येन्द्रियवृत्तिः प्राणः, एकद्वित्रिचतुरेन्द्रियाभावे तदभावप्रसङ्गाद्, नो खलु चूर्णहरिद्रासंयोगजन्मारुणगुणस्तयोरन्यतराभावे भवितुमर्हति" इत्यादिर्भामतीग्रन्थोप्यश्रद्धेय एवावधेयः—अनभ्युपगतं प्राणानां बाह्येन्द्रियवृत्तित्वमुपकल्प्य तत्खण्डनस्यायुक्तत्वाद्,

जीवनवृत्ते स्थानभेदेन पञ्चविधत्वमाह—"तत्र प्राण" इति, कृकाटिका=घाटा, प्राणनाद्=अन्नाशनादिना शरीरधारणात्प्राणः, मलमूत्रादेरपनयनादपानः, समम्=अनुरूपं नाडीषु रसानां नयनात्समानः, रसाद्यूर्द्ध्वनयनादुदानः, बलवत्कर्महेतुत्वाच्च व्यानः, इति—व्यापारभेदादपि जीवनस्य पञ्चविधत्वं ज्ञेयम् ॥ २९ ॥

---

(१) अ० २ सू० ३० । (२) पा० ३ सू० ३९ (३) ननु महदहङ्कारयोरिन्द्रियत्वाभावेन कथं समस्तेन्द्रियशब्देन तयोर्ग्रहणम्, इत्यत्राह—"योगभाष्य इन्द्रियशब्दश्च" इति, बाह्येन्द्रियग्रहणपक्षेपि तयोर्ग्रहणार्थैषैव गतिराश्रयणीयेति भावः । (४) पूर्वोक्तप्रकारेण प्राणानां बाह्येन्द्रियवृत्तित्वाभावे सिद्धे सति । (५) "सामान्यकरणवृत्तिः प्राणादिर्" इति साङ्ख्यसिद्धान्तखण्डनपरः । (६) अ० २ पा० ४ सू० ८ । (७) कृकं=कण्ठम् अटति=व्याप्नोतीत्यर्थे कर्मण्यणि ङीपि स्वार्थे के ह्रस्वे टापि 'प्रत्ययस्थाद्' इतीत्त्वे च कृकाटिकेति साधुः यौवनोद्भेदसमये गल उपलभ्यमाना 'घंडी' इति प्रसिद्धा, तदेवाह—'घाटा' इति ।

चतुर्विधकरणस्यासाधारणीषु वृत्तिषु क्रमाक्रमौ सप्रकारावाह—"युगपच्चतुष्टयस्य" इति—

युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा,
दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ॥ ३० ॥

"दृष्टे" यथा—यदा सन्तमसाऽन्धकारे विद्युत्सम्पातमात्राद् व्याघ्रमभिमुखमतिसन्निहितं पश्यति तदा खल्वस्यालोचनसङ्कल्पाभिमानाध्यवसाया 'युगपद्' एव प्रादुर्भवन्ति यस्तत उत्प्लुत्य तत्स्थानादेकपदेऽपसरति, ।

"चतुर्विधकरणस्य"=बाह्यकरणसहिताऽन्तःकरणत्रयस्य, "दृष्टे"=चक्षुरादिगोचरे पदार्थे तु "चतुष्टयस्य"=करणस्य वृत्तिः कदाचिद् "युगपद्"=अक्रमेण जायते "कदाचिच्च" क्रमशो जायत इत्येवं क्रमाक्रमवर्ती "वृत्तिर् निर्दिष्टा"=साङ्ख्याचार्य्यैरभिहितेत्यर्थमभिप्रेत्य यौगपद्योदाहरणं तावदाह—"दृष्टे यथा" इति,

"सन्तमसान्धकारे"=निबिडान्धकारे, सन्तमसशब्देनैव गाढान्धकारलाभसम्भवाद् अन्धकार इत्यनुपयुक्तम्,

"आलोचनसङ्कल्पाभिमानाध्यवसायाः" एते यथाक्रमं नयनमनोऽहङ्कारबुद्धीनां व्यापाराः,

"उत्प्लुत्य"=मण्डूकवदूर्ध्वप्लवनमनुष्ठाय "एकपदे"=तत्क्षणमेव—झटित्येवेति यावद्, "अपसरति"=स्थानान्तरमेति,

अत्र वृत्तीनां यौगपद्याख्यानेन बाह्येन्द्रियवृत्तीनामपि युगपद्भवनस्यार्थात्कथितत्वाद् दीर्घशष्कुलीभक्षणादावपर्य्यायेण जायमानं ज्ञानपञ्चकमप्यत्रोदाहरणीयम्,

न च 'नैकमणु मनो विभिन्नस्थानानीन्द्रियाणि युगपदधिष्ठातुं शक्तम्' इति न युगपज्ज्ञानपञ्चकोत्पादः शक्यसम्पादः, तथा च यथाऽऽशु सञ्चारात्संभ्रमतोऽलातस्य विद्यमानोपि क्रमो न गृह्यते तथा ज्ञानानामप्याशु स-

(१) "क्रमशोऽक्रमशश्चेन्द्रियवृत्तिर्" अ० २ सू० ३२—इति कपिलाचार्य्यैरित्यर्थः। (२) सन्ततं तम इति विग्रहे 'अवसमन्धेभ्यस्तमसः' (५।४।७९) इति सूत्रेण समासान्तेऽचि 'सन्तमसम्' इति साधु, सर्वतोव्याप्तान्धकारे चास्य वृत्तिरित्यमरः। (३) अक्रमेण। (४) मनोऽधिष्ठितानामेव बाह्येन्द्रियाणां स्वस्वव्यापारे क्षमत्वस्य पूर्वमुक्तत्वात्। (५) "आशु"=शीघ्रम्।

"क्रमशश्च"—यदा मन्दालोके प्रथमं तावद् वस्तुमात्रं सम्मुग्धमालोचयति, अथ प्रणिहितमनाः कर्णान्ताकृष्टसशरशिञ्जितमण्डलीकृतकोदण्डः प्रचण्डतरः पाटच्चरोयमिति निश्चिनोति, अथ च 'माम्प्रत्येति' इत्यभिमन्यते, अथाऽध्यवस्यति–'अपसरामीतः स्थानाद्' इति ।

परोक्षे त्वन्तःकरणत्रयस्य बाह्येन्द्रियवर्जं वृत्तिरित्याह- "अदृष्टे त्रयस्य तत्पूर्विका वृत्तिर्"=अन्तःकरणत्रयस्य युगपत्क्रमेण च वृत्तिर्दृष्टपूर्विकेति, अनुमानागमस्मृतयो हि प-

---

ञ्चाराद् विद्यमानक्रमस्याग्रहणाद् दीर्घशष्कुलीभक्षणादौ युगपदुपलब्ध्यभिमान इत्यास्थेयं, यदाहुर्–'अलातचक्रेदर्शनवत् तदुपलब्धिराशु सञ्चाराद् इति'–इति शङ्कनीयं, साङ्ख्यमते मनसो मध्यमपरिमाणवत्त्वेन युगपदनेकेन्द्रियाधिष्ठातृत्वसंभवाद्, अननुभूयमानक्रमकल्पनाया अप्रामाणिकत्वाद् "ज्ञानायौगपद्यादेकं मनः" "यथोक्तहेतुत्वाच्चाणु" इत्यक्षपादोदितः सिद्धान्तो न साङ्ख्यसम्मत इति भावः,

अपर्य्यायेण वृत्त्युत्पादस्थलमुदाहृत्य पर्य्यायेण वृत्त्युत्पादस्थलमुदाहर्तुमाह–"क्रमशश्च" इति, अत्र 'यथा' इति पूरणीयम्,

"कर्णान्ताकृष्टसशरशिञ्जितमण्डलीकृतकोदण्डः"=कर्णान्तम्=उपकर्णं यथा स्यात् तथाऽऽकृष्टम्=आतानितं,=कर्णान्ताकृष्टं, सशरशिञ्जितम्=आरोपितबाणम् अव्यक्तशब्दवच्चेति सशरशिञ्जितं, कर्णान्ताकृष्टं च सशरशिञ्जितं च मण्डलीकृतं च कोदण्डं धनुर्येन स तथा, "पाटच्चरः"=तस्करः, "निश्चिनोति"=स्थाण्वादिभ्यो विवेचयति,

"बाह्येन्द्रियवर्जं"=बाह्येन्द्रियाणि वर्जयित्वा,

"अदृष्टे"=अनुमेये वह्न्यादौ, शाब्दे च स्वर्गापूर्वदेवतादौ, स्मरणीये च पित्रादौ,

"तत्पूर्विका" इत्यस्यार्थमाह–"दृष्टपूर्विका" इति, तदेव स्पष्टयति–"अ-

---

(१) 'द्वितीयायां च' (३।४।५३) इति णमुल् । २ न्या० अ० ३ आ० २ सू० ६१, (६३) । (३) न्या० अ० ३ आ० २ सू० ५९, ६२ । (६१, ६४) । (४) कर्णसमीपे ।

रोक्षेऽर्थे दर्शनपूर्वाः प्रवर्तन्ते नान्यथा, यथा दृष्टे "तथाऽदृष्टे-पि" इति योजना ॥ ३० ॥

स्यादेतत्-चतुर्णां त्रयाणां वा वृत्तयो न तावत् तन्मात्राधीनाः, तेषां सदातनत्वेन वृत्तीनां सदोत्पादप्रसङ्गाद्, आकस्मिकत्वे तु वृत्तिसङ्करप्रसङ्गो नियमहेतोरभावाद्, इत्यत आह "स्वांस्वाम्" इति-

स्वांस्वां प्रतिपद्यन्ते परस्पराकूतहेतुकां वृत्तिं,
पुरुषार्थ एव हेतुर्न केन चित्कार्य्यते करणम् ॥ ३१ ॥

करणानि इति शेषः, यथा हि बहवः पुरुषाः

नुमान" इत्यादिना, "दर्शनपूर्वा"=अनुमेये व्याप्तिज्ञानाय प्रत्यक्षापेक्षा, शाब्दे च शक्तिग्रहाय प्रत्यक्षापेक्षा, स्मरणीये च संस्कारायानुभवापेक्षा, इत्यनुमानादयो दर्शनपूर्वाः,

"तथाप्यदृष्टे" इति, 'अपिर्' भिन्नक्रम इत्याशयेनाह-"तथाऽदृष्टेपि" इति ॥ ३० ॥

"तन्मात्राधीनाः"=इतरनिमित्तनैरपेक्ष्येण करणमात्राधीनाः, "तेषां" करणानाम्,

"सदोत्पादप्रसङ्गाद्" इति, ननु विषयसन्निधानादेर्वृत्त्युत्पादे निमित्तत्वसत्त्वान्न वृत्तीनां सदोत्पादप्रसङ्ग इति चेद्, एवमपि नियामकस्य कस्य चिदभावादाकस्मिकत्वप्रसङ्गो[1] दुर्वारः, भवत्वाकस्मिकत्वं कात्र क्षतिरिति चेत्, तत्राह-"आकस्मिकत्वे तु" इति, करणवृत्त्युद्भवस्यानैमित्तिकत्वे तु "वृत्तिसङ्करप्रसङ्गः"=कदाचिच्चक्षुरेव शब्दग्रहणाय व्याप्रियेत, कदाचिच्च श्रोत्रमेव रूपे व्याप्रियेत, कदाचिच्च मन एव निश्चिनुयात्, कदाचिच्च बुद्धिरेव सङ्कल्पयेद् इत्येवं वृत्तीनां परस्परव्यतिकरप्रसङ्गः, तत्र हेतुमाह-"नियमहेतोरभावाद्"=इयं त्वदीया वृत्तिरेतद्गोचरा=इति नियमप्रदर्शकस्य कस्य चिद् हेतोरभावादित्यर्थः,

कारिकागतेन 'करणम्' इत्यनेनानिर्वाहादाह[2]-"करणानीति शेष" इति, करणानि परस्पराभिप्रायनिमित्तामात्मीयामात्मीयामेव वृत्तिं प्रतिपद्यन्ते=प्राप्नुवन्ति न परकीयामित्यर्थं दृष्टान्तेन स्पष्टयति-"यथा हि" इत्यादिना,

---

(१) निर्हेतुकवृत्त्युद्भवप्रसङ्गः। (२) "प्रतिपद्यन्ते" इति बहुवचनान्तक्रियापदेन सह योगायोगाद्।

शाक्तीक-याष्टीक-धानुष्क-कार्पाणिकाः कृतसङ्केताः परावस्कन्दनाय प्रवृत्ताः, तत्रान्यतमस्याकूतमवगम्यान्यतमः प्रवर्तते, प्रवर्तमानस्तु शाक्तीकः शक्तिमेवादत्ते न तु यष्ट्यादिकम्, एवं याष्टीकोऽपि यष्टिमेव न शक्त्यादिकं, तथाऽन्यतमस्य करणस्याऽऽकूतात् =स्वकार्य्यकरणाभिमुख्याद् अन्यतमं करणं प्रवर्तते, तत्प्रवृत्तेश्च हेतुमत्त्वान्न वृत्तिसङ्करप्रसङ्ग इत्युक्तं—"स्वां स्वां प्रतिपद्यन्त" इति ।

स्यादेतत्—याष्टीकादयश्चेतनत्वात्परस्पराकूतमवगम्य प्रवर्त्तन्त इति युक्तं, करणानि त्वचेतनानि, तस्मान्नैवं प्रवर्त्तितुमुत्सहन्ते, तेनैषामधिष्ठात्रा करणानां स्वरूपसामर्थ्योपयोगाभिज्ञेन

शक्तिः प्रहरणमस्यासौ शाक्तीकः, एवं याष्टीकादयो ज्ञेयाः, शक्तिपाणयः यष्टिपाणयः धनुष्पाणयः कृपाणपाणयश्चेति यावत्, "कृतसङ्केताः"=आक्रमणवेलायां त्वयेदं प्रहरणं ग्रहणीयमित्येवं पूर्वमेव कृतनियमास्सन्तः "परावस्कन्दाय"=रिपोराक्रमणाय—अरिदमनायेति यावत्, "आकूतम्"=अभिप्रायम्,

दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजयति—"तथाऽन्यतमस्य" इति,

आकूतस्येच्छाविशेषत्वेन चेतनधर्मत्वादचेतने करणग्रामे बाधितत्वाल्लाक्षणिकमर्थमाह—"स्वकार्य्यकरणाभिमुख्याद्" इति,

फलितमाह—"तत्प्रवृत्तेश्च" इति, एवं करणप्रवृत्तेः परस्पराकूतनिमित्तकत्वान्न वृत्तिसङ्करप्रसङ्गावसर इत्यर्थः,

"तस्मान्नैवम्" तस्माद्=अचेतनत्वाद् एवं=शाक्तीकादिवत् प्रवर्तितुं न "उत्सहन्ते"=उद्युक्ता भवन्ति, "तेन"=स्वयं प्रवर्तितुमक्षमत्वेन, "एषां"= करणानाम् "अधिष्ठात्रा"=प्रयोजकेन केन चिद् भवितव्यमित्यन्वयः,

कीदृशेनाऽधिष्ठात्रा भवितव्यम् इत्यत्राह="करणानां स्वरूपसामर्थ्योपयो-

(१) 'आदत्ते' इत्यनुषङ्गः, एवं 'यष्टिमेव' इत्यादावपि। (२) प्रह्रियतेऽनेनेति प्रहरणम्=आयुधम्। (३) 'शक्तियष्ट्योरीकक्' (४।४।५९) इतीकक्, धानुष्ककार्पाणिकशब्दे त्वधिकारप्राप्तष्ठक्। (४) यथा—'नदीकूलं पिपतिषति' इत्यत्रेच्छया पतनोन्मुखत्वं लक्ष्यते तथाऽत्रापि कार्यकरणोन्मुखत्वं लक्ष्यत इत्यर्थः।

भवितव्यम्, इत्यत आह–"पुरुषार्थ एव हेतुर्न केन चित्कार्यते करणम्" इति।

भोगापवर्गलक्षणः पुरुषार्थ एवानागतावस्थः प्रवर्तयति करणानि, कृतमत्र तत्स्वरूपाभिज्ञेन कर्त्रा।

एतच्च "वत्सविवृद्धिनिमित्तम्" इत्यत्रोपपादयिष्यते ॥३१॥

"न केन चित्कार्य्यते करणम्" इत्युक्तं, तत्र करणं विभजते- "करणं त्रयोदशविधम्" इति–

करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरं,

कार्य्यं च तस्य दशधाऽऽहार्य्यं धार्य्यं प्रकाश्यं च ॥ ३२ ॥

इन्द्रियाण्येकादश बुद्धिरहङ्कारश्चेति त्रयोदशप्रकारं करणं, कारकविशेषः=करणं, न च व्यापारावेशं विना कारकत्वम्,

---

गाभिज्ञेन" इति, यद्यप्यस्यैव पुरुषोऽधिष्ठानाभिज्ञस्तथाप्यसङ्गत्वान्निर्विकारत्वान्न तस्य प्रेरकत्वसम्भवः, ईश्वरस्तु नास्त्येवेत्याशयः,

सत्कार्य्यवादसिद्धान्ते भाविनावपि भोगापवर्गावव्यपदेश्यतया गुणेषु तिष्ठत इति प्रकृतिगतावनागतौ तावेव प्रवर्त्तकौ, तावदेव हि गुणाः प्रवर्त्तन्ते न यावद् भोगं वाऽपवर्गं वा जनयन्ति, निर्वर्त्तितभोगापवर्गास्तु समाप्ताधिकाराः सन्तो निवर्त्तन्त इति हि साङ्ख्यसिद्धान्तः,

अपवृज्यते=केवलीभवत्यनेनेत्यपवर्गः=सत्त्वपुरुषान्यताज्ञानम्, "अनागतावस्थः"=निष्पादनीयत्वेन स्थिरः,

"कृतम्"=अलम्, "अत्र"=करणानां प्रेरणे, पुरुषार्थातिरिक्तेन केनचित् कर्त्रा किमपि साध्यं नास्तीति व्यर्थमेव तदाश्रयणमित्यर्थः,

"एतच्च"=न केनचिद् ईश्वरेण जीवेन वा कार्य्यते=प्रवर्त्यते करणम् इत्येतदित्यर्थः, ॥ ३१ ॥

"कारकविशेषः"=कर्त्रादिषट्कारकमध्ये साधकतमरूपः, "व्यापारावेशं" =व्यापारयोगं, व्यापाराश्रयस्यैव कारकत्वादित्यर्थः,

---

(१) का० ५७। (२) ईदृक् करणानां स्वरूपमेवंविधं चैषां सामर्थ्यमत्र चैषामुपयोग इत्येवं सप्रकारकरणज्ञात्रा।

इति व्यापारावेशमाह-"तदाहरणधारणप्रकाशकरं"-यथा-यथं तत्र कर्मेन्द्रियाणि वागादीनि आहरन्ति=यथास्वमुपाददते-स्वव्यापारेण व्याप्नुवन्तीति यावद्, बुद्ध्यहङ्कारमनांसि तु स्ववृत्त्या-प्राणादिलक्षणया धारयन्ति, बुद्धीन्द्रियाणि च प्रकाशयन्ति ।

आहरणधारणादिक्रियाणां सकर्मकतया किं कर्म, कतिविधं च, इत्यत आह-"कार्य्यं च तस्य" इति, तस्य=त्रयोदशविधस्य करणस्य "दशधाऽऽहार्य्यं धार्य्यं प्रकाश्यं च" कार्य्यम्, आहार्य्यं=व्याप्यं, कर्मेन्द्रियाणां वचनादानविहरणोत्सर्गानन्दा यथायथं व्याप्याः, ते च दिव्यादिव्यतया दशेत्याहार्य्यं दशधा, एवं धार्य्यमप्यन्तःकरणत्रयस्य प्राणादिलक्षणया वृत्त्या शरीरं, तच्च पार्थिवादि पाञ्चभौतिकं, शब्दादीनां पञ्चानां म-

किम्प्रत्येकमेवाहरणादिकरं, नेत्याह-"यथायथं"-यथात्मीयं, तदेवाह-"तत्र" इत्यादिना,

"कार्य्यं"=कर्म, "व्याप्यं"=वागादिव्यापारेणाप्यं कर्म, तदेवाह-"कर्मेन्द्रियाणाम्" इति, देवादीनां भोग्या दिव्याः, अस्मदादीनां चादिव्याः,

"तच्च"=शरीरं च "पार्थिवादि," आदिना जलीयतैजसवायवीयानां ग्रहणम्, पाञ्चभौतिकं-"पञ्चभूतानां विकारभूतम्, पञ्चभूतविकारत्वे कथं पार्थिवादित्वव्यपदेश इति चेत्, तत्तत्प्राधान्येनेति गृहाण, तथा हि दशधात्वं कुतस्त्यं, तत्राह-"शब्दादीनाम्" इति, शब्दादिपञ्चतन्मात्राणां समूहरूपः परिणामः स्थूला पृथिवीति पूर्वमभिहितं, ते च शब्दादयः पञ्च दिव्यादिव्यतया दशेति तद्वती पृथिव्यपि दशधा-तत्परिणामत्वाच्च शरीरमपि दशधेत्यर्थः,

(१) "यथास्वे यथायथम्" इति (८।१।१४) पा० सूत्रेण साधु । (२) तत्र पार्थिवं मनुष्याणां, वरुणवह्निवायुलोकनिवासिनां च यथाक्रमं जलीयादिशरीरमिति बोध्यम् । (३) मानुषे शरीरे पृथिव्याः प्राधान्यमितरेषां च भूतानामुपष्टम्भकत्वमात्रम्, एवमितरत्रापि तत्तत्प्राधान्यं ज्ञेयम् । (४) सूक्ष्माः शब्दादयो दिव्याः, स्थूलाश्चादिव्याः ।

मूहः पृथिवीति ते च पञ्च दिव्यादिव्यतया दशेति धार्य्य-मपि दशधा, एवं बुद्धीन्द्रियाणां शब्दस्पर्शरूपरसगन्धा यथा-यथं व्याप्याः, ते च दिव्यादिव्यतया दशेति प्रकाश्यमपि दशधेति ॥ ३२ ॥

त्रयोदशविधे करणेऽवान्तरविभागं करोति—"अन्तःकर-णम्" इति—

अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यं,
साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ॥ ३३ ॥

"अन्तःकरणं त्रिविधं"=बुद्धिरहङ्कारो मन इति, शरीराभ्य-न्तरवर्त्तित्वादन्तःकरणं, दशधा बाह्यं करणं "त्रयस्य"अन्तः-करणस्य "विषयाख्यं" विषयमाख्याति=विषयसंकल्पाभिमा-नाध्यवसायेषु कर्तव्येषु द्वारीभवति, तत्र बुद्धीन्द्रियाण्यालोच-नेन, कर्मेन्द्रियाणि तु यथास्वं व्यापारेण,

बाह्यान्तरकरणयोर्विशेषान्तरमाह—"साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम्"इति, साम्प्रतकालं=वर्तमानकालं

"व्याप्याः"=आलोचनीया विषयाः ॥ ३२ ॥

"विषयमाख्याति"=तत्तद्विषयगोचरं व्यापारमुत्पादयति, तदेवाह—"वि-षयसङ्कल्प" इति, मनआदिभिर्विषयगोचरेषु सङ्कल्पादिषु कर्तव्येषु बाह्य-मिन्द्रियं द्वारीभवति=उपायीभवतीत्यर्थः,

"आलोचनेन"=आलोचनाख्यव्यापारद्वारा सहायीभवन्तीति शेषः एवं "यथास्वं व्यापारेण" इत्यत्रापि 'द्वारीभवन्ति' इति शेषो ज्ञेयः,

"वर्त्तमानकालं" वर्तमानकालो विषयो यस्य तद्वर्त्तमानकालं, लौकिको बाह्यकरणाश्रितोऽध्यवसायो वर्तमानविषय इत्यर्थः,

(१) बाह्येन्द्रियतन्त्रं ह्यन्तःकरणं बाह्ये प्रवर्त्तत इति बाह्यगोचरवृत्त्युद्भवेऽन्तः-करणस्य बाह्येन्द्रियं सहायीभवतीति भावः। (२) योगिनः प्रत्यक्षमतीता-ऽनागतावपि गोचरयति, अत उक्तं "लौकिक" इति।

बाह्यम्=इन्द्रियं, वर्तमानसमीपमनागतमतीतमपि वर्त्तमानम् अतो वागपि वर्तमानकालविषया भवति ।

"त्रिकालमाभ्यन्तरं करणं"–तद् यथा–नदीपूरभेदादभूद् वृष्टिर्, अस्ति धूमादग्निरिह नगनिकुञ्जे, असत्युपघातके पिपी-

---

ननु 'अयमागमम्' 'एष गमिष्यामि' इत्यतीताऽनागतयोरप्यागमनगमनयोर्वाचो व्याप्रियमाणत्वात्कथं वर्तमानकालं बाह्यं करणम् इति नियम इत्याशङ्कायामाह–"वर्तमानसमीपमनागतमतीतमपि वर्त्तमानम्" इति, अत एव कदाचित् 'कदाऽऽगतोसि' इति पृष्टः सन्नतीते वर्त्तमानं प्रयुङ्क्ते–'अयमागच्छामि' इति, 'कदा गमिष्यसि' इति च पृष्टः सन्ननागते वर्तमानं प्रयुङ्क्ते–'एष गच्छामि' इति, तथा चाह भगवान् दाक्षीनन्दनः–"वर्तमानसामीप्ये वर्तमानवद्वा" इति, गङ्गासमीपे गङ्गात्वारोपवद् वर्तमानसमीपे वर्तमानत्वारोपसम्भवान्नातीवावश्यकमिदं सूत्रमिति महाभाष्यकाराः,

अन्तःकरणव्यापारस्य त्रैकाल्यविषयत्वं स्पष्टयितुमादौ तावदतीतविषयमनुमानमाह–"नदीपूरभेदाद्" इति, नदीपूरः=नद्याः पूर्णत्वं, रोधादेरपि नद्याः पूर्णत्वस्य कदाचित्सम्भवाद् व्यभिचारः स्यात् तद्वारणाय भेदपदं, नदीपूरविशेषादित्यर्थः, वैशेष्यं च बहुतरफेनफलपल्लवकाष्ठादिमद्रजस्वलजलवत्त्वसहकृतत्वं,तथा चैतादृङ्नद्याः पूर्णत्वं, स्रोतसः,शीघ्रत्वं च दृष्ट्वानुमीयते–'नद्या उपरिदेशे वृष्टो देव' इत्यत्र फलितम् ॥

वर्तमानविषयमनुमानमाह–"अस्ति धूमाद्" इति, "नगनिकुञ्जे"=गिरिगह्वरे–लताच्छादिते पर्वतप्रदेश इत्यर्थः,

अनागतविषयमनुमानमाह–"असत्युपघातक" इति, वर्षमूलकारणे महाभूतसंक्षोभे सति भौमेनोष्मणा क्थ्यमानाः खलु पिपीलिकाः स्वान्यण्डानि भूमिष्ठान्युपरिष्टान्नयन्ति, तथा च पिपीलिकाण्डसञ्चरणाद् वर्षकारणमनुमाय पुनर्वर्षकारणाद् भावि कार्यं वर्षणमनुमीयत इत्यर्थोत्र ज्ञेयः, नीडोपघातादपि कदाचित् पिपीलिकाण्डसञ्चारो भवतीति तन्निरासायाह–"असत्युपघातक" इति,=पिपीलिकागृहोपमर्दकारणेऽसतीत्यर्थः,

---

(१) इदानीमित्यर्थकम्–'अयम्','एष' इति च । (२) पाणिनि० (३।३।१३१)। (३) स्पन्दमानानामपां द्रवत्वप्रतिबन्धहेतुसेत्वादिकं 'रोध' इति । (४) वर्षकारणं=भूतसंक्षोभम् । (५) नीडम्=गृहम् । (६) तादृक्सञ्चरणेन मिथ्यानुमानभवननिराकरणाय ।

लिकाण्डसञ्चरणाद् भविष्यति वृष्टिरिति, तदनुकूलाश्च सङ्कल्पाभिमानाध्यवसाया भवन्ति।

कालश्च वैशेषिकाभिमत एको नाऽनागतादिव्यवहारभेदं प्रवर्त्तयितुमर्हतीति, तस्मादयं यैरुपाधिभेदैरनागतादिव्यवहार-

---

तथा चाविभ्रान्तानां भूयसीनां भूयस्सु स्थानेषु साण्डानां पिपीलिकानां सञ्चरणमेवाऽनागतवर्षणमनुमापयति न सञ्चारमात्रमिति न मिथ्यानुमानमित्यत्र फलितम्,

"वृष्टिरिति" इति, यतः एवं त्रैकाल्यविषयमनुमानमतः तदनुरूपाः—तत्तदतीताद्यनुगुणा एव मनआदीनां सङ्कल्पादयो भवन्तीत्यर्थः,

'त्रिकालमाभ्यन्तरं करणम्' इति श्रुत्वा भवेत्कस्यचित् 'पञ्चविंशतितत्त्वातिरिक्तं कालतत्त्वमपि कापिलैरास्थीयते, इति भ्रांतिः, तां पराणुदति—"कालश्च" इति, "अपरस्मिन्नपरं युगपच्चिरं क्षिप्रमिति काललिङ्गानि" इत्येवं वैशेषिकैरभिहितश्च कालो नाऽनागतानादिव्यवहारभेदं प्रवर्तयितुमर्हति—यतः स एक इति,

ननु कालस्य स्वरूपत ऐक्येप्युपाधिभेदादनागतादिभेदव्यवहार उपपत्स्यते, यदाहुर्—"एकत्वेपि सर्वकार्य्याणामारम्भक्रियाभिनिर्वृत्तिस्थितिनिरोधोपाधिभेदान्मणिवत्पाचकादिवद्वा नानात्वोपचार" इति, यथैकस्मिन् पुरुषेऽनेकसंबन्धभेदानुविधायिन्यभिन्ने पिता पुत्रो भ्रातेति प्रत्यया भवन्ति—तद्वदेकः कालः कार्य्यकारणविशेषापेक्षः परापरादिप्रत्ययहेतुर् इति च, तत्राह—"तस्मादयं यैरुपाधिभेदैर्" इति, इति=यत एकः

---

(१) इतिकारो ज्ञानप्रकारपरः प्रत्येकमभिसंबध्यते, तथा च अपरमिति प्रत्ययः, युगपदिति प्रत्ययः, चिरमिति प्रत्ययः, क्षिप्रमिति प्रत्ययः, इति काललिङ्गानीत्यर्थः, अपरस्मिन्नपरमित्यनेन परस्मिन् परमित्यपि द्रष्टव्यम् इति काणादसूत्रार्थः, अ० २, आ० २ सू० ६। (२) आरम्भः=उपक्रमः, क्रियाया अभिनिर्वृत्तिः=परिसमाप्तिः, स्थितिः=स्वरूपावस्थानं, निरोधः=नाशः, एषामुपाधीनां भेदान्नानात्वव्यपदेशः, यथैकोपि स्फटिकादिमणिस्तत्तन्नीलाद्युपाधिभेदादनेकरूपो, यथा चैकोपि पुरुषस्तत्तत्क्रियाभेदात्पाचकः पाठक इति तद्वद् इति प्रशस्तपादभाष्यार्थः। (३) कार्य्यस्य=परापरादेः प्रत्ययस्य यः कारणविशेषो बहुतराल्पतरातीततपनपरिस्पन्दावच्छिन्नकालपिण्डसंयोगस्तदपेक्षः काल एकोपि परापरादिप्रत्ययहेतुर् इति न्यायवार्तिकार्थ इति तात्पर्य्यटीका० अ० १ आ० २ सू० ३९।

भेदं प्रतिपद्यते सन्तु त एवोपाधयोऽनागतादिव्यवहारहेतवः कृतमन्तर्गडुना कालेनेति साङ्ख्याचार्य्याः । तस्मान्न कालरूपतत्त्वान्तराभ्युपगम इति ॥ ३३ ॥

कालोऽनागतादिव्यवहारभेदं प्रवर्त्तयितुं नार्हति "तस्माद् यैरुपाधिभेदैः"=कार्यारम्भकार्य्यस्थितिकार्य्यनिरोधादिरूपैर् बहुतराल्पतरदिनकरोदयास्तमयक्रियादिरूपैर्वोपाधिभिर् "अयं"=काल अनागतादिव्यवहारं परापरादिव्यवहारं च भेदेन"प्रतिपद्यते"=प्राप्नोति "त एवोपाधयोऽनागतादिव्यवहारहेतवो" भवन्त्वलम् "अन्तर्गडुना"=अनर्थकेन कालेनेत्यर्थः,

तथा चाहुर्योगभाष्यकाराः–"स खल्वयं कालो वस्तुशून्यो बुद्धिनिर्माणः शब्दज्ञानानुपाती लौकिकानां व्युत्थितदर्शनानां वस्तुस्वरूप इवावभासते" इति,

केचित्तु "क्षणस्तु वस्तु पतित" इत्युत्तरभाष्यानुरोधात् क्षणाद्यानां कालत्वमेव न वस्त्वन्तरत्वम्, अन्यथा घटपटयोरिव क्षणयोर्द्वयोः सहभावापत्तिः,

---

(१) देशतःसन्निकृष्टयोर्युवस्थविरयोरेकस्मिन् शरीरावस्थाभेदानुमितातीतसूर्य्योदयास्तमयरूपक्रियाप्रचयबहुत्वान्तरितजन्मनि स्थविरे शरीरावस्थाभेदानुमितातीतसूर्योदयास्तमयरूपक्रियाप्रचयाल्पत्वान्तरितजन्मानं युवानमवधिं कृत्वा विप्रकृष्टा बुद्धिरुत्पद्यते, तामपेक्ष्य बहुतरसवित्रुदयास्तमयविशिष्टेन कालप्रदेशेन योगात्स्थविरे परत्वस्योत्पत्तिरित्यादिरूपा हि वैशेषिकादिकल्पना, तत्र मार्तण्डोदयास्तमयक्रियाप्रचयाल्पत्वबहुत्वविशिष्टादेव पिण्डात्परत्वापरत्वे भविष्यतः, कृतमत्र द्रव्यान्तरेण कालेनेति साङ्ख्याः । (२)यत्प्रागभावेन यः कालोऽवच्छिद्यते स तस्यानागतकालः, स्थितेन च वस्तुना यः कालोऽवच्छिद्यते स वर्त्तमानकालः, यत्प्रध्वंसेन यः कालोऽवच्छिद्यते स तस्यातीतकालः इति हि तार्किककल्पना, तत्रारम्भस्थितिनिरोधक्रियाभिरेवानागतादिव्यवहारसिद्धेरलं भेदकालकल्पनयेति भावः । (३) योग० पा० ३ सू० ५२ । (४) योगवार्तिककाराः । (५) 'विघ्नप्राचुर्यदोषात्कृतिरियमधुना नान्तमापाद्य कार्यं किं वेत्येवम्परेणाखिलनिगमविदात्मस्वरूपाभिधेन, शिष्येणातिप्रियेण द्रुतमियमधुना ह्यन्यविद्वन्मुखेन शिष्टा यत्नादकारि त्वविरतविविधार्चादिकार्याकुलेन ॥ १ ॥' यद्वा 'भाष्यानुरोधात्क्ष' इत्यन्तमकारि कृतिरजसा, श्री १०८ स्वाम्युदासीनबालरामेण विदुषादरात् तेष्व-

साम्प्रतविषयाणां बाह्येन्द्रियाणां विषयं विवेचयति—

बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि,
वाग्भवति शब्दविषया शेषाणि तु पञ्चविषयाणि ॥ ३४ ॥

"बुद्धीन्द्रियाणि" इति । "बुद्धीन्द्रियाणि तेषां"=दशाना-

क्रमिकत्वानापत्तिश्च, एवं च क्षणाद्याः सर्वेपि कालाः सर्ववस्तुपरिणामाधारा इति तत्त्वम्,

न च क्षणस्यैव कालत्वे 'विषमः कालो गतः' 'क्रूरः कालोयम्' इति क्षणसमूहात्मकमहाकालादिसाक्षात्कारानुपपत्तिः, क्षणातिरिक्तस्य तस्यानङ्गीकारादिति वाच्यं, क्षणसमूहानामेकबुद्धिविषयत्वारोपेण तद्व्यवहारोपपत्तेः, अत एव "कालनित्यत्वश्रुतिस्मृतयश्च प्रवाहरूपकालरूपा" इति योगवार्तिककृतः, एतेन 'पूर्वदेशसंयोगाद्यवच्छिन्नः परमाणुक्रियैव क्षणस्तदतिरिक्तो नित्यश्च' इति वैशेषिकोक्तमपास्तं, तन्मते विशिष्टस्य शुद्धानतिरेकाद्, अतिरिक्तत्वे स्वसिद्धान्तविरोध इत्युभयतस्पाशापत्तेः, नित्यकालान्तराभ्युपगमे प्रमाणाभावाच्च,

तस्मात्क्षणादिरूपः कालः क्षणद्वयाद्यवस्थायिपदार्थान्तरेभ्यो भिन्न एव स्थिरः पदार्थोऽभ्युपेय इति प्राहुः ॥ ३३ ॥

"साम्प्रतविषयाणां"=प्रकृतविषयाणां, "विशेषाः"=शान्तघोरमूढलक्ष-

---

न्तिमं द्वयं नष्टं पत्रयोरादरेण च, श्रीस्वाम्यात्मस्वरूपोदासीनेनातिधनव्ययात्, प्रियशिष्येण महता यत्नेनाकारि पूरणम्, शिष्टं यदेतच्छ्लोकस्य श्लोकस्याप्यग्रिमस्य च, एकेनान्येनाऽऽसमाप्ति कृतेरस्यास्ततः परम् । अत्रान्तिममकारीति पदद्वयं ण्यन्ताण्णिचि चिण्णन्तम् । (१) आनन्तर्यरूपक्रमस्य प्रतियोग्यनुयोगिघटितत्वेन तस्यानङ्गीकारे प्रतियोग्यनुयोगिघटितक्रमानुपपत्तेः। (२) क्षणाख्यः कालः सत्त्वादीनां द्रव्यरूपः परिणामविशेष एवेति यावत्। यावता समयेन चलितः परमाणुः पूर्वदेशमतिक्रामेदुत्तरदेशमुपसङ्गच्छेत च स कालः क्षण इति ज्ञेयम्। (३) "विशिष्टं शुद्धान्नातिरिच्यत" इति खलु तदीयः समयः। (४) "तन्मात्राण्यविशेषाणि अविशेषास्ततो हि ते, न शान्ता नापि घोरास्ते न मूढाश्चाविशेषिणः" इति विष्णुपुराणे।

मिन्द्रियाणां मध्ये "पञ्च विशेषाविशेषविषयाणि"='विशेषाः= स्थूलाः शब्दादयः=शान्तघोरमूढरूपाः पृथिव्यादिरूपाः, अवि-

णविशेषरहितानामत एवाविशेषसंज्ञकानां शब्दस्पर्शरूपरसगन्धतन्मात्रा-णां=शब्दादिधर्मैकसूक्ष्मद्रव्याणां विकारा एवाकाशवाय्वग्न्युदकभूमयः=पञ्च भूतानि='विशेषाः'=अभिव्यक्तशान्तादिविशेषकाः परिणामाः न तु तत्त्वान्त-रप्रकृतय एताः,

तथाऽस्मितालक्षणस्याभिमानमात्रवृत्तिकस्य श्रवणस्पर्शनदर्शनादिरूपवि-शेषसहितस्य सत्त्वप्रधानस्याहङ्कारस्य श्रवणस्पर्शनादिधर्मविशेषकाणि पञ्च ज्ञानेन्द्रियाणि, तस्यैव वचनादानविसर्गादिरूपविशेषशून्यस्य रजःप्रधान-स्याहङ्कारस्य वचनादानगमनविसर्गादिरूपधर्मविशेषकाणि पञ्च कर्मेन्द्रियाणि, 'अन्यत्रमना अभूवं', 'त्वयोक्तं नाश्रौषम्' इत्यादिव्यवहारानुरोधाच्चक्षुरा-दीनां वागादीनां च मनोधिष्ठितानामेव स्वस्वविषयेषु प्रवृत्तिरित्यु-भयप्रधानस्य श्रवणस्पर्शनादिवचनादानादिरूपधर्मविशेषशून्यस्याभिमानमा-त्रवृत्तिकस्याहङ्कारस्य श्रवणस्पर्शनादिवचनादानादिरूपधर्मविशेषकं मनश्च 'विशेषाः'=कार्याणीत्यर्थः,

ननु पञ्चतन्मात्राणामविशेषत्वे मानाभाव इति चेत्, न, शब्दतन्मात्राणि बुद्धिकारणकानि–अविशेषाद्–अस्मितावदित्यनुमानस्य मानत्वात्, "तन्मा-त्राण्यविशेषाणि" इति विष्णुपुराणाच्च,

तदेव=तन्मात्रं, ते एव=तन्मात्रे, तान्येव=तन्मात्राणि–"मयूरव्यंसकाद-यश्च' इति (पा० २।१।७२) सूत्रेण समासः, तन्मात्रं च तन्मात्रे च तन्मात्राणि च तन्मात्राणि च तन्मात्राणि चेत्येकशेषेण तन्मात्राणीति शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रं चेत्यर्थः,

एषूत्तरोत्तरं प्रति पूर्वपूर्वस्य हेतुतया शब्दतन्मात्रं शब्दमात्रधर्मकम्, एवं स्पर्शतन्मात्रं शब्दतन्मात्रकार्यतया शब्दस्पर्शमात्रधर्मकम्, एवं रूपतन्मात्रं शब्दस्पर्शतन्मात्रकार्यतया शब्दस्पर्शरूपमात्रधर्मकम्, एवं रसतन्मात्रं शब्द-स्पर्शरूपतन्मात्रकार्यतया शब्दस्पर्शरूपरसमात्रधर्मकम् । एवं गन्धतन्मात्रं श-ब्दस्पर्शरूपरसतन्मात्रकार्यतया शब्दस्पर्शरूपरसगन्धमात्रधर्मकमिति यावत्,

एवं च मात्रशब्देन शान्तादिविशेषस्यैव व्यावृत्तिर्न तु पूर्वपूर्वकार्यत्वे-नापन्नस्य गुणान्तरस्य,

(१) अहङ्कारस्याविशेषत्वे हेतुरस्मितालक्षणस्येति । (२) संसारवृक्षस्यास्मि-तामात्रपरिणामः=महत्तत्त्वं, बुद्धिपरिणामस्त्वहङ्कारादिः । (३) तेनेन्द्रियभावा-पन्नाहङ्कारस्य व्यावृत्तिः । (४) स्थूलभावमपाकरोतीति पाठान्तरम् ।

शेषाः=तन्मात्राणि=सूक्ष्माः शब्दादयः, मात्रशब्देन भूतभाव-मपाकरोति, विशेषाश्चाविशेषाश्च=विशेषाविशेषाः, त एव वि-षया येषां बुद्धीन्द्रियाणां तानि तथोक्तानि'।

तत्रोर्ध्वस्रोतसां योगिनां च श्रोत्रं शब्दतन्मात्रविषयं स्थू-

---

तन्मात्राणां पूर्वपूर्वकार्यत्वाभ्युपगमे मानं तु "आकाशाद्वायुः, वायोरग्निः, अग्नेरापः अद्भ्यः पृथिवी" इति तैत्तिरीयकोपनिषद्वाक्यम्,—कार्याणां कारण-गुणपूर्वकत्वाभ्युपगमाद्,

एतानि च तन्मात्राणि नामसाहङ्काराच्छब्दादिक्रमेणोत्पद्यन्ते इत्युक्तम्, "ऊर्ध्वस्रोतसाम्"—'ऊर्ध्वमेव न कदाचिदधःस्रोतः=रेतःस्रोतो येषां ते=

---

(१)न च भीष्मस्योर्ध्वरेतस्त्वोक्तिरयुक्ता, यतो महाभारते—"महता राजयोगेन परिवारेण संवृतः, स्तूयमानो महातेजा भीष्मस्याग्नीननुव्रजन्, प्राप्तोस्मि समये राजन्नग्नीनादाय ते विभो" इति वाक्ये तस्मिन्नग्निहोत्रित्वसूचकदक्षिणाग्निगार्हपत्याहवनी-याख्याग्नित्रयसम्बन्धस्याग्नीनिति बहुवचनेन प्रतीतेः, तेषां चापत्नीकेन सम्बन्धा-संभवाच्च। पत्न्याश्च विवाहसंस्कारेण संपाद्यमानता, स च संस्कारः "अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा, दाराधीनस्तथा स्वर्गः पितृणामात्मनश्च ह" इति, "त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीं, त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति स-त्वरः" इति च मनुना, "अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम्, अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम्" इति याज्ञवल्क्येन, कान्तां=वोढुर्मनोनयनानन्द-कारिणीम् इति तद्व्याख्याकृता विज्ञानेश्वरेण चोक्तेरूर्ध्वरेतस्त्वं विरुद्धम् इति वाच्यं,—"वैयाघ्रपद्यगोत्राय साङ्कृत्यप्रवराय च, गङ्गापुत्राय भीष्माय आ-जन्मब्रह्मचारिणे, अपुत्राय ददाम्येतदुदकं भीष्मवर्मणे, वसूनामवताराय शन्त-नोरात्मजाय च, अर्घ्यं ददामि भीष्माय आबाल्यब्रह्मचारिणे" इति पाद्मे तर्पणा-र्घ्यदानमन्त्राभ्याम्, "अयं पितरमाज्ञाय कामार्तं शन्तनुं पुरा, ऊर्ध्वरेतसमात्मानं चकार" इति महाभारतीयवचनेन चास्य नैष्ठिकब्रह्मचारित्वस्य कण्ठत एवोद्घुष्य-माणत्वात्। तस्याग्निहोत्रादिसम्बन्धाद्युक्तिस्तु ब्रह्मचारिणोऽप्यग्निहोत्रादिकं क्वचिद् भवतीत्यनुमितश्रुतिमूला। न च "त्वां हि राज्ये स्थितं स्फीते समग्राङ्गमरोगिणं, स्त्रीसहस्रैः परिवृतम्" इति महाभारते तस्य सपत्नीकत्वमुच्यत इति परस्परविरुद्धा एवैता उक्तय इति वाच्यम्। पत्नीभिन्नस्त्रीसम्बन्धोक्त्या विरोधानवतारात्। अत एव तस्यैव चतुर्थचरणं "पश्यामीहोर्ध्वरेतसम्" इति पठ्यत इति दिक्। (२) "योगिनां च"=तद्भिन्नानामष्टाङ्गयोगनिष्ठानां चेत्यर्थः। तदुक्तं ब्रह्मवैवर्ते-"स्वर्णे लोष्टे गृहेऽ-

लशब्दविषयं च, अस्मदादीनां तु स्थूलशब्दविषयमेव । एवं तेषां त्वक् स्थूलसूक्ष्मस्पर्शविषया, अस्मदादीनां तु स्थूलस्पर्श-विषयैव । एवं चक्षुरादयोपि तेषामस्मदादीनां च रूपादिषु सूक्ष्मस्थूलविषयेषु द्रष्टव्याः ।

एवं कर्मेन्द्रियेषु मध्ये "वाग्भवति शब्दविषया"=स्थूल-शब्दविषया-तद्धेतुत्वात् न तु शब्दतन्मात्रस्य हेतुः, तस्या-ऽऽहङ्कारिकत्वेन वागिन्द्रियेण सहैककारणकत्वात् । "शेषाणि तु"=चत्वारि=पायूपस्थपाणिपादाख्यानि "पञ्चविषयाणि"

जनकसनकसनन्दनादयस्तथा भीष्मादयो नैष्ठिका ब्रह्मचारिणः, संन्यासिनोपि तेषाम्' इत्यर्थः, उपकुर्वाणकब्रह्मचारिणां तन्न सम्भवति-तेषां विवाहार्थ-प्रवृत्तेः एवं च ऊर्ध्वरेतस्त्वम्=अष्टविधमैथुनेच्छारहितत्वम् ।

ननु वागिन्द्रियं शब्दतन्मात्रं प्रति, कारणं स्याद्, इत्यत आह-"एवं कर्मेन्द्रियेषु" इति, वागिन्द्रियं-स्थूलशब्दविषयं-स्थूलशब्दहेतुत्वात्-शब्द-तन्मात्रवदित्यनुमानाकारः । शब्दतन्मात्रस्य वागिन्द्रियस्याप्यहङ्कारादेवो-त्पन्नत्वेन तत उत्पन्नयोः कार्यकारणभावासम्भवादिति भावः,

"चत्वारि"=पायूपस्थपाणिपादाख्यानि "पञ्चविषयाणि"=पञ्च विषया

रण्ये सुस्निग्धे चन्दने तथा, समताभावना यस्य स योगी परिकीर्तितः" इति, भगवद्गी-तायामपि-"आत्मौपम्येन सर्वत्र समं पश्यति योर्जुन, सुखं वा यदि वा दुःखं स योगी परमो मतः" इति, कौर्मेपि-"सर्वकर्माणि सन्न्यस्य समाधिमचलं श्रितः, य आस्ते निश्चलो योगी स सन्न्यासी न पञ्चमः=" इत्याद्युक्त्वा "योगी च त्रिविधो ज्ञेयो भौतिकः साङ्ख्य एव च, तृतीयोऽत्याश्रमी प्रोक्तो योगमुत्तममास्थितः" इति । (२) एवं च चित्तस्य स्वत एव स्थूलसूक्ष्मयावदर्थसाक्षात्कारसामर्थ्ये सत्यपि विषयान्तरव्यासङ्गवासनादोषवशेन तत्प्रतिबन्धाद्वृत्त्यन्तरोदय इति स्थूलवस्तुनः साक्षात्कार एव दूरं गते कुतो वा सूक्ष्मवस्तुनः साक्षात्कार इति चेद्-योगेन तत्प्रति-बन्धस्य निःशेषतो विगमे स्वत एव स्थूलसूक्ष्माणां यावतां वस्तूनां साक्षात्कारो भवतीति तेषां शब्दतन्मात्रादिविषयकं स्थूलशब्दादिविषयकं च श्रोत्रादिकं भवति, अस्मदादीनां तु तद्भिन्नानां स्थूलशब्दादिविषयकमेव तद्भवति न सूक्ष्मशब्दा-दिविषयकमिति भावः,

(१) लोकेप्येकस्मादुत्पन्नयोर्द्वयोः कार्यकारणभावो न युज्यत इति प्रसिद्धम् ।

पाण्याद्याहार्याणां घटादीनां पञ्चशब्दाद्यात्मकत्वादिति ॥३४॥
साम्प्रतं त्रयोदशसु करणेषु केषाञ्चिद्गुणभावं, केषाञ्चित्प्रधानभावं सहेतुकमाह—

सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्,
तस्मात्त्रिविधं करणं द्वारि द्वाराणि शेषाणि ॥ ३५ ॥

"सान्तःकरणा" इति । "द्वारि"=प्रधानं, "शेषाणि"=करणानि बाह्येन्द्रियाणि "द्वाराणि" गौणानि, तैरुपनीतं "सर्वं विषयं" समनोऽहङ्कारा "बुद्धिः" "यस्माद्" "अवगाहते"=अध्यवस्यति "तस्माद्" बाह्येन्द्रियाणि द्वाराणि, द्वारवती च सान्तःकरणा बुद्धिरिति ॥ ३५ ॥

न केवलं बाह्येन्द्रियाण्यपेक्ष्य प्रधानं बुद्धिः, अपि तु ये अप्यहङ्कारमनसी द्वारिणी ते अप्यपेक्ष्य बुद्धिः प्रधानमित्याह—

एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः,
कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति ॥ ३६ ॥

येषां तानि—पाण्यादिविषयाणां=पाण्यादिग्राह्याणां घटादीनां शब्दस्पर्शरूपरसगन्धात्मकत्वेन शब्दादिपञ्चविषयाणि भवन्तीत्यर्थः, एवं च वाक् शब्दमात्रविषया, अन्यानि तु पञ्चविषयाणीति कर्मेन्द्रियेषु वैलक्षण्यमिति भावः ॥३४॥

द्वारमस्यास्तीति "द्वारि"[1] 'बाह्यकरणानि द्वारतुल्यानि द्वारविशिष्टगृहतुल्यां बुद्धिमुपकुर्वन्ति, "तैरुपनीतं"=बाह्यकरणैरुपस्थापितम्, "समनोऽहङ्कारा बुद्धिर्" इति, अन्तःकरणस्य त्रिविधत्वं "त्रिविधं करणम्" इति कारिकांशेनाक्षिप्तमेव स्पष्टीकरोति, अवगाहनमत्र न विलोडनं किन्तु बुद्धिकर्म्माध्यवसायपर्य्यवसायीत्याह—"अवगाहते=अध्यवस्यति" इति, "द्वारवती च सान्तःकरणा बुद्धिरिति" इति—मनोऽहङ्कारयोरपि द्वारवत्त्वरूपं प्राधान्यं बाह्यकरणापेक्षयाऽभिमतं, बुद्ध्यपेक्षया तु तयोरपि द्वारत्वरूपं गौणत्वमेवेत्युपरिष्टात्स्पष्टीकरिष्यति ॥ ३५ ॥

बाह्येन्द्रियापेक्षयाऽहङ्कारमनसोः प्राधान्यं, बुद्ध्यपेक्षया तु तयोरङ्गत्वमेवेत्युपक्षिपति—"न केवलम्" इत्यादिना, मनसोऽल्पाच्तरत्वेऽप्यजाद्यदन्तत्वादहङ्कारस्य पूर्वनिपाताद् "अहङ्कारमनसी" इति साधु, "ते अप्यपेक्ष्य" इति,

---

(१) मत्त्वर्थीय इनिः । (२) कारिकायां—३६ ।

"एत"इति । यथा हि ग्रामाध्यक्षाः कौटुम्बिकेभ्यः करमादाय विषयाध्यक्षाय प्रयच्छन्ति, विषयाध्यक्षश्च सर्वाध्यक्षाय, स च भूपतये, तथा बाह्येन्द्रियाणि आलोच्य मनसे समर्पयन्ति, मनश्च सङ्कल्प्याहङ्काराय, अहङ्कारश्चाभिमत्य सर्वाध्यक्षभूतायां बुद्धौ । तदिदमुक्तं—"पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति" इति । बाह्येन्द्रियमनोऽहङ्काराश्च="गुणविशेषाः" =गुणानां=सत्त्वरजस्तमसां विकाराः ते तु परस्परविरोधशीला अपि पुरुषार्थेन भोगापवर्गरूपेणैकवाक्यतां नीताः—यथा—वर्तितैलवह्नयः सन्तमसापनयेन रूपप्रकाशाय मिलिताः प्रदीपे—एवम् "एते गुणविशेषा" इति योजना ॥ ३६ ॥

कस्मात्पुनर्बुद्धौ प्रयच्छन्ति? न तु बुद्धिरहङ्काराय द्वारिणे मनसे वेत्यत आह—

सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः,
सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम् ॥ ३७ ॥

"सर्वम्"इति । पुरुषार्थस्य प्रयोजकत्वात्तस्य यत्साक्षा-

प्रगृह्यत्वात्सन्ध्यभावः । "कौटुम्बिकेभ्यः"=गृहिभ्यः "तपःषड्भागमक्षय्यं ददत्यारण्यका हि नः" इत्युक्तत्वात्पूर्वराजभिरारण्यकाः करगोचरीकृता इति ध्वन्यते, विषयो=जनपद-ग्रामसमूहात्मकः, "सङ्कल्प्य"=बाह्येन्द्रियोपलब्धक्षणिकसंवेदनस्मृतीरेकत्वेन संग्रथ्येत्यर्थः, "अभिमत्य"=संवेदनस्मृतिसंदर्भमात्मीयत्वेन मत्वेति यावत्, "पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति"= बुद्धावर्थं प्रदाय पुरुषस्य प्रकाशयन्तीत्यर्थः, एकवाक्यताशब्दोऽत्रैककार्यकारितोपलक्षकः, विरुद्धानामेकवाक्यतायां दृष्टान्तमाह—"वर्तितैल" इति ॥ ३६ ॥

बुद्धिमनोऽहङ्कारेषु कथमन्तःकरणत्वाविशेषेऽपि बुद्धेः प्राधान्यं न त्वितरयोरित्याशङ्कायामाह—"सर्वं प्रत्युपभोगम्" इति, "प्रयोजकत्वात्"=प्रकृति-

---

(१) मनसे चेत्यत इति पाठान्तरम् । (२) अन्यथा क्षणिकसंवेदनास्वेकस्या अनुभवकालेऽपरासां विनाशात्कस्यापि वस्तुनो यथावद्ग्रहणं न स्यादित्यभिसन्धिः । (३) उद्देश्यस्य सम्बन्धत्वेन विवक्षया षष्ठी ।

त्साधनं तत्=प्रधानं, बुद्धिश्चास्य साक्षात्साधनं, तस्मात्सैव प्रधानं, यथा–सर्वाध्यक्षः साक्षाद्राजार्थसाधनतया प्रधानम् । इतरे तु ग्रामाध्यक्षादयस्तं प्रति गुणभूताः । बुद्धिर्हि पुरुषसन्निधानात्तच्छायापत्त्या तद्रूपेव सर्वविषयोपभोगं "पुरुषस्य साधयति"=सुखदुःखानुभवो हि भोगः, स च बुद्धौ, बुद्धिश्च पुरुषरूपेवेति, सा च पुरुषमुपभोजयति–यथाऽर्थालोचनसङ्कल्पाभिमानाश्च तत्तद्रूपपरिणामेन बुद्धावुपसङ्क्रान्ताः,–तथेन्द्रियव्यापारा अपि बुद्धेरेव स्वव्यापारेण=अध्यवसायेन सहैकव्यापारीभवन्ति–यथा वा–स्वसैन्येन सह ग्रामाध्यक्षादिसैन्यं सर्वाध्यक्षस्य भवति, "सर्वं"=शब्दादिकं "प्रति" य उपभोगः पुरुषस्य तं साधयति, ।

ननु पुरुषस्य सर्वविषयोपभोगसंपादिका यदि बुद्धिः–तर्हि निर्मोक्षः, इत्यत आह–"सैव च" इति । पश्चात् प्रधानपुरुषयोरन्तरं=विशेषं "विशिनष्टि"=करोति–यथौदनपाकं पचतीति । अनेनापवर्गः पुरुषार्थो दर्शितः । ननु प्रधानपुरुषयोरन्तरस्य

प्रवर्त्तकत्वादित्यर्थः । "तद्रूपेव" इति, इव[1]शब्दोऽवास्तवत्वद्योतकः, बुद्धिर्न वस्तुत आत्माभिन्ना, तथापि तथाविधा लक्ष्यते लौकिकैरित्यर्थः, अनध्यवसितानामिदन्त्वान्यत्वाभ्यामनिश्चीयमानानामर्थानां पुरुषार्थाप्रयोजकत्वेन बुद्धिव्यापाराध्यवसायसमनुक्रान्तैरेवेन्द्रियव्यापारैः पुरुषार्थसिद्धिरित्याह "स्वव्यापारेण" इत्यादिना, "स्वसैन्येन"=सर्वाध्यक्षसैन्येन बुद्धिव्यापारस्थानीयेन, 'ग्रामाध्यक्षादिर्' इन्द्रियव्यापारस्थानीयः, यथा–'पाकं पचति' इत्यत्र पचेः क्रियासामान्यार्थता–तथा "विशेषं विशिनष्टि" इत्यत्र 'अन्तरं विशिनष्टि' इति द्वितीयस्य वाक्ये विपूर्वस्य शिषेः क्रियासामान्यार्थता, तदेवाह–"यथौदन" इति, "सूक्ष्मम्" इति, अन्तरस्य सूक्ष्मत्वादेवावास्तवोऽपि भोगो

---

(१) उत्प्रेक्षावाचकस्येवशब्दस्यावास्तवत्वद्योतकत्वं प्रसिद्धम् ।

कृतकत्वादनित्यत्वं तत्कृतस्य मोक्षस्यानित्यत्वं स्याद् इत्यत आह–"सूक्ष्मम्" इति। "सूक्ष्मं"=दुर्लक्ष्यं तदन्तरमित्यर्थः। प्रधानं सविकारमन्यद्, अहमन्य, इति विद्यमानमेवान्तरमविवेकेनाविद्यमानमिव बुद्धिर्बोधयति न तु करोति येनानित्यत्वमित्यर्थः। करणं च प्रतिपादनम् ॥ ३७ ॥

तदेवं करणानि विभज्य विशेषाविशेषान् विभजते–

तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः,
एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च ॥ ३८ ॥

शब्दादितन्मात्राणि, सूक्ष्माणि, न चैषां शान्तत्वादिरस्त्युपभोगयोग्यो विशेष इति मात्रशब्दार्थः। अविशेषानुक्त्वा विशेषान्वक्तुमुत्पत्तिमेषामाह–"तेभ्यः"=तन्मात्रेभ्यो यथासङ्ख्यमेकद्वित्रिचतुःपञ्चभ्यो "भूतानि"=आकाशानिलानलस-

---

वास्तव इवेति भावः, अन्तरं सिद्धमेवेति तत्करणमत्र प्रतिपादनोपलक्षणम् ॥ ३७ ॥

"तन्मात्राणि"=तान्येवेति मयूरव्यंसकादित्वान्नित्यसमासः, एवशब्दो विग्रहवाक्ये उपभोगयोग्यसकलविशेषयोगव्यवच्छेदार्थः, "विशेषान्वक्तुम्" इति, "तुमुण्ण्वुलौ क्रियायाम्" इति (३।३।१०।पा०) सूत्रेण तुमुन्, विशेषोक्तिफलिका मत्कर्तृका वर्तमानकालिक्येषामुत्पत्त्युक्तिरिति बोधः, "एकद्वि" इत्यादि, आकाशतन्मात्रात्केवलादाकाशमुत्पद्यते, तस्मादेव वायुतन्मात्रसहिताद्वायुर्, आकाशवायुतन्मात्राभ्यां तेजस्तन्मात्रसहिताभ्यां वह्निर्, आकाश-

---

(१) "त्वादनित्यत्वं, तत्कृतकत्वं मोक्षस्य स्यादित्यत आह–"सूक्ष्मम्" इति। दुर्लक्ष्यमित्यर्थः। प्रधानादन्य इति विद्यमानमेवान्तरमविवेकिनाऽविद्यमानमिव बुद्धिर्बोधयति न तु करोति येनानित्यत्वमित्यर्थः। तदन्तरकरणं च=प्रतिपादनम्। अनेनापवर्गः पुरुषार्थो दर्शितः" इति श्लोकान्तव्याख्यायां पाठान्तरम्। (२) 'आह-"विशिनष्टि" प्रधानं सविकार' इति क्वचित्पाठः। (३) 'तेनापवर्गः=पुरुषार्थो दर्शितः। "सूक्ष्मं"=दुर्लक्ष्यं तदन्तरमित्यर्थः' इति क्वचित्पाठः। (४) एतच्च नैयायिकानां सम्मतं, 'पञ्चीकृतेभ्यो भूतेभ्यः स्थूलभूतान्युत्पद्यन्ते' इति वेदान्तिनयेन तु विरुद्धम् ॥

लिलावनिरूपाणि "पञ्च" । "पञ्चभ्यः"=तन्मात्रेभ्योऽस्त्वेषां भूतानामुत्पत्तिः,विशेषत्वे किमायातम्?इत्यत आह—"एते स्मृता विशेषा" इति, कुतः? "शान्ता घोराश्च मूढाश्च" । चकार एको हेतौ, द्वितीयः समुच्चये । यस्मादाकाशादिषु स्थूलेषु सत्त्वप्रधानतया केचिच्छान्ताः=सुखाः=प्रसन्नाः=लघवः, केचिद्रजःप्रधानतया घोराः=दुःखाः=अनवस्थिताः, केचित्तमःप्रधानतया मूढाः=विषण्णाः=गुरवः । तेऽमी परस्परव्यावृत्ता अनुभूयमाना 'विशेषा'इति, 'स्थूला'इति चोच्यन्ते, तन्मात्राणि त्वस्मदादिभिः परस्परव्यावृत्तानि नानुभूयन्ते इति 'अविशेषा' इति, 'सूक्ष्मा'इति चोच्यन्ते ॥ ३८ ॥

विशेषाणामवान्तरविशेषमाह—

सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः,
सूक्ष्मास्तेषां नियता मातापितृजा निवर्त्तन्ते ॥ ३९ ॥

"त्रिधा विशेषाः स्युः" । तान् विशेषप्रकारानाह—"सूक्ष्मा" इत्यादि । सूक्ष्मदेहाः परिकल्पिताः, "मातापितृजाः" षाट्कौशिकाः—तत्र मातृतो लोमलोहितमांसानि—पितृतः स्नाय्वस्थिम-

---

वायुतेजस्तन्मात्रेभ्योऽप्तन्मात्रसहितेभ्यो जलम्, आकाशवायुतेजोऽप्तन्मात्रेभ्यः क्षितितन्मात्रसहितेभ्योऽवनिरुत्पद्यत इति फलितोर्थः, मितसारवचसाचार्येणोपन्यस्ते चद्वये नैकेनापि पादपूरणार्थकेन भवितव्यमित्यभिप्रेत्याह—"चकार एक" इति, तथा च यत एते शान्ता घोरा मूढाश्च तत एषां विशेषत्वमित्यर्थः, शान्तघोरमूढशब्दैश्चात्र गुणत्रयधर्मा उपलक्षिता इत्याह—"सत्त्वप्रधानतया" इत्यादि, "परस्परव्यावृत्तानि"=इतरेतरं भिन्नानि ॥ ३८ ॥

"परिकल्पिताः"=अनुमानगम्या न तु स्थूलशरीरवत्प्रत्यक्षोपलब्धाः, ननु सूक्ष्माणां तन्मात्राणामविशेषत्वमुक्तम्, अत्र पुनः सूक्ष्मदेहानां विशेषमध्ये कथं परिगणनमिति चेद्—इन्द्रियैः शान्तघोरमूढैरन्वितत्वात्सूक्ष्मदेहानां विशेषत्वमित्यनुपदं[1] स्फुटीभविष्यति । षड्भिः कोशैर्निर्मिताः="षाट्कौशिकाः", के

---

(१) कारिकास०—४० ।

ज्ञान इति षट्को गणः, 'प्रकृष्टानि=महान्ति भूतानि'=प्रभूतानि तैः "सह" । सूक्ष्मशरीरमेको विशेषः, मातापितृजो द्वितीयः, महाभूतानि तृतीयः । महाभूतवर्गे च घटादीनां निवेश इति । सूक्ष्ममातापितृजयोर्देहयोर्विशेषमाह-"सूक्ष्माः" "तेषां"=विशेषाणां मध्ये ये—ते "नियताः"=नित्याः, "मातापितृजास्" तु "निवर्त्तन्ते"—रसान्ता वा भस्मान्ता वा विडन्ता वेति ॥ ३९ ॥

सूक्ष्मशरीरं विभजते—

पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्य्यन्तं,
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम् ॥ ४० ॥

"पूर्वोत्पन्नम्"इति । "पूर्वोत्पन्नं"=प्रधानेनादिसर्गे प्रतिपुरुषमेकैकमुत्पादितम्, "असक्तम्"=अव्याहतं शिलामप्यनुप्रविशति, "नियतम्"—आ चादिसर्गादा च महाप्रलयादवतिष्ठते, "महदादिसूक्ष्मपर्य्यन्तं"=महदहङ्कारैकादशेन्द्रियपञ्चतन्मात्रपर्यन्तम्—एषां समुदायः=सूक्ष्मशरीरं शान्तघोरमूढैरिन्द्रियैरन्वितत्वाद्विशेषः ।

नन्वस्त्वेतदेव शरीरं भोगायतनं पुरुषस्य, कृतं दृश्यमानेन षाट्कौशिकेन शरीरेणेत्यत आह—"संसरति"इति, उपात्तमु-

---

ते षट् कोशाः ? कुतो वा ते शरीरमुपसङ्क्रामन्ति ? इत्यत आह—"मातृतो लोम" इत्यादि, "रसान्ता"=रसा पृथिवी सैवान्ते येषां ते=पृथिवीभावापन्ना इत्यर्थः, "विड्"=विष्ठा, तिस्रो ह्यवसाने शरीरस्य गतयः-क्षितौ निर्वातस्य गलितस्य क्षितिभावो, दग्धस्य भस्मीभावः, क्रव्याद्भिर्भुक्तस्य च विष्ठात्वापत्तिरिति भावः ॥ ३९ ॥

सूक्ष्मशरीरस्य सूक्ष्मत्वात्तन्मात्रवदविशेषत्वं कुतो न ? इति समुत्थितामाशङ्कामपाकरोति—"शान्तघोर" इत्यादिना, सूक्ष्मशरीरस्य बाह्यकर्म्मानुष्ठानमेव नास्ति, धर्माधर्मादयो बौद्धा भावास्तु तदधिवसन्त्येव बुद्धिद्वारेण तत

---

१ सूक्ष्मशरीरम् ।

यात्तं षाट्कौशिकं शरीरं जहाति, हायंहायं चोपादत्ते । कस्मात् ? "निरुपभोगं" यतः षाट्कौशिकं शरीरं विना सूक्ष्मं शरीरं निरुपभोगं, तस्मात्संसरति ।

ननु धर्माधर्मनिमित्तः संसारः, न च सूक्ष्मशरीरस्यास्ति तद्योगः, तत्कथं संसरति ? इत्यत आह—"भावैरधिवासितं"= धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याणि भावाः, तदन्विता बुद्धिः, तदन्वितं च सूक्ष्मशरीरमिति तदपि भावैरधिवासितं, यथा—सुरभिचम्पकसंपर्काद्वस्त्रं तदामोदवासितं भवति । तस्माद्भावैरेवाधिवासितत्वात्संसरति । कस्मात्पुनः प्रधानमिव महाप्रलयेऽपि तच्छरीरं न तिष्ठति? इत्यत आह—"लिङ्गम्" । लयं गच्छतीति लिङ्गं, हेतुमत्त्वेन चास्य लिङ्गत्वमिति भावः ॥ ४० ॥

स्यादेतद्—बुद्धिरेका साहङ्कारेन्द्रिया कस्मान्न संसरति ? कृतं सूक्ष्मशरीरेणाप्रामाणिकेनेत्यत आह—

चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा च्छाया,
तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम् ॥ ४१ ॥

'लिङ्गनाद्—ज्ञापनाद्बुद्ध्यादयो="लिङ्गं", तदनाश्रितं "न तिष्ठ-

---

एव चास्य संसरणमित्याह—"धर्माधर्म" इत्यादि, यद्यत्प्राकृतं तत्तत्सर्वं त्रिगुणमयत्वाद्धर्माधर्मादिसत्त्वकमेव, गुणातीतत्वात्पुरुष एको वस्तुतो धर्माधर्माद्यसंबद्धः, यस्मात्सूक्ष्मत्वेऽपि लिङ्गशरीरस्य धर्मादिसंबन्धोऽस्त्येवेति सिद्धान्तः, कस्मान्महाप्रलयेऽपि लिङ्गशरीरस्य लय इत्याकाङ्क्षायामाह—"हेतुमत्त्वेन" इति, यद्यद्धेतुमत्=कारणवत्=कार्यमिति यावत्, तस्य स्वकारणे लयोऽवश्यम्भावीति व्याप्तिग्रहात्प्रधानकार्यस्य सर्वस्यापि साक्षात्परम्परया वा प्रधाने लयः, ततश्च सूक्ष्मशरीरस्यापि लयो महाप्रलये भवत्येव ॥ ४० ॥

"अप्रामाणिकेन" इति, प्रत्यक्षानुपलब्धेनेति भावः, अनुमानाच्छ्रुतिस्मृतिभ्यां च तत्सिद्धिर्हि प्रतिपादयिष्यते, अत्र लिङ्गशब्दस्य व्युत्पत्तिलभ्यो बुद्ध्यादिरर्थ इत्याह—"लिङ्गनाद्" इति, व्याप्तिपक्षधर्मताज्ञानपूर्वकमनु-

ति" । जन्मप्रायणान्तरालेबुद्ध्यादयः–प्रत्युत्पन्नशरीराश्रिताः–प्रत्युत्पन्नपश्चतन्मात्रवत्त्वे सति बुद्ध्यादित्वाद्-दृश्यमानबुद्ध्यादिवत् । "विना विशेषैर्" इति । सूक्ष्मैः शरीरैरित्यर्थः । आगमश्चात्र भवति–"अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलाद्" इति । अङ्गुष्ठमात्रत्वं सूक्ष्मतामुपलक्षयति । आत्मनो निष्कर्षासंभवेन सूक्ष्ममेव शरीरं पुरुषः । तदपि हि पुरि–स्थूलशरीरे शेते ॥४१॥

एवं सूक्ष्मशरीरास्तित्वमुपपाद्य– यथा संसरति, येन च हेतुना, तदुभयमाह—

पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन,
प्रकृतेर्विभुत्वयोगान्नटवद् व्यवतिष्ठते लिङ्गम् ॥ ४२ ॥

पुरुषार्थेन हेतुना प्रयुक्तं, निमित्तं=धर्मादि, नैमित्तिकं, तेषु-तेषु निकायेषु यथायथं षाट्कौशिकशरीरग्रहः । स हि धर्मादिनिमित्तप्रभवः । निमित्तं च नैमित्तिकं च तत्र यः प्रसङ्गः=प्रस-

---

मानं सूक्ष्मशरीरावस्थानसाधकमुपन्यस्यति "जन्म" इत्यादिना, प्रायणं=मृत्युः, अङ्गुष्ठमात्रत्वं पुरुषस्यात्र सूक्ष्मत्वोपलक्षकमित्युक्तं, "हृद्यपेक्षया तु मनुष्याधिकारत्वाद्" इति बादरायणीयसूत्रेण तु मनुष्यहृदयसंबद्धत्वादङ्गुष्ठमात्रत्वमुक्तम्, आत्मनो दिक्कालाद्यनवच्छिन्नस्य न प्राक् प्रवेशाद्देहे न वा पश्चात् ततो निष्कर्षणं संभावयितुं शक्यत इति सूक्ष्मशरीरस्योत्क्रान्तिगत्यागतिप्रभृतीनि कर्माणीत्याह–"आत्मन" इत्यादिना, "तदन्तरप्रतिपत्तौ रंहतिसंपरिष्वक्तः प्रश्ननिरूपणाभ्याम्", इत्यादिनाऽपि भूतसूक्ष्मैः सहितस्यैवेन्द्रियादेरुत्क्रमणमुक्तं–तदप्यत्रानुसन्धेयम्, सूक्ष्मशरीरस्य पुरुषत्वं कथम्? इत्यत आह–"पुरि स्थूल" इत्यादिना ॥ ४१ ॥

"पुरुषार्थेन" इति, सूक्ष्मशरीरस्य संसरणे पुरुषार्थ एवोद्देश्यं, धर्मादि च प्रवर्त्तकं=कारणं, स्थूलशरीरग्रहणं च धर्मादिकृतमव्यवहितं फलं, धर्मादौ स्थूलशरीरग्रहणकारणप्रसङ्गेन स्थूलशरीरग्रहणं, गृहीत्वा चेदृशं

---

(१) वेदां० सू० (२।३।२५) । (२) वेदा० सू० (३।१।१) ।

क्तिस्तया । "नटवद् व्यवतिष्ठते" "लिङ्ग"=सूक्ष्मशरीरं, यथा हि–नटस्तान्तां भूमिकां विधाय परशुरामो वाऽजातशत्रुर्वा वत्सराजो वा भवति- एवं तत्तत्स्थूलशरीरग्रहणाद् देवो वा, मनुष्यो वा पशुर्वा, वनस्पतिर्वा, भवति–सूक्ष्मं शरीरमित्यर्थः । कुतस्त्यः पुनरस्येदृशो महिमा ? इत्यत आह–"प्रकृतेर्विभुत्वयोगात्" । तथा च पुराणं–"वैश्वरूप्यात्प्रधानस्य परिणामोऽयमद्भुतः" इति ॥ ४२ ॥

"निमित्तनैमित्तिकप्रसङ्गेन" इत्युक्तं, तत्र निमित्तं नैमित्तिकं च विभजते—

सांसिद्धिकाश्च भावाः प्राकृतिका वैकृताश्च[1] धर्माद्याः,
दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः ॥ ४३ ॥

"वैकृताः"=वैकृतिकाः=नैमित्तिकाः "प्राकृतिकाः"=स्वाभाविकाः="सांसिद्धिका भावाः"-यथा-सर्गादावादिविद्वान् भगवान् कपिलो महामुनिर्धर्मज्ञानवैराग्यैश्वर्यसंपन्नः प्रादुर्बभूवेति स्मरन्ति। "वैकृताश्च भावाः"=असांसिद्धिकाः=उपायानुष्ठानोत्पन्नाः-य-

---

शरीरं पुनर्धर्मादौ प्रवृत्तिरिति संसरणानुपरम आ विवेकाद्, अन्योऽन्याश्रयदोषस्त्वनादित्वेन संसृतेर्बीजाङ्कुरवद् वारणीय इत्यभिप्रायः, "भूमिकां"=वर्णिकापरिग्रहं=पात्रविशेषवेषादिकमिति यावद्, "अजातशत्रुः"=युधिष्ठिरः, परशुरामो वीरचरितादौ–युधिष्ठिरो वेणीसंहारादौ वत्सराजश्च रत्नावल्यादावित्यनुसन्धेयम्, सूक्ष्मशरीरस्य कुतो वैश्वरूप्यम्? इत्यत आह–"प्रकृतेर्" इति, वैश्वरूप्यं=नानारूपत्वम् ॥ ४२ ॥

धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याणि निमित्तरूपाः करणाश्रिताः भावाः, तत्कृता संसृतिः, एते च भावा द्विविधाः–स्वभावसिद्धाः पुरुषप्रयत्नसाध्याश्च, स्वभावसिद्धाः प्राकृतिका उच्यन्ते, प्रयत्नसाध्याश्च वैकृतिका उच्यन्ते, प्राकृतिकानां धर्मादीनाम् उत्तमभावानामुदाहरणं–भगवान् कपिलः, वैकृतिकानां च तेषामेवोदाहरणं–भगवान् वाल्मीकिः,

---

(१) "वैकृतिकाः" इति पाठस्तु च्छन्दोभङ्गभयादुपेक्षणीयः ।

था प्राचेतसप्रभृतीनां महर्षिणाम् । एवमधर्माज्ञानावैराग्यानैश्वर्याण्यपि । एते कुत्र दृष्टाः? इत्यत आह—"करणाश्रयिण" इति । करणं=बुद्धितत्त्वं, कार्यं=शरीरं, तदाश्रयिणः । तस्यावस्थाः=कललबुद्बुदमांसपेशीकरण्डाङ्गप्रत्यङ्गव्यूहाः गर्भस्थस्य, ततो विनिर्गतस्य बालस्य बाल्यकौमारयौवनवार्द्धकानीति ॥ ४३ ॥

अवगतानि निमित्तनैमित्तिकानि, कतमस्य तु निमित्तस्य कतमन्नैमित्तिकमित्यत आह—

धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण,
ज्ञानेन चापवर्गो विपर्य्ययादिष्यते बन्धः ॥ ४४ ॥

"धर्मेण गमनमूर्ध्वं" द्युप्रभृतिषु लोकेषु, "गमनमधस्ताद्भवत्यधर्मेण" भूतलादिषु, "ज्ञानेन चापवर्गः" तावदेव प्रकृतिरारभ्यते न यावद्विवेकख्यातिं करोति, अथ विवेकख्यातौ सत्यां कृतकृत्यतया विवेकख्यातिमन्तं पुरुषं प्रति निवर्त्तते । य-

---

अधमानामधर्मादिभावानां चोभयविधानां स्वाभाविकास्वाभाविकानामुदाहरणान्यूह्यानीत्येतमर्थमाह—"वैकृताश्च" इत्यादिना="एवमधर्माज्ञानावैराग्यानैश्वर्याण्यपि" इत्यन्तेन, तथा चैते भावाः करणाश्रिताः, तथा तत्कार्यं नैमित्तिकस्वरूपं यच्छरीरं तदाश्रिताः= कललाद्यवस्थाश्रिताः, तत्र कललं, बुद्बुदः, मांसं, पेशी, करण्डोऽङ्गं, प्रत्यङ्गं, व्यूहश्चेति—क्रमादुत्तरोत्तरभाविनो गर्भस्थजन्तुशरीरस्य परिणामाः,गर्भान्निर्गतस्य तु तस्यैव बाल्यादिकाश्चत्वारः परिणामाः,—गर्भस्थस्यायुर्वेदीयशरीरस्थानाद्, गर्भाद्बहिर्भूतस्य तु परिणामा लोकतः स्वयं निरीक्षणीयाः, अत्र कललं=वीर्यरजसोर्मिश्रीभावः, बुद्बुदः=तयोर्वर्त्तुलीभावः, मांसं=घनीभावः, पेशी=मांसस्य कोशीभावरूपो भागः, करण्डः=ततोऽप्यधिककठिनतरो भागः, सर्वथा पूर्णत्वं चाङ्गानामङ्गप्रत्यङ्गव्यूहविभागशब्देनोच्यते ॥ ४३ ॥

कथं ज्ञानेनापवर्ग इत्याह—"तावदेव"इति, विवेकख्यातिं प्रति शनैःशनैः प्रकृतिः स्वयं प्रवर्त्तते तदेव हि तस्या अन्तिममुद्देश्यं, तच्च साधयित्वा साध्यान्तराभावाद् यस्य पुरुषस्यापवर्गो जातस्ततो निवर्त्तते इति भावः, अयमेवार्थोऽन्यैरप्युक्त इति दर्शयति—"यदाहुः"इति,

दाहुः—"विवेकख्यातिपर्यन्तं ज्ञेयं प्रकृतिचेष्टितम्" इति । "विपर्य्ययाद्"=अतत्त्वज्ञानाद्, "इष्यते बन्धः" स च त्रिविधः—प्राकृतिको, वैकृतिको, दाक्षिणकश्चेति । तत्र प्रकृतावात्मज्ञानाद् ये प्रकृतिमुपासते–तेषां प्राकृतिको बन्धो—यः पुराणे प्रकृतिलयान् प्रत्युच्यते—"पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः" इति, वैकारिको बन्धस्तेषां–ये विकारानेव=भूतेन्द्रियाहङ्कारबुद्धीः पुरुषबुद्ध्योपासते, तान्प्रतीदमुच्यते—

"दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः ।
भौतिकास्तु शतं पूर्णं सहस्रं त्वाभिमानिकाः ॥
बौद्धा दश सहस्राणि तिष्ठन्ति विगतज्वराः ।"

"ते खल्वमी विदेहा येषां वैकृतिको बन्धः" इति ।

इष्टापूर्त्तेन दाक्षिणकः,—पुरुषतत्त्वानभिज्ञो हीष्टापूर्त्तकारी कामोपहतमना बध्यत इति ॥ ४४ ॥

वैराग्यात्प्रकृतिलयः संसारो भवति राजसाद्रागाद्,
ऐश्वर्य्यादविघातो विपर्ययात्तद्विपर्यासः ॥ ४५ ॥

"विवेकख्यातिपर्यन्तम्"इति,=तत्तत्पुरुषविवेकख्यातिपर्यन्तं तत्तत्पुरुषविषये प्रकृतिव्यापारस्यावस्थानमित्यर्थः, शरीरात्मवादिनश्चार्वाकाद्याः प्राकृतिकविपर्ययबद्धाः प्रकृतौ लयो=अवधानं येषां ते प्रकृतिलयास्तान्"प्रकृतिलयान्"[1], वैकृतिकदाक्षिणकशब्दावनुपदं व्याख्यातव्याविति नात्र व्याख्यातौ, "अव्यक्तचिन्तकाः"=प्रकृतिभावनापराः, ये पुनः प्रकृतिमपि=जगन्मूलभूतां निरस्य तद्विकारान्=स्थूलभूतादीनेवोपासते–ते=वैकृतिकाः, एतेऽपि चार्वाकभेदा एव–"विदेहाः" विविधदेहविशिष्टाः–"जन्ममरणप्रवाहपतितत्वाद् दक्षिणासंबद्धाः दाक्षिणकाः, तल्लक्षणं विशदयति–"इष्टापूर्त्तेन" इत्यादिना ॥

"इष्टापूर्त्तकारी कामोपहतमना बध्यत इति"इति, तदाम्नन्ति च्छन्दोगाः–"अथ य इमे ग्राम इष्टापूर्त्ते दत्तमित्युपासते ते धूममभिसंभवन्ति"[2]इति, एतच्छ्रुतेरिष्टादिकारिणां धूमादिदक्षिणमार्गगामित्वादपि दाक्षिणकत्वमित्यवगन्तव्यम्, ॥ ४४ ॥

---

(१) यद्वा प्रकृतावात्मत्वेनाभिमतायां लयो विलयो येषां तान् । (२) छान्दो० उ० (५।१०।३) ।

"वैराग्यात्प्रकृतिलयः"—पुरुषतत्त्वानभिज्ञस्य वैराग्यमात्रात्प्रकृतिलयः,=प्रकृतिग्रहणेन प्रकृतिकार्यमहदहङ्कारभूतेन्द्रियाणि गृह्यन्ते तेष्वात्मबुद्ध्योपास्यमानेषु लयः । "संसारो भवति राजसाद्रागाद्" । राजसादित्यनेन रजसो दुःखत्वात्संसारस्य दुःखता सूचिता । "ऐश्वर्यादविघातः"—इच्छायाः । ईश्वरो हि यदिच्छति तत्करोति । "विपर्ययाद्"=अनैश्वर्यात् "तद्विपर्यासः"=सर्वत्रेच्छाविघात इत्यर्थः ॥ ४५ ॥

बुद्धिधर्मान्=धर्मादीनष्टौ भावान् समासव्यासाभ्यां मुमुक्षूणां हेयोपादेयान्दर्शयितुं प्रथमतस्तावत्समासमाह—

एष प्रत्ययसर्गो विपर्ययाऽशक्तितुष्टिसिद्ध्याख्यः,
गुणवैषम्यविमर्दात्तस्य च भेदास्तु पञ्चाशत् ॥ ४६ ॥

प्रतीयतेऽनेनेति प्रत्ययो=बुद्धिः—तस्य सर्गः । तत्र विपर्ययः=अज्ञानम्=अविद्या च—बुद्धिधर्मः, अशक्तिरपि करणवैकल्यहेतुका बुद्धिधर्म एव तुष्टिसिद्धी अपि वक्ष्यमाणे बुद्धिधर्मावेव । तत्र विपर्ययाशक्तितुष्टिषु यथायोगं सप्तानां च धर्मादीनां ज्ञानवर्जमन्तर्भावः, सिद्धौ च ज्ञानस्येति । व्यासमाह—"तस्य च

रागस्य रजोमयत्वं सिद्धमेवेति "राजसाद्" इति विशेषणम् 'उष्णो वह्निर्' इति वह्नेरुष्णत्वविशेषणवदनावश्यकमित्याशङ्क्य समाधत्ते—"संसारस्य दुःखता सूचिता" इति, कस्याविघात इत्याकाङ्क्षायामाह—"इच्छाया" इति ॥ ४५ ॥

समासः=संक्षेपो, व्यासश्च=तद्विपरीतो विस्तरः "तस्य"=प्रत्ययस्य बुद्ध्यर्थकस्य विपर्ययो=अज्ञानम्=अविद्येति पर्यायाः, करणवैकल्यम्=इन्द्रियदोषः, तेन च परम्परया बुद्धिदोषा उत्पद्यन्ते इति तस्य बुद्धिधर्मत्वमुपपन्नं, "सप्तानां"=धर्माधर्माज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याणां, "ज्ञानस्य" केवलस्य

---

(१) "विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्" इति यो० सू० (१।८)

भेदास्तु पञ्चाशद्" इति। कस्मात्? "गुणवैषम्यविमर्दाद्" इति,= 'गुणानां वैषम्यम्=एकैकस्याधिकबलता द्वयोर्द्वयोर्वा, एकैकस्य न्यूनबलता द्वयोर्द्वयोर्वा, ते च न्यूनाधिक्ये मन्दमध्याधिक्य-मात्रतया यथाकार्यमुन्नीयेते, तदिदं गुणानां वैषम्यं, तेनो-पमर्दः=एकैकस्य न्यूनबलस्य द्वयोर्द्वयोर्वाऽभिभवः, तस्मात्' "तस्य भेदाः पञ्चाशद्" इति ॥ ४६ ॥

तानेव पञ्चाशद्भेदान् गणयति-

पञ्च विपर्ययभेदा भवन्त्यशक्तिश्च करणवैकल्याद्,
अष्टाविंशतिभेदा तुष्टिर्नवधाष्टधा सिद्धिः ॥ ४७ ॥

अविद्याऽस्मितारागद्वेषाभिनिवेशा यथासङ्ख्यं तमोमो-हमहामोहतामिस्रान्धतामिस्रसंज्ञकाः=पञ्च विपर्ययविशेषाः-विपर्ययप्रभवाणामस्मितादीनां विपर्ययस्वभावत्वाद्, यद्वा यद्-

सिद्धिरूपत्वादन्येषां विपर्ययादिष्वन्तर्भावः, कस्य? कुत्रान्तर्भाव? इति त्वग्रे स्पष्टीभविष्यति, सत्त्वरजस्तमसां वैषम्ये=न्यूनाधिकबलत्वरूपे समापन्ने सति तेन वैषम्येण प्रवर्त्तितो योऽधिकबलैर्गुणैः कृतो न्यूनबलानामुपमर्द-स्तन्मूलकानां पञ्चाशद्भेदानां प्रत्ययसर्गाणां किं स्वरूपं? के च ते भेदा? इत्यग्रे स्फुटीभविष्यति ॥ ४६ ॥

"पञ्चविपर्ययविशेषा" इति, क्लेशशब्देन एते योगदर्शने उक्ता भगवता पतञ्जलिना-"अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः" इति "क्लेशा इति-पञ्च विपर्यया" इति, च तत्र व्यासभाष्यम्,

अविद्यादीनां स्वरूपं योगशास्त्रे स्पष्टम्-"अनित्याशुचिदुःखानात्मसु नि-त्यशुचिसुखात्मख्यातिरविद्या", "दृग्दर्शनशक्त्योरेकात्मतेवाऽस्मिता", "सु-खानुशयी रागः", "दुःखानुशयी द्वेषः", "स्वरसवाही विदुषोऽपि तथारूढो-ऽभिनिवेशः", एतेषां सूत्राणां भाष्यानुसार्यर्थस्तु विस्तरभयान्नात्रोपन्यस्तः,

अविद्यादीनां संज्ञान्तराण्याह-"तम" इति, अस्मितादीनामवस्तुस्वभा-

(१) कारिकायां-४७। (२) यो० सू०-(२।३)। (३)। यो० सू०-(२।५)। (४) यो० सू०-(२।६)। (५) यो० सू०-(२।७)। (६) यो० सू०-(२।८)। (७) यो० सू०(२।९)।

विद्यया=विपर्ययेणावधार्यते वस्तु-अस्मितादयस्तत्स्वभावाः सन्तस्तदभिनिविशन्ते । अत एव "पञ्चपर्वा अविद्या" इत्याह भगवान् वार्षगण्यः ॥ ४७ ॥

संप्रति पञ्चानां विपर्ययभेदानामवान्तरभेदानाह—

भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः,
तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः ॥ ४८ ॥

"भेदः"-"तमसः"=अविद्यायाः "अष्टविधः", अष्टस्वव्यक्त-महदहङ्कारपञ्चतन्मात्रेष्वनात्मस्वात्मबुद्धिर्=अविद्या=तमः, अष्टविधविषयत्वात्तस्याष्टविधत्वम् । "मोहस्य च" इति । अत्रापि 'अष्टविधो भेद' इति चकारेणानुषज्यते । देवा ह्यष्टविधमैश्वर्यमासाद्यामृतत्वाभिमानिनोऽणिमादिकमात्मीयं शाश्वतिकमभिमन्यन्त इति सोयमस्मितामोहोऽष्टविधैश्वर्यविषयत्वाद् "अष्टविधः" । "दशविधो महामोह" इति । शब्दादिषु पञ्चसु दिव्यादिव्यतया दशविधेषु विषयेषु रञ्जनीयेषु रागः=आसक्तिः="महामोहः", स च दशविधविषयत्वाद् "दशविधः" । "तामिस्रः" =द्वेषः-"अष्टादशधा"='शब्दादयो दश विषया रञ्जनीयाः स्वरूपतः, ऐश्वर्यं त्वणिमादिकं न स्वरूपतो रञ्जनीयं, किन्तु रञ्जनीयशब्दाद्युपायाः, ते च शब्दादय उपस्थिताः परस्प-

---

त्वमवस्तुनोऽवधारणं चाविद्यया, विद्यया तु वस्तुनोऽवधारणमिति सर्वेषां विदितमेव, "पञ्चपर्वा"=एकापि सती पञ्चशाखाविशिष्टेव, "वार्षगण्यः" =कश्चित्साङ्ख्याचार्यः ॥ ४७ ॥

अष्टविधेनैश्वर्येणात्राणिमादयोऽष्टसिद्धयोऽभिप्रेताः, "दिव्यादिव्यतया" इति, अदिव्याः=भौमाः शब्दादयो वादित्रादिसंभवाः, दिव्यास्त्वभौमा अशन्यादिसंभवास्तेष्वासक्तिश्च-प्रायो दिव्येषु दिव्यानामदिव्येषु च पार्थिवानामित्यवगन्तव्यं, "रञ्जनीयाः=रागार्हाः"-आसक्तिविषया इति यावद्, अणिमादिषु तु साक्षादासक्तिविषयता न ह्यणिमाद्यर्थं-किन्तु शब्दाद्यर्थमणिमादयः सेव्यन्ते इति तेषां न स्वरूपतो रञ्जनीयत्वं, किन्तु परम्परया शब्दा-

रेणोपहन्यमानास्तदुपायाश्चाणिमादयः स्वरूपेणैव कोपनीया भवन्तीति शब्दादिभिर्दशभिः सहाणिमादिकमष्टादशधेति तद्विषयो द्वेषः=तामिस्रोऽष्टादशविषयत्वाद् अष्टादशधा, इति । "तथा भवत्यन्धतामिस्रः" । "अभिनिवेशः"=अन्धतामिस्रः । "तथा"इत्यनेन"अष्टादशधा"इत्यनुषज्यते । देवाः खल्वणिमादिकमष्टविधमैश्वर्यमासाद्य दश शब्दादीन् विषयान् भुञ्जानाः—'शब्दादयो भोग्यास्तदुपायाश्चाणिमादयोऽस्माकमसुरादिभिर्मा स्रोपघानिपत'इति बिभ्यति, तदिदं भयम्=अभिनिवेशः—अन्धतामिस्रोऽष्टादशविषयत्वाद् "अष्टादशधा" इति । सोऽयं पञ्चविकल्पो विपर्ययोऽवान्तरभेदाद्द्वाषष्टिरिति ॥ ४८ ॥

तदेवं पञ्चविपर्ययभेदानुक्त्वाऽष्टाविंशतिभेदामशक्तिमाह—

एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा,
सप्तदश वधा बुद्धेर्विपर्ययात्तुष्टिसिद्धीनाम् ॥ ४९ ॥

"एकादश"इति । [इन्द्रियवधस्य ग्रहो बुद्धिवधहेतुत्वेन, न त्वशक्तिभेदपूर्णत्वेन] । "एकादशेन्द्रियवधाः"—

="बाधिर्यं कुष्ठिताऽन्धत्वं जडताऽजिघ्रता तथा ।
मूकता कौण्यपङ्गुत्वे क्लैब्योदावर्त्तमन्दताः"—

दीनां परस्परोपपातेऽनुकूलेषु रागात्, प्रतिकूलेषु=प्रतिघातकेषु कोपनीयत्वे द्वेषविषयत्वम्, अणिमादीनां त्वलभ्यत्वादप्रतिहन्यमानेषु प्रतिघातकत्वेऽपि द्वेष इत्याह—"स्वरूपेणैव" इत्यादिना, "मा स्रोपघानिषत"इति, न विहतिं प्रापन्नित्यर्थः ॥ ४८ ॥

"बाधिर्यं"=श्रोत्रदोषः, "कुष्ठिता"=त्वग्दोषः, "अन्धत्वं"=नेत्रदोषः, "जडता"=रसनादोषः=जिह्वाजाड्यरूपो येनास्वादविघातादि, "अजिघ्रता"=घ्राणदोषः, "मूकता"=वाग्दोषः, "कौण्यं"=कुणित्वं=कुणिभावो=हस्तदोषः, "पङ्गुत्वं"=पाददोषः, "क्लैब्यं"=प्रजननेन्द्रियदोषः, "उदावर्त्तः"=पायुदोषः,

---

(१) 'हो हन्तेः० (पा० ७।३।५४) इति घः ।

यथासङ्ख्यं श्रोत्रादीनामिन्द्रियाणां वधाः । एतावत्येव तु तद्धेतुका बुद्धेरशक्तिः स्वव्यापारे भवति । तथा चैकादशहेतुकत्वाद् "एकादशधा" बुद्धेरशक्तिरुच्यते, हेतुहेतुमतोरभेदविवक्षया च सामानाधिकरण्यम् ।

तदेवमिन्द्रियवधद्वारेण बुद्धेरशक्तिमुक्त्वा स्वरूपतोऽशक्तीराह—"सह बुद्धिवधैर्"इति । कति बुद्धेः स्वरूपतो वधा इत्यत आह—"सप्तदश वधा बुद्धेः" इति । कुतः ? "विपर्ययात्तुष्टिसिद्धीनां" तुष्टयो नवधेति तद्विपर्ययास्तन्निरूपणात्—तत्प्रतियोगिकत्वान्नवधा भवन्ति, एवं सिद्धयोऽष्टाविति तद्विपर्ययास्तन्निरूपणादष्टौ भवन्तीति ॥ ४९ ॥

तुष्टिर्नवधेत्युक्तं, ताः परिगणयति—

आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभागाख्याः,
बाह्या विषयोपरमात्पञ्च च नव तुष्टयोऽभिमताः ॥ ५० ॥

'प्रकृतिव्यतिरिक्त आत्मास्ति' इति प्रतिपद्य ततोऽस्य श्रवणमननादिना विवेकसाक्षात्काराय त्वसदुपदेशतुष्टो यो न प्रयतते तस्य—"आध्यात्मिक्यश्चतस्रः" तुष्टयो भवन्ति । प्रकृतिव्यतिरिक्तमात्मानमधिकृत्य यस्मात्तास्तुष्टयस्तस्माद् "आध्यात्मिक्यः" । कास्ताः ? इत्यत आह—"प्रकृत्युपादानकालभागाख्याः"=प्रकृत्यादिराख्या यासां तास्तथोक्ताः ।

"मन्दता"=मनोदोषः, "हेतुहेतुमतोर्" इति, वधस्य=हेतोः, हेतुमत्याः=वधनिमित्तवत्याः=अशक्तयाः, भेदाविवक्षया वधा=अशक्तिरिति सामानाधिकरण्यमुपपन्नम्, शेषं स्पष्टम्, तुष्टयः सिद्धयश्चानुपदं वक्ष्यन्ते ॥ ४९ ॥

'साक्षात्काराय' इत्यस्य 'न प्रयतत' इत्यनेन संबन्धः, "प्रकृत्युपादान"इति-प्रकृतिकार्यत्वं विवेकख्यातेरिति श्रवणादिवैमुख्यं=प्रकृतितुष्टिः, तस्याश्च संसारमज्जनहेतुत्वाद् 'अम्भ' इति नामान्तरम्, प्रकृतिमात्रं तु सर्वत्र सर्वस्य

---

(१) कारिकायां-(५०,५१)

तत्र प्रकृत्याख्या तुष्टिर्यथा–कस्यचिदुपदेशे–'विवेकसाक्षात्कारो हि प्रकृतिपरिणामभेदः, तं च प्रकृतिरेव करोतीति कृतं तद्ध्यानाभ्यासेन, तस्मादेवमेवाऽऽस्स्व वत्स' इति–येयमुपदेष्टव्यस्य शिष्यस्य तुष्टिः प्रकृतौ–सा तुष्टिः प्रकृत्याख्या='अम्भ' उ(इत्यु)च्यते ।

'या तु प्राकृत्यपि विवेकख्यातिर्न सा प्रकृतिमात्राद्भवति, मा भूत् –सर्वस्य सर्वदा तन्मात्रस्य सर्वान् प्रत्यविशेषात्, प्रव्रज्यायास्तु सा भवति, तस्मात्प्रव्रज्यामुपाददीथाः, कृतं ते ध्यानाभ्यासेनायुष्मन्' इत्युपदेशे या तुष्टिः–सोपादानाख्या='सलिलम्' इत्युच्यते ।

'या तु प्रव्रज्याऽपि सद्यो न निर्वाणदेति सैव कालपरिपाकमपेक्ष्य सिद्धिं ते विधास्यति, अलमुत्तप्ततया तव' इत्युपदेशे या तुष्टिः सा कालाख्या–'ओघ' इत्युच्यते ।

'या तु न प्रकृतेर्न कालान्नाप्युपादानाद्विवेकख्यातिः, अपि तु भाग्यादेव, अत एव मदालसापत्यान्यतिबालानि मातुरुपदेशादेव विवेकख्यातिमन्ति मुक्तानि बभूवुः, तस्माद्भाग्यमेव हेतुर्नान्यद्' इत्युपदेशे या तुष्टिः सा भागाख्या='वृष्टिर्' उच्यते।

बाह्या दर्शयति "बाह्याः" तुष्टयो "विषयोपरमात् पञ्च" याः खल्वनात्मनः प्रकृतिमहदहङ्कारादीनात्मेत्यभिमन्यमानस्य वैराग्ये सति तुष्टयस्ता "बाह्याः"–आत्मज्ञानाभावे

सममिति सर्वविमुक्तिपरिहाराय प्रव्रज्योपादानपूर्वकेऽभ्यासादिवर्जने या तुष्टिः सोपादानाख्या, तस्याश्च सलिलापराख्यत्वं संसरणनिमित्तत्वात्, सलिलं हि सृधातोरिरन्प्रत्यये सरिरम् इति जाते रलयोरभेदाद्भवति, कालापेक्षित्वेन सुखासिकारूपा तुष्टिर्दैवाधीनवृष्टिना मेघेन तुल्येति मेघापराख्या, भाग्यापेक्षया सन्तोषेणैवास्थानात्मिका या भाग्यतुष्टिः सा वृष्टिवदनियतत्वाद् वृष्ट्यपराख्येत्याध्यात्मिकतुष्टीनां संक्षिप्तं विवरणम्,

संप्रत्याध्यात्मिकीस्तुष्टीः प्रदर्श्य बाह्याः प्रपञ्चयति—"बाह्यास्तुष्टय"इत्यादिना, शब्दरूपरसगन्धस्पर्शाः=पञ्च भोग्यविषयास्तेषामसारत्वदर्शनात्त-

सत्यनात्मानमधिकृत्य प्रवृत्तेरिति । ताश्च वैराग्ये सति सम्भवन्ति तुष्टय इति वैराग्यहेतुपञ्चत्वाद् वैराग्याण्यपि पञ्च, तत्पञ्चत्वात् तुष्टयः "पञ्च" इति । उपरम्यतेऽनेनेति उपरमो=वैराग्यम्, विषयादुपरमो=विषयोपरमो विषयाः=भोग्याः शब्दादयः पञ्च, उपरमा अपि पञ्च, तथा हि अर्जनरक्षणक्षयभोगहिंसादोषदर्शनहेतुजन्मानः पञ्चोपरमा भवन्ति, तथा हि सेवादयो धनार्जनोपायाः, ते च सेवकादीन् दुःखाकुर्वन्ति,

'दृप्यद्दुरीश्वरद्वाःस्थदण्डिचण्डार्धचन्द्रजाम् ।
वेदनां भावयन्प्राज्ञः कः सेवास्वनुपज्जते' ।

एवमन्येऽप्यर्जनोपाया दुःखा इति विषयोपरमे या तुष्टिः सैषा 'पारम्' इत्युच्यते ।

तथा 'अर्जितं धनं राजैकागारिकाग्निजलौघादिभ्यो विनङ्क्ष्यतीति तद्रक्षणे महद् दुःखम्' इति भावयतो विषयोपरमे या तुष्टिः सा द्वितीया 'सुपारम्' उच्यते ।

तथा 'महतायासेनार्जितं धनं भुज्यमानं क्षीयते' इति तत्प्रक्षयं भावयतो विषयोपरमे या तुष्टिः सा तृतीया 'पारावारम्' उच्यते ।

एवं 'शब्दादिभोगाभ्यासात् प्रवर्धन्ते कामाः, ते च विषयाप्राप्तौ कामिनं दुःखाकुर्वन्ति; इति भोगदोषं भावयतो विष-

---

द्विषयाणि पञ्च वैराग्याणि, किं चान्यथापि वैराग्याणां पञ्चत्वं-तद्धि धनादेरर्जनरक्षणक्षयभोगहिंसादोषदर्शनमूलकं, तदेव दृष्टान्तैर्विशदयति-"तथाहि" इत्यादिना,

"दृप्यद्दुरीश्वरे"ति, एतच्छायारूपस्त्र्यन्तदेशिकश्लोकः-"दुरीश्वरद्वारबहिर्वितर्दिकादुरासिकायै रचितोऽयमञ्जलिः । यदञ्जनाभं निरपायमस्ति मे धनञ्जयस्यन्दनभूषणं धनम्"इति, "पारम्"इति, धनार्जनदुःखपारप्रापयितृत्वात्पाराख्येयं तुष्टिः, ऐकागारिकः=चौरः, "ऐकागारिकट् चौरे" इति पाणिनीयात् । अर्जनदोषदर्शनेऽपि कदाचिद्भोगाभिलापेण प्रवृत्तिः स्याद्, रक्षणभयात्तस्य तु प्रवृत्तेरतितरामसंभव इति तदीयायास्तुष्टेः सुपारता, क्षयं भावयतः कदाचित्प्रवृत्तिः, कदाचिदप्रवृत्तिर् इति-तदीया तुष्टिः

---

(१) पा० सू० (५।१।११३) ।

योपरमे या तुष्टिः सा चतुर्थी 'अनुत्तमाम्भ' उच्यते ।

एवं 'नानुपहत्य भूतानि विषयोपभोगः संभवति' इति हिंसादोषदर्शनाद्विषयोपरमे या तुष्टिः सा पञ्चमी 'उत्तमाम्भ' उच्यते ।

एवमाध्यात्मिकीभिश्चतसृभिर्बाह्याभिश्च पञ्चभिर् "नव तुष्टयोऽभिमताः" ॥ ५० ॥

गौणमुख्यभेद(दा)ः सिद्धीराह—

ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः,
दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः ॥ ५१ ॥

विहन्यमानस्य दुःखस्य त्रित्वात्तद्विघातास्त्रय इतीमा मुख्यास्तिस्रः सिद्धयः, तदुपायतया त्वितरा गौण्यः पञ्च सिद्धयः, ता अपि हेतुहेतुमत्तया व्यवस्थिताः । तत्राऽऽद्याऽध्ययनलक्षणासिद्धिर्हेतुरेव, मुख्यास्तु सिद्धयो हेतुमत्य एव, मध्यमास्तु हेतुहेतुमत्यः । विधिवद्गुरुमुखादध्यात्मविद्यानामक्षरस्वरूपग्रहणम्=अध्ययनं, प्रथमा सिद्धिः 'तारम्' उच्यते ।

तत्कार्यं शब्दः='शब्द'इति पदं शब्दजनितमर्थज्ञानमुप-

पारावाराख्या, भोगे रोगभयं भावयतस्तुष्टिः स्वार्थपरेति तस्या उत्तमेतराम्भस्त्वम्, हिंसादोषतस्तस्यास्तुष्टेस्तु कारुण्यमूलकत्वादुत्तमाम्भस्त्वम् ॥ ५० ॥

कारिकायां क्रमोऽविवक्षितः, दुःखविघातानां त्रयाणामितरसिद्ध्यपेक्षयाऽभ्यर्हितत्वात्सकलसिद्ध्यन्तरोद्देश्यत्वाच्च प्राथम्यमित्याशयेनाह—"मुख्या" इति, अध्ययनं सिद्ध्यन्तरहेतुत्वेनैव सर्वैरपेक्ष्यं न तु तस्य स्वतः किमपि माहात्म्यं, दुःखविघातरूपा मुख्यास्तिस्रः सिद्धयः, फलरूपा अन्तिमाः—तासां किमपि साध्यान्तरं नावशिष्यते, अन्यासां चतसृणां तु किञ्चित्सिद्ध्यन्तरमपेक्ष्य निमित्तत्वं किञ्चिच्चापेक्ष्य नैमित्तिकत्वं च पारिशेष्यात्सिद्धम्, अक्षरस्वरूपं=क्षयरहितानां शाश्वतानां वर्णानां स्वरूपं—पारायणमिति यावत्, संसारतरणस्य प्रथमहेतुत्वात् ताराख्यताऽध्ययनसिद्धेः, शब्दपदेनार्थो लक्ष्यते, तदाह—"अर्थज्ञानमुपलक्षयति"इति, अर्थज्ञानस्य सुखेन संसारता-

लक्षयति–कार्ये कारणोपचारात्, सा द्वितीया सिद्धिः 'सुतारम्' उच्यते । पाठार्थाभ्यां तदिदं द्विधा श्रवणम् ।

"उहः"=तर्कः आगमाविरोधिन्यायेनागमार्थपरीक्षणम् । परीक्षणं च=संशयपूर्वपक्षनिराकरणेनोत्तरपक्षव्यवस्थापनं, तदिदं 'मननम्' आचक्षते आगमिनः, सा तृतीया सिद्धिः 'तारताम्' उच्यते ।

स्वोत्प्रेक्षितं मननममननमेवासुहृत्सम्मतमिति द्वितीयं मननमाह–"सुहृत्प्राप्तिः"–न्यायेन स्वयं परीक्षितमप्यर्थं न श्रद्धत्ते–न यावद् गुरुशिष्यसब्रह्मचारिभिः सह संवाद्यते, अतः सुहृदां गुरुशिष्यसब्रह्मचारिणां संवादकानां प्राप्तिः="सुहृत्प्राप्तिः", सा सिद्धिश्चतुर्थी 'रम्यक' उच्यते ।

"दानं च"=शुद्धिर्विवेकज्ञानस्य–"दैप् शोधने" इत्यस्माद्धातोर्दानपदव्युत्पत्तेः । यथाह–भगवान् पतञ्जलिः–"विवेकख्यातिरविप्लवा हानोपायः"(1) । अविप्लवः=शुद्धिः, सा च सवासनसंशयविपर्यासानां परिहारेण विवेकसाक्षात्कारस्य स्वच्छप्रवाहेऽवस्थापनं, सा च न विनादरनैरन्तर्यदीर्घकालसेविताभ्यासपरिपाकाद्भवतीति दानेन सोऽपि संगृहीतः, सेयं पञ्चमी सिद्धिः 'सदामुदितम्' उच्यते ।

तिस्रश्च मुख्याः सिद्धयः–प्रमोदमुदितमोदमानाः ।। इति "अष्टौ सिद्धयः" ।।

रकत्वात्सुतारत्वम्, तारसुतारयोरुभयोर्गुरुमुखाद्ध्ययनरूपत्वाच्छ्रवणेऽन्तर्भावः, उत्तरपक्षः स्वसिद्धान्तः, ऊहस्य मननरूपत्वमाह–"तदिदम्" इति,

मननस्याध्ययनात्तारादप्यधिकतारकत्वात्तारतरत्वम्, सब्रह्मचारिणः=सतीर्थ्याः–सहाध्यायिन इति यावत्, सुहृद्भिः सह शास्त्रार्थसंवादस्यातिरमणीयत्वात्सुहृत्प्राप्तेः रम्यता, सवासनानां=संस्कारसहितानां संशयविपर्यासादीनां परिहारेण विवेकसाक्षात्कारस्य शुद्धे निरन्तरे प्रवाहेऽवस्थानं=परमा

---

(1) योगसू० (२।२६) ।

अन्ये व्याचक्षते—"विनोपदेशादिना प्राग्भवीयाभ्यासवशात्तत्त्वस्य स्वयमूहनं यत् सा सिद्धिः="ऊहः" । यस्य साङ्ख्यशास्त्रपाठमन्यदीयमाकर्ण्य ज्ञानमुत्पद्यते सा सिद्धिः="शब्दः"—शब्दपाठान्तरभावाद् । यस्य शिष्याचार्यसंबन्धेन संवादेन साङ्ख्यशास्त्रं ग्रन्थतोऽर्थतश्चाधीत्य ज्ञानमुत्पद्यते साऽध्ययनहेतुका सिद्धिः="अध्ययनम्" । "सुहृत्प्राप्तिर्"इति । यस्याधिगततत्त्वं सुहृदं प्राप्य ज्ञानमुत्पद्यते सा ज्ञानलक्षणा सिद्धिस्तस्य "सुहृत्प्राप्तिः" । "दानं च" सिद्धिहेतुः—धनादिदानेनाराधितो ज्ञानी ज्ञानं प्रयच्छति । अस्य च युक्तायुक्तत्वे सूरिभिरेवावगन्तव्ये इति कृतं परदोषोद्भावनेन सिद्धान्तमात्रव्याख्यानप्रवृत्तानाम्" इति ।

सिद्धितुष्टिविपर्ययेणाशक्तिर्बुद्धिवधः सप्तदशधेष्टव्यः ।

अत्र प्रत्ययसर्गे सिद्धिरुपादेयेति प्रसिद्धमेव, तन्निवारणहेतवस्तु विपर्ययाशक्तितुष्टयो हेया इत्याह—"सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः"इति । "पूर्व"इति विपर्ययाशक्तितुष्टीः परामृशति । ताः=सिद्धिकरिणीनामङ्कुशो—निवारकत्वाद् । अतः सिद्धिपरिपन्थित्वादङ्कुश इवेति विपर्ययाशक्तितुष्टयो हेया इत्यर्थः ॥ ५१ ॥

स्यादेतत्—पुरुषार्थप्रयुक्ता सृष्टिः, स च पुरुषार्थः प्रत्ययसर्गाद्वा तन्मात्रसर्गाद्वा सिध्यतीति कृतमुभयसर्गेणेत्यत आह—

शुद्धिः, सा च सदा मोदहेतुत्वात्सदामुदिताख्या, तिस्रो मुख्याः सिद्धयः=आधिभौतिकाध्यात्मिकाधिदैविकाख्यदुःखत्रयविघातरूपाः, प्राग्भवीयोऽभ्यासः=पूर्वजन्मसु ज्ञानाभ्यासः,

अन्यैः कृतस्त्वर्थो न सङ्गतोपि प्रेक्षावतां परीक्षणाय तं प्रदर्शयति—"विनोपदेशादिना"इत्यादिना,

"पूर्वो"=विपर्ययाशक्तितुष्ट्याख्यस्त्रिविधः सिद्धेरङ्कुशः, "सिद्धिपरिपन्थित्वात्"=सिद्धिविघातकत्वात् ॥ ५१ ॥

प्रत्ययसर्गो महदादिसर्गः, तन्मात्रसर्गः=आकाशादिसर्गः,

न विना भावैर्लिङ्गं न लिङ्गेन भावनिर्वृत्तिः,
लिङ्गाख्यो भावाख्यस्तस्माद्द्वेधा प्रवर्त्तते सर्गः ॥ ५२ ॥

"लिङ्गम्" इति तन्मात्रसर्गमुपलक्षयति, "भावैः"इति च प्रत्ययसर्गम् । एतदुक्तं भवति-तन्मात्रसर्गस्य पुरुषार्थसाधनत्वं, स्वरूपं च,-"न" प्रत्ययसर्गाद् "विना" भवति-एवं प्रत्ययसर्गस्य स्वरूपं, पुरुषार्थसाधनत्वं च,-"न" तन्मात्रसर्गादृते-इत्युभयथा सर्गप्रवृत्तिः । भोगः=पुरुषार्थो न भोग्यान्=शब्दादीन् भोगायतनं च=शरीरद्वयमन्तरेण सम्भवतीत्युपपन्नस्तन्मात्रसर्गः-एवं स एव भोगो भोगसाधनानि=इन्द्रियाण्यन्तःकरणानि चान्तरेण न संभवति, न च तानि धर्मादिभिर्भावैर्विना संभवन्ति, न चापवर्गहेतुर्विवेकख्यातिरुभयसर्गेण विनेत्युपपन्न उभयविधः "सर्गः" अनादित्वाच्च बीजाङ्कुरवन्नान्योन्याश्रयदोषभाव इति । कल्पादावपि प्राचीनकल्पोत्पन्नभावलिङ्गसंस्कारवशाद्भावलिङ्गयोरुत्पत्तिर्नानुपपन्नेति सर्वमवदातम् ॥ ५२ ॥

पुरुषार्थरूपाय भोगाय वस्तुत्रयमपेक्षितं-भोग्यं-भोगाधिकरणं-भोगसाधनं च, राजादिकर्तृके हि भोगे भोग्यं=वनितादि, भोगाधिकरणं=शय्यादि, भोगसाधनानि च=पानानुलेपनादीन्यपेक्ष्यन्ते; पुरुषार्थविषये चैतत्रयं किंरूपमित्याकाङ्क्षायां भोग्यं=शब्दादिकं, भोगाधिकरणं=शरीरं स्थूलसूक्ष्मरूपेण द्विविधं, भोगसाधनानि च=करणानि बाह्यान्तरभेदेन द्विविधानि, तत्र भोगभोगाधिकरणयोः संपादनाय तन्मात्रसर्गो-भोगसाधनसंपादनाय च प्रत्ययसर्गोऽपेक्षित इति सर्गद्वयमपेक्षितमेव, अन्यतराभावे पुरुषार्थासिद्धिरित्याह-"भोगः पुरुषार्थ" इत्यादिना,

ननु धर्मादयो भावाः शरीरापेक्षाः शरीरं च धर्माद्यपेक्षमिति परस्पराश्रयेणोभयमपि न संभवेदित्याशङ्क्याह-"बीजाङ्कुरवद्" इति ॥ ५२ ॥

---

(१) यथा-बीजस्य प्राथम्यमङ्कुरस्य वेत्यनिर्णयेऽपि नेतरेतराश्रयदोषोऽभ्युपगम्यते तद्वत् ।

विभक्तः प्रत्ययसर्गः, भूतादिसर्गं च विभजते-

अष्टविकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति,
मानुषकश्चैकविधः समासतो भौतिकः सर्गः ॥ ५३ ॥

ब्राह्मः, प्राजापत्यः, ऐन्द्रः, पैत्रो, गान्धर्वो, याक्षो, राक्षसः, पैशाचः-इत्यष्टविधो="दैवः" सर्गः । "तैर्यग्योनश्च पञ्चधा भवति"-पशुमृगपक्षिसरीसृपस्थावरा इति । "मानुषकश्चैकविध"इति । ब्राह्मणत्वाद्यवान्तरजातिभेदाविवक्षया-संस्थानस्य चतुर्ष्वपि वर्णेष्वविशेषात् । "समासतः =सङ्क्षेपतः"भौतिकः सर्गः" । घटादयस्त्वशरीरत्वेऽपि स्थावरा एवेति ॥ ५३ ॥

भौतिकस्यास्य सर्गस्य चैतन्योत्कर्षनिकर्षतारतम्याभ्यामूर्ध्वाधोमध्यभावेन त्रैविध्यमाह-

---

ब्रह्मलोके "ब्राह्मः" सर्गः प्रजापतयो दक्षादयस्तदीयः सर्गः="प्राजापत्यः", इन्द्रलोके "ऐन्द्रः" सर्गः, पितृलोके "पैत्रः", गन्धर्वयक्षरक्षःपिशाचा अपि देवयोनित्वेन देवा गृह्यन्ते तत्सर्गोऽपि "दैव" एव,

"पशुमृग"इति, पशवः=ग्राम्याश्चतुष्पदाः=गवाश्वादयः, मृगाः=आरण्यकाश्चतुष्पदाः=हरिणादयः, पक्षिणः=पतत्रवन्तो=गृध्रादयः, सरीसृपाः=अल्पचरणाश्चरणरहिता वा=सर्पशतपदीवृश्चिकादयः, स्थावराः=प्रायः प्रत्यक्षचेष्टारहिताः=वृक्षादयः, अत्र च सरीसृपेषु कीटादीनां, निर्जीवानां घटादीनां च स्थावरेष्वन्तर्भावो बोध्यः,

"संस्थानस्य"=आकृतिभेदस्यावयवसंस्थानकृतस्य "चतुर्षु"=ब्राह्मणक्षत्रियवैश्यशूद्रेषु, "अशरीरत्वे"=सजीवशरीरवैशिष्ट्याभावे, निर्जीवशरीरं तु सर्वस्यापि मूर्त्तपदार्थस्यास्त्येव, प्रायः शरीरशब्देन जीवच्छरीरस्यैव बोधो लोके प्रसिध्यतीत्यभिप्रायः, शीर्यमाणतारूपो व्युत्पत्तिलभ्यस्त्वर्थो मूर्त्तपदार्थमात्रमन्तर्भावयति ॥ ५३ ॥

ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः,
मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः ॥ ५४ ॥

"ऊर्ध्वं सत्त्वविशालः"=द्युप्रभृतिसत्यान्तो लोकः सत्त्वबहुलः । "तमोविशालश्च मूलतः सर्गः"=पश्वादिस्थावरान्तः, सोऽयं मोहमयत्वात्तमोबहुलः । भूर्लोकस्तु सप्तद्वीपसमुद्रसन्निवेशः। "मध्ये रजोविशालः"=धर्माधर्मानुष्ठानपरत्वाद्दुःखबहुलत्वाच्च । तामिमां लोकसंस्थितिं संक्षिपति—"ब्रह्मादिस्तम्बपर्यन्तः" । स्तम्बग्रहणेनोपलक्षणतया वृक्षादयोपि संगृहीताः ॥ ५४ ॥

तदेवं सर्गं दर्शयित्वा तस्यापवर्गसाधनवैराग्योपयोगिनीं दुःखरूपतामाह—

तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः,
लिङ्गस्याविनिवृत्तेस्तस्माद्दुःखं स्वभावेन ॥ ५५ ॥

द्यौर्=अन्तरिक्षं=पृथिव्याः सन्निहितं भुवर्नामकम्, प्रभृतिशब्देन स्वर्महर्जनस्तपःसमाख्यानां लोकानां ग्रहणं,

सत्यं च=पृथिव्या भूर्लोकसमाख्याया विप्रकृष्टतमं, पट्सु च भुवरादिषु सत्यान्तेषु लोकेषु क्रमात्सत्त्वस्याधिक्यं=तारतम्येनोत्कर्षः,

भूर्लोके तमसः क्रमादुत्कर्षो भवति—पश्वादिषु पशुमृगपक्षिसरीसृपस्थावरसहितेषु, भूर्लोक एव मनुष्येषु क्रमाद्रजस उत्कर्षः—ब्रह्मक्षत्रविट्शूद्रेषु रजसो हि कार्यं धर्माधर्मादिकं दुःखबाहुल्यं चोपलभ्यते मध्यमणिन्यायेन,

"भूर्लोकस्तु सप्तद्वीपसमुद्रसन्निवेशः" इत्यंशस्य "अस्ति" इति शेषेण सार्थकस्योभयसंबन्धः—"मूलतः" इत्यत्र "मध्य" इत्यत्र च, भूर्लोको योऽस्ति तत्रैव "मूलतः"=अधोऽधः पश्वादिसर्गो "मध्ये" च मानवसर्गः, अधस्तनत्वं च न दिगपेक्षं किंतु तमोऽपेक्षम्, एवं मध्यत्वमपि रजोऽपेक्षं—रजसः सत्त्वतमसोर्मध्ये स्थितत्वात् ॥ ५४ ॥

---

(१) "स्तम्बो गुच्छस्तृणादिनः" इत्यमरः ।

"तत्र"=शरीरादौ । यद्यपि विविधा विचित्रानन्दभोगभागिनः प्राणभृद्भेदाः । तथाऽपि सर्वेषां "जरामरणकृतं दुःखम्" अविशिष्टम् । सर्वस्य खलु कृमेरपि मरणत्रासो ='मा न भूवम्' 'भूयासम्' इत्येवमात्मकोऽस्ति । दुःखं च भयहेतुरिति मरणं "दुःखम्" ।

स्यादेतत्—दुःखादयः प्राकृता बुद्धिगुणाः,तत्कथमेते चेतनसम्बन्धिनो भवन्ति? इत्यत आह—"पुरुष"इति । पुरि=लिङ्गे शेत इति "पुरुषः"। लिङ्गं च तत्संबन्धीति चेतनोऽपि तत्संबन्धी भवतीत्यर्थः । कुतः पुनर्लिङ्गसंबन्धिदुःखं पुरुषस्य चेतनस्य? इत्यत आह—"लिङ्गस्याविनिवृत्तेः" । पुरुषाद् भेदाग्रहाल्लिङ्गधर्मानात्मन्यध्यस्यति पुरुषः । अथवा दुःखप्राप्ताववधिराङा कथ्यते—'लिङ्गं यावन्न निवर्त्तते तावद्' इति ॥ ५५ ॥

उक्तस्य सर्गस्य कारणविप्रतिपत्तीर्निराकरोति—

'मा न भूवं' 'भूयासं' मम नाशो न स्यात्सर्वदैव च जीवन्स्यामित्यर्थः, "दुःखं च भयहेतुः", तथा च यथा धूमाद् हेतोर् हेतुमान्वह्निरनुमीयते—तथैव हेतुमतो मृत्युभयात्सदाऽनुभूयमानात्सततवर्तिनो हेतोर्दुःखस्यानुमानमित्यर्थः, लिङ्गशरीरस्यैव वस्तुतः सर्वं दुःखं, तथापि पुरुषेण तस्याभेदग्रहात्पुरुषोऽपि दुःखवान् भवति, यदा तु वास्तवेन भेदग्रहेण भ्रमात्मकस्याभेदग्रहस्य नाशः—तदा दुःखनिवृत्तिर् इत्याह—"स्यादेतद्" इत्यादिना,

"लिङ्गस्याविनिवृत्तेर्"इति, लिङ्गशरीरस्याविनिवृत्तेः=नाशाभावाद्धेतोः "पुरुषो दुःखं प्राप्नोति" इत्येकोऽर्थः, तत्र "अविनिवृत्तेर्"इति—हेतौ पञ्चमी, "अथवा" पक्षान्तरे, "लिङ्गस्याऽऽविनिवृत्तेर्"इति च्छेदः, ततश्च सूक्ष्मशरीरनाशावधि दुःखमित्यर्थः, विनिवृत्तेर्"इति पञ्चमी तु मर्यादार्थकस्याङो योगे ॥ ५५ ॥

---

(१) 'पञ्चम्यपाङ्परिभिः' (पा० २ । ३।१०) ।

इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्यन्तः,
प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः ॥ ५६ ॥

आरभ्यत इति "आरम्भः"=सर्गः महदादिभूम्यन्तः प्रकृत्यैव कृतो नेश्वरेण, न ब्रह्मोपादानो, नाप्यकारणः-अकारणत्वे ह्यत्यन्ताभावोऽत्यन्तभावो वा स्यात्, न ब्रह्मोपादानः-चितिशक्तेरपरिणामात् । नेश्वराधिष्ठितप्रकृतिकृतः-निर्व्यापारस्याधिष्ठातृत्वासंभवात् । न हि निर्व्यापारस्तक्षा वाश्याद्यधितिष्ठति । —

ननु प्रकृतिकृतश्चेत्-तस्या नित्यायाः प्रवृत्तिशीलाया अनुपरमात् सदैव सर्गः स्यादिति न कश्चिन्मुच्येतेत्यत आह–"प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः"इति । यथौदनकाम ओदनाय पाके प्रवृत्त ओदनसिद्धौ निवर्त्तते-एवं प्रत्येकं पुरुषान् मोचयितुं प्रवृत्ता प्रकृतिर्यं पुरुषं मोचयति तं प्रति पुनर्न प्रवर्त्तते, तदिदमाह–"स्वार्थ इव"इति । स्वार्थे यथा-तथा परार्थ आरम्भ इत्यर्थः ॥ ५६ ॥

स्यादेतत्–स्वार्थं, परार्थं वा चेतनः प्रवर्त्तते, न च प्रकृतिरचेतनैवं भवितुमर्हति, तस्मादस्ति प्रकृतेरधिष्ठाता चेतनः,

---

विशेषभूतानि=स्थूलभूतानि, "आरम्भ"इति, कर्मणि प्रत्ययः, असन्मूलकत्वं जगतो निराकरोति–"अकारणत्वे हि"इति, वेदान्तिसंमतं ब्रह्ममूलकत्वं जगतो निराकरोति–"न ब्रह्मोपादान"इति, नैयायिकैर्भक्तिवादिभिश्चोपन्यस्तमीश्वराधिष्ठातृत्ववादं निराकरोति–"नेश्वर"इति, "तक्षा"=काष्ठतक्षकः, वाश्यादि=वाशीलक्षण आयुधविशेषः, सर्वं तस्य शस्त्रजातं करपत्रप्रमुखमत्रादिशब्देनाभिप्रेतम्,

स्वपक्षदोषान् वेदान्तिप्रभृतिभिरुपन्यस्तान् वारयति–"ननु"इत्यादिना, "परार्थः"=पुरुषार्थः=पुरुषभोगापवर्गप्रयोजन इत्यर्थः ॥ ५६ ॥

---

(१) ३८–तमसंख्याककारिकायाम् ।

न च क्षेत्रज्ञाश्चेतना अपि प्रकृतिमधिष्ठातुमर्हन्ति-तेषां प्रकृतिस्वरूपानभिज्ञत्वात्, तस्मादस्ति सर्वार्थदर्शी प्रकृतेरधिष्ठाता, स चेश्वर इत्यत आह-

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य,
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥ ५७ ॥

दृष्टमचेतनमपि प्रयोजनं प्रति प्रवर्त्तमानम्। यथा-वत्सविवृद्ध्यर्थं क्षीरमचेतनं प्रवर्त्तते-एवं प्रकृतिरचेतनाऽपि पुरुषविमोक्षणाय प्रवर्त्तिष्यते। न च क्षीरप्रवृत्तेरपीश्वराधिष्ठातृनिबन्धनत्वेन साध्यत्वान्न साध्यव्यभिचार इति। साम्प्रतं-प्रेक्षावतः प्रवृत्तेः स्वार्थकारुण्याभ्यां व्याप्तत्वात्। ते च जगत्सर्गाद्व्यावर्त्तमाने प्रेक्षावत्प्रवृत्तिपूर्वकत्वमपि व्यावर्त्तयतः। न ह्यवाप्तसकलेप्सितस्य भगवतो जगत्सृजतः किमप्यभिलषितं भवति, नापि कारुण्यादस्य सर्गे प्रवृत्तिः। प्राक् सर्गाज्जीवानामिन्द्रियशरीरविषयानुत्पत्तौ दुःखाभावेन कस्य प्रहाणेच्छाकारुण्यं, सर्गोत्तरकालं दुःखिनोऽवलोक्य कारुण्याभ्युपगमे दुरुत्तरमितरेतरा-

दृष्टसाम्येनादृष्टसिद्धिरिति नियमः, न चाचेतनस्य स्वार्थां परार्था वा प्रवृत्तिर्दृष्टेति प्रकृतेरदृष्टा प्रवृत्तिः कथं कल्प्यत? इत्याशङ्क्य समाधत्ते-"वत्स" इत्यादिना, उपभुक्ततृणादेरप्रसूताया गोर्न क्षीरमुत्पद्यते, तस्या एव प्रसूताया वत्सविवृद्धये तृणादेरुपभुक्ताद्रसभावमापन्नात्पृथग् भवत् क्षीरं क्षीराशये संचीयते, इयमेव क्षीरस्य वत्सविवृद्धये प्रवृत्तिः, तत्र च न गोः प्रयत्नः कश्चिदस्ति तस्या वत्सस्य वा,-यत्नस्य क्षीरोत्पत्तावकिञ्चित्करत्वात्, ततश्च-"वत्सचूषणादिनैव क्षीरप्रवृत्तिर्"इत्यादिश्रीशङ्करोक्तिर्ब्रह्मसूत्रभाष्योक्ताऽसङ्गतैव, श्रीशङ्करोक्तक्षीरप्रवृत्तेरपि चेतनाधिष्ठितत्वं दूषयति-"प्रेक्षावत"इत्यादिना, "स्वार्थकारुण्याभ्याम्"इति, नव्यास्तु कारुण्यमपि स्वार्थमूलकमेव, परक्लेशान् दृष्ट्वा स्वयं दुःखितो हि पुरुषः स्वदुःखविमोचनायैव परदुःखप्रहाणाय यतते, यस्तु परदुःखेन न दुःखितस्तस्य तत्प्रहाणेऽप्रवृत्तेरित्याहुः,

(१) वेदान्त॰ सू॰ (२।२।४)।

श्रयदूषणं–कारुण्येन सृष्टिः सृष्ट्या च कारुण्यमिति । अपि च करुणया प्रेरित ईश्वरः सुखिन एव जन्तून् सृजेन्न विचित्रान् । 'कर्मवैचित्र्याद्वैचित्र्यम्' इति चेत्–कृतमस्य प्रेक्षावतः कर्माधिष्ठानेन । तदनधिष्ठानमात्रादेवाचेतनस्यापि कर्मणः प्रवृत्त्युपपत्तेः–तत्कार्यशरीरेन्द्रियविषयानुत्पत्तौ दुःखानुत्पत्तेरपि सुकरत्वात् । प्रकृतेस्त्वचेतनायाः प्रवृत्तेर्न स्वार्थानुग्रहो, न वा कारुण्यं, प्रयोजकमिति नोक्तदोषप्रसङ्गः । पारार्थ्यमात्रं तु प्रयोजकमुपपद्यते । तस्मात्सुष्ठूक्तं–"वत्सविवृद्धिनिमित्तम्" इति ॥ ५७ ॥

स्वार्थ इवेति दृष्टान्तितं तद्विभजते–

औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्त्तते लोकः,
पुरुषस्य विमोक्षार्थं प्रवर्त्तते तद्वदव्यक्तम् ॥ ५८ ॥

औत्सुक्यम्=इच्छा, सा खल्विष्यमाणप्राप्तौ निवर्त्तते । इष्यमाणश्च स्वार्थः–इष्टलक्षणत्वात्फलस्य । दार्ष्टान्तिके योजयति–"पुरुषस्य विमोक्षार्थं प्रवर्त्तते तद्वदव्यक्तम्" इति ॥ ५८ ॥

ननु भवतु प्रकृतेः पुरुषार्थः प्रवर्त्तको, निवृत्तिस्तु कुतस्त्या प्रकृतेर् ? इत्यत आह–

ननु स्वार्थानुग्रहकारुण्यान्यतरासंभवात्प्रकृतेरपि कथं सर्गे प्रवृत्तिर् ? इत्यत्राह–"प्रकृतेस्तु" इति, अचेतनानां हि क्षीरजलवाय्वादीनां सर्वत्र स्वार्थकारुण्याभ्यां विनैवैषां चेतनानामर्थं साधयितुं प्रवृत्तिर्दृष्टा, तद्दर्शनाच्चादृष्टाया अचेतनप्रकृतिप्रवृत्तेः स्वार्थकारुण्यान्यतराभावेऽपि तत्र प्रवृत्तिकल्पना संगता ॥ ५७ ॥

"इच्छा"=प्रवृत्तिमात्ररूपा, साङ्ख्यमते गुणत्रयपर्याप्तवृत्तिर्न तु न्यायनय इवेच्छायाश्चेतनधर्मत्वमिति तस्या अचेतने वृत्तिरत्रोपक्षिप्ता, "दार्ष्टान्तिके"=लोकप्रवृत्तिदृष्टान्तेन प्रतिपिपादयिषिते प्रकृतिपुरुषव्यवहारे ॥ ५८ ॥

"कुतस्त्या"=किम्प्रयुक्ता,

रङ्गस्य दर्शयित्वा निवर्त्तते नर्त्तकी तथा नृत्यात्,
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्त्तते प्रकृतिः ॥ ५९ ॥

"रङ्गस्य" इति स्थानेन-स्थानिनः पारिषदानुपलक्षयति । "आत्मानं" शब्दाद्यात्मना, पुरुषाद्भेदेन, च "प्रकाश्य" इत्यर्थः ॥ ५९ ॥

स्यादेतत्-प्रवर्त्ततां प्रकृतिः पुरुषार्थं, पुरुषादुपकृतात् प्रकृतिर्लप्स्यते कञ्चिदुपकारम्-आज्ञासंपादनाराधितादिवाज्ञापयितुर्भुजिष्या, तथा च न परार्थोऽस्या आरम्भ इत्यत आह-

नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः,
गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ॥ ६० ॥

यथा गुणवानप्युपकार्यपि भृत्यो निर्गुणोऽत एवानुपकारिणि स्वामिनि निष्फलाराधन-एवमियं प्रकृतिस्तपस्विनि "गुणवती" "उपकारिणी" अप्यनुपकारिणि निर्गुणेऽपि पुरुषे व्यर्थपरिश्रमेति पुरुषार्थमेव यतते न स्वार्थमिति सिद्धम् ॥ ६० ॥

स्यादेतत्-नर्त्तकी नृत्यं परिषद्भ्यो दर्शयित्वा निवृत्ताऽपि पुनस्तद्द्रष्टृकौतूहलात्प्रवर्त्तते यथा-तथा प्रकृतिरपि पुरुषायात्मानं दर्शयित्वा निवृत्ताऽपि पुनः प्रवर्त्स्यतीत्यत आह-

---

रङ्गशब्देन परिषदुच्यते, तेन चात्र लक्षणया पारिषदा उच्यन्ते-मुख्यार्थस्य स्थानस्य दर्शनान्वयासंभवात्, अव्यक्तरूपायाः प्रकृतेः कथं व्यक्तिरूपः प्रकाश इत्यभिसन्धायाह-"शब्दाद्यात्मना" इति, स्वगुणैर्व्यक्तिमापन्नैः शब्दादिभिः, पुरुषभिन्नत्वेन स्वरूपेण चेत्यर्थः ॥ ५९ ॥

"भुजिष्या"=दासी, "न परार्थः" किन्तु लप्स्यमानस्वार्थनिबन्धन इत्यर्थः, "तपस्विनी"=दीना-"मुनिर्दीनौ तपस्विनौ" इत्यभिधानाद् दीनत्वं च फललाभाभावात् ॥ ६० ॥

"परिषद्भ्यः"=पारिषदेभ्य इत्यर्थः, "तद्द्रष्टृकौतूहलात्"=परिषत्स्थितदर्शक-

प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति,
या दृष्टाऽस्मीति पुनर्दर्शनमुपैमि पुरुषस्य ॥ ६१ ॥

सुकुमारता=अतिपेशलता–परपुरुषदर्शनासहिष्णुतेति यावद्। असूर्यम्पश्या हि कुलवधूरतिमन्दाक्षमन्थरा प्रमादाद्विगलितसिचयाञ्चला चेदालोक्यते परपुरुषेण–तदासौ तथा प्रयततेऽ–प्रमत्ता यथैनां न पुनः पुरुषान्तराणि पश्यन्तीति–एवं प्रकृतिरपि कुलवधूतोऽप्यधिका दृष्टा विवेकेन न पुनर्द्रक्ष्यते इत्यर्थः ६१

स्यादेतत् पुरुषश्चेदगुणोऽपरिणामी कथमस्य मोक्षः? मुचेर्बन्धनविश्लेषार्थत्वात्, सवासनक्लेशकर्माशयानां च बन्धनसंज्ञितानां पुरुषेऽपरिणामिन्यसंभवात्। अत एवास्य न संसारः=प्रेत्यभावापरनामास्ति–निष्क्रियत्वात्। तस्मात्पुरुषविमोक्षार्थमिति रिक्तं वच इतीमामाशङ्कामुपसंहारव्याजेनाभ्युपगच्छन्नपाकरोति—

तस्मान्न बध्यतेऽसौ न मुच्यते नापि संसरति कश्चित्,
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥ ६२ ॥

अद्धा "न" कश्चित्पुरुषो "बध्यते", "न" कश्चित् "संसरति",

कौतुकवशात्, मन्दाक्षं=त्रपा तेन–मन्थरा=परदर्शनेऽप्रवृत्ता="मन्दाक्षमन्थरा", "विगलितसिचयाञ्चला"=च्युतपटप्रान्ता दृष्टा, "विवेकेन"=ज्ञानेन, "दृष्टा"=साक्षात्कृतपुरुषप्रतियोगिकभेदा, "न द्रक्ष्यते"=विवेकिनः पुरुषस्य दर्शनगोचरं न गमिष्यतीत्यर्थः ॥ ६१ ॥

"क्लेश"इत्यादि, "अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः" "क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः", इति भगवत्पतञ्जल्युक्तः–कर्माशयः=क्लेशमूलभूतः, तत्कार्यं च=क्लेशः, वासना तु संस्कारः, प्रेत्यभावः=मृत्योरनन्तरं स्थितिः, "रिक्तं"=प्रमत्तप्रलपितवच्छून्यम्=अर्थरहितमित्यर्थः, 'संभवव्यभिचाराभ्यां स्याद्विशेषणमर्थवद्' इति सतताव्यभिचरितौष्ण्यस्य वह्नेरुष्णत्वोक्तिरिव सततमुक्तस्य पुरुषस्य मोक्षोक्तिरसंगता, "अद्धा"=वस्तुतः, "तत्वे

---

(१) योग० सू० (२।३)। (२) यो० सू० (२।१२)।

"न" कश्चित् "मुच्यते" इति—"प्रकृतिर्" एव तु "नानाश्रया" सती—"बध्यते" च, "संसरति" च, "मुच्यते च"। बन्धमोक्षसंसाराः पुरुष उपचर्यन्ते। यथा—जयपराजयौ भृत्यगतावपि स्वामिन्युपचर्य्येते—तदाश्रयेण भृत्यानां तद्भागित्वात्, तत्फलस्य च शोकलाभादेः स्वामिसंबन्धात्। भोगापवर्गयोश्च प्रकृतिगतयोरपि विवेकाग्रहात्पुरुपसंबन्ध उपपादित इति सर्वं पुष्कलम्॥ ६२॥

नन्ववगतं प्रकृतिगता बन्धसंसारापवर्गाः पुरुष उपचर्य्यन्त इति, किंसाधनाः पुनरेते प्रकृतेः? इत्यत आह—

रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः,
सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण॥ ६३॥

तत्त्वज्ञानवर्जं "बध्नाति" धर्म्मादिभिः "सप्तभिः" "रूपैर्" भावैरिति "पुरुषार्थं प्रति"=भोगापवर्गं प्रति "आत्मनात्मानम्" "एकरूपेण"=तत्त्वज्ञानेन=विवेकख्यात्या "विमोचयति"=पुनर्भोगापवर्गौ न करोतीत्यर्थः॥ ६३॥

त्वद्धाञ्जसा द्वयम्"इत्यमरः, "उपचर्यन्ते"=आरोप्यन्ते, "पुष्कलम्"=उपपन्नम्॥ ६२॥

धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याणि=अष्ट भावाः पूर्वमुक्ताः, तत्र ज्ञानं वर्जयित्वाऽन्यानि सप्त प्रकृतिरूपाणि=बन्धहेतवः, ज्ञानाख्यं तु तद्रूपं-बन्धविमोचकमित्याशयेनाह—"तत्त्वज्ञानवर्जम्"इति, "भोगापवर्गं"=भोगश्चापवर्गश्च तयोः समाहारो भोगापवर्गमिति समाहारद्वन्द्वः, "आत्मनात्मानम्"इत्यंशस्य "बध्नाति—विमोचयति" इति, क्रियाद्वये पर्यायेण संबन्धः, "एकरूपेण"=विवेकख्यात्यपरपर्यायेण="तत्त्वज्ञानेन"=धर्मादिरूपबन्धहेतुभावसप्तकभिन्नेन निजस्वरूपेणेत्यर्थः॥ ६३॥

अवगतमीदृशं तत्त्वं, ततः किम्? इत्यत आह—

एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्,
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥ ६४ ॥

तत्त्वेन विषयेण विषयि=ज्ञानमुपलक्षयति । उक्तप्रकारतत्त्वविषयज्ञानाभ्यासादादरनैरन्तर्यदीर्घकालसेवितात्सत्त्वपुरुषान्यतासाक्षात्कारि ज्ञानमुत्पद्यते=यद्विषयश्चाभ्यासस्तद्विषयकमेव साक्षात्कारमुपजनयति, तत्त्वविषयश्चाभ्यास इति तत्त्वसाक्षात्कारं जनयति । अत उक्तं–"विशुद्धम्" इति । कुतो विशुद्धम्? इत्यत आह–"अविपर्ययाद्" इति । संशयविपर्ययौ हि ज्ञानस्याविशुद्धी, तद्रहितं "विशुद्धं", तदिदमुक्तम्–"अविपर्ययाद्"इति । नियतमनियततया गृह्णन्संशयोऽपि विपर्ययः, तेन "अविपर्ययाद्" इति संशयविपर्ययाभावो दर्शितः । तत्त्वविषयत्वाच्च संशयविपर्ययाभावः ।

स्यादेतद्–उत्पद्यतामीदृशाभ्यासात्तत्त्वज्ञानम् । तथाप्यनादिना मिथ्याज्ञानसंस्कारेण मिथ्याज्ञानं जनयितव्यम् । तथा च

"तत्त्वं"=वस्तुयाथात्म्यं, तच्च ज्ञानस्य विषयः, तेनात्र विषयि ज्ञानमुपलक्ष्यते, तथा च "तत्त्वाभ्यासाद्"इत्यस्य "तत्त्वविषयज्ञानाभ्यासाद्"इत्यर्थः, सेवादरो, नैरन्तर्यं, कालदैर्घ्यं चेति त्रितयमपेक्षितम्, अन्यतमाभावे फलाभावः, तथा हि–ज्ञानाभ्यासोऽनादरेण चिरं निरन्तरं सेवितोऽपि न फलाय, एवमादरेणापि क्षणं निरनुबन्धं सेवितो न फलायेति बोध्यम्, "अविपर्ययाद्" इत्युक्तत्वात्संशयस्यानिषेध इति संशयग्रस्तं ज्ञानं कथं शुद्धम्? इत्यत आह–"नियतमनियततया" इति, नियतत्वं वस्तुनो लक्षणं, न च नियते संशय उपपद्यते, किं तु नियतस्यानियतत्वेन ग्रहः=संशयः, स च तथाभूतस्यातथाभूतत्वग्रहरूपस्य=विपर्ययस्यैव विशेष इत्यभिप्रायः, कुतोऽत्र संशयविपर्ययौ न? इत्यत आह–"तत्त्वविषयत्वाच्च"इति, यस्य वस्तुनः स्वरूपं यादृशं तस्य तेन रूपेण याथार्थ्येन ज्ञाने कुतः संशयस्य विपर्ययस्य वा संभव इति भावः,

तन्निमित्तस्य संसारस्यानुच्छेदप्रसङ्गः इत्यत उक्तं "केवलं" =विपर्ययेणासंभिन्नम् । यद्यप्यनादिर्विपर्ययवासना । तथापि तत्त्वज्ञानवासनया तत्त्वविषयसाक्षात्कारमादधत्याऽऽदिमत्यापि शक्या समुच्छेत्तुम् । तत्त्वपक्षपातो हि धियां स्वभावः । यथाहुः बाह्या अपि-

"निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः,
न बाधो यत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः" इति ।

ज्ञानस्वरूपमुक्तं-"नास्मि न मे नाहमिति" इति । "नास्मि" इति । अनेनात्मनि क्रियामात्रं निषेधति । यथाहुः-"कृभ्वस्तयः क्रियासामान्यवचना" इति । तथा चाध्यवसायाभिमानसंकल्पालोचनानि चान्तराणि, बाह्याश्च सर्वे व्यापाराः, आत्मनि प्रतिषिद्धानि बोद्धव्यानि ।

यतश्चात्मनि व्यापारावेशो नास्त्यतो "नाहम्" । अहमिति कर्तृपरम् । 'अहं-जानामि' 'अहं जुहोमि' 'अहं ददे' 'अहं भुञ्जे'

"विपर्ययवासना"=मिथ्याज्ञानसंस्कारः=प्रकृतिपुरुषयोर्वस्तुतो विविक्तयोरविविक्तत्वग्रहः, न हि "नादिमताऽनादेर्नाश" इति कश्चिन्नियमोऽस्ति नैयायिकनये प्रागभावस्यानादेः सादिना ध्वंसेन नाशस्य दृष्टत्वादिति भावः,

"तत्त्वपक्षपातो हि" इति, यथाकथञ्चिद्भ्रमे पतिताऽपि धीस्तत्त्वं प्रकाशितमात्रं प्रति स्वभावतो धावति,

"निरुपद्रव" इति, निरुपद्रवः=संशयाद्युपद्रवरहितो यो भूतार्थः=परमार्थः तस्य तदुपलक्षितस्य तज्ज्ञानस्य "विपर्ययैः"=भ्रमैः "यत्नवत्त्वे"='अतिशयेन' यत्ने कृतेपि बाधो नैव भवति, बुद्धिर्हि तत्त्वपक्षपातिनी विपर्ययाननादृत्य तत्त्वमेवावलम्बते, "नास्मि"=न सक्रियोऽहम्=अध्यवसायाभिमानसंकल्पाद्यालोचनानि=क्रमाद्बुद्ध्यहङ्कारमनसां कार्याणि नास्मीति निष्क्रियत्वमात्मनः, तदुक्त्वा तत्फलभूतं कर्तृत्वाभावं तस्याह-"यतश्च इति" कर्तृत्वाभावे च स्वामित्वाभावो न ह्यलसमनुद्योगपरमत्यन्तोदासीनं कश्चित्स्वामिनं मन्यते, स्वोद्योगार्जितं च धनं समर्पयतीति पुरुषो न मे किञ्चिदिति तात्त्विकं स्वस्य स्वामित्वाभावं गृह्णाति विवेकख्यात्यनन्तरम्,

इति सर्वत्र कर्त्तुः परामर्शात्, निष्क्रियत्वे च सर्वकर्तृत्वाभावः। ततः सुष्ठूक्तं—"नाहम्"इति । अत एव "न मे"। कर्त्ता हि स्वामितां लभते, तदभावात्तु कुतः स्वाभाविकी स्वामिता? इत्यर्थः । अथवा "नास्मि"इति=पुरुषोस्मि=न प्रसवधर्मा । अप्रसवधर्मत्वाच्चाकर्तृत्वमाह—"नाहम्"इति । अकर्तृत्वाच्च न स्वामितेत्याह—"न मे"इति । नन्वेतावत्सु ज्ञातेष्वपि कश्चित्कदाचिदज्ञातो विषयोऽस्ति, तज्ज्ञानं च जन्तून्बन्धयिष्यतीत्यत आह—"अपरिशेषम्"इति । नास्ति किञ्चिदस्मिन् परिशिष्टं ज्ञातव्यं—यदज्ञानं बन्धयिष्यतीत्यर्थः ॥ ६४ ॥

किं पुनरीदृशेन तत्त्वसाक्षात्कारेण सिध्यति? इत्यत आह—

> तेन निवृत्तप्रसवामर्थवशात्सप्तरूपविनिवृत्तां,
> प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः सुस्थः ॥ ६५ ॥

भोगविवेकसाक्षात्कारौ हि प्रकृतेः प्रसोतव्यौ, तौ च प्रसूताविति नास्याः प्रसोतव्यमवशिष्यत इति निवृत्तप्रसवा प्रकृतिः । विवेकज्ञानरूपो योऽर्थस्तस्य वशः=सामर्थ्यं तस्मात् । अतत्त्वज्ञानपूर्वकाणि खलु धर्माधर्माज्ञानवैराग्यावैराग्यैश्वर्यानैश्व-

---

"नास्मि न मे नाहम्"इत्यंशस्यार्थान्तरमाह—"अथवा"इति, प्रसवधर्मिणी स्त्रीजातिः प्रकृतिः—न पुरुषः, ततः पुरुषोस्मि न प्रसवधर्म्मा, शेषं स्पष्टम्, 'अज्ञानहेतुको बन्धः—न च सांख्यैः प्रतिज्ञातान्येव वस्तूनि सर्वाणि—न ततः परिशिष्टानि कानिचिदिति कश्चिदज्ञातोऽपि विषयोऽवशिष्टः स्याद्'इत्याशङ्क्य समाधत्ते—"ननु" इत्यादिना, "यदज्ञानम्" इति, यद्विषयकमज्ञानमित्यर्थः ॥ ६४ ॥

अपवर्गास्तु सिद्ध एवेति तत्प्रतिबन्धकाज्ञाननिवर्त्तको विवेकसाक्षात्कारः, सोतव्य इत्याह—"अतत्त्वज्ञानपूर्वकाणि"=तत्त्वाज्ञानमूलकानि, "केवलतौष्टि-

---

(१) ना अस्मीति पदच्छेदेन ना=पुरुष इत्यर्थात् । तत्तत्क्रियानिरूपितकर्तॄणामनुगमरूपेण तत्तत्कर्तृत्वशक्तिमत्प्रतिपादकमित्यर्थः ।

र्याणि। वैराग्यमपि केवलतौष्टिकानामतत्त्वज्ञानपूर्वकमेव। तत्र तत्त्वज्ञानं विरोधित्वेनातत्त्वज्ञानमुच्छिनत्ति। कारणविनिवृत्त्या च सप्तरूपाणि निवर्त्तन्ते इति सप्तरूपविनिवृत्ता प्रकृतिः। "अवस्थित"इति। निष्क्रियः। "सुस्थ"इति। रजस्तमोवृत्तिकलुषया बुद्ध्याऽसंभिन्नः। सात्त्विक्या तु बुद्ध्या तदाप्यस्य मनाक् संभेदोऽस्त्येव। अन्यथैवम्भूतप्रकृतिदर्शनानुपपत्तेरिति ॥ ६५ ॥

स्यादेतत्–"निवृत्तप्रसवाम्"इति न मृष्यामहे, संयोगकृतो हि स इत्युक्तं, योग्यता च=संयोगः, भोक्तृत्वयोग्यता च=पुरुषस्य चैतन्यं, भोग्यत्वयोग्यता च=प्रकृतेर्जडत्वं विषयत्वं च, न चैतयोरस्ति निवृत्तिः, न च करणीयाभावान्निवृत्तिः, तज्जातीयस्यान्यस्य करणीयत्वात्–पुनःपुनः शब्दाद्युपभोगवदित्यत आह–

दृष्टा मयेत्युपेक्षक एको दृष्टाहमित्युपरमत्यन्या,
सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य ॥ ६६ ॥

करोतु नाम पौनःपुन्येन शब्दाद्युपभोगं प्रकृतिर्यया विवेक-

कानाम्"="आध्यात्मिक्य[1]"इत्यादिकारिकायां या नव[2] तुष्टय उक्तास्तासां तुष्टीनामेकतरामाश्रित्य ये श्रवणमननादिसिद्धिषु विरक्तास्ते केवलतौष्टिकास्तेषाम्, "सप्त रूपाणि"=धर्मादिकानि, "अवस्थितः"=स्वरूपेण स्थितः, ततश्च निष्क्रियः, "मनाग्"=ईषद् अन्तिमक्षणे,

ततः प्रकृतिदर्शने संवृत्ते तु सात्त्विक्या बुद्धेरपि न स्थितिः ॥ ६५ ॥

"संयोगकृतः"=प्रकृतिपुरुषसंबन्धप्रयुक्तः कीदृशोऽत्यन्तभिन्नस्वभावयोस्तयोः संयोगः? इत्यत आह–"योग्यता"इति, चेतनोऽचेतनानि भुङ्क्ते, तथा च

(१) कारिकायां–(५०)। (२) कारिकायां–(८)।

ख्यातिर्न कृता, कृतविवेकख्यातिस्तु शब्दाद्युपभोगं न जनयति। अविवेकख्यातिनिबन्धनो हि तदुपभोगो, निबन्धनाभावे न तद्भवितुमर्हत्यङ्कुर इव बीजाभावे।

प्राकृतान् हि सुखदुःखमोहात्मनः शब्दादींस्तदविवेकान 'ममैत' इत्यभिमन्यमान आत्मा भुञ्जीत, एवं विवेकख्यातिमपि प्राकृतीमविवेकादेवात्मा 'मदर्थेयम्' इति मन्यते। उत्पन्नविवेकख्यातिस्तु तदसंसर्गान्न शब्दादीन् भोक्तुमर्हति, नापि विवेकख्यातिं प्राकृतीम्। ततो विविक्त आत्मा स्वार्थमभिमन्तुमर्हतीति। पुरुषार्थौ च भोगविवेकौ प्रकृत्यारम्भप्रयोजकावित्यपुरुषार्थौ सन्तौ न प्रकृतिं प्रयोजयतः। तदिदमुक्तं="प्रयोजनं नास्ति सर्गस्य"इति। अत्र[1] प्रयुज्यते सर्गे प्रकृतिरनेनेति प्रयोजनं, तद् अपुरुषार्थत्वे नास्तीत्यर्थः ॥ ६६ ॥

प्रकृतेरचेतनत्वे पुरुषस्य चेतनत्वं भोगप्रयोजकं विवेकख्यातेः परस्तादपि समानमेवेति भोगानिवृत्तिरित्यभिप्रायः, "करोतु"इति, यथा कुण्डलाद्यभिमानी कुण्डलादीनि पुनःपुनः प्रेक्षते, धारयति च, स एव निवृत्ताभिमानो विरक्तः सर्वं तद् विजहाति, प्रव्रज्यां चोपादत्ते,–तथैव पूर्वं विवेकख्यातेः प्रकृतिकृताञ्शब्दादिभोगान्पुरुष आत्मीयत्वेन मन्यते न तु विवेकख्यातेरनन्तरमित्यभिप्रायः,

विवेकख्यातिरपि प्रकृतिकार्यं, नात्मकार्यं, ततश्च प्रकृतिकार्येणैवान्तिमेनानवशिष्टकार्येण पुरुषस्यापवर्ग इत्येतदभिसंधायाह–"प्राकृतान्"इत्यादि, विवेकख्यात्यनन्तरं तु संसारोद्भवमारभ्य विवेकख्यात्यवधिकं सकलं प्रकृतिकार्यं नात्मीयत्वेनोदासीनः पुरुषो निश्चिनोतीति सिद्धान्तयति–"तदसंसर्गाद्"इत्यादिना, "अपुरुषार्थौ"=पुरुषेणोदासीनेनात्मीयतयाऽनभिमन्यमानौ, आत्मीयत्वेनानभिमन्यमानं न किञ्चित्कस्यापि प्रयोजनं भवति, न ह्यनात्मसंबन्धयोग्यमाकाशताडनादिकार्यमुद्दिश्य कश्चित्प्रवर्त्तते, तदाह–"प्रयुज्यत" इत्यादिना ॥ ६६ ॥

---

(१) 'अत्र' इत्यस्य 'सर्गे' इत्यत्रान्वयः। अत्रेत्यस्य स्थानेऽथेति पाठान्तरं क्वचित्।

स्यादेतद्—उत्पन्नतत्त्वसाक्षात्कारान्मुक्तश्चेदनन्तरमेव तस्य शरीरपातः स्यादिति कथमदेहः प्रकृतिं पश्येद् ? अथ तत्त्वज्ञानेऽपि न मुच्यते—कर्मणामप्रक्षीणत्वात् तेषां कुतः प्रक्षयो ? भोगादिति चेद्—हन्त भोः ! तत्त्वज्ञानं न मोक्षसाधनमिति 'व्यक्ताव्यक्तज्ञविज्ञानजन्मना तत्त्वज्ञानेनापवर्ग' इति रिक्तं वचः, भोगेन चापरिसङ्ख्येयः कर्माशयप्रचयोऽनियतविपाकसमयः क्षेतव्यः, ततश्चापवर्गप्राप्तिरित्यपि मनोरथमात्रमित्यत आह—

सम्यग् ज्ञानाधिगमाद्धर्मादीनामकारणप्राप्तौ,
तिष्ठति संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः ॥ ६७ ॥

तत्त्वसाक्षात्कारोदयादेवानादिरप्यनियतविपाककालोऽपि कर्माशयप्रचयो दग्धबीजभावतया न जात्याद्युपभोगलक्षणाय फलाय कल्पते । क्लेशसलिलावसिक्तायां हि बुद्धिभूमौ कर्मबीजान्यङ्कुरं प्रसुवते । तत्त्वज्ञाननिदाघनिपीतसकलक्लेशसलिलायामूषरायां कुतः कर्मबीजानामङ्कुरप्रसवः ? । तदिदमुक्तं—"ध-

---

प्रकृतिदर्शनक्षणपर्यन्तं देहसद्भाव आवश्यकः, अन्यथा निष्क्रियेण निर्विकारेण पुरुषेण देहरहितेन कथं प्रकृतेर्दर्शनं, तच्चान्तिमक्षणे देहावस्थानं न संभवति, तत्त्वसाक्षात्कारसमकालमेव पुरुषस्य मुक्तत्वादित्याशङ्क्य सदेहस्य जीवन्मुक्तिं "तस्य तावदेव" इत्यादिश्रुतिप्रसिद्धामुपपादयति दृष्टान्तादिबलेन—"सम्यग्ज्ञान" इत्यादिना, तत्त्वसाक्षात्कारमहिम्ना "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन" इत्याद्युक्तदिशा धर्मादिसंसारनिमित्तानां प्रजननशक्तौ नाशितायां तेषां संसारकारणत्वाप्राप्तौ केवलमारब्धकर्मणां वर्तमानशरीरारम्भकाणां भोगमात्रेण क्षयस्य संभवाद्दण्डवेगवशाद्दण्डनाशेऽपि किञ्चित्कालावस्थायिचक्रभ्रमणन्यायेन कियत्समयं सशरीर एव पुरुषस्तिष्ठतीति तत्कृतं प्रकृतिदर्शनेनुपपत्तिप्रदर्शनेन—दर्शनसाधनस्य शरीरस्य सद्भावात् ॥

"क्लेशसलिलायाम्" इति, "अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च

---

१ छान्दो० (६।१४।२) ।

र्मादीनामकारणप्राप्तौ"=अकारणत्वप्राप्तावित्यर्थः । उत्पन्ने तत्त्वज्ञानेऽपि च "संस्कारवशात्तिष्ठति", यथोपरतेऽपि कुलालव्यापारे चक्रं वेगाख्यसंस्कारवशाद्भ्रमत्तिष्ठति कालपरिपाकवशात्तूपरते संस्कारे निष्क्रियं भवति । शरीरस्थितौ च प्रारब्धकर्मपरिपाकौ धर्माधर्मसंस्कारौ भोगेन क्षेतव्यौ । तथा चानु श्रूयते—"भोगेन त्वितरे क्षपयित्वाऽथ संपद्यते" इति, "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ च संपत्स्ये" इति च । प्रक्षीयमाणाविद्याविशेषश्च संस्कारस्तद्वशात्तत्सामर्थ्याद्धृतशरीरस्तिष्ठति ॥ ६७ ॥

स्यादेतद्—यदि संस्कारविशेषाद्धृतशरीरः, तथापि कदास्य मोक्षो भविष्यति ? इत्यत आह—

क्लेशा"इति योगसूत्रोक्ता अत्र क्लेशा ग्राह्याः, "संस्कारवशाद्"इति, वर्त्तमानशरीरारम्भककर्मभोगारम्भकाले तत्कर्मजन्यः संस्कारोऽत्राभिप्रेतः, तस्य किञ्चित्कालमनुवृत्तत्वाच्छरीरस्थितिः, अस्य संस्कारस्य कालवशात्कुलालप्रहितदण्डजनितवेगस्येव स्वयं निवृत्तिरित्याह—"कालपरिपाक"इत्यादि, "भोगेन त्वितरे" इति, ब्रह्मसूत्रमिदं, न श्रुतिः, ततश्च "अनुश्रूयते" इत्यस्य श्रुतिमनु स्मर्यत इत्यर्थः । "तावदेव"इति तु श्रुतिः "भोगेन त्वितरे क्षपयित्वा संपद्यते","इतरे"=आरब्धकार्ये=पुण्यपापे न ज्ञानमात्रेण किन्तु भोगेन "क्षपयित्वा" कैवल्यभाजनं "संपद्यते," ज्ञानीति शेषः ॥ ६७ ॥

---

(१) वे० सू० (४।१।१८) । "कैश्चिन्मन्त्राणामेव वेदत्वं व्याख्यातं, कैश्चित्कल्पसूत्राणामपि" इति आपस्तम्बपरिभाषायां—"मन्त्रब्राह्मणयोर्वेदनामधेयम्"इत्यस्य व्याख्यावसरे हरदत्तेनोक्तरीत्या "छन्दोवत्सूत्राणि भवन्ति" इत्युक्तेश्चारोपितं वेदत्वमिति चेदोमिति भ्रमः । (२) तारानाथतर्कवाचस्पतिस्तु "भोगेन त्वितरे" इति मूलमनुपलभ्य प्रमादादिममस्यार्थमाह—"इतरे"=ज्ञानिनः"भोगेन"प्रारब्धकर्माणि "क्षपयित्वा"=नाशयित्वा—समाप्येति यावत्, "अथ"=प्रारब्धक्षयानन्तरं "संपद्यते"=बन्धशून्यतया कैवल्यभाजनं "संपद्यते" इति, तत्र "इतरे" इति बहुवचनान्तपदवाच्यकर्तृणां "सम्पद्यत" इत्येकवचनान्तक्रियया कथमन्वय इति स एव देवानां प्रियः पण्डितम्मन्यो जानातु ॥

प्राप्ते शरीरभेदे चरितार्थत्वात्प्रधानविनिवृत्तेः,
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ॥ ६८ ॥

अनारब्धविपाकानां तावत्कर्माशयानां तत्त्वज्ञानाग्निना बीजभावो दग्धः, प्रारब्धविपाकानां तूपभोगेन क्षये सति "प्राप्ते" शरीरस्य "भेदे"=विनाशे "चरितार्थत्वात्"=कृतप्रयोजनत्वात्प्रधानस्य तं पुरुषं प्रति निवृत्तौ "ऐकान्तिकम्"=अवश्यम्भावि, "आत्यन्तिकम्"-अविनाशीति-"उभयं कैवल्यं"=दुःखत्रयविगमं प्राप्नोति पुरुषः ॥ ६८ ॥

प्रमाणेनोपपादितेऽप्यत्यन्तश्रद्धोत्पादनाय परमर्षिपूर्वकत्वमाह—

पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातं,
"स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम् ॥ ६९ ॥

"गुह्यं"-गुहानिवासि, स्थूलधियां दुर्बोधमिति यावत् । "परमर्षिणा"=कपिलेन । तामेव श्रद्धामागमिकत्वेन द्रढयति-"स्थि-

"तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य" इति छान्दोग्यश्रुतिः प्रतिजानीते । स श्रुत्या प्रतिज्ञातो मोक्षः कदा भवति? इत्याकाङ्क्षायां कारिकामाह-"प्राप्त"इति, आरब्धभोगेन कर्मणोत्पादितस्य शरीरस्य "भेदे"=नाशे जाते ज्ञानाग्निनानारब्धानां सर्वेषां कर्मणां दग्धत्वादुपभोगेन चारब्धकर्मणां क्षयादपवर्गसिद्धौ भविष्यद्भोगस्यासंभवाद्भोगापवर्गमात्रफलायास्तत्फलद्वये प्रसूतेऽनवशिष्टप्रयोजनान्तरायाः प्रकृतेर्विनिवृत्तौ परमपुरुषार्थं पुरुषः प्राप्नोति, एवं प्राप्तस्य कैवल्यस्यावश्यभाव्यत्वं ज्ञानिनो, न च तस्य पुनरावृत्तिरित्याह-"आत्यन्तिकम्" इत्यादिना ॥ ६८ ॥

ईश्वरकृष्णो न महर्षिः किन्तु प्राकृतो विद्वानिति तदुक्तौ न्यायपरिपुष्टायामपि तर्काप्रतिष्ठानादबहुमानः स्यादपिवाक्ये श्रद्धावतामित्यस्य शास्त्रस्य परमर्षिपूर्वकत्वमाह-"पुरुषार्थ" इति, श्रुतिरपि कपिलस्य परमर्षितां प्रख्या-

(१) वे० सू० (२।१।११)—"तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्ग" इति ।

त्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानां", "यत्र"=ज्ञाने=यदर्थे—
यथा—"चर्मणि द्वीपिनं हन्ति"इति । "भूतानां"=प्राणिनां
"स्थित्युत्पत्तिप्रलयाः" आगमैः "चिन्त्यन्ते" ॥ ६९ ॥

स्यादेतद्—यत्परमर्षिणा साक्षात्कथितं तच्छ्रद्दधीमहि, यत्पुनरीश्वरकृष्णेन कथितं तत्र कुतः श्रद्धा ? इत्यत आह—

एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ,
आसुरिरपि पञ्चशिखाय तेन बहुधा कृतं तन्त्रम् ॥ ७० ॥

"एतत्पवित्रं"=पावनं=दुःखत्रयहेतोः पाप्मनः पुनातीति, "अग्र्यं"=सर्वेभ्यः पवित्रेभ्यो मुख्यम् । "मुनिः"=कपिलः "आ-

---

पयति श्वेताश्वतरैराम्नाता—"ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्त्ति जायमानं च पश्येद्"इति, "समाख्यातं"=मुखत आसुरये समुपदिष्टं न तु तन्त्ररूपेणोपनिबद्धमित्यनेन सूचितं, तेन पञ्चशिखाचार्यप्रणीतात्पष्टितन्त्रनामकान्निबन्धात्पूर्वं साङ्ख्यनिबन्धो नासीदिति सूचितं, ततश्च संप्रति प्रचलितानां साङ्ख्यसूत्राणां न कपिलप्रणीतत्वमिति प्रतिभाति । अत एवेषु सूत्रेषु "अविवेकनिमित्तो वा पञ्चशिखः"इत्यादौ कपिलादर्वाचीनानां प्राकृताचार्याणामपि नामानि दृश्यन्ते, सूत्राणि श्रीमच्छङ्करभगवत्पादानां समयेऽपि नासन्, अन्यथा दर्शनान्तरमूलप्रस्तावेषु जैमिनिगौतमकणादपतञ्जलिसूत्राण्युदाहरन्कथं कपिलसूत्राण्यपहाय स साङ्ख्यकारिका एवोदाहृतवान्, वाचस्पतेः कालेऽपि सूत्राणामनवस्थितिः, अन्यथाऽनेन षड्दर्शनव्याख्याकृता कथं न सूत्राणि तद्भाष्यं वा व्याख्यातं? कथं पञ्चशिखवार्षगण्यादीनां लेखांस्तत्रतत्र निर्दिशन् वाचस्पतिमिश्रः कपिलस्य न कमपि लेखमुद्धृतवान्?, तथा च सूत्राणां नवमशतकोद्भूताद्वाचस्पतिमिश्रादप्यर्वाचीनत्वम् ॥ ६९ ॥

"एतत्"=साङ्ख्यशास्त्रं न पुनः कारिकासदृशानुपूर्वीकमेव, "मुनये शिष्याय तस्य चासुरये"इत्यत्युक्तत्वादासुरेरपि मुनित्वम्, आसुरेश्च शिष्यः

---

(१) सां० सू० (६।६८) न्यायसूचीनिबन्धे वाचस्पतिमिश्रेण स्वसमयः स्वयं निर्दिष्टः—"न्यायसूचीनिबन्धोऽयमकारि सुधियां मुदे । श्रीवाचस्पतिमिश्रेण वस्वङ्क (८९८) वसुवत्सरे" इति ।

सुरयेऽनुकम्पया प्रददौ, आसुरिरपि पञ्चशिखाय, तेन च बहुधा कृतं तन्त्रम्" ॥ ७० ॥

शिष्यपरम्परयाऽऽगतमीश्वरकृष्णेन चैतदार्याभिः,
संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ॥७१ ॥

आराद् याता तत्त्वेभ्य इत्यार्या, आर्या मतिर्यस्य सोऽयमार्यमतिरिति ॥७१ ॥

एतच्च शास्त्रं—सकलशास्त्रार्थसूचकत्वान्न तु प्रकरणमित्याह—

सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य,
आख्यायिकाविरहिताः परवादविवर्जिताश्चापि ॥ ७२ ॥

तथा च राजवार्त्तिकं—

"प्रधानास्तित्वमेकत्वमर्थवत्त्वमथान्यता ।
पारार्थ्यं च तथानैक्यं वियोगो योग एव च ॥
शेषवृत्तिरकर्तृत्वं मौलिकार्थाः स्मृता दश ।

पञ्चशिखः, स एव षष्टितन्त्रप्रणेता, पञ्चशिखप्रबन्धानामतिविस्तृतत्वात्कारिकाणां च यथावत्तदर्थानां संक्षेपेण प्रतिपादनादासामेव साङ्ख्यमूलग्रन्थत्वं संवृत्तम्, अस्यां कारिकायां "पञ्चशिखाय तेन"इत्यंशे यतिर्न मनोरमेति यतिभङ्गो दोषः ॥ ७० ॥ ७१ ॥

"बहुत्वम्"=आनैक्यशब्दवाच्यम्, "स्थितिः"=शेषवृत्तिशब्दवाच्या, ग्रन्थान्तरे षष्टिपदार्थी यथा—

"पुरुषः प्रकृतिर्बुद्धिरहङ्कारो गुणास्त्रयः,
तन्मात्रमिन्द्रियं भूतं मौलिकार्थाः स्मृता दश,

---

(१) पञ्चशिखस्य तन्त्रेषु प्रतिपादितं कापिलं शास्त्रं शिष्यपरम्परया पञ्चशिखादतितरामर्वाचीनेनेश्वरकृष्णेन स्वगुरुभ्योऽप्रकाशितनामधेयेभ्यो लब्ध्वा सप्तत्यार्याभिः संक्षिप्तम् (२) नाद्याप्युपलब्धोऽयं निबन्धो, वाचस्पतिना तु दृष्ट इति कौमुदीतोऽवगम्यते ।

विपर्ययः पञ्चविधस्तथोक्ता नव तुष्टयः ॥
करणानामसामर्थ्यमष्टाविंशतिधा मतम् ।
इति षष्टिः पदार्थानामष्टाभिः सह सिद्धिभिर्" इति ।

सेयं षष्टिपदार्थी कथितेति सकलशास्त्रार्थकथनान्नेदं प्रकरणम्, अपि तु शास्त्रमेवेदमिति सिद्धम् । एकत्वमर्थवत्त्वं, पारार्थ्यं च–प्रधानमधिकृत्योक्तम्, अन्यत्वमकर्तृत्वं–बहुत्वं चेति पुरुषमधिकृत्य, अस्तित्वं–वियोगो–योगश्चेत्युभयमधिकृत्य, स्थितिः–स्थूलसूक्ष्ममधिकृत्य ॥ ७२ ॥

मनांसि कुमुदानीव बोधयन्ती सतां मुदा,
श्रीवाचस्पतिमिश्राणां कृतिस्तात्तत्त्वकौमुदी ॥ १ ॥

॥ इति षड्दर्शनटीकाकृच्छ्रीमद्वाचस्पतिमिश्रविरचिता
साङ्ख्यतत्त्वकौमुदी समाप्ता ॥

"विपर्यय" इत्यादि तु समानं राजवार्त्तिकेन ॥ ७२ ॥ शिवो जयति ॥ "प्रकरणं"=शास्त्रप्रतिपाद्यैकदेशमुद्दिश्य प्रवृत्तम् ॥

॥ इति श्रीमत्सर्वतन्त्रस्वतन्त्रश्री १०८बालरामोदासीनविरचिता
साङ्ख्यतत्त्वकौमुदीव्याख्या विद्वत्तोषिणी समाप्ता ॥

(१) श्रीबालरामोदासीनप्रारब्धा व्याकृतिर्मुदा । सूरिरामावतारेण कौमुद्याः सम्प्रपूरिता ॥ १ ॥ पञ्चत्रिंशत्तमश्लोकादारभ्य विदुषां मुदे । भूरिश्रमेण तेनेशो भगवान्संप्रसीदतु ॥ २ ॥